# तर्कसङ्ग्रहोपन्यासटीकायाः हिन्द्यनुवादो विश्लेषणञ्च

# (आरेखीयप्रस्तुतीकरणोपेतम्)

(Tarkasaṅgrahopanyāsaṭīkāyāḥ Hindyanuvādo Viśleṣaṇañca)

(Ārekhīyaprastutīkaraṇopetam)

जवाहरलालनेहरूविश्वविद्यालयीय-एम्. फिल्.

इत्युपाध्यर्थम्प्रस्तुतो लघुशोधप्रबन्धः


शोधनिर्देशकः
डॉ. राम नाथ झा

शोधार्थिनी
खुशबू शुक्ला

विशिष्टसंस्कृताध्ययनकेन्द्रम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली-११००६७


**July 2016**

विशिष्टसंस्कृताध्ययनकेन्द्रम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- 110067

**SPECIAL CENTRE FOR SANSKRIT STUDIES**
**JAWAHARLAL NEHRU UNIVERSITY**
**NEW DELHI – 110067**

26 July, 2016

## DECLARATION

I Khushboo Shukla, hereby declare that the dissertation entitled "तर्कसंग्रहोपन्यासटीकायाः हिन्द्यनुवादो विश्लेषणञ्च (आरेखीयप्रस्तुतीकरणोपेतम्)" (Tarkasaṅgrahopanyāsaṭīkāyāḥ Hindyanuvādo Viśleṣaṇañca) (Ārekhīyaprastutīkaraṇopetam) submitted to **Special Centre for Sanskrit Studies, Jawaharlal Nehru University, New Delhi – 110067,** for the award of degree of **Master of Philosophy** is an original research work and has not been previously submitted for any other degree or diploma in any other institution/University.

खुशबू शुक्ला
Khushboo Shukla

विशिष्टसंस्कृताध्ययनकेन्द्रम्
जवाहरलालनेहरूविश्वविद्यालयः
नवदेहली- ११००६७

**SPECIAL CENTRE FOR SANSKRIT STUDIES**
**JAWAHARLAL NEHRU UNIVERSITY**
**NEW DELHI – 110067**

26 July, 2016

## CERTIFICATE

The dissertation entitled "तर्कसंग्रहोपन्यासटीकायाः हिन्द्यनुवादो विश्लेषणञ्च (आरेखीयप्रस्तुतिकरणोपेतम्)" (Tarkasaṅgrahopanyāsaṭīkāyāḥ Hindyanuvādo Viśleṣaṇañca) (Ārekhīyaprastutīkaraṇopetam) submitted by Khushboo Shukla to **Special Centre for Sanskrit Studies, Jawaharlal Nehru University, New Delhi – 110067**, for the award of degree of **Master of Philosophy** is an original research work and has not been submitted so far, in part or full, for any other degree or diploma in any University. This may be placed before the examiners for evaluation and for award of degree of Master of Philosophy.

**Prof. Girish Nath Jha**
**(Chairperson)**

PROF. GIRISH NATH JHA
Chairperson
Special Centre for Sanskrit Studies
Jawaharlal Nehru University
New Delhi-110067, INDIA

**Dr. Ram Nath Jha**
**(Supervisor)**

Dr. Ram Nath Jha
Associate Professor
Special Centre for Sanskrit Studies
Jawaharlal Nehru University
New Delhi - 110067

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।

यं कामये तन्तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥

(ऋग्वेदः, वाक् सूक्तम् -१०/१२५/५)

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

(दुर्गासप्तशती – ५/ २०-२२)

# ॥ विषयानुक्रमणिका ॥

कृतज्ञताज्ञापनम् ................................................ iii-v

सङ्केतविवरणसूची .................................................. vi

प्रस्तावना .................................................. १-१५

1. प्रथमोऽध्यायः –

पदार्थविवेचनम् ................................ १६ -५१

2. द्वितीयोऽध्यायः –

द्रव्यविवेचनम् .................................... ५२ - ७९

3. तृतीयोऽध्यायः –

गुणविवेचनम्.......................................... ८० - २४०

4. चतुर्थोऽध्यायः –

कर्म-समवाय-सामान्य-विशेष-अभावानां विवेचनम् ... २४१ - २५६

5. उपसंहारः ........................................................ २५७ - २६०

6. परिशिष्टम्.............................................................२६१ - २६७

7. सन्दर्भग्रन्थसूची......................................................२६८ - २७७

# कृतज्ञताज्ञप्तिः

सर्वादौ प्रणम्यते विमलोत्कर्षिणी ब्रह्मवादिनी सर्वशास्त्रमयी नारायणी सिद्धिदात्री सृष्टेरादिशक्तिः, यस्या अनुकम्पया विना चराचरजगत्यस्मिन् न तृणमपि प्रवर्तते । लघुशोधप्रबन्धोऽयं तस्यैव सकारात्मकप्राकृतिकशक्त्या एव निर्बाधगत्या सम्पन्नो जातः।

कृतज्ञताज्ञापनक्रमे प्रबन्धसमर्पणावसरे वा सर्वप्रथमं सश्रद्धं स्मरामि ये मम प्रथमशिक्षकाः पितामहवर्याः गोलोकवासिनः स्वनामधन्याः पं० श्रीमाधवशरणशुक्लमहोदयाः । येषां वात्सल्यपूर्णशिक्षणेनैव बाल्यावस्थायां विद्याजगति मम पदार्पणमभवत् । तदनु स्नेहमूर्तिं पितामहीं श्रीमतीकलावतीदेवीं प्रत्यपि प्रणामो वितन्यते मया । अतः परं सादरमभिवादनं ज्ञाप्यते परमपूजनीयौ पितरौ श्रीमतीकविताशुक्लावर्या श्रीसंगमलालशुक्लवर्यश्च। याभ्यां स्वजीवनस्य विपरीतपरिस्थितावपि मम अध्ययनस्य नैरन्तर्यम् अबाधतया विधीयते । तयोरेव सत्प्रेरणया मम जीवनं संस्कृताध्ययने प्रवृत्तम् । अवसरेऽस्मिन् ताभ्यां भूरिशः प्रणतिततिभिः सभाजयामि कार्तज्ञ्यसमुच्चयञ्च विनिवेदयामि ।

शुभावसरेऽस्मिन् विविधशास्त्रनिष्णातृभ्यः, प्राच्यप्रतीच्यविद्यासु कृतभूरिपरिश्रमेभ्यः प्रातःस्मरणीयपितृसदृशेभ्य आचार्येभ्यः स्वशोधनिर्देशकेभ्यः डॉ० रामनाथाझामहाभागेभ्यो विशेषकार्त्तज्ञ्यं विज्ञाप्यते मया । येषां चिन्तनवैदग्ध्यपूर्णेन मार्गदर्शनेन पाठनेन वा न्यायवैशेषिकदर्शने मम गतिर्जाता । तेषां कुशलशोधनिर्देशने **'तर्कसङ्ग्रहोपन्यासटीकायाः हिन्द्यनुवादो विश्लेषणञ्च'** विषयममुं गृहीत्वा शोधकार्यस्यास्य सम्पूर्णतायां समर्था भवाम्यहम् । शोधकार्येऽस्मिन् तेषां सततं पथप्रदर्शनम्, आशीर्वचांसि, स्नेहः, आत्मीयता च मया प्रतिक्षणं सम्प्राप्यते । शोधविषयस्य चयनादारभ्य शोधप्रबन्धलेखनपूर्णतापर्यन्तं विशेषसहयोगः प्रदीयते । लेखनकाले न केवलं अध्ययन-अध्यापनदृष्ट्या अपितु व्यावहारिकदृष्ट्या अपि भवन्तः सर्वदैव मानससम्बलं प्रेरणास्पदचिन्तनञ्च प्रदत्तवन्तः । अतः स्वगुरून् प्रति सश्रद्धं कार्तज्ञ्यकुसुमाञ्जलिः समर्प्यते मया ।

तदनु कृतज्ञताज्ञप्तिसरण्यां स्वानुजानां अंकित-अंकुश-कनिष्कानामपि मां प्रति सर्वदैव सहयोगाय स्नेहाय च विशेषतया धन्यवादं व्याहरामि । अनन्तरं मातामहः, मातामही, पितृव्यौ, पितृव्या, मातुलौ, मातुल्यौ, मातृस्वसारो विशेषत अनुजा मातृस्वसा इत्येतेषां

पारिवारिकसमस्तजनानां प्रत्यहं आभारं वितरामि। यैर्जीवनस्य प्रतिक्षणं येन केन रूपेणापि मया सार्धं स्थीयते।

शोधप्रबन्धोऽयं मया यथासामर्थ्यम् उपस्थापितः। शोधकार्यस्यास्य परिपूर्त्तये येषां महानुभावानां साहाय्यं मया सम्प्राप्तम्, तेभ्यः समेभ्योऽहम् आधमर्ण्यं वहामि । यतो हि इदन्तु सर्वविदितमस्ति यत्किमपि सहायतां विना कार्यमिदम् अतिदुष्करं जायेत अतो मनसा नितरां कृतज्ञतां वितरामि तेषां सुहृज्जनानां कृते ।

मया विशिष्टसंस्कृताध्ययनकेन्द्रस्य केन्द्राध्यक्षपदं विभूषयद्भ्यः प्रो० गिरीशनाथझामहाशयेभ्यः, प्रो०चौडूरि-उपेन्द्ररावमहाभागेभ्यः, प्रो०शशिप्रभाकुमार-महोदयाभ्यः, डॉ० हरिराममिश्रमहोदयेभ्यः, डॉ० रजनीश-कुमारमिश्रवर्य्येभ्यः, डॉ० सन्तोषकुमारशुक्लमहोदयेभ्यः, डॉ०सुधीरकुमार आर्यवर्य्येभ्यः, डॉ०सत्यमूर्तिवर्य्येभ्यः, डॉ० टी. महेन्द्रवर्य्येभ्यश्चापि कार्तज्ञ्यं विनिवेद्यते । येषां समुचितपथप्रदर्शनेन शोधकार्यमिदं सम्पूर्णमभवत् । अहम् इन्द्रप्रस्थमहाविद्यालये सहायका- आचार्या डॉ. अनीतास्वामीमहोदयां प्रत्यपि हार्दिकं धन्यवादं ज्ञापयामि । याभिर्मम शोधकार्ये साहाय्यं कृत्वाहमनुगृहीता।

तत्पश्चात् अस्य शोधकार्यस्य साफल्ये संस्कृतकेन्द्रस्यैव न्यायशास्त्रे प्रबुद्धबुद्धिवद्भ्यः शोधच्छात्रेभ्यो भातृवर्य्येभ्यो राकेशमहोदयेभ्यः पौनः पुन्येन धन्यवादं व्याहरामि । येषां सहयोगेन विना मया नेदं शोधकार्यं सफलीभूतं पारयितुं शक्यते।

पुनश्च सुहृद्मित्रजनसमुदाये पूजा, ललितपाण्डेयः, सोनमती, निधिः, वशिष्ठबहुगुणा, अमितः, दीप्तिश्च इति एतेषां विशेषतोऽऽभारः प्रकट्यते मया। ये सर्वदैव सर्वस्यां परिस्थित्यां सर्वविधसाहाय्यं कृत्वा माम् उपकृतवन्तः। अस्मिन्नेवोपक्रमे प्रत्यक्षपरोक्षरूपेण मामुपकुर्वतामग्रजानामनुजानां मित्राणाञ्च कृते पौनःपुन्येन कृतज्ञतां वितरामि

तत्राग्रजेषु नारायणदत्तमिश्रः, हरीशकुकरेती, रजनीशपाण्डेयः, प्रचेतस्-महोदयः, यीशनारायणद्विवेदी, मनीषकुमारझा वालखडेभूपेन्द्रारुणश्च तथा अग्रजासु अनु-निहारिका-सुचिता-आस्था चात्र स्मरणीयाः । तेभ्यस्सर्वेभ्यो भूयो भूयो धन्यवादान् कार्तज्ञ्यञ्च बिभर्मि ।

कक्षसहाध्यायिषु उमेशचन्द्रजोशी, स्वस्तिनाथझा, रविचौबे, दीपकसाहू, अनिलद्वयम्, सहदेवः, जयन्तः, रविमीणा, वेदान्शुः, ओमप्रकाशः, इवाना, शिखा, कविः, जितेन्द्रश्च,

सतीशश्चेत्येते इह विशेषरूपेण धन्यवादार्हास्तेभ्योऽपि कृतज्ञतां व्याहरामि । अन्यमित्रगणेषु अर्चनाद्वयम्, नीमा, प्रज्ञा, सिम्पी, अरुणकुमारभट्टः, गोविन्दः, पूर्वप्रकोष्ठसहभागिनी अग्रजा मिनती इत्याख्यमित्राणामपि धन्यवादान् वितीर्य आत्मानं धन्यं मन्येऽहम्।

तथा च कनिष्ठेषु ममता, नन्दिनी, यशोदा, कुसुम, विवेकः, प्रभातः, अभयः, जितेन्द्रः, राघवेन्द्रमिश्रः, मुकुन्दः, अंकितः, ललितः, रमेशश्च इत्यादयोऽपि शोधकर्मानुष्ठाने साहाय्यं प्रदाय मामुपकृतः। तत्रापि विशिष्य विवेकम्, अंकि तम्, अभयम्, प्रभातञ्च भूयो भूयो धन्यवादान् वितरामि । येषां विशिष्टस्सहयोगः शोधकर्मलेखनसमये मया अवाप्तः।


तथैव संस्कृतकेन्द्रकर्मचारिणां विकास-अरुण-मयूरी-मञ्जू-शबनम-दीपकादीनां कृतेऽपि कृतज्ञतां विज्ञापयामि, यतोहि एतैस्सर्वदा सहर्षं साहाय्यं प्रदत्तम्।

शोधकार्यस्य सामग्रीसंकलनाय जवाहलालनेहरूविश्वविद्यालयस्य, विशिष्टसंस्कृताध्ययनकेन्द्रस्य, दिल्लीविश्वविद्यालयस्य, श्रीलालबहादुरशास्त्रीविद्यापीठस्य, राष्ट्रियसंस्कृतसंस्थाननवदेहल्याः, गंगानाथझापरिसरराष्ट्रियसंस्कृतसंस्थानप्रयागस्य तथा ईलाहाबादविश्वविद्यालयस्य पुस्तकालयेषु कार्यरतकर्मचारिणां कृतेऽपि धन्यवादान् व्याहरामि ।


अन्ततः तान् सर्वजनान् प्रति मनसा कृतज्ञतां विनोदयामि यैः प्रत्यक्षाप्रत्यक्षतया लघुशोधप्रबन्धेऽस्मिन् साहाय्यं विधीयते ।

खुशबूशुक्ला (शोधच्छात्रा)


# सङ्केतविवरणसूची


1. 

= धर्म-धर्मी

2. 

= निरूप्य-निरूपकभावः

3. 
= अवच्छेदकम्

4. 
= ज्ञानम्

# प्रस्तावना

सृष्टिरियं परमतत्त्वात् जायते। अस्यां सृष्ट्यां नैकेषां जीवानां संरचना अभवत्। एतेषु जीवेषु मानव एकः,यस्मिन् चिन्तनसामर्थ्यं विद्यते। एतेन गुणेनैव मानवेषु नानाविधाः स्थूल-सूक्ष्मविषयिणिजिज्ञासाः उत्पद्यन्ते। स्थूलविषयान् जिज्ञास्य शनैः शनैः मानवेन सूक्ष्मविषयाणां जिज्ञासा प्रतिपादिता। जीवानामस्तित्वं कथम्, आत्मतत्त्वं नाम किम्, सृष्टेरादिरनन्तश्च कुतः, सृष्टेः कर्ता कः? इत्यादीनां सूक्ष्मप्रश्नानाम् उत्तरं प्राप्तुं मानवः प्रवृत्तः बभूव। एतेषां प्रश्नानां समाधानस्य अन्वेषणफलस्वरूपे दर्शनस्योत्पत्तिरभूत्। दर्शनमिति पदस्य व्युत्पत्तिः **'दृश्' धातुना भावार्थे करणार्थे च 'ल्युट्' प्रत्ययस्य** संयोगेन भवति।[1] सामान्यतः दर्शनस्य तात्पर्यं दर्शनक्रियैव। किन्तु भारतीयसंस्कृतौ ईक्षणक्रियायाः भावः आत्मज्ञानमथवा आत्मसाक्षात्कारोऽप्यस्ति। भारतीयज्ञानपरम्परायां प्रत्येकशास्त्रस्य उद्गमस्थलं वेदः स्वीक्रियते यतोहि वेदः भारतीयसंस्कृतेः आद्यग्रन्थः। दर्शनशास्त्रस्यापि उपस्थितिसंकेतः सर्वप्रथमं वेदेष्वेव प्राप्यते इति वक्तुं शक्नुमः। यतोहि वेदेष्वपि आत्मसाक्षात्कारस्य प्रवृत्तिः वर्ण्यते। तत्र आत्मतत्त्वं ज्ञातुं बहुधा जिज्ञासा उत्पद्यन्ते ऋषिभिः। सृष्टेः मूलतत्त्वस्यैव जिज्ञासां विचिन्त्य **'नासदीयसूक्त'** इत्यस्य दार्शनिकदृष्टिः सम्पाद्यते ऋषिणा।[2] शनैः शनैः एवम्विधविषयाणामुपरि विभिन्नदृष्टिभिस्तर्कः वितर्कश्चारभते। अनन्तरं वाद-विवादस्य एतामेव परम्परां विद्वाँसः सुव्यवस्थितां सुनियोजिताञ्च कृत्वा प्रस्तुवन्ति। या परम्परा संस्कृतवाङ्मये 'दर्शनशास्त्रम्' इति अभिधीयते। दर्शनशास्त्रे भिन्नदार्शनिकदृष्ट्या आस्तिक-नास्तिकदर्शनस्य च अवधारणा प्रचलिता। वेदप्रमाणाधिक्रियमाणेषु आस्तिकदर्शनेष्वेव न्याय-वैशेषिकस्य युगलत्वं विधीयते। द्वयोरेव दर्शनयोः सिद्धान्तेषु प्रचुरतया साम्यत्वात् उभे एव एकस्यां श्रेण्यां संस्थापिते जाते किन्तु स्वाद्यावस्थायां दर्शनद्वयं स्वतन्त्ररूपेण प्रतिष्ठितमासीत्।

**न्याय-वैशेषिकदर्शनपरम्परा –**

**(क) न्यायदर्शनस्य परिचयः -** यदा वयं प्रत्यक्षादारभ्य अप्रत्यक्षं प्रति, ज्ञातविषयादारभ्य अज्ञातविषयं प्रति च अग्रेसरामः तदैव अस्माकं चिन्तनप्रणाली दार्शनिकदृष्टिर्वा प्रारभते।

---

[1] संस्कृत-हिन्दी कोश – पृ० ४५०

[2] ऋग्वेदः -१०/१२९

चिन्तनस्य तथा तर्कस्य आवश्यकता एव तत्र वर्तते, यत्र संशयः अज्ञानञ्च विधीयते। संशयमेव दूरीकर्तुं तथा तत्त्वस्य विषयस्य वा यथावत् स्वरूपं ज्ञातुं मानवेन चिन्तनं,मननं तर्कश्च क्रियते।

**अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः**[3]

यस्य विषयस्य स्वरूपं सामान्यतया ज्ञातं किन्तु विशेषतया न ज्ञातं, तस्मिन् विषये प्रमाणैः यथार्थस्वरूपज्ञानाय कृतो विचार एव तर्क उच्यते। न्यायभाष्यकारेणापि एवं निश्चीयते न्यायभाष्ये - **तत्र नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते,किं तर्हि ? संशयितेऽर्थे।**[4] एवम्प्रकारेण मानवैः सृष्टेः सूक्ष्मस्तरं प्रति प्रवर्धितां जिज्ञासां शमनार्थं, अज्ञानं निवृत्त्यर्थं, संशयं दूरीकरणार्थञ्च भारतीयदर्शने न्यायस्य बीजवपनं दृश्यते। न्यायदर्शने प्रमाणैः प्रमेयस्य वस्तुनः वा यथार्थस्वरूपं प्रकटीकृतत्त्वात्, दर्शनमिदं वस्तुवादि यथार्थवादि वा भणितम्। न्यायभाष्ये एतदेवोक्तम् आचार्यवात्स्यायनेन – **प्रमाणैरर्थपरीक्षणं न्यायः**[5]। एवं दृश्यते यत् आदौ न्यायः प्रमेयमधिकृत्य स्वविषयवस्तूनि प्रस्तौति। न्यायदर्शनं हेतुविद्या,तर्कशास्त्रं प्रमाणशास्त्रञ्च कथ्यते। शास्त्रेषु न्यायदर्शनस्य कृते 'आन्वीक्षिकी' पदमप्युक्तम्।[6] आन्वीक्षिकी पदम् 'अनु' इत्युपसर्गपूर्वकम् 'ईक्षधातुना' निर्मीयते। अनुसंधानं गवेषणा वा अन्वीक्षणस्यार्थः वर्तते।[7] वस्तुतः 'अनु' अर्थात् श्रवणस्य पश्चात् 'ईक्षा' दर्शनं मननमित्यन्वीक्षा। न्यायम् अन्वीक्षा कथ्यते यतोहि श्रवणानन्तरं युक्तिभिः पदार्थानां दर्शनं मननं वा क्रियते अर्थात् शास्त्रगतरीत्या अनुमानमेव अन्वीक्षा। अन्वीक्षायाः निर्वाहार्थं प्रकाशिता विद्या आन्वीक्षिकी कथ्यते। न्यायभाष्ये आन्वीक्षिकी न्यायशास्त्रस्यैव नामान्तरम् - **प्रत्यक्षागमागमाश्रितमनुमानं साऽन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्याऽन्वीक्षणमन्वीक्षा, तया प्रवर्तित इत्यान्वीक्षिकी-न्यायविद्या-न्यायशास्त्रम्।**[8] न्यायदर्शनं तर्कदृष्ट्या विचिन्त्यमानेषु दर्शनेष्वन्यतमं वर्तते। सर्वेषामेव शास्त्राणामुपकारकतया न्यायशास्त्रस्य प्रसिद्धिः सुतरां प्राचीनैव प्रतिभाति,

---

[3] न्यायसूत्र – १/१/४०

[4] न्यायभाष्य – १/१/१

[5] तत्रैव

[6] प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥ अर्थशास्त्रम् – १/२/१

[7] संस्कृत-हिन्दी-कोशः,वामन शिवराम आप्टे – पृ० ५४

[8] न्यायभाष्य – १/१/१

स्मृतिपुराणादिषु चतुर्दशविद्यास्थानानां न्यायस्य अभिधानोक्तत्वात्।[9] भारतीयज्ञानपरम्परायां सर्वेष्वेव शास्त्रेषु प्रमाणं स्वीक्रियते अतः न्यायः सर्वविद्यानां दीपक इत्युच्यते।[10] न्यायदर्शनस्य आदिकाले षोडशपदार्थाभिमता प्रमेयप्रधाना धारा विकसिता किन्त्वनन्तरं प्रमाणप्रधाना अन्यधारा अपि निस्सृता न्यायदर्शनात्। दर्शनवाङ्मये एते धारे प्राचीनन्यायः नव्यन्यायश्च इति संज्ञया अभिहिते।

प्राचीनन्यायस्य आद्यग्रन्थः गौतममुनिविरचितं न्यायसूत्रमस्ति। न्यायसूत्रस्योपरि विरचितैः वात्स्यायनकृतन्यायभाष्यम्, उद्योतकरविरचितन्यायवार्तिकम्, वाचस्पतिमिश्रस्य न्यायवार्तिक- तात्पर्यटीका, उदयनाचार्येण रचितं न्यायवार्तिकतात्पर्यपरिशुद्धिश्चेति ग्रन्थैः प्राचीनन्यायपरम्परा संवर्धिता। एतदतिरिक्तं जयन्तभट्टः भासर्वज्ञश्च प्राचीनन्याये प्रचण्डकोटिकनैयायिकः मन्यते। एते एव दशमशताब्द्यां न्याय-वैशेषिकस्य युगलपरम्परायाः विकासं कृतवन्तौ।[11] तदनु न्याय-वैशेषिकस्य युग्मविषयवस्तुमधिकृत्य उदयनाचार्यस्य आत्मतत्त्वविवेकः न्यायकुसुमाञ्जलिग्रन्थश्च। द्वादशशताब्देः न्यायक्षेत्रे नव्य-न्यायस्य आरम्भः जातः। अस्य प्रवर्तकः द्वादशशताब्दीकस्य[12] गङ्गेशोपाध्यायः वर्तते एवञ्च तत्कृतं 'तत्त्वचिन्तामणिग्रन्थः' नव्यन्यायस्य आद्यग्रन्थः अस्ति। कस्या अपि नवीनधारायाः उद्भवः न भवत्यकस्मादेव, नव्यन्यायोऽपि अस्यापवादः नास्ति। दशमशताब्दीकस्य उदयनाचार्यस्यैव ग्रन्थेभ्यः नव्यन्यायस्य तत्त्वं बीजरूपेण प्राप्यते।[13] उदयनाचार्यस्य असंदिग्धोचितभाषायुता शैल्यन्विता च प्रयोगदृष्टिः अर्थप्रस्तुतौ लभ्यते। तदनु द्वादशशताब्दीकेन शशधरेण प्रणीते न्यायसिद्धान्तदीप उल्लिखितेषु पञ्चविंशतिलेखेषु नव्यन्यायस्य सिद्धान्तानां सङ्ग्रहः प्राप्यते किन्तु नव्यन्यायस्य स्थितिः द्वादशशताब्दीमध्ये गङ्गेशकृततत्त्वचिन्तामणिग्रन्थेन सुदृढीकृता।

---

[9] पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

याज्ञवल्क्यस्मृतिः,आचाराध्यायः – ३

अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः।

पुराणं धर्मस्शास्त्रञ्च विद्या ह्येताश्चतुर्दश॥ विष्णुपुराणम् – ३/६/२८

[10] प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।

आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥ न्यायभाष्य – १/१/१

[11] भारतीय दर्शन,वाचस्पति गैरोला – पृ० १८४,

एतयोः कालः दशमशताब्दी एव - History of Indian logic – page 146,357

[12] History of Indian logic – page 405

[13] भारतीय न्यायशास्त्र ( चक्रधर बिजल्वान ) - पृ० ४२२

तदनन्तरं न्यायक्षेत्रे नव्यन्यायस्य परम्परैव विकसिता वर्धिता च। नव्यन्याये न्याय-वैशेषिकस्य विषयवस्तुनः सामान्या रूपरेखा एव स्वीकृता किन्तु विवेचनशैली पूर्णतया भिन्ना अस्ति। कस्यापि सूक्ष्मविचारस्य अभिव्यक्तौ नव्यन्यायस्य शब्दावली प्रविधिश्चसर्वोत्तमा मन्यते। वैज्ञानिकविश्लेषणं, उपयुक्तशब्दावलीचयनं, असन्देहादिः नव्यन्यायस्य मूलसिद्धान्ताः सन्ति। गङ्गेशोपाध्यायानन्तरं वर्धमानोपाध्यायः, पक्षधरमिश्रः, वासुदेवसार्वभौमः, रघुनाथशिरोमणिः ,मथुरानाथतर्कवागीशः, गदाधरभट्टाचार्यः, विश्वनाथपञ्चाननश्च प्रभृतिभिः आचार्यैः नव्य-न्यायपरम्परा संवर्धिता। एतेषु मध्ये एव सप्तदशशताब्दीकस्य अन्नम्भट्टः नव्य-न्यायाचार्यरूपेण प्रतिष्ठितः।[14]

**(ख) वैशेषिकदर्शनस्य परिचयः -** न्यायदर्शनस्य शास्त्रार्थपद्धतिः,तर्कप्रणाली तथा प्रमाणपरम्परा अतीवसमृद्धा सर्वस्वीकृता च,किन्तु तत्र पदार्थविश्लेषणस्य न्यूनता दृश्यते इति वक्तुं शक्नुमः। यतोहि न्याये प्रमाणस्यैव प्रधानता, प्रमाणशास्त्रत्वात्। अस्याः न्यूनतायाः परिपूर्तिः न्यायस्य युग्मरूपेण प्रसिद्धे वैशेषिकदर्शने दृश्यते। संस्कृतजगति एकः श्लोकः प्रसिद्धः -

**काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्[15]**

एतेन श्लोकेन एव भारतीयशास्त्रपरम्परायां वैशेषिकदर्शनस्य महत्ता प्रतिपाद्यते। यथा शब्दस्य यथार्थनिर्णये व्याकरणं प्रमाणं तथैव पदार्थस्य स्वरूपनिर्धारणे वैशेषिकदर्शनमेव उपादेयम्। वैशेषिकदर्शनस्य भौतिकपदार्थानां विश्लेषणं न्यायदर्शनस्य प्रमाणमाध्यमेन प्रतिपाद्यते। अतो हेतोः द्वयोः दर्शनयोः परस्परपूरकत्वं युगलतन्त्रत्वञ्च स्वीक्रियते। विशेषपदेन वैशेषिकशब्दः निर्मीयते। वैशेषिकसूत्रे पदमिदम् एकवारमेव प्रयुक्तम्।[16] तत्र अस्यार्थः पृथक्त्वं वैशिष्ट्यं वा वर्तते। विश्वस्य समेषां जीवानां परमाणूनाञ्च परस्परं पार्थक्यं वैशिष्ट्यं वा अस्ति। एतस्य विशिष्टतत्त्वस्य सम्पादनार्थम् एतस्मिन् दर्शने 'विशेष' इति नामकस्य पृथग्पदार्थस्य सङ्कल्पना कृता। अत दर्शनमिदं वैशेषिकसंज्ञया अभिहितं यतोहि विशेषपदार्थभेदमधिकृत्य कृतं शास्त्रं वैशेषिकम् इति सिद्धम्। एतदतिरिक्तमपि अनेकानि विशिष्टतत्त्वानि सन्ति, यानि अपरेभ्यो दर्शनेभ्यो वैशेषिकदर्शनं पृथक्कुर्वन्ति। यथा – द्वित्वसिद्धान्तः, पाकजोत्पत्तिः, विभागजवर्णनञ्च।

---

[14] A History of Indian logic – page 388

[15] वैशिषक दर्शन में पदार्थ-निरूपण – पृष्ठ १८

[16] संयुक्तसमवायादग्नेवैंशेषिकम् – वैशेषिकसूत्रम् १०/२/७

**द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे ।**
**यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः ॥**[17]

अस्य दर्शनस्य नाम काणाददर्शनमपि अस्ति। वैशेषिकदर्शनस्य आद्यग्रन्थवैशेषिकसूत्रस्य रचयिता कणादः, अस्मात् कारणात् काणाददर्शनं नाम उचितम्। अस्य दर्शनस्य औलूक्यदर्शनम् इत्यभिधानविषये एकः तर्कः दीयते यत् वैशेषिके तमोद्रव्यस्य प्रकाशस्याभावरूपेण प्रतिपादनत्वात् एवञ्च उलूकस्य तमसेन सह विशेषसम्बन्धत्वात् वैशेषिकदर्शनमौलूक्यदर्शनेति नाम्ना प्रख्यातम्।[18] पाकप्रक्रियायां पीलुपाकसिद्धान्तस्य अनुवर्तनत्वात् दर्शनमिदं पैलुकदर्शनेनापि उपात्तम्। पदार्थमीमांसा वैशेषिकदर्शनस्य प्रमुखप्रतिपाद्यः वर्तते। पदार्थस्यैव प्रामुख्यार्थं प्रशस्तपादाचार्येण वैशेषिकसूत्रभाष्यमेव 'पदार्थधर्मसंग्रहः' संज्ञयाभिहितम्।[19] वैशेषिकस्यारम्भकाले द्रव्यगुणकर्मसामान्यविशेषसमवायाश्च एते षट् पदार्थाः तथा प्रत्यक्षमनुमानञ्च प्रमाणं स्वीक्रियते। किन्तु न्यायेन सह युग्मानन्तरं अभावसहितं उपमानप्रमाणं शब्दप्रमाणञ्चापि स्वीकृत्य चत्वारिप्रमाणानि सप्तपदार्थाश्च मन्यन्ते।

महर्षिकणादेन विरचितं वैशेषिकसूत्रम् अस्य दर्शनस्य प्रथमो ग्रन्थः। वैशेषिकसूत्रस्योपरि प्रशस्तपादाचार्यविरचितं प्रशस्तपादभाष्यः पदार्थधर्मसंग्रहो वा विद्यते। प्रशस्तपादभाष्यातिरिक्तं वैशेषिकसूत्रस्योपरि अनुपलब्धस्य रावणभाष्यस्याप्युल्लेखः प्राप्यते ग्रन्थेषु।[20] तदनु व्योमाचार्यः, आचार्यचन्द्रः,श्रीधराचार्यः,उदयनाचार्यः ,शिवादित्यः,वल्लभाचार्यादय अनेके वैशेषिकाचार्याः परम्परामिमां विकसितां कृतवन्तः। वैशेषिके न्यायस्य एकीकरणानन्तरं तु अर्थात् एकादश- शताब्द्यादेरारभ्य प्रायः ते एव आचार्याः अत्रैव वर्तन्ते ये न्यायपरम्परायां पूर्वमेव उक्ताः। एतेष्वाचार्येष्वेव सप्तदशशताब्द्यामुत्पन्नः,न्यायवैशेषिकस्य प्रकाण्डविद्वान्,नव्य-न्यायाचार्यश्च अन्नम्भट्टः स्थीयते। यस्य ग्रन्थस्तर्कसंग्रह अतीव महत्वपूर्णो विख्यातश्च न्याय-वैशेषिकक्षेत्रे।

---

17 सर्वदर्शनसंग्रहः, (सं०) उमाशंकरऋषिः – पृ० ३६०

18 न्याय-वैशेषिक,एक चिन्तन – पृ० ७५

19 प्रणम्यहेतुमीश्वरं मुनिंकणादमन्वतः।
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः॥ मङ्गलाचरणम्, प्रशस्तपादभाष्यम्

20 भारतीयदर्शन – पृ० २२४, न्याय-वैशेषिक,एक चिन्तन – पृ० ८२

**(ग) न्याय-वैशेषिकयोः समानतन्त्रत्वम् –** यद्यपि न्याय-वैशेषिकदर्शनस्य प्रारम्भावस्थायां विकासः स्वतन्त्रशास्त्ररूपेण अभवत्। किन्तु कालानन्तरे द्वयोरेव सिद्धान्तेषु प्रचुरतया साम्यत्वात् उभे एव एकस्यां श्रेण्यां संस्थापिते जाते। दशमशताब्द्यां जयन्तभट्टः,भासर्वज्ञः,उदयनाचार्यश्च न्याय-वैशेषिकस्य युगलपरम्पराया आदिप्रवर्तक इव अस्यां दिशि बीजवपनं कृतम् इत्युपर्युक्तम्। किन्तु सर्वप्रथमः स्पष्टतया न्याय-वैशेषिकयोर्युगलत्वं दशमशताब्दीकस्यैव आचार्यशिवादित्येन 'सप्तपदार्थी' इत्यस्मिन् ग्रन्थे विहितम्।[21] एकादशशताब्दीपर्यन्तं तु द्वयोः दर्शनयोः पूर्णरूपेण एकीकरणं स्वीकृतं विद्वद्भिः।[22] किन्तु एतत्पूर्वमपि द्वयोरेव सम्प्रदाययोः घनिष्ठसम्बन्ध आसीत्, अस्य बहुविधाः सङ्केताः प्राप्ताः। न्यायसूत्रेषु कतिपयसूत्राणि एतादृशानि सन्ति, येषामुल्लेखः वैशेषिकसूत्रेषु यथावत् प्राप्यते। यथा - **'अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः'।**[23] एतदतिरिक्तं न्यायभाष्ये अनेकेषु स्थलेषु एतयोः सम्बन्धः प्रदर्श्यते वात्स्यायनेन। न्यायभाष्ये मनस इन्द्रियत्वे तन्त्रान्तरस्य सिद्धान्तं प्रमाणं मन्यते।[24] संभवत इदं तन्त्रान्तरं वैशेषिकतन्त्रं भवितुं शक्यते,यत्र मनसः इन्द्रियत्वं स्पष्टतया उक्तम्। अन्यच्च न्यायभाष्ये '**अस्त्यन्यदपि द्रव्यगुण-कर्मसामान्यविशेषसमवायाः प्रमेयम्'**[25] इत्युक्त्वा वैशेषिकपदार्था एव स्वकीयसिद्धान्तरूपे स्वीक्रियन्ते वात्स्यायनेन। उद्योतकरमहोदयेनापि न्यायवार्तिके संयुक्त-समवायः, संयुक्त-समवेत-समवायः प्रभृतयः वैशेषिकशब्दावल्यः प्रयुज्यन्ते। अतः एकादशशताब्देः पूर्वमपि अस्माकम् आचार्यैः न्यायवैशेषिकस्य युगलपरम्परायाः साक्ष्याः प्रदत्ताः। एकादशशताब्द्याम् एतेषामेव साक्ष्याणामाधारे दर्शनतत्त्वविद्भिः एतयोः दर्शनयोः सुव्यवस्थितं सुनियोजितञ्च समानतन्त्रत्वं विहितम्। न्यायवैशेषिकयोः युग्मनिर्माणानन्तरं एतयोः विषयवस्तुनि किञ्चित् परिवर्तनं जातम्। न्यायदर्शने षोडशपदार्थानां स्थाने वैशेषिकस्य सप्तपदार्थाः स्वीकृताः तथा वैशेषिकदर्शने प्रमाणद्वयस्थाने न्यायस्य चतुर्णां प्रमाणानामागमनं

---

21 न्याय-वैशेषिक,एक चिन्तन – पृ० ८४

22 भारतीयदर्शनशास्त्र – पृ० १०२

23 न्यायसूत्रम् – ३/१/३९, वैशेषिकसूत्रम् – ४/१/८

24 मनसश्चेन्द्रियाभावात् तन्न वाच्यं लक्षणान्तरमिति। तन्त्रान्तरसमाचाराच्चैतत्प्रत्येतव्यमिति। न्यायभाष्यम् – १/१/४

25 न्यायभाष्यम् – १/१/९

जातम्। द्वयोः सम्प्रदाययोः समन्वितविषयवस्तु एतदेव, परवर्तिकाले अस्यैव विकास अभवत्। अस्य विषयवस्तुनः प्रकर्षो विशेषतो न्यायवैशेषिकस्य प्रकरणग्रन्थेषु उपलभ्यते।

**(घ) न्याय-वैशेषिकदर्शने प्रकरणग्रन्थः –** वस्तुत एकादशशताब्दीपर्यन्तं न्यायवैशेषिकयोः सम्प्रदाययोर्विपुलसाहित्यं प्रणीतम्। अतो हेतोर्लघुग्रन्थानामावश्यकता नितान्तमनुभूयते विद्वज्जनैः,न्यायवैशेषिकस्य जिज्ञासूनां कृते सद्य अवगमनं कारयितुम्। अतः प्रकरणग्रन्थानां रचनायाः सूत्रपातं जातं न्यायवैशेषिकवाङ्मये। शास्त्रस्य सर्वाङ्गीणसिद्धान्तानां संक्षिप्तः सारगर्भितश्च परिचयः विविच्यते प्रकरणग्रन्थे। शास्त्रस्य एकदेशसम्बन्धिप्रकरणग्रन्थानां[26] युगे तु न्यायः वैशेषिकश्च परस्पराभिन्न एव व्यवह्रियेते दर्शनजगति। प्रायो येषु ग्रन्थेषु न्यायपरिगणित- षोडशपदार्थानामन्तर्भावो वैशेषिकदर्शनस्य सप्तपदार्थेषु क्रियते, ते वैशेषिकप्रधानप्रकरणग्रन्थाः कथ्यन्ते। एवञ्च यत्र वैशेषिकदर्शनस्य सप्तपदार्थानामन्तर्भावो न्यायस्य षोडशपदार्थेषु भवति, स वैशेषिकप्रधानप्रकरणग्रन्थः। न्यायवैशेषिकपरम्परायां प्रकरणग्रन्थस्य विभागचतुष्टयं वर्ण्यते। [27]

**प्रथमोविभागः –** अत्र केवलप्रमाणमेव पदार्थः मन्यते। अन्यपदार्थानां विवेचनं प्रमाणस्याङ्गरूपेण क्रियते यथा – न्यायसारः (भासर्वज्ञप्रणीतः)।

**द्वितीयो विभागः** –प्रभागेऽस्मिन् मुख्यतो वैशेषिकदर्शनस्य ग्रन्था भवन्ति किन्तु तत्र तत्र न्यायदर्शनतत्त्वमप्युल्लिख्यते। यथा – न्यायलीलावती (बल्लभाचार्यप्रणीता), तर्कसङ्ग्रहः (अन्नम्भट्टप्रणीतः), तर्ककौमुदी (लौगाक्षिभास्करकृता) आदिः। राममूर्तिशर्मणा अयमेव विभागः 'तर्कप्रकरणग्रन्थ' इति नाम्ना विधीयते स्वग्रन्थे। [28] एतस्य मते तर्कप्रकरणग्रन्थानां रचना नव्य-न्यायाचार्यैः प्रतिपादिता। एतेन तर्कप्रकरणग्रन्थानामन्तर्गते तर्कामृतं (जगदीशतर्कालङ्कारकृतम्) तथा भाषापरिच्छेदः (विश्वनाथपञ्चाननरचितः) अपि स्वीकृतः।

**तृतीयो विभागः-** अत्र प्रधानतया न्यायसिद्धान्ता व्याख्यायिता गौणतया च वैशेषिकदर्शनतत्त्वं समाविश्यते। यथा- तार्किकरक्षा (वरदराजविहिता), तर्कभाषा (केशवमिश्रकृता) इत्यादिः। **चतुर्थविभागः-** विभागेऽस्मिन् न्याय-वैशेषिकसिद्धान्तानां समानतया निरूपणं विधीयते यथा-न्यायसिद्धान्तदीपः (शशधरविहितः)।

---

26 शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितम्। आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥ - अप्पयदीक्षितकृतविधिरसायनम्

27 भारतीय न्यायशास्त्र , चक्रधर बिजल्वान ,पृ० -४५

28 न्याय-वैशेषिक,एक चिन्तन – भूमिका

**तर्कसंग्रहस्य उपन्यासटीकायाश्च परिचयः –**

**(क) अन्नम्भट्टकृतस्तर्कसंग्रहः –** तर्कसङ्ग्रहः प्रकरणग्रन्थानां द्वितीयविभागस्य प्रतिनिधित्वं करोति। तर्कसङ्ग्रहे वैशेषिकदर्शनस्य सप्त पदार्था न्यायस्य चत्वारि प्रमाणानि च विविच्यन्ते। ग्रन्थोऽयं तर्कशास्त्रस्य न्यायवैशेषिकस्य वा प्रवेशद्वारं मन्यते। अस्मिन् ग्रन्थे नवानां द्रव्याणां,चतुर्विंशतीनां गुणानां, पञ्चानां कर्मणाम्, द्विविधस्य सामान्यस्य, विशेषस्य, समवायस्य, अभावानाञ्चोद्देशः, लक्षणानि, परीक्षाः, भेदाश्च वैशेषिकसूत्रादारभ्य तत्त्वचिन्तामणिपर्यन्ता विचाराः संग्रहेण निरूपिताः। न्यायशास्त्रनिरूपितानि प्रत्यक्षादीनि चत्वारि प्रमाणानि बुद्धौ अन्तर्भाव्य तेषां लक्षणोदाहरणानां विशदं प्रतिपादनं गुणनिरूपणावसरे कृतम्। न्यायवैशेषिकदर्शने वितताः प्रायः सर्वेऽपि विचाराः समासेनात्र प्रतिपादिताः। संक्षिप्तः,सारगर्भितः,सरलभाषायुतश्चायं ग्रन्थो न्यायवैशेषिकजिज्ञासूनां बालानां भृशमुपकरोति। अस्य पुष्टिः 'बालानां सुखबोधाय क्रियते तर्कसंग्रहः' अस्मात् मङ्गलश्लोकादेव भवति। यद्यपि तर्कसङ्ग्रहः प्रमुखतया न्यायवैशेषिकस्य सिद्धान्तान् प्रतिपादयति तथापि तर्कसङ्ग्रहस्य भाषायां नव्यन्यायशब्दावलीनां स्पर्शः स्पष्टतया दृश्यते यथा- प्रतियोगी, पक्षधर्मता इत्यादिः।[29] तर्कसंग्रहः सूत्रग्रन्थो न, तथापि यस्यां शैल्यामयं विरचितस्तस्मात्तु सूत्रात्मक एव प्रतिभाति। यतोहि अल्पाक्षरेषु असन्दिग्धं सारयुक्तं अधिकाधिकञ्च भावानामुपस्थापनमेव सूत्रस्य तात्पर्यं वर्तते।[30] कार्येऽस्मिन् तर्कसंग्रहः पूर्णतया सफलीभूतोऽस्ति। संक्षिप्तशैल्यां निहितोऽपि तर्कसङ्ग्रहग्रन्थः न्यायवैशेषिकदर्शनस्य गूढतत्त्वानाम् आकरो मन्यते। न्यायवैशेषिकयोः सम्पूर्णसिद्धान्तानां रहस्यम् अस्मिन् लघुग्रन्थे पिहितमस्ति। अतस्तर्कसङ्ग्रहे वर्णितसिद्धान्तानां सरलीकरणाय सम्यगर्थावबोधाय च अस्योपरि अधिकाधिकाष्टीका विरचिता विद्वद्भिः। ज्ञायत एव यत् तर्कसङ्ग्रहग्रन्थस्योपरि छात्रोपकारिण्य आलोचकबुद्धिपरिष्कारिण्यश्च नैकाः टीकाः उपलभ्यन्ते। तर्कसङ्ग्रहस्य महत्त्वं तु एतस्मादेव परिलक्ष्यते यत् अद्यावधि नूतनव्याख्यादृष्ट्या अस्य टीकनं भवद् एवास्ति।

**(ख) तर्कसंग्रहकारस्य परिचयः -** तर्कसङ्ग्रहकार अन्नम्भट्टः सुप्रसिद्धो नव्यनैयायिकोऽस्ति। अन्नम्भट्टो दक्षिणप्रदेशान्तर्गते आन्ध्रप्रदेशस्य कश्चन् ग्रामविशेष आसीत्। अयं कौशिकगोत्रोत्पन्नः, तैलंगब्राह्मणः वर्तते। कृष्णानदीतीरोपान्तवासी

---

[29] कार्यं प्रागभावप्रतियोगि। कार्यलक्षणम्, तर्कसंग्रहः
व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। अनुमान-प्रकरणम्, तर्कसंग्रहः

[30] अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रकृतो विदुः॥ काव्यमीमांसा - २

राघवसोमयाजिकुलोत्पन्नस्य अद्वैतविद्याचार्यस्य तिरूमलाचार्यस्य पुत्रः अन्नम्भट्टः इति ज्ञायते।[31] अद्यापि तस्मिन् प्रान्ते कृष्णानदीतीरे स्थिते जनपदे अन्नम्भट्टोपनामकानां ऋग्वेदिब्राह्मणानां निवासः वर्तते। [32] एवमपि प्रसिद्धं यत् अन्नम्भट्टः सिद्धांतमुक्तावल्याः सिद्धान्तरत्नाकरव्याख्याकर्तुः रामकृष्णभट्टस्य सर्वदेवस्य च कनीयान् भ्राता अस्ति। [33] अन्नम्भट्टस्य कालः सप्तदशशताब्दी ईस्वी इति निश्चीयते विद्वद्भिः। [34] यद्यपि अयमान्ध्र-प्रदेशजः तथापि स्वजीवनस्य प्रचुरकालं वाराणस्यां यापितवान्। श्रीमदन्नम्भट्टस्य अध्ययनं काशीनगर्यामभवत्। इयं प्रसिद्धोक्तिरपि अस्य काशीवासित्वं सूचयति यत् ' **काशीगमनमात्रेण नान्नम्भट्टायते द्विजः'**। अस्य ग्रन्थेषु भगवतो विश्वेश्वरस्य स्तुतिना अपि वयं निश्चेतुं शक्नुमो यदयं काश्यामन्यवसत्। [35] शिवभक्तः श्रीअन्नम्भट्टो व्याकरणे व्याकरणाचार्यशेषकृष्णपुत्रशेषविश्वेश्वरस्य शिष्यः तथा अद्वैतवेदान्ते ब्रह्मानन्दसरस्वत्याः शिष्यश्चेति ब्रह्मसूत्रव्याख्यामिताक्षरया ज्ञायते। [36] अन्नम्भट्टः व्याकरणवेदान्तन्यायवैशेषिकातिरिक्तं मीमांसाशास्त्रस्यापि विद्वान् आसीत्। अस्य पुष्टि अन्नम्भट्टस्य एतेषां शास्त्राणामुपरि विरचितैर्ग्रन्थैर्भवति। अन्नम्भट्टस्य उपलब्धा ग्रन्था अधोलिखिताः सन्ति।

**न्यायवैशेषिकदर्शने-** तर्कसङ्ग्रहः, तर्कसंग्रहदीपिका (दीपिकासहिततर्कसंग्रहः'अन्नम्भट्टीयमिति')[37], दीधितिव्याख्यासुबुद्धिमनोरमा, न्यायपरिशिष्टप्रकाशः, तत्त्वचिन्तामण्यालोकव्याख्यासिद्धाञ्जनम्।

**उत्तरमीमांसाशास्त्रे -** ब्रह्मसूत्रवृत्तिर्मीताक्षरा[38],तत्त्वविवेकदीपनम्।

**मीमांसादर्शने –** न्यायसुधाव्याख्या राणकोज्जीवनी,तन्त्रवार्तिकटीका सुबोधिनी, स्वरविवेकः।

---

31 तर्कसंग्रहः, तट्टीकानां च समीक्षात्मकमध्ययनम् – भूमिका

32 तर्कसंग्रहः (प्राचीननवटीकासहितः) - सम्पादकीयम्

33 तर्कसंग्रहः, तट्टीकानां च समीक्षात्मकमध्ययनम् – भूमिका

34 1623 A.D.,History of Indian logic – page 388
तत्त्वचिन्तामण्यालोकव्याख्या सिद्धाञ्जनम् - भूमिका

35 A History of Indian logic – page 388
निधाय हृदि विश्वेशं...। तर्कसंग्रहः मङ्गलाचरणम्, विश्वेश्वरं साम्बमूर्तिं..। तर्कसंग्रहदीपिका, मङ्गलाचरणम्
विश्वेश्वरं नमस्कृत्य...। ब्रह्मसूत्रमिताक्षराव्याख्या मङ्गलाचरणम्

36 तर्कसंग्रहः, तट्टीकानां च समीक्षात्मकमध्ययनम् – भूमिका

37 A History of Indian logic – page 388

38 केषान्चित् मतेन काशिकानुसारिणी पाणिनीयसूत्रवृत्तिः।

**व्याकरणदर्शने-** महाभाष्यप्रदीपोद्योतनम्, अष्टाध्यायीवृत्तिः मिताक्षरा।[39] एतदतिरिक्तं भेदनिरासः,तत्त्वबोधिनीटीका चापि अन्नम्भट्टस्यैव लेखिन्या विरच्यते इति यत्र तत्र उल्लिख्यते। किन्तु एतेषु ग्रन्थेषु श्रीमदन्नम्भट्टस्य सर्वाधिकः प्रचलितः सुप्रसिद्धश्च ग्रन्थस्तर्कसंग्रह एव। तर्कसंग्रहेणैव न्याय-वैशेषिकक्षेत्रे अन्नम्भट्टः अक्षयकीर्तिम् अर्जितवान्।

**(ग) उपन्यासटीका -** तर्कसङ्ग्रहस्योपरि लिखिता टीकाः कोटिद्वये विभक्तुं शक्यन्ते – सामान्यशैल्यां विरचिताष्टीकास्तथा नव्यन्यायशैल्यां विरचिताष्टीकाः। तर्कसङ्ग्रहदीपिका-परीक्षा-बालप्रबोधिनी-प्रकाशादयः सामान्यशैल्यां रचिताष्टीकास्सन्ति। एतदतिरिच्य नैकाष्टीका विद्यन्ते याः नव्यन्यायशैल्यां प्रतिष्ठिताः यथा न्यायबोधिनी-पदकृत्य-टिप्पणी-बालमनोरमा – न्यायचन्द्रिका - तर्कप्रकाशिनीप्रभृतयः। एतासु नव्यन्यायान्तर्गते विरचितासु टीकासु एका अन्यतमा टीका वर्तते ‘उपन्यासटीका’।

उपन्यासटीकायाः षट् पाण्डुलिपिकोषा वाराणसेय-संस्कृत-विश्वविद्यालयस्य ग्रन्थालये सरस्वतीभवने लब्धाः।[40] शिवनारायणशास्त्रिमहोदयेन एतट्टीकायाः सम्पादनं कृतम्। उपन्यासटीकासमुपेतं पुस्तकं भारतीय-पब्लिशिंग-हाऊसदिल्लीतः प्रकाशितमस्ति। ग्रन्थस्यास्य प्रथमसंस्करणकालः १९७४ ईस्वी वर्तते। के.कुन्जुनीराजामहोदयेन ‘ **न्यू कैटालागस कैटालोगोरम’** इत्यस्मिन् पुस्तके तर्कसंग्रहोपन्यासटीकायाः त्रयोदशपाण्डुलिपयः उल्लिखिताः।[41] ‘अलवर-अमेरिका-बरोदा-बाम्बे ब्रान्च आफ रायल एसियाटिक सोसायटी-भण्डारकर ओरिएन्टल रिसर्च इन्स्टीट्यूट-नासिक-पेजावर-पंजाब यूनिवर्सिटी लाइब्रेरी-त्रावणकोर यूनिवर्सिटी’ इत्यादिकं नाम वर्णितं ग्रन्थे यतः पाण्डुलिपयः प्राप्यन्ते। एतासु प्रायः पाण्डुलिपयः न सम्पूर्णा इति खेदविषयः।[42] (कार्ल एच पाटर)

उपन्यासटीकाया बहुधा अपरनाम अपि दृश्यते। के.कुन्जुनीराजामहोदयेन तर्कसंग्रहोपन्यासटीका ‘वाक्यवृत्ति’ इति नाम्ना अपि संबोध्यते। [43] ‘अ हिस्ट्री आफ इण्डियन लाजिक’ ग्रन्थेऽपि वाक्यवृत्तिनाम्ना वर्णिता उपन्यासटीका। [44] तत्र वी.एन.झामहोदयेन

---

[39] श्रीहरिदत्तविरचिता व्याकरणकारिका - पृ० ८

[40] तर्कसङ्ग्रहः ( बालप्रबोधिनी,उपन्यास इति प्राचीनाप्रकाशितटीका-युगलेन),शिवनारायण-शास्त्री,प्रास्ताविकम् –पृ० ४

[41] New catalogas catalogoram ( An alphabetical register of Sanskrit and allied works and authors, volume-8 ) – page 131

[42] तत्रैव

[43] तत्रैव

[44] A History of Indian logic – page 391

संपादिते तर्कसंग्रहे उपन्यासः वाक्यवृत्तिश्चातिरिक्तमपि एकमभिधानं 'भाष्यवृत्तिः' विहितम् ।[45] एवम् साम्प्रतमस्याष्टीकाया उपन्यासः, वाक्यवृत्तिः, भाष्यवृत्तिश्च नामत्रयमुपलब्धम्। अथ च भिन्न-भिन्नपुस्तकेषु एषा टीका एताभिः संज्ञाभिरेव व्यवहृता।
उपन्यासटीका नव्यन्यायशैल्यां लिखिता अस्ति। अस्यां टीकायां सर्वत्र लक्षणेषु त्रिदोषनिरीक्षणाय परिहाराय च परीक्षा कृता तथा नव्यन्यायस्य पारिभाषिकशब्दावलीभिः सूक्ष्मतया विश्लेषणं विवेचनञ्च विहितं तर्कसङ्ग्रहसिद्धान्तानाम्।

**(घ) टीकाकारस्य परिचयः -** शिवनारायणशास्त्रिमहाभागेन सम्पादिते पुस्तके आचार्येण स्पष्टतया उपात्तं यत् टीकेयम् अज्ञातकर्तृका। यतोहि शास्त्रिवर्येण गृहीतासु उपन्यासटीकायाः पाण्डुलिपिषु टीकाकर्तुः नाम-काल-स्थानादिकं न वर्णितम्,एवमुच्यते शास्त्रिमहोदयेन ।[46] किन्तु 'न्यू कैटालागस कैटालोगोरम' इत्यस्मिन् ग्रन्थे तर्कसंग्रहटीकानां विवरणे उपन्यासटीका वाक्यवृत्तिर्वा विधीयते। तत्र टीकाकर्तुः नाम **'श्रीमेरूशास्त्री गोडबोले'** इति संसूच्यते।[47] एस.सी. विद्याभूषणवर्येणापि अस्या रचनाकारः ' **मेरूशास्त्री गोडबोले'** एवास्ति इति कथितम्।[48] ( कार्ल एच पाटर) तर्कसंग्रहस्य आंग्लभाषायां कृतं सम्पादनं वी.एन.झामहोदयेन। तत्र पुस्तकस्यान्ते तर्कसंग्रहस्य नवत्यष्टीकायाः नामसंकीर्तनं विधाय तासां ज्ञातटीकाकारस्यापि उद्देशः क्रियते। तासां मध्ये उपन्यासस्यापि उल्लेखः,यस्य कर्ता **मेरूशास्त्री गोडबोले** एव विहितः।[49] एवमेव 'तर्कसंग्रहः-तट्टीकानां समीक्षात्मकमध्ययनम्' नामकस्य ग्रन्थस्य परिशीलितग्रन्थानां सूच्यां **श्रीमेरूशास्त्रीकृत**तर्कसंग्रहोपन्या- सस्य नामोल्लेखनं कृतम्। किन्तु एतेन सह अत्र अज्ञातनाम्नी उपन्यासटीका अपि उपात्ता।[50] एवमुपर्युक्तसाक्ष्यैर्वयं वक्तुं शक्नुमो यत् श्रीमेरूशास्त्रीगोडबोलेवर्येण विरचिता तर्कसंग्रहोपन्यासटीका।
अत्र टीकाकारस्य परिचये एक अपरो बिन्दुरपि योजनीयः। श्रीसत्कारिशर्मणा बङ्गीयेन 'प्राचीननवटीकासहितः तर्कसंग्रहः' इति पुस्तकं सम्पादितम्। तत्र नवसु टीकासु एका

---

45 Tarkasangraha ( English translataion with notes), V.N.Jha - page 141

46 तर्कसङ्ग्रहः ( बालप्रबोधिनी,उपन्यास इति प्राचीनाप्रकाशितटीका-युगलेन),शिवनारायण शास्त्री,प्रास्ताविकम् –पृ० ४

47 New catalogas catalogoram ( An alphabetical register of Sanskrit and allied works and authors, volume-8 ) – page 131

48 A History of Indian logic – page 391

49 Tarkasangraha ( English translataion with notes), V.N.Jha - page 141

50 तर्कसंग्रहः-तट्टीकानां समीक्षात्मकमध्ययनम्' – पृ० ९९

मेरूशास्त्रिविरचिता वाक्यवृत्तिटीका अपि अस्ति। किन्तु तस्मिन् पुस्तके प्रदत्ता वाक्यवृत्तिटीका शिवनारायण- शास्त्रिणा सम्पादितोपन्यासटीकायाः पूर्णतया भिन्ना वर्तते। अतोऽत्र सन्देहो जायते यत् मेरूशास्त्रिविरचितस्य तर्कसंग्रहस्य उपन्यासटीका वाक्यवृत्तिटीका च एका एव अथवा न। यदि द्वे समाने तर्हि द्वयोर्भाषाशैल्याः कथं पृथक्त्वम्, यदि भिन्ना तर्हि उपर्युक्तेषु ग्रन्थेषु द्वयोः कथं न नामान्तरम् ? अस्याः शंकायाः समाधानम् एवं भवितुं शक्यते यत्, उपन्यासस्य अपरनाम वाक्यवृत्तिरिति प्रतिपादयन्ते ये ग्रन्था उपर्युल्लिखितास्तेषां प्रामाणिकत्वं न सन्देहस्य विषय इति विद्वद्भिः सिद्धम् एवञ्च वाक्यवृत्तेरुपन्यासात् भिन्नत्वमपि प्रत्यक्षतया प्रमाणितम्। अतो हेतोरत्र एवं वक्तुं शक्यते यत् उपन्यासस्य अपरनाम वाक्यवृत्तिस्तु अस्तीति उपर्युक्तम्। संभवतः श्रीसत्कारिशर्मणा सम्पादितवाक्य-वृत्तिटीकायाः रचनाकारः उपन्यासकारात्भिन्नः किन्तु तदाभिधानम् एक एव **'मेरूशास्त्री'** इति।

टीकाकारस्य कालः न प्राप्यते कुत्रापि किन्तु टीकेयं तर्कसङ्ग्रहस्योपरि विद्यते अतोऽस्य टीकाकारस्य कालः सप्तदशशताब्द्याः परमेव इति निश्चितम्। उपन्यासटीकाया आरम्भेन 'श्रीगणेशाय नमः' इति मङ्लाचरणेनापि अस्य महाराष्ट्रवासित्वं सूच्यते यतोहि महाराष्ट्रदेशे सर्वप्रथमो मङ्गलकारको विघ्नविनाशकश्च गजानन एव पूज्यते। एतस्य नामाग्रे संयोजित'गोडबोले' इति पदेनापि ज्ञायते यत् अयं महाराष्ट्रदेशीयः यतोहि महाराष्ट्रीयजनैः पदमिदं स्वनाम्ना सह युज्यते।

मेरूशास्त्रिमगोडबोलेहोदयस्य तर्कसंग्रहोपन्यासाद् अतिरिक्तग्रन्थानां स्फुटोल्लेखनं तु न प्राप्यते किन्तु यत्र तत्र ग्रन्थेषु मेरूशास्त्रिगोडबोले इति नाम्न एव विदुषः **'भारतखण्डा च ऐतिहासिक कोष'** इत्याख्यग्रन्थ उल्लिख्यते।[51] अस्य ग्रन्थस्य महाराष्ट्रीभाषानिबद्धनेन सम्भावनेयं दृढतरा भवति यत् ग्रन्थोऽयं उपन्यासकारेण मेरूशास्त्रिणा विरच्यते।

**(ङ) उपन्यासटीकायाः वैशिष्ट्यम् –** संस्कृतवाङ्मये कस्यचिदपि शास्त्रस्य शास्त्रत्वं तदेव स्वीक्रियते यदा तस्मिन् त्रिविधशास्त्रप्रवृत्तिः प्राप्यते।[52] त्रिविधशास्त्रप्रवृत्तिर्नाम उद्देशो लक्षणं

---

[51] तर्कसंग्रहः (प्राचीननवटीकासहितः) – सम्पादकीयम्
तत्त्वचिन्तामण्यालोकव्याख्या सिद्धाञ्जनम् - भूमिका

[52] न्यायभाष्यम् - १/१/३

परीक्षा चेति।[53] संस्कृतजगति एतत्त्रयं शास्त्राणां निकषा वदन्ति। उपन्यासकारेण एषा परम्परा पूर्णतया परिपाल्यते। अस्यां टीकायां प्रथमं पदार्थानामुद्देशः, तदनु लक्षणम्, ततः परं लक्षणस्य दोषनिवारणाय परीक्षा विशिष्टरूपेण उपस्थापिता इति उपन्यासटीकायाः प्रमुखवैशिष्ट्यम्। अत्र पदकृत्यवत् उदाहरणं प्रत्युदाहरणं वाक्याध्याहारो सह लक्षणानां संयोजनं कृतम्। परपदार्थलक्षणे या प्रक्रिया अदृष्टा तस्याः पूर्वपदार्थलक्षणादनुवर्तनमिति वाक्याध्याहारः यथा अष्टाध्याय्यामुक्तम् – **सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र।**[54] एतेषां सर्वेषां बिन्दूनां व्यवस्थापनम् उपन्यासटीकायां प्रस्तूयते तथा एतैर्बिन्दुभिः सहैव तर्कसंग्रहसिद्धान्तानां टीकनं क्रियते उपन्यासाचार्यैः। अतो वक्तुं शक्यते यत् उपन्यासटीका सम्यक् व्याख्या अस्ति तर्कसंग्रहस्य यतोहि **'उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवतीति'** महाभाष्ये उल्लिखितम्।[55] आचार्यचन्द्रजसिंहेन विरचिता तर्कसंग्रहस्य पदकृत्यटीका अपि एतादृशी एव ,किन्तु तत्र चन्द्रजसिंहेन अन्नम्भट्टस्य प्रदत्तमूलपंक्तिम् अधिकृत्य व्याख्यानं कृतम्। उपन्यासटीकायां तु पदार्थानामुद्देशस्तर्कसंग्रहस्य एव किन्तु पदार्थलक्षणं टीकाकारेणैव प्रस्तुत्य तस्य परीक्षादिकं कृतम्, इदमेव द्वयोर्टीकयोर्भिन्नत्वम्। लक्षणे अव्याप्ति-अतिव्याप्ति-असंभवदोषाणां निवारणाय परीक्षा कृता। अत्र पदार्थस्य लक्षणं तथा लक्षणस्य परीक्षैव प्रमुखतया प्रतिपादिता। अत इयमुपन्यासटीका मूलतः पदार्थस्य लक्षणपरीक्षयोरेव उपरि केन्द्रिता इति वक्तुं शक्नुमः। भेद-प्रभेदादीनामन्यतत्त्वानां व्याख्या अत्र गौणतया प्रस्तुता। अस्यां टीकायां प्रायो नवीनोदाहरणानां संकलनमपि अस्याः वैशिष्ट्यं सूचयति यथा दोषत्रयादिप्रसङ्गे दृश्यते। उपन्यासटीकाया भाषा सामान्या सरला च किन्तु शैली नव्यन्यायपारिभाषिकशब्दावलीयुता वर्तते।

---

[53] नाममात्रेणवस्तुसंकीर्तनमुद्देशः,असाधारणाधर्मो लक्षणम्,लक्षितस्य लक्षणं सम्भवेति नवेति विचारः परीक्षा - पदकृत्यम् – मङ्गलाचरणप्रकरणम्

[54] पाणिनीयसूत्रवृत्तिः लघुसिद्धान्तकौमुदी – १/३/३

[55] व्याकरणमहाभाष्यम् - पश्पशाह्निकम्

**शोधकार्यस्योद्देश्यम् –** प्रस्तुतशोधकार्यस्य उद्देश्यं भारतीयदार्शनिकपरम्परायां निहितस्य न्याय-वैशेषिकदर्शनस्यान्तर्गते तर्कसङ्ग्रहस्य सामान्यतया उपन्यासटीकायाश्च विशिष्टतया निरूपणमस्ति। प्रधानरूपेण लघुशोधकार्यस्यास्य अधोनिर्दिष्टान्युद्देश्यानि सन्ति-

- न्याय-वैशेषिकदर्शनस्य सिद्धान्तानां विवेचनम्
- न्याय-वैशेषिकदर्शने प्रकरणग्रन्थस्य तर्कसङ्ग्रहस्य स्थानम्, तत्प्रतिपादितविषयवस्तूनाञ्च समीक्षणम्।
- तर्कसङ्ग्रहोपन्यासटीकायाष्टीकाकारस्य च यथासंभवप्राप्तपरिचयः।
- तर्कसङ्ग्रहोपन्यासटीकाया हिन्दीभाषायामनुवादः।
- उपन्यासटीकायां व्याख्यायितानां तर्कसङ्ग्रहीयसिद्धान्तानां विश्लेषणम्।
- उपन्यासटीकान्तर्गते उल्लिखितानां पदार्थादिलक्षणानां अन्यसिद्धान्तानाञ्च रेखाचित्रमाध्यमेन स्पष्टीकरणम्।

**पूर्ववर्ती शोधकार्याणां विवरणम् –**

- तर्कसंग्रहदीपिकाटिप्पणी तत्त्वार्थदीपिकासमीक्षात्मकं सम्पादनम्, श्रीकान्त सुब्बाराव, रामकृष्ण केन्द्रीयसंस्कृत विद्यापीठ, तिरुपति १९८९ (शोध-प्रबन्ध)
- तर्कदीपिकायाः नवीनं संस्करणं समीक्षात्मकमध्ययनञ्च, म०वा० सुपर्णा, केन्द्रीयसंस्कृतविद्यालय तिरुपति, १९९० (शोध-प्रबन्ध)
- तर्कप्रकाशिनी (तर्कसंग्रह की अप्रकाशितटीका) का समालोचनात्मक अध्ययन ,भूपेन्द्र सिंह परनामी,जवाहरलाल नेहरू विश्वविद्यालय,दिल्ली, (लघुशोध-प्रबन्ध),२००७.
- तर्कसंग्रह का आरेखीय एवं गणितीय प्रस्तुतिकरण (नव्यन्याय भाषा के आलोक में), सत्यमुदिता स्नेही, जवाहरलाल नेहरू विश्वविद्यालय,दिल्ली, (लघुशोध-प्रबन्ध),२००९.

**प्रस्तुतशोधकार्यस्य वैशिष्ट्यम् –**

उपर्युक्तेषु केषुचिदपि शोधकार्येषु तर्कसङ्ग्रहोपन्यासटीकाया हिन्द्यनुवादो विश्लेषणञ्च न जातम्। यद्यपि तर्कसङ्ग्रहस्य अन्यासु टीकासु कृतानि कार्याणि प्राप्यन्ते किन्तु उपन्यासटीकामाधारीकृत्य शोधकार्यं न दृग्गोचरीभवति। उपन्यासटीकासम्बन्धि यत् कार्यं वर्तते तदपि टीकायाः पाण्डुलिपेः सम्पादनमस्ति न त्वनुवादः। उपन्यासटीकाया हिन्द्यनुवाद

उपर्युक्तशोधकार्येभ्यः पूर्णतोऽस्पृष्टोऽस्ति। अतः प्रस्तुतलघुशोध-प्रबन्धमाध्यमेन तर्कसङ्ग्रहोपन्यासटीकायाः हिन्द्यनुवादः (भावानुवादः) विश्लेषणञ्च शोधदृष्ट्या संभवतः प्रथमं कार्यमस्ति।

**शोधप्रविधिः** –

शोधप्रबन्धेऽस्मिन् विश्लेषणात्मकपद्धत्या विषयवस्तुनः प्रतिपादनं विहितम्। टीकाया भाषा टीकाकारस्य तात्पर्यञ्च द्वयमेव सम्यक्तया अवगम्य हिन्द्यनुवादः कृतः। शोधकार्यस्य पूर्णतया व्यवस्थापनाय अध्याय-उपाध्याय-बिन्दु-उपबिन्दु-आरेखादिमाध्यमेन च शोधस्य विषय-वस्तुनो विभाजनं तार्किकरीत्या च विषयप्रस्तुतीकरणस्य प्रयत्नो विधीयते। अत्र अध्यायविभाजनं तर्कसङ्ग्रहग्रन्थाधीनं भूत्वा एव विधीयते।

श्रीः

# प्रथमोऽध्यायः - 'पदार्थविवेचनम्'

**तर्कसंग्रहः**

निधाय हृदि विश्वेशं विधाय गुरु वन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१॥

**अथ उपन्यासः** - श्रीगणेशाय नमः। प्रारिप्सितस्य ग्रन्थस्य परिसमाप्त्यर्थमीश्वरध्यानात्मकं मङ्गलं कृतं "निधाय" इत्यादिना। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति वचन-पर्यालोचनं गुरु-वन्दनं च कृतं 'विधाय' इत्यादिना।

ग्रन्थादौ श्रोतृ-प्रवृत्त्यर्थं सम्बन्ध-चतुष्टयं वक्तव्यम्। तदनुक्तावसम्बन्धशङ्कया श्रोतृप्रवृत्त्यनुपपत्तिः। अत उक्तं सम्बन्धचतुष्टयं विषय-प्रयोजन-सम्बन्ध-अधिकारिरूपम् - १. तर्कसंग्रहपदेन विषय उक्तः २. सुखबोधाय इत्यनेन प्रयोजनमुक्तम् ३. बालानाम् इत्यनेनाधिकार्युक्तः ४. विषयस्य ग्रन्थस्य च प्रतिपाद्य-प्रतिपादकभावसम्बन्ध उक्तः। [बालानाम् इत्यनेनानुपपत्तिः][56]॥१॥

**हिन्द्यनुवादः** – मङ्गलकारक भगवान गणेश को नमस्कार है। अभीष्ट ग्रन्थ के सम्यग्तया समाप्ति के लिए 'निधाय..' इन पदों  के द्वारा यहाँ पर ईश्वर के ध्यान वाला मङ्गल किया गया है। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इस वचन के पर्यालोचन से 'विधाय..' इन पदों से गुरु की वन्दना की गयी है।

ग्रन्थ के आरम्भ में श्रोता अथवा पाठक की प्रवृत्ति के लिए सम्बन्ध-चतुष्टय कहना चाहिए। सम्बन्ध-चतुष्टय न कहने पर ( ग्रन्थ एवं उसके प्रतिपाद्य में ) असम्बन्ध की आशंका से श्रोता की ग्रन्थ के अध्ययन में प्रवृत्ति नहीं होती है। अतः तर्कसंग्रह का विषय, प्रयोजन, सम्बन्ध एवं अधिकारी रूप सम्बन्ध-चतुष्टय को उपन्यासटीका के आरम्भ में कहा गया। (क) विषय - मङ्लाचरण में तर्कसंग्रह पद के द्वारा विषय का कथन किया गया है। (ख) प्रयोजन - विषय

[56] अत्र अर्थक्रमानुसारेण अस्य वाक्यस्य संगतिः न प्रतीयते। अन्यपाण्डुलिपिप्रतीस्वपि नेदं वाक्यम् उपलभ्यते। अतः हिन्द्यनुवादे विश्लेषणे च अस्यार्थः न क्रियते।

का सुखपूर्वक बोध ही ग्रन्थ का प्रयोजन है। (ग) अधिकारी - 'बाल' पद से अधिकारी संकेतित है। (घ) सम्बन्ध - विषय एवं ग्रन्थ का 'प्रतिपाद्य-प्रतिपादकभाव' सम्बन्ध है।

## विश्लेषणम्

**मङ्गलाचरणम्-** भारतीयशास्त्रपरम्पराया एकं वैशिष्ट्यं वर्तते यदत्र ग्रन्थारम्भे मङ्गलं क्रियते। मङ्गलवाचकशब्देन श्लोकेन वा ग्रन्थ आरभ्यत इति सुतरां प्रसिद्धमेव। उपन्यासटीकायामपि 'अथ' इति मङ्गलवाचकम् आरम्भवाचकञ्च पदं प्रस्तुतम् आरम्भे। अमरकोशे तु 'अथ' शब्दस्य मङ्गल-अनन्तर-आरम्भ-प्रश्नादिः अनेके अर्थाः परिगण्यन्ते।[57] टीकायामथशब्द आरम्भवाचको मङ्गलवाचकश्चास्ति। अथपदस्य माङ्गलिकत्वे पद्यमेकं प्रसिद्धम् –

**ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।**
**कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥**

सृष्टे आदौ ओंकार अथ च ब्रह्मणः कण्ठात् बहिरागतौ अत उभौ एव माङ्गलिकौ। आरम्भार्थके प्रयुक्ते सत्यपि 'अथ' पदमत्र श्रवणमात्रेणैव मङ्गलं साधयति। यथा – जलपूर्णकलशादिः स्वकार्ये प्रयुक्तमपि द्रष्टुः कृते दर्शनमात्रेणैव मङ्गलं कारयन्ति तथैव अथपदमपि श्रवणमात्रेण मङ्गलं कुर्वत् आरम्भार्थमपि द्योतयति। अतः सम्प्रति उपन्यास आरभ्यत इति सूचयति **'अथ उपन्यासः'**। उपन्यासपदस्य व्युत्पत्तिः **'उप' तथा 'नि' उपसर्गयुते 'अस्'धातोर्घञ् प्रत्ययात्** भवति।[58] संस्कृत-हिन्दी-कोशे अस्य पदस्य समीपस्थापनं, न्यासः, परामर्शः, प्रस्तावः, भूमिका, प्रस्तावनादि अर्था विधीयन्ते।[59] अमरकोशे तु वचनोपक्रमस्य रूपे उपन्यास वर्ण्यते।[60] तर्कसंग्रहोपन्यासटीकायाम् आदौ 'श्रीगणेशाय नमः' इत्यमुना वाक्येन भारतीयशास्त्रपरम्पराया अनुपालनं कुर्वता मङ्गलाचरणं विधीयते टीकाकारेण। मङ्लाचरणस्य कोटित्रयं विभज्यते संस्कृतशास्त्रे - आशीर्वादात्मकं, नमस्कारात्मकं वस्तुनिर्देशात्मकञ्च। अत्र भगवद्गणेशं नमस्कृत्य नमस्कारात्मकं मङ्गलाचरणं प्रस्तूयते। वस्तुतः सामान्या अवधारणा वर्तते यत् ग्रन्थस्य बाधारहितसमाप्त्यै इष्टस्य अर्चनमेव

---

57 अमरकोशः – तृतीयं काण्डम्, नानार्थवर्गः - २४६

58 संस्कृत-हिन्दी-शब्दकोशे , वामनशिवरान आप्टे – पृ० २०७

59 तत्रैव

60 अमरकोशः – प्रथमकाण्डम् , शब्दादिवर्गः ९

मङ्गलाचरणम्। कस्यचिदपि ग्रन्थस्य सम्बन्धे विघ्नत्रयं भवितुं शक्यते - समाप्तिप्रतिबन्धकः, प्रचारप्रतिबन्धको यशःप्रतिबन्धकश्च।[61] कृतिकारेण कृतेर्भव्यतया उपक्रमं कृत्वा अपि ग्रन्थस्य समाप्तिर्न भवेत् तर्हि अयं समाप्तिप्रतिबन्धकविघ्नः। प्रचारप्रतिबन्धकस्तु कृतेः पूर्णानन्तरमपि तस्या जनमानसपर्यन्तं न प्रसिद्धि अर्थात् प्रचाराभावः। एवञ्च कतिपयग्रन्थाः एतादृशा अपि भवन्ति ये पूर्णाः प्रचारिताश्च द्वयमेव भवन्ति तथापि रचनाकारस्य कीर्तिं वर्धयितुं न समर्था भवन्ति अथवा रचनाकर्तुः पूर्वप्राप्तयशोऽपि अपयशसि परिवर्तयन्तीति यशःप्रतिबन्धकविघ्नः। अतः संस्कृतवाङ्मये विघ्नानानामेतेषां परिवर्जनाय मङ्गलाचरणस्य प्रयोजनं सिद्ध्यते। टीकाकारमते अन्नंभट्टेनापि अस्मादेव कारणात् ईश्वरध्यानात्मकं गुरुवन्दनविधानात्मकञ्च मङ्गलश्लोकं कृतम्। गुरुमहत्तां प्रदर्शयन् श्वेताश्वतरोपनिषदो मन्त्रमेकम् उल्लिखितवान् टीकाकारः –

**'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ'।**

**तस्येते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।**[62]

यथा देवः पूजनीयः तथैव गुरु अपि, एतेन न्यायेन तर्कसंग्रहे ईश्वरतुल्यगुरोर्वन्दनस्य विधानम् अनुपाल्यते। अतो हेतोः संस्कृतशास्त्रपरम्परायाः यथोचितरीत्या परिपालनं कृत्वा मूलग्रन्थकारेण टीकाकारेण च अस्मिन् ग्रन्थे मङ्गलविधानं संयुज्यते।

**अनुबन्ध-चतुष्टयम् -** श्रोतॄणां प्रवृत्युत्पत्त्यै ग्रन्थादौ 'अनुबन्ध-चतुष्टयम्' उच्यते शास्त्रपरम्परायाम्। अथ च अनुबन्ध-चतुष्टयं विना मङ्गलाचरणस्य पूर्तिः न भवत्येवमपि श्रूयते -

**सम्बन्धश्चाधिकारी च विषयश्च प्रयोजनम्।**

**विनानुबन्धं ग्रन्थादौ मङ्गलं नैव शस्यते।**[63]

तर्कसंग्रहकारेण वर्णितस्य अनुबन्ध-चतुष्टयस्य टीकनम् उपन्यासकारः कृतवान्। उपन्यासकारेण 'अनुबन्ध-चतुष्टयमिति' स्थाने 'सम्बन्ध-चतुष्टयम्' पदं प्रयुक्तम्। अत्र द्वावपि समानार्थकौ यतोहि सम्बन्ध-चतुष्टयेऽपि अधिकारिविषयसम्बन्धप्रयोजनस्यैव निबद्धनम्। तर्कसंग्रहस्य मङ्गलाचरणे सम्बन्ध-चतुष्टयस्य पुष्टिं कुर्वता उपन्यासकारेण उल्लिख्यते यत्

---

61 काव्यालंकारः (आनन्दऽऽख्यहिन्दीभाष्यसंवलितः) – पृ ० १

62 श्वेताश्वतेरोपनिषद् – ६/२३

63 तर्कसंग्रहः , संपादकः – गोविन्दाचार्यः पृ० १९

ग्रन्थस्य विषयः 'तर्कसंग्रहः' पदेन उक्तः। तर्क्यन्ते प्रमितिविषयीक्रियन्ते तर्का इति पदार्थाः।[64] एते एव सप्तपदार्थाः अत्र विषयरूपेण प्रतिपादिताः। संस्कृतवाङ्मये एका उक्तिः प्रसिद्धा यत् **'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते'।** एतमेव वाक्यं स्मारयित्वा अन्नम्भट्टेनापि ग्रन्थप्रयोजनं विधीयते प्रथमश्लोके। न्यायवैशेषिकपदार्थानां 'सुखपूर्वकबोध' एव अस्य ग्रन्थस्य प्रयोजनम्। यद्यपि न्यायवैशेषिकदर्शनस्य मुख्यं प्रयोजनं निःश्रेयसरूपं तथापि तर्कसंग्रहेण न्यायवैशेषिकसम्मतपदार्थानां अनायासेन यथार्थज्ञानं तु उपायात्मकं प्रयोजनम्। अतः पदार्थानां सुखपूर्वकबोधः अस्य ग्रन्थस्य उपायात्मकप्रयोजनरूपेण निर्दिष्टः।[65] य यस्य सोदाहरणं निरूपणम् अथवा व्याख्यानं करोति स तस्य प्रतिपादकः, एवञ्च यस्य व्याख्यानं भवति स प्रतिपाद्यः कथ्यते। वस्तुतः कोशे तु प्रतिपादकस्य स्थापक-प्रदर्शक-निष्पादकादिर्बहवोऽर्थाः प्रचलिताः किन्तु ग्रन्थस्य विषयस्य च सम्बन्धसन्दर्भे व्याख्याकारकं निरूपकञ्चैव स्वीकृतम् प्रतिपादकस्यार्थः।[66] एतस्मिन् ग्रन्थे न्यायवैशेषिकस्थपदार्थानां निरूपणं 'विषयः' तथा विषयस्य प्रतिपादकोऽयं ग्रन्थः, अतो ग्रन्थविषयोर्मध्ये प्रतिपाद्यप्रतिपादकभावश्च सम्बन्धः। सर्वस्मिन् कार्ये सर्वोऽपि जनः अधिकारी न भवति। यदि कोऽपि पुरूषः कस्मिन्नपि कार्ये प्रवृत्तिमिच्छति तदा अवश्यमेव अवलोकनीयं यत् तस्मिन् कार्ये तस्य अधिकारित्वं वर्तते न वा। तर्कसंग्रहस्य अधिकारी तु बालः। अत्र बालस्य तात्पर्यं न तु स्तनन्धयः अपितु येन व्याकरण-काव्य -कोशादिस्तु अधीताः किन्तु न्यायशास्त्रे यस्य गतिर्न स एव बाल अत्र।[67]

( वैशेषिकमतानुसारेण सप्त पदार्थोद्देशः )

**तर्कसंग्रहः** – द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः॥२॥

**उपन्यासः** – पदार्थो लक्ष्यः। पदार्थत्वं लक्ष्यताऽवच्छेदकम्। पदस्यार्थः = पदार्थः इति व्युत्पत्त्या "अभिधेयत्वं पदार्थ-सामान्य लक्षणम्" इति मनसि निधाय विभागमाह 'द्रव्य०' इत्यादिना। अत्र सप्तग्रहणं नाशङ्कनीयम्। शंकाप्रकारश्च - सप्तग्रहणस्य कोऽर्थः? १. न्यूनसंख्या

---

64 पदकृत्यम् – मङ्गलाचरणप्रकरणम्

65 तर्कसंग्रहः,तट्टीकानां च समीक्षात्मकमध्ययनम् – पृ० ४

66 संस्कृत-हिन्दी-कोश , पृ० ६५३

67 पदकृत्यम् – मङ्गलाचरणप्रकरणम्

व्यवच्छेदार्थो वा? २. अधिकसंख्या व्यवच्छेदार्थो वा? ३. 'पदार्थत्वं द्रव्यादि-सप्तान्यतमत्व-व्याप्तम्' इति व्याप्त्यर्थो वा? इति।

१.न तावदाद्यः विभागादेव न्यूनसंख्यायाः परिहृतत्वात्। २. न द्वितीयः 'अष्टमपदार्थो नास्ति'। इति वक्तव्येऽष्टमपदार्थज्ञानं विना अष्टमपदार्थो नास्ति, इति वक्तुमशक्यत्वात्,अभावज्ञानस्य प्रतियोगिज्ञानहेतुत्वात्। प्रतियोगी *यदि ज्ञातः? तस्यापि सप्तपदार्थवत् परिगणनीयत्वं भवति, ज्ञानत्वाविशेषात्। *यदि न प्रमितः? निषेद्धुमशक्यत्वात्। ३.न तृतीयः सप्तान्यतमत्वं= सप्त-भिन्न-भिन्नत्वं वक्तव्यम्, सप्तभिन्नस्याप्रसिद्धत्वात्। तद्भिन्नत्व-रूप-साध्याप्रसिद्धत्वात् तन्निरूपितव्याप्ति- रप्यप्रसिद्धैव इति।

तत्तुच्छम्-सप्तान्यतमत्वं त्रयान्यतमत्वादिवत् त्रितय-भिन्न-भिन्नत्वं इति न ब्रूमः अपितु सप्तान्यतमत्वं = द्रव्यादि-सप्त-प्रतियोगिक-भेद-कूटाभाववत्त्वम्। एव च द्रव्यादि-सप्त-प्रतियोगिक-सप्त-भेद-कूटाभाववत्त्वं रूपान्यतमत्वव्याप्तम्। इत्यत्रापि द्रव्यादि-सप्त-प्रतियोगिक-सप्त-भेद-कूटाधिकरण-प्रसिद्धया तदभावेऽप्यप्रसिद्ध इति वाच्यम्, अभावज्ञानस्य प्रतियोगि-ज्ञान मात्रापेक्षितत्वात् कूटाभावस्य प्रतियोगि-कूट-घटकीभूत-सप्त-भेद-रूप-प्रतियोगिनः प्रसिद्धत्वात्। द्रव्ये [गुणादि][68] षट् भेदः अद्रव्यभेद [गुणादौ द्रव्य भेद][69] इति कूटस्यापि प्रसिद्धत्वात्। एवञ्च 'सप्तग्रहणं पदार्थत्वं द्रव्यादि-सप्तान्यतमत्वव्याप्यम्'। इति व्याप्त्यर्थकम् इति ध्येयम्॥२॥

**हिन्द्यनुवादः** – 'पदस्यार्थः पदार्थः' इस व्युत्पत्ति से "अभिधेयत्वं पदार्थसामान्यलक्षणम्" पदार्थ का लक्षण है । उपर्युक्त वाक्य में 'पदार्थ' लक्ष्य है। 'पदार्थत्व' लक्ष्यता-अवच्छेदक है। इसी लक्षण को ध्यान करके द्रव्यगुणादि का विभाग किया गया है।

यहाँ 'सप्त-ग्रहण' इस पद में आशंका नहीं करनी चाहिए क्योंकि यहाँ सप्तग्रहण का क्या अर्थ है? इस विषय में आशंका के निम्न प्रकार हो सकते है - १. न्यूनसंख्या के व्यावर्तन हेतु २.

---

68 संपादितपुस्तके न इदं पदं दत्तम्। किन्तु अन्यप्रतीसु उल्लिखितमित्युक्तं सपादकमहोदयेन। अत्र अर्थसौविध्यकारणात् पदमिदमपि प्रस्तुतम्।

69 अत्रापि तथैव बोध्यम्।

अधिक संख्या के व्यावर्तन हेतु ३.'पदार्थत्व' के 'द्रव्यादिसप्तान्यतमत्व' के साथ व्याप्ति होने से व्याप्त्यर्थ हेतु।

१.प्रथम प्रकार की शङ्का नहीं की जानी चाहिए क्योंकि संख्या विभाग से ही न्यूनसंख्या का परिवर्जन हो जाता है। २. दूसरी शङ्का भी ठीक नहीं है क्योंकि अभाव के ज्ञान में प्रतियोगिज्ञान के हेतु होने से, आठवें पदार्थ के ज्ञान के बिना 'आठवाँ पदार्थ नहीं है अथवा आठवें पदार्थ का अभाव है' ऐसा नहीं कहा जा सकता है। (क) यदि अष्टमपदार्थ के अभाव का प्रतियोगी अर्थात् अष्टमपदार्थ ज्ञात है तो उसका भी सप्तपदार्थों के समान पदार्थ में गणना होनी चाहिए, किन्तु यहाँ प्रतियोगी का ज्ञान न होने आठवें पदार्थ की परिगणना नहीं हो सकती। (ख) यदि प्रतियोगी ज्ञात नहीं है तो उसका निषेध ही नहीं किया जा सकता। ३. शङ्का का तीसरा प्रकार भी अर्थात् 'पदार्थत्व' का 'सप्तान्यतमत्व' के साथ व्याप्ति है, यह भी उचित नहीं है। क्योंकि आप (पूर्वपक्षी) 'सप्तान्यतमत्व' का अर्थ 'सप्तभिन्न से जो भिन्न है' यह ग्रहण कर रहे है जो कि उचित नहीं है। यहाँ पर सप्तभिन्न (व्याप्ति का हेतु) अर्थात् सातवें पदार्थ से भिन्न पदार्थ के अप्रसिद्ध होने से, सप्तभिन्न से भिन्न अर्थात् साध्य भी अप्रसिद्ध है। अतः इनसे निरूपित व्याप्ति भी अप्रसिद्ध ही है। क्योंकि जब पहले 'सप्त से भिन्न' ही अप्रसिद्ध है तो 'सप्तभिन्न से जो भिन्न है' अर्थात् 'सप्ताभाव का अभाव' इसका का कथन नहीं कर सकते क्योंकि उसका प्रतियोगी 'सप्तभिन्न' हुआ, जो कि अप्रसिद्ध है (अभाव बिना प्रतियोगी ज्ञान के नहीं होता है )। अतः 'सप्तभिन्नभिन्नत्व' इस पद का आपके द्वारा प्रतिपादित अर्थ में उपादन ही नहीं किया जा सकता। अर्थात् सप्तान्यतमत्व का अर्थ 'सप्तभिन्नभिन्नत्व' नहीं ग्रहण करना चाहिए।

क्योंकि आपका यह तर्क उचित नहीं है। उपर्युक्त उल्लिखित 'सप्तान्यतमत्व' को 'त्रयान्यतमत्व' रूप 'त्रितयभिन्नभिन्नत्व' के समान नहीं कहना चाहिए। अपितु 'सप्तान्यतमत्व' को 'द्रव्यादि सप्त प्रतियोगी से युक्त कूटाभाव (सप्त पदार्थों का परस्पर भेद) वाला' ऐसा कहना चाहिए। अर्थात् द्रव्यादि सप्त पदार्थ एक दूसरे से भिन्न है, अतः वो एक दूसरे के प्रतियोगी हुए। ऐसे सप्तपदार्थों का परस्पर अभाव ही 'सप्तान्यतमत्व' अथवा 'सप्तभिन्नभिन्नत्व' से ग्रहण करना चाहिए (ऐसा करने पर इस कूटाभाव का प्रतियोगी भी उपलब्ध हो जाएगा, क्योंकि अभाव सप्रतियोगिक होता है)। इस प्रकार 'द्रव्यादि सप्तपदार्थ जिसमें प्रतियोगी है ऐसा सप्त पदार्थों

से भिन्न उनका परस्पर अभाव (कूटाभाव) रूप अन्यतमत्व' ही सप्तान्यतमत्व का अर्थ है। यहाँ पर द्रव्यादि सप्तपदार्थ जिसके प्रतियोगी है, ऐसे कूटाभाव का अधिकरण (सप्त पदार्थ) प्रसिद्ध होने से, उनका अभाव नहीं प्रसिद्ध है। ऐसा नहीं कहना चाहिए क्योंकि अभाव ज्ञान में प्रतियोगिज्ञान मात्र की अपेक्षा होती है। यहाँ पर भी कूटाभाव (एक पदार्थ का दूसरे पदार्थ में अभाव) का 'प्रतियोगी कूट घटकीभूत सप्तभेद वाले पदार्थ' प्रतियोगी के रूप में प्रसिद्ध है। जैसे कि 'द्रव्य में गुणादि षट् पदार्थों का भेद है तथा अद्रव्य गुणादि में द्रव्य का भेद है' ऐसा प्रसिद्ध ही है। इस प्रकार उपर्युक्त अर्थानुसार 'सप्तग्रहण' यह पद 'जहाँ जहाँ पदार्थत्व है वहाँ वहाँ सप्तान्यतमत्व है' इस व्याप्ति हेतु प्रयुक्त हुआ है।

## विश्लेषणम्

**पदार्थलक्षणप्रकरणम् -** तर्कसंग्रहेऽस्मिन् तर्काणां संग्रहः, तर्क्यन्ते प्रमितिविषयीक्रियन्त इति तर्काः। अथ च तर्काः अर्थात् द्रव्यादिसप्तपदार्थाः।[70] यतोहि पदार्थ एव प्रमितेर्विषय अत एतेषां पदार्थानामेव संग्रहः अत्र वर्तते। 'संक्षेपेणोद्देशलक्षणपरीक्षा यस्मिन् स ग्रन्थः संग्रहः' इति पदकृत्यकारेण।[71] तर्कसंग्रहे एतेषां त्रयाणाम् अनुवर्तनत्वात् 'तर्कसंग्रहः' इत्यन्वर्थमभिधानम् अस्य ग्रन्थस्य सार्थकमेव। उद्देशः, लक्षणं परीक्षा च एतत्त्रयं शास्त्रस्य त्रिविधाः प्रवृत्तय उच्यन्ते।[72] कस्यचिदपि शास्त्रस्य ग्रन्थे एतेषां निबद्धनेनैव ग्रन्थस्य सार्थकत्वम्। तर्कसंग्रहकर्त्रा आदौ शास्त्रस्य प्रथमा प्रवृत्तिः उद्देशो विधीयते। **नाममात्रेणवस्तुसंकीर्तनम् उद्देशो,**[73] गोविन्दाचार्येण विभागकथनमपि अस्मिन्नेव स्वीक्रियते।[74] यथा - तर्कसंग्रहे द्रव्यगुणादिसप्तपदार्थानां नामसंकीर्तनानन्तरं एतेषां संख्या अपि प्रदर्शिता। अतः तावत्पर्यन्तमुद्देशप्रकरणमेव कथ्यते। मङ्गलाचरणानन्तरं तर्कसंग्रहपदार्थोद्देशे उपन्यासकारेण पदार्थस्य लक्षणात् टीकनमारभते। लक्षणं नाम

---

70 तत्रैव, दीपिका - मङ्गलाचरणप्रकरणम्

71 पदकृत्यम् – मङ्गलाचरणप्रकरणम्


72 न्यायभाष्यम् – १/१/३

73 पदकृत्यम् – मङ्गलाचरणप्रकरणम्

74 उद्देशो नाम- नामग्रहणमात्रेण वस्तुनां विभागप्रदर्शनम्। श्रीनिवासमुखोल्लासिनी – पृ० २

वस्तुनोऽसाधारणधर्मः।[75] 'पदस्य अर्थः पदार्थः' इति व्युत्पत्त्या **'अभिधेयत्वं पदार्थसामान्यलक्षणम्'** क्रियते टीकाकारेण यथा दीपिकायाम्।[76] पदस्य तात्पर्यं शब्दस्तथा इन्द्रियेण यो ग्राह्यः स अर्थः। प्रत्येकलक्षणात्मकस्य वाक्यस्य भागद्वयं वर्तते- लक्ष्यभागः लक्षणभागश्च। एतौ एव सम्मिल्य लक्षणवाक्यमिति जानीयात्। पदार्थलक्षणवाक्येऽपि लक्ष्यभागो लक्षणभागश्च विद्यते। अत्र 'अभिधेयत्वं' पदं लक्षणम्, पदार्थो लक्ष्यः। पदार्थे प्राकृतिकधर्मः पदार्थत्वं आहृतधर्मो लक्ष्यता च विद्यते, लक्ष्यत्वात्। कस्मिंश्चिदपि विषये तस्य प्राकृतिकधर्म आहृतधर्मश्चेति धर्मद्वयं निश्चितम्। विषयस्य प्राकृतिकधर्मः कदापि न विपरिणमते, यतोहि धर्मोऽयं तस्य मूलप्रकृतौ एव भवति। प्राकृतिकधर्मः प्रायो जातिरपि कथ्यते। आहृतधर्मस्तु विषये प्रसंगानुसारेण स्थीयते। 'आहृत' इति पदेनैव ज्ञायते यत् अस्य धर्मस्याहरणं भवति, अत आहृतधर्मः परिवर्तनशीलः। अथ च प्राकृतिकधर्मः सर्वदा आहृतधर्मस्य अवच्छेदको[77] भवति। अतः पदार्थस्य प्राकृतिकधर्मः पदार्थत्वम् आहृतधर्मलक्षताया अवच्छेदकमस्ति। एवमेव टीकायां प्रदत्तेषु सर्वलक्षणेषु बोद्धव्यम्।

**आरेखीयप्रस्तुतिः -**




**चित्र-क्रमाँकः १**

---

75 पदकृत्यम् – मङ्गलाचरणप्रकरणम्

76 तर्कसंग्रहदीपिका - पदार्थोद्देशप्रकरणम्

77 अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वम् – न्यायकोशः पृ० ८४

टीकाकारेण प्रदत्ते पदार्थलक्षणे पदमस्ति वाचक एवं अर्थो वाच्य अभिधेयो वा। यो अर्थः पदेन अभिधीयते अर्थात् भाषया वक्तुं शक्यते स एव पदार्थः। एषा अभिधानयोग्यतैव अभिधेयत्वम्। अभिधेयार्थोऽभिधया अभिव्यज्यते। न्यायवैशेषिकदर्शने अभिधा शक्तिनाम्ना अपि संबोध्यते।[78] एतेन पदेन अयमेवार्थो ग्राह्य इतीश्वरेच्छा शक्तिः[79], परवर्तिकाले तु इच्छामात्रैव।[80] कोशग्रन्थेष्वपि अभिधेयत्वमेव पदार्थस्य तात्पर्यम्।[81] प्रशस्तपादवर्येण अभिधेयत्वेन सह अस्तित्वं ज्ञेयत्वञ्चापि पदार्थलक्षणं दीयते।[82] इदमेव लक्षणं वैशेषिकसूत्रपरम्परायां पदार्थस्य प्राचीनतरं लक्षणं यतोहि इतः पूर्वं वैशेषिकसूत्रे पदार्थलक्षणविषये न किमपि संकेतितम्। प्रत्येकं पदार्थोऽपरेभ्यः पदार्थेभ्यो भिन्नः, पृथगस्तित्वकारणात्। पदार्थानां पृथगस्तित्वकारणादेव विशेषनामकः पदार्थः स्वीक्रियते वैशेषिकैः। अतः सृष्ट्यां सर्वपदार्थानां स्वास्तित्वं वर्तते। येषां वस्तूनामस्तित्वं वर्तते,तेषां ज्ञानमपि संभवति। एतादृशानां केषाञ्चिदपि वस्तूनामस्तित्वमेव न, यं ज्ञातुं न शक्यते। यतोहि विश्वस्य सर्ववस्तूनां विभाजनं सप्तपदार्थान्तर्गते क्रियते न्यायवैशेषिके तथा 'ज्ञेयत्वं' तु पदार्थलक्षणमेव। अतः ज्ञेयत्वम् अस्तित्वाधारितमिति। यस्य वस्तुनोऽस्तित्वं ज्ञेयत्वं च भवति। तस्य भाषया अभिव्यक्तिरित्यभिधानम्। अतः प्रथमं वस्तुनोऽस्तित्वं, तदनु ज्ञेयत्वं, ततः परं अभिधेयत्वमेव तस्य वस्तुनः पदार्थत्वं द्योतयतीत्युक्तं प्रशस्तपादाचार्येण।

न्यायवैशेषिकस्य व्यावहारिकसिद्धान्तोप्यस्ति यत् आदौ वस्तुनः सत्ता (अस्तित्वं/भावः) विद्यते। सत्तेयं तु निरपेक्षा। ततो वस्तुज्ञानं भवति किन्तु ज्ञानस्य कृते सत्ताया अपेक्षा। यतोहि यदा वस्तु एव न तर्हि तस्य ज्ञानं कथम् ? अतो वस्तुज्ञानं वस्तुनः सत्तायामाधृतम्। एवमेव वस्तुज्ञानानन्तरं भाषामाध्यमेन तस्याभिधानम्, वस्तुज्ञानं विना वस्त्वाभिधानस्यासंभवात्। अत अभिधानस्य कृते सत्ता ज्ञानञ्च उभौ एव अपेक्षितौ। सिद्धान्तोऽयं तु वक्तुर्दृष्ट्या

[78] शक्तिश्च पदार्थेन सह पदार्थस्य सम्बन्धः। न्यायसिद्धन्तमुक्तावली - शब्दखण्डः

[79] अस्मात् पदादयमर्थो बोद्धव्य इतीश्वीवरसंकेतः शक्तिः। तर्कसंग्रहः - शब्दपरिच्छेदः

[80] नव्यास्तु ईश्वरेच्छा न शक्तिः,किन्त्विच्छैव। न्यायसिद्धन्तमुक्तावली - शब्दखण्डः

[81] पदानां घटपटादीनाम् अर्थोऽभिधेयः। शब्दकल्पद्रुमः,तृतीयोभागः,पृ० ४०
अभिधेयाः पदार्थाः। संस्कृत-हिन्दी-कोश, पृ० ७१

[82] षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि। प्रशस्तपादभाष्यम् – पृ० ६

उल्लिखितः, किन्तु यदि भाषया पदार्थस्य यथावत् ज्ञानं श्रोतरि समुत्पद्यते तर्हि अयमेव सिद्धान्तः श्रोतुर्दृष्ट्या प्रतिपाद्यते।

**आरेखीयप्रस्तुतिः -**

वक्तुर्दृष्ट्या वस्तुव्यवहारः –

सत्ता → सविकल्पकज्ञानम् → भाषा

घटस्यास्तित्वम् | घटत्वविशिष्टघटज्ञानम् | 'अयं घटः' इत्यभिधानम्

श्रोतुर्दृष्ट्या वस्तुव्यवहारः –

भाषा → सविकल्पकज्ञानम् → सत्ता

**चित्र-क्रमाँकः २**

उपन्यासकारस्य पदार्थलक्षणे अभिधेयत्वं मात्रोक्तम्। अतो लक्षणमिदम् अव्याप्तिदोषयुक्तमिति मा शङ्कनीयम्। यतोहि पूर्वमुक्तं यत् अभिधेयत्वम् अस्तित्वं ज्ञेयत्वञ्च विना संभवत्येव न। यत्र अभिधेयत्वं तत्र तु अस्तित्वं ज्ञेयत्वञ्च समन्वितमेव। संभवतः अतो हेतोरत्र पृथक्तया तयोः कथनं न क्रियते टीकाकारेण। न्यायकन्दलीकारेण तु अभिधेयत्वमपि वस्तुस्वरूपम् एव मन्यते।[83] अतः अभिधेयत्वेनापि सद्वस्तुनो व्याख्या संभवति यथा शशिप्रभामहोदयया उक्तम्।[84] पदार्थस्य भाषया कथनकारणादेव न्यायवैशेषिकदर्शनं वस्तुवादि, बाह्यार्थवादि अनुभववादि च कथ्यते। अतः आदर्शवादिवेदान्तदर्शनात् अस्य पार्थक्यं यतोहि वेदान्ते तु अर्थः (ब्रह्म) भाषया कदापि न अभिव्यज्यते। तत्र तु भाषा ब्रह्मणः स्पर्शमपि न कर्तुं शक्नोति। अस्य प्रमाणं तूपनिषद्वाक्यं - **यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह।**[85] यथा अस्तित्वं ज्ञेयत्वम् अभिधेयत्वञ्च न्यायवैशेषिके पदार्थस्य स्वरूपं तथैव वेदान्ते

---

83 अभिधेयत्वमपि वस्तुनः स्वरूपम् एव । न्यायकन्दली पृ० ४१

84 अतः स्पष्ट हो जाता है कि सिद्धान्तमतानुसार अस्तित्व,अभिधेयत्व और ज्ञेयत्व वस्तु के धर्ममान्तर नहीं,उसके स्वरूप है। इनमें से किसी एक भी लक्षण से सद्वस्तु की व्याख्या करना इसीलिए संभव हो पाता है कि ये तीनों एक ही वस्तु के तीन पक्षों को द्योतित करते है। वैशेषिकदर्शन में पदार्थ-निरूपण, पृ० २३

85 तैत्तिरीयोपनिषद् -२/४/१

अस्तित्वं ज्ञानञ्च ब्रह्मस्वरूपम् किन्त्वभिधेयत्वं न यतोहि तत्तु अनिर्वचनीयम्।[86] एवं द्वयोरेव दर्शनयोः पदार्थस्वीकृतिः किन्तु पदार्थमीमांसा पूर्णतया भिन्नेति।

**शङ्काप्रकारः समाधानञ्च -** तर्कसंग्रहे अत्र नामसंकीर्तनेन सह 'सप्त'इति संख्यापि उक्ता। द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावस्य च नामकथनादेव ज्ञायते यदेते सप्तैव, तर्हि सप्तपद- ग्रहणस्याशयः कः? सन्दर्भेऽस्मिन् शङ्कात्रयम् उपस्थाप्य ताः निवार्यन्ते टीकाकारेण। शङ्कायाः प्रथमः प्रकारोऽस्ति यत् सप्तपदेन न्यूनसंख्यापरिवर्जनं भवति। पदार्थाः सप्तसंख्यका एव, न न्यूनाः। सप्तपदम् एतस्यैव निर्धारणं करोति किम्? अस्याः निराकरणं तु टीकाकारः अतिसारल्येन करोति यत् पदार्थानां विभागादेव न्यूनसंख्यायाः परिवर्जनं तु स्वतः भवति,अतः मैवं शङ्कनीयम्।

तदनु द्वितीयाशङ्का भवति यत् अधिकसंख्यापरिवर्जनत्वात् सप्तपदग्रहणं किम्? एषा शङ्का अपि निरामूला यतोहि अष्टमपदार्थस्य निषेधपूर्वं अष्टमपदार्थस्य ज्ञानमावश्यकम्,पदार्थाभावस्य ज्ञाने तस्य प्रतियोगी अर्थात् भावज्ञानस्य हेतुत्वात् इति दीपिकायामपि उक्तम्[87] अतः एवमपि न वक्तुं शक्यते यत् 'अष्टमपदार्थो नास्ति'। यतोहि भावज्ञानम् अभावज्ञानस्य हेतुः, अष्टमपदार्थस्य अभावे अष्टमपदार्थभावः कारणम्। यदि अष्टमपदार्थस्य भावस्तर्हि तस्यापि सप्तपदार्थवत् गणनं स्यात्, ज्ञानस्य अविशेषकारणात्। यदि अष्टमपदार्थस्य भाव एव न तर्हि तस्याभावो निषेधो वा न भवितुं शक्यत इति द्वितीयशंकासमाधानम्। अतः सप्तपदम् अधिकसंख्याव्यवच्छेदायापि न।

पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्तमिति हेतुना सप्तपदमत्र व्याप्त्यर्थे प्रयुक्तमिति तृतीयाशंका। अर्थात् 'यत्र यत्र पदार्थत्वं तत्र तत्र द्रव्यादिसप्तान्यतमत्वं' इति। किन्तु अत्र पूर्वपक्षिणः सप्तान्यतमत्वस्य अर्थः 'सप्तभिन्नभिन्नत्वं' गृह्यते अत एषा शंका अपि निरामूला यतोहि अत्र सप्तान्यतमत्वस्य अर्थः सप्तभिन्नभिन्नत्वं नापितु 'द्रव्यादिसप्तप्रतियोगिकसप्तभेदकूटाभाववत्त्वं रूपान्यतमत्वं' क्रियते। अत्र सप्तभिन्नभिन्नत्वम् अस्मात् कारणात् न गृह्यते यत् सप्तभिन्नभिन्नस्य प्रतियोगिनः प्राप्तिर्न जायते। अत्र सप्तभिन्न इत्यर्थः सप्ताभावस्तथा सप्तभिन्नभिन्नस्य अर्थ सप्ताभावाभावः। अत्र सप्तभिन्नभिन्नस्य

---

[86] सच्चिदानन्दानन्ताद्वयं ब्रह्म। वेदान्तसारः पृ० ४०

अत्र 'सत्' इति अस्तित्वं,'चित्' इति ज्ञानम्।


[87] प्रतियोगिप्रमितिं बिना निषेधानुपपत्तेरिति। दीपिका,पदार्थोद्देशप्रकरणम्

प्रतियोगी सप्तभिन्नो भवति। किन्तु एषः सप्तभिन्नः अर्थात् सप्तपदार्थातिरिक्त अष्टमपदार्थ अप्रसिद्धो वर्तते। अतः सप्तभिन्नभिन्नोऽपि अप्रसिद्धः, तस्य प्रतियोगिनः अप्रसिद्धत्वात्। अत एव सप्तान्यतमत्वस्य अर्थः 'द्रव्यादिसप्तप्रतियोगिकसप्तभेदकूटाभाववत्त्वं रूपान्यतमत्वं' इति गृह्यते। अत्र द्रव्यादिसप्तप्रतियोगिकभेदकूटाभाव इत्यर्थो 'द्रव्यादिसप्तपदार्थभिन्नः'। अत्र द्रव्यादिसप्तपदार्थभिन्न अष्टमपदार्थो न अपितु सप्तपदार्थानां पारस्परिकाभावो गृह्यते। यदभावः प्रसिद्धो अपि अस्ति। अयं पारस्परिकाभाव एव कूटाभावः कथ्यते। सम्प्रति अस्मात् अभावात् भिन्नः, अस्य अभावस्य प्रतियोगिनः सप्तपदार्थाः इति प्रसिद्धत्वात् 'यत्र यत्र पदार्थत्वं तत्र तत्र द्रव्यादिसप्तान्यतमत्वं' इति व्याप्तिर्निर्मीयते। अत अत्र 'सप्तग्रहणं' इति पदं द्रव्यादिसप्तप्रतियोगिकभेदकूटाभावानुसारेण 'पदार्थत्वं द्रव्यादिसप्तान्यतमत्वं व्याप्तमि'ति व्याप्त्यर्थकमस्ति।

अथ द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावाश्च सप्तैव पदार्थाः सन्ति। एतेष्वेव सम्पूर्णं जगदन्तर्निहितं न्यायवैशेषिके। जगतः भाषिकदृष्टिव्याख्यायै कृतं विभागमिदं भावाभावपदार्थयोः श्रेण्यामपि स्थातुं शक्नुमो वयम्। प्रथमो भावपदार्थो यस्मिन् द्रव्यगुणकर्मसामान्यविशेषसमवायाश्च विद्यन्ते, द्वितीये भागे अभावपदार्थः। अभावपदार्थस्य सत्ता काल्पनिकी न, अपितु भावपदार्थानां सत्ता इव यथार्था। यथा झामहोदयेन उक्तम्- "Both the bhāva-padarthas as well as the abāva-padarthas are equally real and hence existent and vastu (entity)."[88]

**आरेखीयप्रस्तुतिः –**

[88] Tarkasangrah, English translation with notes – page 4




**चित्र-क्रमाँकः ३**

( १.द्रव्य-पदार्थ-विभागोद्देशः )

**तर्कसंग्रहः** – तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥३॥

**उपन्यास: -** द्रव्यं लक्ष्यम्। द्रव्यत्वं लक्ष्यताऽवच्छेदकम् । समवायसम्बन्धेन गुणवत्त्वं द्रव्यसामान्यस्य लक्षणम्। अत्र समवायसम्बन्धानुपादाने कालिकसम्बन्धेन गुणवत्त्वस्य ध्वंसे सत्त्वात् अतिव्याप्तिः, अतस्तदुपादानम्। उत्पन्न-विनष्टे द्रव्ये समवायसम्बन्धेन गुणवत्त्वाभावादतिव्याप्तिः, अतो गुण-समानाधिकरण-पदार्थ-विभाजकोपाधिमत्त्वस्य विवक्षितत्वात्। इत्यभिप्रायेण द्रव्यविभागमाह 'तत्र' इत्यादिना। तत्र = पदार्थेषु मध्ये। इत्यर्थः।

किन्तल्लक्षणम्? दूषण-त्रय-रहित-धर्मवत्त्वम्। कानि दूषणानि? अव्याप्ति-अतिव्याप्ति असम्भवानि। १.अव्याप्तिर्लक्ष्या, अव्याप्तित्वं लक्ष्यताऽवच्छेदकम्। लक्ष्यैकदेशावृत्तित्वं लक्षणम्, यथा द्रव्यस्य रूपवत्त्वम्, लक्ष्यैकदेशात्मन्यभावात्। २. अतिव्याप्तिर्लक्ष्या, अतिव्याप्तित्वं लक्ष्यताऽवच्छेदकम्। लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वं लक्षणम्। यथा द्रव्यस्य प्रमेयत्वम् । लक्ष्यवृत्तिमात्रमुक्तं चेत्? लक्षणेऽतिव्याप्तिः अतः 'अलक्ष्यवृत्तित्वम्' उक्तम्।

अलक्ष्यवृत्तित्वमात्रमुक्तं चेत्? असम्भवेऽतिव्याप्तिः, अतः सति अन्तम्। ३.असम्भवो लक्ष्यः, असम्भवत्वं लक्ष्यताऽवच्छेदकम्। लक्ष्यमात्रावृत्तित्वं लक्षणम्। यथा द्रव्यस्य गुणत्वम्।

'एतद्दूषण-त्रय-रहित-धर्मवत्त्वं लक्ष्यताऽवच्छेदक-सम-नियतत्वम्।' इति यावत्। समनियतत्त्वं च लक्ष्यतावच्छेदक-व्याप्यत्वे[व्यापकत्वे][89] सति लक्ष्यताऽवच्छेदकव्यापकत्वम्। अस्ति हीदं लक्षणम्- 'गुणवत्त्व-रूपलक्षणे लक्ष्यतावच्छेदकीभूत-द्रव्यत्वाधिकरण-वृत्ति-लक्षणताघटकीभूत-समवाय-सम्बन्धाव- च्छिन्न-प्रतियोगिताको योऽभावो - नहि गुणात्यन्ताभावः, अपितु गुणवत्वात्यन्ताभावः तत्प्रतियोगित्वं गुणत्वे, अप्रतियोगित्वं गुणे, इति व्यापकत्वं सिद्धम्। व्यापकत्वं च लक्ष्यताऽवच्छेदकीभूत-द्रव्यत्व-सामानाधिकरण्यम्। तच्च गुणेऽस्ति। इति लक्षणसमन्वयः।

व्यवहारस्य लक्षणत्वं व्यावर्तकस्य। व्यावर्तकस्यैव इति चेत् ? अव्यावर्तकीभूताभिधेयत्वादावति- व्याप्तिः,तत्रापि लक्ष्यतावच्छेदक-सम-नियतत्वस्य सत्त्वात्। एवं व्यावृत्तावपि बोध्यम्। लक्षणस्य व्यावृत्तिः व्यवहारो वा प्रयोजनम्। आद्यपक्षे व्यावृत्तिभिन्नत्वे सति, अभिधेयभिन्नत्वे सति, लक्ष्यताऽवच्छेदक-सम-नियतत्त्वं लक्षणस्य लक्षणम्। द्वितीये तु तद्भिन्नत्वं न देयम्, व्यवहारप्रयोजनत्वस्य तयोरपि सत्त्वात्।

ननु दशम-द्रव्यस्य तमसः सत्त्वात् "नवैव" इत्ययुक्तम्। इति चेत् ? न, तमसो द्रव्यत्वे किम्मानम् ? प्रत्यक्षं वा उत अनुमानम्? नाद्यः तमसि द्रव्यत्वं प्रत्यक्षसामग्र्या न केनाप्यनुभूयते। न द्वितीयः तमः पक्षो, द्रव्यत्वं साध्यते, रूपवत्त्वात् कर्मवत्त्वाद्वा हेतुः, रूपवत्ताप्रतीतिस्तु भ्रान्तिरेव-तदभाववति तत्प्रकारकत्वात्, कर्मवत्ता-प्रतीतिस्तु आलोकोपाधिकी भ्रान्ति-नौका-गामिनस्तटस्थ-वृक्ष-गमन-प्रतीतिवत्। इति "नवैव" इति सिद्धम्॥ ३॥

**हिन्द्यनुवादः -** यहाँ द्रव्य लक्ष्य है। द्रव्यत्व लक्ष्यता-अवच्छेदक है। समवाय सम्बन्ध से 'गुण' जिसमें रहता है वही द्रव्यसामान्य का लक्षण है। लक्षण में समवाय सम्बन्ध के न ग्रहण करने

---

[89] यद्यपि शिवनारायणशास्त्रिणा अत्र व्यापकत्वमुक्तम्, किन्तु सिद्धान्तानुसारन्तु एवं प्रतीयते यदत्र व्याप्यत्वेन एव अर्थ- संगतिः। कालीपदतर्काचार्येणापि समनियतत्वस्य लक्षणे व्याप्यत्वमेवोक्तम् – 'लक्ष्यस्य असाधारणो धर्मश्च लक्ष्यतावच्छेदक- समनियतो धर्मः। स च प्रकृतलक्ष्यतावच्छेदकव्याप्यः सन् प्रकृतलक्ष्यतावच्छेदकव्यापकः।' नव्यन्याभाषाप्रदीपपरिशिष्टः

पर कालिक सम्बन्ध से 'गुणवत्त्व' का ध्वंस में अतिव्याप्ति होगी, अतः यहाँ समवाय सम्बन्ध का ग्रहण किया गया है। शीघ्र ही उत्पन्न होकर विनष्ट हुए द्रव्य में समवाय सम्बन्ध के द्वारा गुणवत्त्व का अभाव होने से अव्याप्ति दोष होगा, अतः गुण के समानाधिकरण पदार्थ के विभाजकोपाधिमत्त्व अर्थात् द्रव्यत्व की विवक्षा होने से यह दोष नहीं होगा। इसी अभिप्राय से द्रव्य पदार्थ का विभाग किया गया है। यहाँ तत्र से तात्पर्य 'पदार्थों के मध्य' है।

लक्षण का लक्षणविचार - लक्षण क्या है? तीन प्रकार के दोषों से रहित धर्म लक्षण है। दोष कौन-कौन से है? अव्याप्तिदोष, अतिव्याप्तिदोष तथा असम्भवदोष लक्षण के ये तीन दोष है। १. अव्याप्ति का लक्षण है- 'लक्ष्य के एक देश में न रहना'(लक्ष्यैकदेशावृत्तित्वं लक्षणम्)। यहाँ अव्याप्ति लक्ष्या है, अव्याप्तित्व लक्ष्यता-अवच्छेदक है। जहाँ लक्षण लक्ष्य के एक देश में न रहे, वहाँ अव्याप्ति दोष होता है। जैसे – द्रव्य का रूपवान् होना। यहाँ लक्षण का लक्ष्य के एक देश में ही होने से, स्वयं में ही अभाव है। २. अतिव्याप्ति लक्ष्या है। अतिव्याप्तित्व लक्ष्यता-अवच्छेदक है। अतिव्याप्ति दोष का लक्षण है – 'लक्ष्य में रहते हुए अलक्ष्य में भी रहना' अतिव्याप्ति दोष का लक्षण है (लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वं लक्षणम्)। जैसे – द्रव्य का 'प्रमेयत्व' से युक्त होना। यदि इस लक्षण में 'लक्ष्यवृत्तित्व' मात्र कहा जाता तो 'लक्षण' में अतिव्याप्ति होती,अतः 'अलक्ष्यवृत्तित्व' भी कहा गया है। 'अलक्ष्यवृत्तित्व' मात्र कहने पर 'असम्भव' में अतिव्याप्ति होती, इसीलिए लक्ष्यवृत्तित्वपद को भी लक्षण में रखा गया है। ३. असम्भव लक्ष्य है। असम्भवत्व लक्ष्यता-अवच्छेदक है। इसका लक्षण है - जो लक्ष्य मात्र में ही न रहे वह असम्भव दोष है (लक्ष्यमात्रावृत्तित्वं लक्षणम्)। जैसे – द्रव्य में 'गुणत्व' धर्म का होना।

इन तीनों दोषों से रहित असाधारण धर्म ही लक्षण कहलाता है। यह असाधारण धर्म लक्ष्यता -अवच्छेदक के समनियत अर्थात् समान अधिकरण में रहने वाला होता है। और यह समनियतत्व (असाधारणधर्म) लक्ष्यता अवच्छेदक के व्याप्य होने पर लक्ष्यता अवच्छेदक का व्यापक भी होता है। इसको निम्न उदाहरण के माध्यम से सिद्ध किया गया है – "गुणवत्त्व अर्थात् गुण रूप लक्षण में (यहाँ गुण रूप लक्षण इसलिए कहा गया क्योंकि गुण द्रव्य का लक्षण है तथा द्रव्य लक्ष्य है) लक्ष्यता-अवच्छेदक द्रव्यत्व के अधिकरण में अर्थात् द्रव्य में रहने वाली लक्षणता (लक्ष्य में ही लक्षण के रहने से परम्परा सम्बन्ध से लक्षणता भी द्रव्य में ही

रहती है) के घटकीभूत समवाय सम्बन्ध से अवच्छिन्न प्रतियोगिता वाला जो अभाव है, वह द्रव्यत्व के प्रतियोगी गुणत्व में है न कि अप्रतियोगी गुण में।" इसका आशय यह है कि द्रव्य में समवाय सम्बन्ध से 'गुण' का अत्यन्ताभाव नहीं है अपितु 'गुणत्व' का अत्यन्ताभाव है। इस प्रकार लक्ष्यता-अवच्छेदक द्रव्यत्व के समनियत का अर्थात् गुण (असाधारणधर्म) का व्यापकत्व सिद्ध हुआ।

व्यापक का लक्षण - लक्ष्यता के अवच्छेदक भूत धर्म द्रव्यत्व के समानाधिकरण में रहने वाला व्यापक है और यह व्यापकत्व गुण में है (अतः गुण लक्ष्यता अवच्छेदक द्रव्यत्व का व्यापक है)। (यह प्रसङ्ग भी लक्षणपरीक्षा के अन्तर्गत है, संभवतः यहाँ पर पुनः लक्षण का भिन्न स्वरूप प्रस्तुत कर उसकी परीक्षा की गई है ) व्यवहार रूप व्यावर्तक ही लक्षण है। यहाँ व्यावर्तक का ग्रहण न करने पर अव्यावर्तकीभूत अभिधेयात्वादि (जो कि लक्षण है, उपर पदार्थ का 'लक्षण' अभिधेयत्व ही दिया गया है) में अतिव्याप्ति हो जाएगी, क्योंकि वहाँ भी लक्ष्यतावच्छेदक समनियतत्व है। अतः 'व्यावर्तक' पद का उपादान किया गया है। व्यावृत्ति एवं व्यवहार ये लक्षण के दो प्रयोजन भी माने गये है। व्यावर्तक मात्र को ही लक्षण मानने पर अर्थात् लक्षण का प्रयोजन मानने पर लक्षण में 'व्यावृत्ति से भिन्न (व्यावृत्तिरूपप्रयोजन से भिन्न, क्योंकि व्यावृत्ति प्रयोजन के अन्तर्गत भी परिगणित होने से लक्षण एवं प्रयोजन दोनों में ऐक्य, अतः 'व्यावृत्तिभिन्न' कहना चाहिए ) तथा अभिधेयत्व से भिन्न लक्ष्यतावच्छेदक समनियत्व' ही लक्षण का लक्षण ऐसा कहना चाहिए। यदि 'व्यवहार' मात्र लक्षण स्वीकार किया जाए तो 'इन दोनो से भिन्न' इसका कथन नहीं करना पडेगा क्योंकि व्यवहाररूपप्रयोजनत्व का इन दोनों में होने से अर्थात् व्यवहार करने में अभिधेयत्व तथा व्यावर्तकत्व दोनों का ग्रहण हो जाता है। क्योंकि व्यावर्तन एवं अभिधान के बिना व्यवहार ही नहीं हो सकता।

यदि ऐसी शङ्का हो कि दशवाँ द्रव्य 'तमस्' के होने से द्रव्य नव ही है,ऐसा कहना अयुक्त है तो यह उचित नहीं है। 'तमस्' के द्रव्यत्व में क्या प्रमाण है, प्रत्यक्ष अथवा अनुमान? इनमें प्रथम तो अमान्य है क्योंकि तम में द्रव्यत्व का प्रत्यक्षसामग्री से किसी के भी द्वारा अनुभव नहीं किया जाता है। द्वितीय प्रमाण भी यहाँ असिद्ध है क्योंकि तम में 'द्रव्यत्व' की अनुमिति में तम पक्ष है, द्रव्यत्व साध्य है रूपवान् (गुणवान्) तथा कर्मवान् होना हेतु है। इनमें प्रथम हेतु तम का रूपवान् होना तो भ्रान्ति ही है क्योंकि जिस वस्तु में रूप का अभाव है उसमें रूप

का ज्ञान होने से। तम का कर्मवान् होना, यह प्रतीति भी उसी प्रकार आलोकोपाधिक भ्रान्ति है जैसे नौकागामी व्यक्ति को तट पर स्थित वृक्ष भी गतिमान् प्रतीत होते है। इस प्रकार तम में द्रव्यत्व की असिद्धि से द्रव्य नव ही है, ऐसा सिद्ध हुआ।

## विश्लेषणम्

**द्रव्यलक्षणप्रकरणम् -** सप्तपदार्थेष्वन्येषां पदार्थानामाश्रयत्वात् द्रव्यं सर्वप्रथमः सर्वप्रधानञ्च पदार्थो वर्तते।[90] सामान्यतो लोके द्रव्यपदस्य प्रयोगः सामग्री, वस्तु, धनं, मदिरा, लज्जा च आदिषु अर्थेषु भवति[91] किन्तु न्यायवैशेषिके द्रव्यमेकं पारिभाषिकपदं वर्तते। उपन्यासकारेण द्रव्यस्य लक्षणम् एवं दीयते- **"समवायसम्बन्धेन गुणवत्त्वं द्रव्यसामान्यस्य लक्षणम्"।** समवायसम्बन्धस्तु नित्यः, अतो नित्यरूपेण गुणो यस्मिन् तिष्ठति तत्द्रव्यम्। लक्षणे गुणस्थाने 'गुणवत्त्वं' पदं प्रयुक्तम्। यतोहि गुणवत्त्वस्य तात्पर्यमपि गुण एव। नव्य-न्याये **"विशिष्टात् भावप्रत्ययः विशेषणम् अभिधत्ते"** इति नियमः प्रसिद्धः।[92] यो विशेषणसहितो सो विशिष्टः। यदा विशिष्टेन सह कश्चित् भावप्रत्ययः (त्व-तलादिः) संयुज्यते तदा विशिष्टो विशेषणमेव भवति। गुणवत्त्वं 'गुणवत्' इति पदेन निर्मितम्। 'गुणवत्' पदमिदं विशिष्टं, गुणविशेषणत्वात्। सम्प्रति 'गुणवत्' इत्यस्मिन् पदे त्वभावप्रत्ययं संयुज्य गुणवत्त्वं निर्मीयते। अतो गुणवत्त्वं गुणस्यैवाभिधानं करोति। नव्य-न्यायशैल्यां विरचितत्वात् उपन्यासटीकायाम् एतादृशः प्रयोगो दृश्यते।

शास्त्रे उद्देशलक्षणातिरिक्तं परीक्षाया अपि विधानं वर्तते। शास्त्रस्य अनया रीत्या टीकाकारेणापि द्रव्यलक्षणात् परं तस्य परीक्षा कृता। **लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा**[93] अर्थात् लक्ष्यस्य यल्लक्षणं दीयते तत् लक्ष्योपरि घटितं न वा तथा अव्याप्ति-अतिव्याप्ति-असम्भवदोषेभ्यश्च रहितं भूत्वा निर्दुष्टं न वेति अस्य परीक्षणमेव परीक्षा। द्रव्यलक्षणे समवायम्बन्धेन अतिव्याप्तिदोषस्य निराकरणं कृतम्। यदि पदमिदं लक्षणे न भवति तर्हि ध्वंसाभावोऽपि द्रव्यं कथ्यते यतोहि तत्रापि कालिकसम्बन्धेन गुणः तिष्ठति।

---

90 'आदौ द्रव्यस्योद्देशः सर्वाश्रयत्वेन प्राधान्यत्वात्' – न्यायकन्दली पृ० १७


91 संस्कृत-हिन्दी-कोश, पृ० ४८०

92 व्याकरणेऽपि 'तस्य भावस्त्वतलौ', मतुबन्ताद्विहितो भावप्रत्ययः प्रकृतमर्थं गमयतीति न्यायपक्षमेव सिद्धयति। - श्रीनिवासमुखोल्लासिनी - पृथिवीनिरूपणम्


93 पदकृत्यम् – मङ्गलाचरणप्रकरणम्

अतः ‘समवायसम्बन्ध’ इत्युक्ते सति अन्यसम्बन्धानां निराकरणत्वात् ध्वंसे द्रव्यलक्षणस्य अतिव्याप्तिर्न भवति। ध्वंसे गुणः कालिकसम्बन्धेन वर्तते न तु समवायसम्बन्धेन।

**आरेखीयप्रस्तुतिः –**




**चित्र - क्रमाङ्कः ४**




**चित्र - क्रमाङ्कः ५**

पुनर्लक्षणेऽव्याप्तिदोषो निराक्रियते। नैयायिकानां सिद्धान्तानुसारम् उत्पन्नद्रव्यं क्षणं निर्गुणं तिष्ठति, अतो द्रव्येऽपि समवायसम्बन्धेन गुणस्य अभावादव्याप्तिदोषो भवति लक्षणे। एतस्य दोषस्य निराकरणाय उक्तं यत् गुणस्य समानाधिकरणे पदार्थविभाजकोपाधिमत्त्वस्य अर्थात् द्रव्यत्व- जातिमत्त्वस्य वा सत्वादव्याप्तिदोषो न संभवति। अर्थात् गुणसमानाधिकरणे सत्ताभिन्नजातिमत्त्वं द्रव्यत्वम् इति कथनेन अव्याप्तिदोषो निवार्यते।[94] अत्र सत्ताभिन्नस्य तात्पर्यं परसामान्यभिन्नत्वम्। द्रव्यगुणकर्मषु त्रिषु वर्तमानं परसामान्यं सत्तारूपं वा अधिकदेशवृत्तित्वम्। एतस्यापेक्षया द्रव्य-गुणादौ द्रव्यत्वमादिकं न्यूनदेशवृत्तित्वम् अपरसामान्यत्वं वा। अतो द्रव्यत्वस्य सत्ताभिन्नत्वमुक्तं। न्यायकोशे विभाजकोपाधिमत्त्वस्य अर्थो जातिरेव उल्लिखितः। सामान्यधर्मात् साक्षाद्व्याप्य धर्म एव विभाजकोपाधिः कथ्यते।[95] उपर्युक्त गुणलक्षणस्य अव्याप्तिनिराकरणे प्रयुक्तवाक्ये 'पदार्थविभाजकोपा- धिमत्त्वमुक्तम्। अत्र सामान्यधर्मः 'पदार्थत्वं' व्यापकं तथा पदार्थत्वेन सह साक्षाद्व्याप्यधर्माणि द्रव्यत्वं गुणत्वमादिः वर्तते। अतो द्रव्यलक्षणे पदार्थविभाजकोपाधिर्द्रव्यत्वमेव। अत्र नव्य-न्यायशब्दावल्याः प्रभावात् अस्य पदस्य प्रयोगः कृतः। अतो द्रव्यस्येदं लक्षणम् अव्याप्त्यादिदोषैरस्पृष्टत्वान्निर्दुष्टम्। अनेन प्रकारेण उपर्युक्ताभिप्रायेण सप्तपदार्थेषु विभागं कृतम्।

एतदतिरिक्तं द्रव्यस्य कर्मवत्त्वं,द्रव्यत्वजातिमत्त्वं,समवायिकारणत्वम् इति अन्याः परिभाषा अपि दीयन्ते वैशेषिकाचार्यैः।[96] किन्तु दर्शनाचार्यैः 'समवायिकारणत्वमेव' द्रव्यस्य निर्दुष्टलक्षणम् स्वीक्रियते अन्यापेक्षया।[97] यत्समवायसम्बन्धेन कारणं, तत्तु समवायिकारणम्। उत्पत्त्यै कस्यचित् धारस्य आवश्यकता भवति यस्मिन् समवेतं भूत्वा कार्यं समुत्पद्यते। अयञ्चाधारो गुणादिर्न अपितु द्रव्यम्। यतोहि द्रव्यमेव अन्येषां पदार्थानामाश्रयम्। अतः समवायिकारणं सर्वदा द्रव्यमेव।

---

94 तट्टीकानां च समीक्षात्मकमध्ययनम् – पृ० ११

95 सामान्यधर्मसाक्षाद्व्याप्यधर्मः विभाजकोपाधिः। यथा ज्ञानविभाजकोपाधिः भ्रमत्वं प्रमात्वञ्च। न्यायकोशः – पृ० ७७१

96 क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम् – वैशेषिकसूत्रम् १/१/१५
द्रव्यजातिमत्त्वं गुणवत्त्वं समवायिकारणत्वं वा द्रव्यसामान्यलक्षणम्। पदकृत्यम् - द्रव्यपदार्थविभागोद्देशप्रकरणम्


97 विस्तृतविवरणम् – वैशेषिक दर्शन में पदार्थ-निरूपण , पृ० ४४-४५

**लक्षणलक्षणप्रकरणम् -** प्रत्येकलक्ष्यस्य लक्षणमवश्यमेव भवति किन्तु लक्षणस्य लक्षणं किम्? अस्मिन् विषये टीकाकारेण विचार्यते यत् **"दूषणत्रयरहितम् असाधारणधर्मवत्त्वञ्च यद् भवति तदेव लक्षणम्"**। दूषणत्रयनाम अव्याप्तिदोषः, अतिव्याप्तिदोशोऽसम्भवदोषश्च। व्याप्तिशब्देन सह 'नञ्' समासात् निर्मीयते अव्याप्तिः, न व्याप्ति इत्यव्याप्तिः। **'लक्ष्यैक-देशावृत्तित्वम्' इति अव्याप्तिदोषस्य लक्षणम्।** यदा लक्षणं लक्ष्यस्य एकस्मिन् भागे तु तिष्ठति किन्तु अपरस्मिन् भागे न अर्थात् लक्षणं स्वलक्ष्यमपि सम्पूर्णतया व्याप्तं न करोति तदा तल्लक्षणं अव्याप्तिदोषयुक्तम् इति। यथा - द्रव्यस्य रूपवत्त्वम्। अत्र रूपवत्त्वं लक्षणं द्रव्यञ्च लक्ष्यः। अर्थात् रूपं समवायसम्बन्धेन यस्मिन् तिष्ठति तदेव द्रव्यम् इति द्रव्यस्य लक्षणम्। इदं लक्षणं न निर्दुष्टं यतोहि दृश्यते यत् द्रव्ये समवायसम्बन्धेन एव रस-गुण-स्पर्शादयः गुणा अपि तिष्ठन्ति अतोऽस्य लक्षणस्य लक्ष्यस्यैकदेशे अर्थात् रूपनामके गुणे तु भाव किन्तु अपरदेशे (रसगन्धस्पर्शादिषु गुणेषु) तु अभावः। अत्र लक्षणस्य लक्ष्यैकदेशात्मन्यैव अभावादव्याप्तिदोषः।

लक्षणं यदि स्वलक्ष्यमतिक्रम्य अलक्ष्ये अपि लक्ष्यते तर्हि अतिव्याप्तिदोषो भवति। अस्य लक्षणं **'लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वम्'।** यथा- द्रव्यस्य प्रमेयत्वम्। द्रव्यं लक्ष्यं प्रमेयत्वं लक्षणम्। प्रमेयत्वं द्रव्ये तु वर्तत एव किन्तु द्रव्यातिरिक्तं गुणकर्मादिपदार्थेष्वपि, अतो द्रव्यस्येदं लक्षणं अतिव्याप्तिदोषग्रस्तम्। अतिव्याप्तेर्लक्षणे यदि 'लक्ष्यवृत्तित्वमात्र'मुच्यते तर्हि लक्षणस्य लक्षणे अस्यातिव्याप्तिर्भवति यतोहि लक्ष्यमात्रे यस्तिष्ठति तत्तु लक्षणम्। अतोऽतिव्याप्तेर्लक्षणे अलक्ष्यवृत्तित्वमपि उक्तम्। लक्षणे 'अलक्ष्यवृत्तित्वं' मात्रमुक्तौ असम्भवदोषेऽतिव्याप्तिः। यतोहि असम्भवदोषः कदापि लक्ष्ये न तिष्ठति अपितु अलक्ष्ये एव। अतोऽसम्भवेऽतिव्याप्तिवारणाय लक्ष्यवृत्तित्वे सत्यपि उक्तम्। यदा लक्षणं स्वलक्षणे संभवत्येव न तदा असंभवदोषो जायते। **"लक्ष्यमात्रावृत्तित्वं असंभवदोषस्य लक्षणम्"।** अस्मिन् दोषे लक्षणं लक्ष्यस्य कस्मिंश्चिपि भागे न वर्तते। यथा - द्रव्यस्य गुणत्वम्। द्रव्यं लक्ष्यं गुणत्वं लक्षणम्। अत्र गुणत्वं कदापि द्रव्ये भवितुम् एव न शक्नोते यतोहि गुणत्वं समवायसम्बन्धेन गुणस्य धर्मो वर्तते न तु द्रव्यस्य। अतो गुणत्वस्य द्रव्ये अवृत्तित्वादसंभवदोषः जायते अस्मिनुदाहरणे। एवमेतेषां दोषत्रयाणां परिहारः यस्मिन् भवति तदेव असाधारणधर्मयुक्तं लक्षणमिति। दोषत्रयरहितधर्मवत्त्वं लक्षणं लक्ष्यतावच्छेदकस्य समनियतं भवति। अर्थात्

यस्मिनधिकरणे लक्ष्यतावच्छेदकस्तिष्ठति तस्मिन्नेवासाधारणधर्मोऽपि। समनियतस्य परिभाषेयं प्रदत्ता टीकायाम् - **'लक्ष्यताऽवच्छेदकव्याप्यत्वे सति[98] लक्ष्यताऽवच्छेदक - व्यापकत्वम्'।** अर्थात् यल्लक्षणं भवति तत्तु लक्ष्यताऽवच्छेदस्य व्याप्ये सति तस्य व्यापकं भवति। कालीपदतर्काचार्येणापि इदमेव कथ्यते।[99]

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः – ६**

**लक्षणव्यापकत्वसिद्धिः -** टीकाकारेण निम्नोदाहरणमाध्यमेन अस्य सिद्धिः क्रियते - गुणवत्त्वं गुणो वा द्रव्यस्य लक्षणं तथा द्रव्यं लक्ष्यमिति,अत्रापि द्रव्यत्वं लक्ष्यतावच्छेदकम्। गुणरूपलक्षणे तस्य आहृतधर्मः लक्षणता वर्तते। अथ चेयं लक्षणता लक्ष्यताया अवच्छेदकद्रव्यत्वस्यैव अधिकरणे तिष्ठति। लक्षणमिदं लक्ष्ये समवायसम्बन्धेनास्ति। सम्बन्धोऽपि अवच्छेदको भवति अतो द्रव्ये/ लक्ष्ये लक्षणताया घटकीभूतेन समवायसम्बन्धेन अवच्छिन्नः प्रतियोगिताकस्य गुणत्वस्य अत्यन्ताभावः,न तु गुणस्य अभावः। गुणस्य तु समवायसम्बन्धेन द्रव्यत्वस्य समानाधिकरणेऽर्थात् द्रव्ये भाव एव, अभावस्तु गुणत्वस्य। यतोहि गुणत्वं समवायसम्बन्धेन गुणे तिष्ठति,द्रव्ये न। यत्र-यत्र गुणस्तत्र तत्र द्रव्यत्वं, समानाधिकरणत्वात्। अतः द्रव्यत्वस्य अप्रतियोगी गुणस्तथा प्रतियोगि गुणत्वं वर्तते। अनेन


---

98 टीकायां व्यापकत्वे इत्युक्तम्, किन्तु द्वयोरेव स्थाने व्यापकत्वस्य उपस्थापनाद् अर्थस्य संगतिः न,कालीपदतर्काचार्येणापि स्वग्रन्थे लक्ष्यताऽवच्छेदकव्याप्यत्वे सति लक्ष्यताऽवच्छेदकव्यापकत्वम् समनियतत्त्वमुक्तम्।

99 लक्ष्यस्य असाधारणो धर्मश्च लक्ष्यतावच्छेदकसमनियतो धर्मः। स च प्रकृतलक्ष्यतावच्छेदकव्याप्यः सन् प्रकृतलक्ष्यतावच्छेदकः। नव्यन्यायभाषाप्रदीपः - परिशिष्टः

प्रकारेण गुणस्य अर्थात् दूषणत्रयरहितधर्मवत्त्वस्य लक्षणस्य लक्ष्यतावच्छेदकापेक्षया व्यापकत्वं सिद्धम्। व्यापकत्वं लक्षणे एव भवति यतोहिव्यापकत्वस्य परिभाषैवास्ति यत् **'लक्ष्यताऽवच्छेदकीभूतद्रव्यत्वसमानाधिकरण्यम्'**।[100] लक्ष्यताया अवच्छेदकद्रव्यस्य समानाधिकरणे/द्रव्ये तु गुणस्यैव वृत्तिः तथा गुणस्तु लक्षणमेव। अतो लक्षणं व्याप्यरूपलक्ष्याताऽवच्छेदकस्य व्यापकम्। अनेन प्रकारेण लक्षणे लक्ष्यताऽवच्छेकसमनियतत्त्वस्य समन्वयः कृतष्टीकाकारेण। एतामेव प्रक्रियामुपन्यासकारो नव्यन्याशब्दावल्यां प्रदर्शितवान् "गुणवत्त्वरूपलक्षणे - लक्ष्यताऽवच्छेदकीभूत – द्रव्यत्वाधिकरणवृत्ति – लक्षणताघटकीभूत – समवाय- सम्बन्धावच्छिन्न - प्रतियोगिताको यो अभावो - नहि गुणात्यन्ताभावः, अपितु गुणत्वात्यन्ताभावः - तत्प्रतियोगित्वं गुणत्वे,अप्रतियोगित्वं गुणे, इति व्यापकत्वं सिद्धम्।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः – ७**

---

100 उपन्यासटीका - द्रव्यलक्षणप्रकरणम्

लक्षणस्य दोषत्रयविवेचनान्तरं लक्षणस्य प्रयोजनं प्रतिपाद्यते। व्यावर्तकं व्यवहारश्च लक्षणस्य प्रयोजनद्वयम्। व्यावर्तकस्य तात्पर्यं लक्षणस्येतरभेदज्ञानम्।[101] कस्यचिदपि पदार्थस्य सामान्यलक्षणं तु तत्प्राकृतिकधर्म एव। प्राकृतिकधर्मोऽन्यविजातीयेभ्यः तस्य व्यावर्तनं करोति। अतः लक्षणस्य प्रथमप्रयोजनं व्यावर्तकत्वं वर्तते किन्तु प्राकृतिक धर्मस्तु जातिस्वरूपः, जातिना तु पदार्थस्य व्यवहारः संभवत्येव न। अतो हेतोर्व्यवहाराय पदार्थस्य विशेषलक्षणमपि क्रियते शास्त्रेषु। इदं विशेषलक्षणं पदार्थस्य असाधारणधर्मः कथ्यते। अत एव इतरभेदज्ञानाय वस्तुव्यवहाराय च लक्षणस्य व्यावृत्तिः व्यवहारो वा प्रयोजनद्वयं परिगणितम्। एतयोर्व्यावर्तकमात्रं लक्षणस्य प्रयोजनं गृह्यते चेत् लक्षणस्य लक्षणेऽतिव्याप्तिः। यतोहि लक्ष्ये इतरभेदानुमानसाधकं व्यावर्तकं भवति। व्यावर्तकमेव लक्षणम् अर्थात् लक्षणस्य प्रयोजनम्। लक्षणं लक्ष्यतावच्छेदकसमनियतत्वं भवति। अतो व्यावृत्तेरभिधेयत्वादेश्च (पदार्थस्य लक्षणं) लक्ष्यतावच्छेदकसमनियतत्वस्य सत्वात्, लक्षणलक्षणस्य अर्थात् व्यावर्तकस्य अत्रातिव्याप्तिर्भवति।

यदि व्यवहारमात्रं लक्षणस्य लक्षणम् अथवा लक्षणप्रयोजनं मन्यते चेत् नेयमतिव्याप्तिर्यतोहि व्यवहारे व्यावृत्तेस्तथा अभिधेयत्वादेर्ज्ञानमेव साधनं भवति। अतो व्यावृत्तिरभिधेयत्वादिश्च लक्षणेऽन्तर्भाव्येते तदा व्यावृत्तिभिन्नत्वम् अभिधेयभिन्नत्वञ्च इति लक्षणलक्षणे प्रयोजने वा न दीयते यथा व्यावृत्तिमात्रं लक्षणप्रयोजनम् उक्ते सति आसीत्।

तर्कसंग्रहे द्रव्यपदार्थस्य पृथ्वी-जल-तेज-वायु-आकाश-काल-दिक्-आत्मा-मनश्च इति नव भेदः कृतः। तत्र नव इति पदेन सह 'एव' शब्दः संयुक्तः। 'एव' पदं निश्चयात्मिकताया बोधं कारयति। अस्य पदस्य श्रवणमात्रेणैव अन्येषां परिवर्जनं सूच्यते।[102] अत्रापि द्रव्याणि नवसंख्यकानि इति 'नवैव' पदेन बोध्यते,नाधिकानि न तु न्यूनानि इति निश्चितानि। **तमोद्रव्यत्वस्य निराकरणम् –** किन्तु मीमांसकैः तमोऽपि दशमद्रव्यरूपेण स्वीक्रियते,तमसि द्रव्यत्वात्। दीपिकान्यायबोधिन्योर्टीकयोरपि उत्थापितोऽयं प्रसङ्गः।[103] उपन्यासकारेण अस्वीक्रियते तमसि द्रव्यत्वं, मानाभावात्। प्रत्यक्षसाग्र्या अर्थात् इन्द्रियसन्निकर्षस्य

---

[101] लक्षणस्य फलम् इतरभेदज्ञानम्। पदकृत्यम् – मङ्गलाचरणप्रकरणम्


[102] 'श्रौतीपरिसंख्या विधिः' – मन्त्रविभागः, अर्थसंग्रहः

[103] दीपिका – द्रव्यविभागप्रकरणम्

न्यायबोधिनी - तत्रैव

अभावत्वात् प्रत्यक्षप्रमाणेन न केनापि अनुभूयते तमसि द्रव्यत्वम्। प्रमाणद्वितीयन्त्वनुमानम्, अत्र रूपाश्रयत्वेन कर्माश्रयत्वेन च तमसि द्रव्यत्वमनुमीयते। तमसि द्रव्यत्वमनुमानाय तमः पक्षं, द्रव्यत्वं साध्यं, रूपवत्वात् कर्मवत्वात् वा हेतुः दीयते। यथा द्रव्ये गुणक्रिये तथैव तमसि। यतोहि 'नीलं तमश्चलति' इत्यबाधितप्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च तमसः द्रव्यत्वं सिद्धमिति दीपिकायाम्।[104] आकाश-काल-दिक्-आत्मा-मन-वायोश्च रूपरहितत्वात् तमसः न एतेषु षट्स्वन्तर्भावः,निर्गन्धत्वान्न पृथिव्यां तथा शीतोष्णस्पर्श- रहितत्वात् जलतेजसोरपि नान्तर्भावस्तमसः। अतस्तमसो दशमद्रव्यरूपेण सिद्धिः स्वत एव, इति न वाच्यम्। यतोहि तमोद्रव्यत्वस्य अनुमाने प्रयुक्तो हेतुः रूपवत्त्वात्तु भ्रान्तिरेव। दीपिकायां तमो तेजसोऽभाव उक्तः – **'तस्मात्प्रौढप्रकाशतेजःसामान्याभावस्तमः'।**[105] प्रौढप्रकाशकं यत् तेजोऽऽलोको वा तस्य सामान्याभाव एव तमः। तेजोऽभावस्तु न रूपवान् यतोहि एषः प्रकाशशून्यदेशे प्रकाशं विना गृह्यते तथैव तमोऽपि अतो न रूपवत् द्रव्यं तमः। रूपवद्द्रव्यस्य प्रत्यक्षं तु प्रकाशे आलोके वा तेजोयुक्तचक्षुरिन्द्रियेण जायते। तेजाभावे तु रूपाभावोऽतस्तमसि अपि रूपाभावोऽस्ति। अत्र नीलरूपस्य प्रत्ययो भ्रममात्रम्, अयथार्थज्ञानमिव तदभाववति तदप्रकारकत्वादर्थात् रूपाभाववति तमसि रूपस्य ज्ञानत्वात्।

**आरेखीयप्रस्तुतिः –**




**चित्र - क्रमाङ्कः ८**

104 दीपिका – द्रव्यविभागप्रकरणम्

105 दीपिका – द्रव्यविभागप्रकरणम्

न्यायकोशः – पृ० ३१९

तमसो द्रव्यत्वसिद्धौ प्रदत्तो द्वितीयहेतुः 'कर्मवत्वात्' अपि आलोकस्य उपाधिकारणात् भ्रान्तिरेव अस्ति। उपाधि धर्मस्य प्रकारः, न्याये धर्मस्य जाति उपाधिश्च भेदद्वयं वर्तते।[106] उप (समीपे) आदधाति (संक्रामयति) स्वीयं धर्मम् इति उपाधिः।[107] अपरसमीपस्थं भूत्वा तं धर्मं यः स्वस्योपरि आदधाति स उपाधिः। उपाधेः परिभाषा - **'व्यावर्तकः, वर्तमानं, क्रियानन्वयि उपाधिः'** इति प्रसिद्धः। य इतरभेदकः, उपस्थितस्तथा क्रियया सह असम्बद्धो भवति स उपाधिः कथ्यते। उपाधिविशेषणयोर्मध्येऽयमेव भेदो यत् विशेषणं क्रियान्वयि वर्तते किन्तूपाधिः क्रियानन्वयि – 'व्यावर्तकं, वर्तमानं, क्रियान्वयिविशेषणम्'।

'नीलं तमश्चलति' एवम्विधवाक्येषु चलनक्रियायाः सम्बन्धस्तमसा सह न अपित्वालोकेन सह भवति। यतोहि दीपस्यपसारणत्वात्, आलोकापसारणं विहितं न तु तमसः। तमसश्चचलनक्रियया सह अनन्वय- कारणादुउपाधिः तथा चेयमुपाधिः आलोकस्य धर्ममादधाति। अतस्तमसि कर्मप्रतीतिरालोको- पाधित्वात्भ्रमो यथा नौकागमनत्वात् तत्र स्थितपुरुषेण तटस्थाः वृक्षा अपि गमनवन्तः प्रतीयन्ते।

( २. गुण-पदार्थ-विभागोद्देशः )

**तर्कसंग्रहः–** रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्म-संस्काराश्चतुर्विंशतिर्गुणाः॥४॥

**उपन्यासः -** गुणो लक्ष्यः। गुणत्वं लक्ष्यताऽवच्छेदकम्। द्रव्यभिन्नत्वे सति कर्मभिन्नत्वे सति सामान्यवत्त्वं गुणस्य लक्षणम्। 'द्रव्यभिन्नत्वे सति सामान्यवत्त्वं..'इत्युक्तौ कर्मण्यतिव्याप्तिः, तदर्थं कर्मभिन्नत्वम् इत्युक्तम्। कर्मभिन्नत्वे सति सामान्यवत्त्वस्य द्रव्ये सत्त्वादतिव्याप्तिः, अतो द्रव्यभिन्नत्वम् इत्युक्तम् । द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वस्य ध्वंसे सत्वादतिव्याप्तिः,अतः समवायेन इत्यपि वक्तव्यम्। इति गुण-सामान्य-लक्षण-पूर्वकं विभागमाह 'रूप' इत्यादिना।
ननु मृदुत्व-कठिनत्वयोरतिरिक्त-गुणयोः सत्त्वात् चतुर्विंशत्येव इत्यनुपपन्नम् इति चेत् ? न,तयोरवयव-संयोग-विशेष-रूपत्वात् चतुर्विंशत्येव इति सिद्धम्॥४॥

---

106 धर्मश्च प्रथमतः द्विविधः जातिरुपाधिश्चेति। नव्यन्यायभाषाप्रदीपः - २

107 न्यायकोशः – पृ० १७७

**हिन्द्यनुवादः –** गुण लक्ष्य है। गुणत्व लक्ष्यता-अवच्छेदक है। 'द्रव्य एवं कर्म से भिन्न होते हुए, सामान्य से युक्त होना ही' गुण का लक्षण है। यदि लक्षण में 'द्रव्य से भिन्न तथा सामान्य से युक्त' इतना ही कहा जाता तो कर्म में अतिव्याप्ति हो जाती। अतः 'कर्मभिन्नत्व' कहा गया। इसी प्रकार 'कर्म से भिन्न तथा सामान्य से युक्त' यदि इतना ही कहा जाता तो द्रव्य में अतिव्याप्ति होती। अतः 'द्रव्यभिन्नत्व' कहा गया। 'द्रव्य-कर्मभिन्नत्व तथा सामान्यवत्त्व' कहने पर ध्वंस में अतिव्याप्ति होने लगेगी। इसलिए समवाय सम्बन्ध से सामान्यवान् है ऐसा भी कहना चाहिए। इस प्रकार गुण के सामान्य लक्षण से युक्त रूपादि का विभाग किया गया है।
मृदुत्व एवं कठिनत्व इन दो अतिरिक्त गुणों के होने से गुणों की संख्या चौबीस है, ऐसा कहना अनुचित है। यदि ऐसी शङ्का हो तो यह उपपन्न नहीं है क्योंकि 'मृदुत्व' एवं 'कठिनत्व' इन दोनों का अवयवों के साथ संयोग-विशेष के द्वारा रूपवान् होने से। अतः गुणों की संख्या चौबीस ही सिद्ध है।

## विश्लेषणम्

**गुणपदार्थविभागोद्देशः –** अन्नम्भट्टेन द्वितीयपदार्थगुणस्य संख्या एव उक्ता न तु लक्षणम्। उपन्यासे **'द्रव्यभिन्नत्वे सति कर्मभिन्नत्वे सति सामान्यवत्त्वं'** गुणलक्षणं कृतम्। द्रव्यकर्मपदार्थाभ्यां भिन्नः किन्तु सामान्येन अर्थात् जात्या युक्तो यः पदार्थः स गुणः। वैशेषिकसिद्धान्तानुसारं 'सामान्यं' सप्तपदार्थमध्ये द्रव्यगुणकर्मसु चैव भवति। यस्मिन् सामान्यं तिष्ठति तत्तु 'सामान्यवत्। द्रव्यकर्मातिरिक्तं गुण एव एवम्विधः पदार्थो वर्तते यः सामान्यवानस्ति। यदि 'द्रव्यभिन्नत्वे सति सामान्यवत्त्वं' गुणस्यैतदेव लक्षणं दीयते तर्हि कर्मण्यतिव्याप्तिं भूत्वा अतिव्याप्तिदोषः, कर्मणोऽपि सामान्यवत्त्वात्। अतो लक्षणे 'कर्मभिन्नत्वे सति' अभिहितम्। 'कर्मभिन्नत्वे सति सामान्यवत्त्वं' इति लक्षणमुक्तौ द्रव्येऽपि सामान्यवत्त्वं भूते सति गुणलक्षणस्य द्रव्येऽतिव्याप्तिवारणाय 'द्रव्यभिन्नत्वे सत्यपि' उक्तम्। अतः द्रव्यकर्मणोरपि सामान्यवत्त्वात्, उभौ परिहार्य गुणस्यैव सामान्यवत्त्वमुक्तम्। किन्तु टीकाकारेण पुनः 'द्रव्य-कर्मभिन्नत्वे सति सामान्यवत्त्वं' अस्मिन् गुणलक्षणेऽपि अतिव्याप्तिदोषस्य संभावना व्यक्ता,द्रव्यगुणकर्मभिन्ने ध्वंसे सामान्यवत्त्वस्य सत्वात्। ध्वंसेऽतिव्याप्तिवारणाय एतस्मिन् लक्षणे 'समवायसम्बन्धेन' इत्यपि कथनीयम्। यतोहि ध्वंसे

सामान्यं समवायेन न अपितु कालिकसम्बन्धेन तिष्ठति किन्तु गुणे तु समवायसम्बन्धेन। अतः 'समवाय' इति पदेन संभावितोऽतिव्याप्तिदोषोपि शम्यते टीकाकारेण।

अत्र शङ्का भवितुं शक्यते यत् टीकाकारेण गुणलक्षणे समवायसम्बन्धमनुक्त्वा अनन्तरं तस्योल्लेखं किमर्थः कृतः? इति चेत् न, आदौ लक्षणे समवायसम्बन्धस्यानवधानम्, ततः परं स्मरणत्वात् अन्यस्थाने समवायसम्बन्धस्य वर्णनमुल्लिखितम्। आचार्या एकबारं वाक्यानि लिखित्वा न निवर्तयन्तीति महाभाष्ये उक्तम्।[108] अतः अत्रापि लक्षणं निर्माय पुनर्न निवर्तितम्।

**शङ्कासमाधानम् -** गुणसंख्याविषये केचन् शंकां कुर्वन्ति यत् 'चतुर्विंशतिर्गुणाः' इत्ययुक्तम्। यतोहि मृदुत्वं कठिनत्वञ्च गुणद्वयमितोपि वर्तते। शङ्कामिमां निवारयन् टीकाकार उक्तवान्-यत् मृदुत्व-कठिनत्वस्य अन्तर्भावो रूपे भवति यतोहि अमुयो अवयवेन सह संयोगविशेषस्य रूपत्वात्। दीपिकाकारोऽपि अद एव समाधानं प्रस्तुतवान्। अतः गुणस्य संख्या चतुर्विंशत्येव।

( ३. कर्म-पदार्थ-विभागोद्देशः )

**तर्कसंग्रहः –** उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ॥५॥

**उपन्यासः -** कर्म लक्ष्यम्। कर्मत्वं लक्ष्यताऽवच्छेदकम्। 'संयोगभिन्नत्वे सति संयोगासमवायि-कारणत्वं' कर्मणो लक्षणम्। संयोगेऽतिव्याप्तिवारणाय संयोगभिन्नत्वम् इत्युक्तम्। संयोगभिन्नत्वमात्रोक्तौ घटादावतिव्याप्तिः, अतः संयोगासमवायि-कारणत्वम् इति। कर्म-सामान्य-लक्षण-पूर्वकं कर्मणो विभागमाह 'उत्क्षेपणा०' इत्यादिना।

ननु भ्रमणादीनामतिरिक्तानां कर्मणां सत्त्वादयुक्तं 'पञ्चैव' इति चेत् ? न, तेषां गमनेऽन्तर्भावः। इति चेत्? तर्हि उत्क्षेपणादीनामप्यस्तु गमनेऽन्तर्भावः। तेषामतिरिक्तत्वे त्विच्छैव नियामिका स्वतन्त्रेच्छस्य मुनेर्नियोग परियोगानर्हत्वात्। इति पञ्चैव इति सिद्धम्।

**हिन्द्यनुवादः –** कर्म लक्ष्य है। कर्मत्व लक्ष्यता-अवच्छेदक है। 'संयोग से भिन्न होते हुए जो संयोग का असमवायि कारण है' उसे कर्म कहते है। कर्म लक्षण का संयोग में अतिव्याप्ति न हो, अतः संयोगभिन्नत्व कहा गया। संयोगभिन्नत्व मात्र कहने पर घटादि में अतिव्याप्ति होती, इसलिए लक्षण में संयोग का असमवायि कारण भी कहा गया। कर्म के सामान्यलक्षणपूर्वक कर्म के उत्क्षेपणादि का विभाग किया गया।

---

[108] न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति। पश्पशाह्निकम्, महाभाष्यम्

'भ्रमणादि अतिरिक्त कर्मों के होने से कर्म पाँच ही है, ऐसा कहना अयुक्त है' इस प्रकार की शङ्का उचित नहीं है क्योंकि भ्रमणादि कर्मों का अन्तर्भाव गमन नामक कर्म में ही हो जाता है। 'यदि ऐसा है तो उत्क्षेपणादि कर्मों का भी गमन में ही अन्तर्भाव करना चाहिए' ऐसी शङ्का भी नहीं करनी चाहिए। क्योंकि इनके अतिरिक्तत्व में तो इच्छा ही नियामिका है तथा स्वतन्त्र ईच्छा वाले मुनियों के नियोग अर्थात् कथनादि में खण्डन का असामर्थ्य होने से 'कर्म' पाँच ही है, ऐसा सिद्ध हुआ।

## विश्लेषणम्

**कर्मपदार्थविभागोद्देशः -** प्रत्येकशास्त्रे कर्मणोऽवधारणा भिन्ना प्राप्यते यथा व्याकरणे 'कर्तुरीप्सिततं कर्म', कर्मत्रयात्मकं तु वेदान्ते संचित-क्रियमाण-प्रारब्धञ्च, एवमन्यत्रापि।[109] किन्तु न्यायवैशेषिके **'संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं कर्म'** कथ्यते यथा उपन्यासकारेण अपि उक्तम्। कर्म संयोगस्य असमवायिकारणं तु किन्तु संयोगात्भिन्नः। असमवायिकारणत्वं गुणकर्मणोर्द्वयोरेव विहितम्। द्रव्यस्यासमवायिकारणं गुणः किन्तु गुणस्यासमवायिकारणं स्वयं गुणः कर्म च वर्तेते। यथा गुणो द्रव्यस्य असमवायिकारणं तथैव स्वयम्प्रत्यपि। गुणातिरिक्तं गुणस्य असमवायिकारणं कर्म भजते। यथा-हस्तपुस्तकसंयोगः शरीरपुस्तकसंयोगस्यासमवायिकारणम्। संयोगः स्वयं गुणो वर्तते तथा तस्य अन्यसंयोगमर्थात् गुणमेव प्रति कारणता अस्ति। निष्कर्षतया संयोगजसंयोगे (गुणे) संयोगः/गुण असमवायिकारणं भवति। अदस्त्वासीत् गुणासमवायिकारणत्वं, सम्प्रति कर्मणि गुणस्यासमवायिकारणता उल्लिख्यते यथा यदि हस्तेन पुस्तकं स्पृशेत् तर्हि हस्तस्य पुस्तकं निकषा गमनम्तु आवश्यकम्। पुस्तकसमीपे हस्तप्रापणमेव हस्तपुस्तकसंयोगस्य कारणम्। अत्र प्रापणक्रिया तु कर्म तथा अस्य कर्मणः संयोगम्प्रति यत् कारणत्वं तत्तु असमवायिकारणत्वं न समवायि यतोहि समवायिकारणं तु सर्वदा द्रव्यमेव।

अस्मिन् लक्षणे संयोगगुणेऽतिव्याप्तिवारणाय 'संयोगभिन्नत्वम्' उक्तम्। कर्म तु संयोगात् पृथक् स्वतन्त्रपदार्थः। अतः 'संयोगभिन्नत्वे सति' इति पदेन संयोगे लक्षणस्यातिव्याप्तिर्निवारिता। लक्षणमध्ये 'संयोगभिन्नत्वं' मात्रोक्तौ घटपटादावतिव्याप्तिर्भवति यतोहि तदा संयोगात् भिन्नं

109 अष्टाध्यायी – १/४/४९, वेदान्तसारः (सुबोधिनीटीकासहितः) – पृ० १४८, १५१

यत्किमपि तत्सर्वं कर्मलक्षणं भवेत्, अतो घटादीनां निवारणाय 'संयोगासमवायिकारणत्वमु'क्तम्।

**शङ्कासमाधानम् -** उत्क्षेपणं,अपक्षेपणं,प्रसारणं,आकुञ्चनं,गमनञ्च पञ्चभेदा मन्यन्ते कर्मणः। किन्तु भ्रमणम्, रेचनम्, स्यन्दनम्, ऊर्ध्वज्वलनम्, तिर्यग्गमनमिति पञ्चाधिकानि कर्माण्यपि उच्यन्ते कैश्चित्, अतः कर्म न पञ्चसंख्यकम्, इति चेत् न। यतोहि भ्रमणादीनाम् अन्यसर्वकर्मणां गमनेऽन्तर्भावः इति टीकाकारः। अन्नम्भट्टेनापि इदमेवोक्तं तर्कदीपिकायाम्।[110] किन्तु पुनः शङ्का भवितुं शक्यते, यथा भ्रमणादीनां गमनेऽन्तर्भावः तथैव उत्क्षेपणादीनामपि तर्हि तेषां पृथगुद्देशः किमर्थः? उपन्यासकारेण एतस्य निराकरणमुक्तं यत् उत्क्षेपणादिकर्मणामतिरिक्तकथने तु आचार्याणाम् इच्छैव नियामिका भवति। तत्र स्वतन्त्रेच्छावन्तो मुनेर्नियोगे कथने वा दूषणार्थं जिज्ञासाया अनर्हत्वात् अर्थात् एतादृशी जिज्ञासा मा करणीया। अस्मात् कारणात् उत्क्षेपणादीनां पृथक्कथनस्य अनौचित्यं नास्ति। आचार्यनीलकण्ठोऽपि एतमेवोक्त्वा समादधति यत् एतादृशविभागकरणे ऋषीणां सर्वत्रेच्छैव नियामिका भवतीति, तत्र पर्यनुयोगो नैव कर्तव्यः।[111] अतः कर्मसंख्या 'पञ्चेति युक्तम्।

( ४. सामान्य-विभागोद्देशः )

**तर्कसंग्रहः –** परमपरञ्चेति द्विविधं सामान्यम्॥६॥

**उपन्यासः -** सामान्यं लक्ष्यम्। सामान्यत्वं लक्ष्यताऽवच्छेदकम्। नित्यत्वे सति,एकत्वे सत्यनेक-समवेतत्वं सामान्यस्य लक्षणम्। अनेकसमवेतत्व-मात्रमुक्तं चेत्? संयोगादावतिव्याप्तिः,अतः 'एकत्वे सति' इत्युक्तम्। 'एकत्वे सति समवेतत्वम्' इत्युक्ते गगन-परिमाणादावतिव्याप्तिः,अतः 'अनेक' इत्युक्तम्। एकत्वे सत्यनेक-समवेतत्वम् इत्युक्तेऽपि घटादावतिव्याप्तिः, अतो नित्यत्वम् इत्युक्तम्। समवायपदानुपादाने नित्यत्वे सत्यनेक-वृत्तित्वस्यात्यन्त्याभावे सत्त्वादतिव्याप्तिः,अतः तदुपादानम्।

तद् द्विविधं परमपरं च इति परं = सत्ता,अपरं = द्रव्यत्वादिः इति ज्ञेयम्॥६॥

---

110 भ्रमणादीनामपि गमनेऽन्तर्भावान्न पञ्चविधत्वविरोधः । तर्कदीपिका - कर्मपदार्थोद्देशप्रकरणम्

111 तर्कसंग्रहः तट्टीकानां समीक्षात्मकमध्ययनम् – पृ० १४

**हिन्द्यनुवादः –** सामान्य लक्ष्य है। सामान्यत्व लक्ष्यता अवच्छेदक है। 'नित्य तथा एक रहते हुए,अनेक में समवेत होना ही सामान्य का लक्षण है'। अनेक-समवेतत्व मात्र कहने से संयोगादि में अतिव्याप्ति हो जाएगी। अतः 'एकत्व' यह पद कहा गया। एकत्व एवं समवेतत्व मात्र कहने पर गगन-परिमाणादि में अतिव्याप्ति होगी। इस कारण से 'अनेक' भी कहा गया। एकत्व एवं अनेक-समवेतत्व मात्र कहने पर घटादि में अतिव्याप्ति होगी। अतः 'नित्य' पद भी रखा गया। 'समवाय' पद के न रखने पर नित्य होने से तथा अनेक में रहने वाले अत्यन्ताभाव में अतिव्याप्ति हो जाती। अतः इसका उपादान किया गया।

सामान्य दो प्रकार का होता है - पर एवं अपर। परसामान्य सत्ता (पदार्थ) का तथा अपरसामान्य द्रव्यत्वादि का बोध कराता है।

## विश्लेषणम्

**सामान्यपदार्थविभागोद्देशः-** सामान्यनामकः चतुर्थोऽयं पदार्थः जातिरपि कथ्यते। महाभाष्ये सामान्यं जातिर्वा आकृतिशब्देनापि व्यवह्रियते।[112] '**समानस्य भावः सामान्यमि**त्यस्य यौगिकार्थो वर्तते। किन्तु अस्यार्थस्य यदा कदा सादृश्येऽपि प्रयोगः क्रियते। अतः न्यायवैशेषिके सामान्यस्य पारिभाषिकं लक्षणं दीयते **'नित्यत्वे सति, एकत्वे सत्यनेकसमवेतत्वं'** इत्युपन्यासकारः। यन्नित्यम्, एकं तथा अनेकेषु समवायसम्बन्धेन व्याप्तं तदेव सामान्यम्।[113] यदि 'अनेकसमवेतत्वं' मात्रं सामान्यलक्षणं दीयते तर्हि संयोगादौ अपि उभयद्रव्यसमवेतत्वादतिव्याप्तिर्भविष्यति। अतो लक्षणे 'एकत्वे सति' उक्तम्,संयोगादौ तु अनेकत्वादतिव्याप्तिर्वारणम्। 'एकत्वे सति समवेतत्वस्य' गगनपरिमाणादौ सत्वात् 'अनेक' इत्युक्तम्। यतोहि गगनस्य परिमाणमपि एकमेवं गगनसदृशा बहवः पदार्था वर्तन्ते येषां परिमाणमेकमेव तथा समवायसम्बन्धेन स्वस्मिन् समवेतमपि। किन्तु 'अनेक' इति पदेन अतिव्याप्तिनिवारणं भवति, गगनादेरनेकेषु असमवेतत्वात्। अतो गगने स्थितं 'गगनत्वं' जातिर्न प्रत्युदुपाधिः। उपाधिर्जातिबाधको वर्तते। उक्तमपि श्रीनिवासमुखोल्लासिनी-टीकायाम् **'एवञ्च एकव्यक्तिवृत्ति आकाशत्वादिकं न जातिः'।**[114] घटादावतिव्याप्तिर्न भवेत्,

---

[112] आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् इत्युच्यते। महाभाष्यम् - पश्पशाह्निकम्

[113] नित्यमेकमनेकानुगतं सामान्यम्। - तर्कसंग्रहः

[114] श्रीनिवासमुखोल्लासिनीटीका - सामान्यपदार्थोद्देशप्रकरणम्

चेत् लक्षणे 'नित्यत्वं' पदमुक्तम्। यतोहि घटपटादेरपि अवयवावयविनोः समवायसम्बन्धेन एकस्तथा कपालद्वयादौ अर्थात् अनेकेषु वृत्तित्वादनेकानुगतमपि किन्तु नित्याः न। अतोनित्यघटादौ अतिव्याप्त्यपसारणार्थं लक्षणे 'नित्यत्वे सति' पदमपि दत्तम्। समवेतत्त्वं नाम समवायेन वृत्तित्वम् इति। लक्षणे 'समवायेन' इत्यनुपादाने तु नित्यत्वे सति अनेकवृत्तित्वादत्यन्ताभावेऽप्यतिव्याप्तिर्जायते, घटादेरत्यन्ताभावस्य स्वरूपसम्बन्धेन अनेकेषु पटमठादिषु वृत्तित्वात् नित्यत्वाच्च। समवायसम्बन्धेन वृत्तित्वकथने अत्यन्ताभावे नातिव्याप्तिः। अत उपन्यासकारेण उल्लिखितस्य प्रत्येकपदस्य औचित्यम् आवश्यकताञ्च उक्त्वा सामान्यलक्षणस्य दोषरहितत्वं सिद्ध्यते।

सामान्यं तु एकमेव किन्तु तस्य रूपद्वयमुल्लिख्यते- परसामान्यम् अपरसामान्यञ्च। परसामान्यम् अधिकदेशवृत्तित्वं तथा परसामान्यापेक्षया न्यूनदेशवृत्तित्वञ्च अपरसामान्यम्। द्रव्यत्वं पृथ्वी- जलादिनवद्रव्येषु सत्वात् परसामान्यं तथा पृथिवीत्वजलत्वादिः द्रव्यत्वापेक्षया पृथिवीजलादिषु च सत्वात् अपरसामान्यम्। परसामान्यमेव 'सत्ता' कथ्यते। यथा द्रव्यत्वं, गुणत्वं, कर्मत्वं च अपरसामान्यापेक्षया त्रिषु विद्यमानं परसामान्यं सत्तारूपमेव।

( ५. विशेष-पदार्थोद्देशः )

**तर्कसंग्रहः –** नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव॥७॥

**उपन्यासः -** विशेषो लक्ष्यः। विशेषत्वं लक्ष्यताऽवच्छेदकम्। 'स्वतो व्यावर्तकत्वं' लक्षणम्। तेषामाश्रयः परमाण्वादिः। परमाण्वादीनामानन्त्यात् तेषामप्यानन्त्यमिति सिद्धम्॥७॥

**हिन्द्यनुवादः-** विशेष लक्ष्य है। विशेषत्व लक्ष्यता अवच्छेदक है। 'स्वतःव्यावर्तकत्व' इसका लक्षण है। इनके आश्रय परमाणु आदि (नित्यद्रव्य) है। परमाणु आदि के आनन्त्य से इनका भी आनन्त्य सिद्ध है ।

## विश्लेषणम्

**विशेषपदार्थोद्दोशः-** सप्तपदार्थेषु विशेषः पञ्चमोऽस्ति। महर्षिकणादेन अस्य पदार्थस्यैव परिकल्पनत्वात् दर्शनमिदं 'वैशेषिकनाम्ना' प्रख्यातम्। अयमेको भेदकपदार्थो वर्तते। नित्यद्रव्याणां नित्यपरमाणूनाञ्च परस्परव्यावर्तनं भेदो वा यः करोति स विशेष एव। विशेषस्य अस्मादेव वैशिष्ट्यात् टीकाकारेण अस्य लक्षणं **'स्वतो व्यावर्तकत्वं'** प्रदीयते। अर्थात् येन पदार्थानां स्वतः परस्परो वा भेदः ज्ञायते, स विशेषः कथ्यते। विशेषस्य आश्रयः

'परमाण्वादिः' उच्यन्ते आचार्येण। अत्र आदिपदस्य तात्पर्यं आकाश-काल-दिग्-आत्म-मनश्च नित्यपदार्थाः सन्ति। परमाणवः अपि नित्याः भवन्ति। अतो ज्ञायते एव यत् विशेषपदार्थो नित्यद्रव्येष्वेव तिष्ठति। एवम्प्रकारेण तर्कसंग्रहकारस्यैव 'नित्यद्रव्यवृत्तयः' इत्युक्तिरेव प्रतिपाद्यते टीकाकारेण।

अत्र जिज्ञासा भवति यत् नित्यद्रव्येष्वेव अस्य उपस्थितिः किं स्वीकार्यते? अस्य समाधानमेवमस्ति यत् घटपटाद्यनित्यद्रव्याणि तु स्वाकारप्रकारैव परस्परभेदं जनयति किन्तु परमाण्वादिषु नित्यद्रव्येष्वेवं न, येन तेषां परस्परभेदः स्यात् , यतोहि तेषामाकारप्रकार एव न। तथापि तेषु भेदस्त्वस्त्येव। तस्मात् एतेषु परस्परभेदज्ञानाय 'विशेषः' कल्पितः। अतो नित्यद्रव्येषु एव अस्योपस्थितिर्मन्यते। विशेषस्य संख्या न निश्चिता, एते तु अनन्ता भवन्ति। यतोहि विशेषस्य आश्रय अर्थात् परमाण्वादिरनन्तसंख्यकाः। अत आश्रयानन्त्यात् विशेषा अपि अनन्ताः। यद्यपि विशेषाः अनेके किन्तु एते परस्परसमवेताः न। प्रत्येकनित्यद्रव्येषु पृथक्-पृथक् विशेषाः वर्तन्ते। एकविशेष अपरविशेषात् स्वरूपत एव भिन्नः। अत एतेषु सामान्यं जातिर्वा न भवति। विशेषे 'विशेषत्वं' स्वरूपहानित्वादुपाधिर्न जातिः।

( ६. समवाय-पदार्थोद्देशः )

**तर्कसंग्रहः –** समवायस्त्वेक एव॥८॥

**उपन्यासः -** समवायो लक्ष्यः। समवायत्वं लक्ष्यताऽवच्छेदकं। नित्यत्वे सति सम्बन्धत्वं लक्षणम्। नित्यत्वानुपादाने संयोगेऽतिव्याप्तिः, संयोग-समवायान्यतरत्व-रूप-सम्बन्धत्वस्य तत्रापि सत्त्वात्, अत- स्तदुपादानम्। सम्बन्धत्वानुपादाने गगनादावतिव्याप्तिः, नित्यत्वस्य तत्रापि सत्त्वात्, अतस्तदुपादानम्। तत्सत्वे किम्प्रमाणम् - प्रत्यक्षं वा उतानुमानम्? नाद्यम्,प्रत्यक्ष-सामग्र्यभावात्। द्वितीयं तु गुणक्रियाऽऽदि -विशिष्ट-बुद्धिर्विशेषण-विशेष्य-सम्बन्ध-विषया,विशिष्ट-बुद्धित्वाद्,'दण्डी पुरुष' इति विशिष्टबुद्धिवत्। इत्यनुमानमिति ध्येयम्॥८॥

**हिन्द्यनुवादः –** समवाय लक्ष्य है। समवायत्व लक्ष्यता-अवच्छेदक है। 'नित्य रहते हुए सम्बन्ध से युक्त होना ही' समवाय का लक्षण है। 'नित्यत्व' को लक्षण में न रखने पर संयोग में अतिव्याप्ति होगी, संयोग एवं समवाय दोनों के स्वरूपतः सम्बन्धत्व के कारण। अतः नित्यत्व

पद को रखा गया है। 'सम्बन्धत्व' पद का उपादान न करने पर गगनादि में अतिव्याप्ति हो जाएगी, क्योंकि गगन में भी 'नित्यत्व' है। अतः 'सम्बन्धत्व' पद का ग्रहण किया गया है।

समवाय के होने में क्या प्रमाण है प्रत्यक्ष अथवा अनुमान ? समवाय की सत्ता प्रमाणित करने में प्रथम अर्थात् प्रत्यक्षप्रमाण अशक्य है, क्योंकि समवाय में प्रत्यक्षविषयकसामग्री का अभाव है। द्वितीय प्रमाण अर्थात् अनुमान से समवाय का ज्ञान होता है। जिस प्रकार 'दण्डी पुरुष' अर्थात् दण्ड (विशेषण) से संयुक्त पुरुष का ज्ञान, ऐसी विशिष्ट बुद्धि होती है, उसी प्रकार गुण-क्रिया आदि से युक्त विशिष्ट बुद्धि का विशेषण-विशेष्य सम्बन्ध विषयिणी विशिष्ट-बुद्धि होने से द्रव्य (विशेष्य) में गुण-कर्म आदि ( विशेषण ) समवाय सम्बन्ध से है, ऐसा अनुमान होता है।


## विश्लेषणम्

**समवायपदार्थोद्देशः -** समवायस्तु मूलतः सम्बन्धो वर्तते। किन्तु न्यायवैशेषिके अस्य विशेषमह- त्वकारणात् स्वतन्त्रपदार्थः स्वीक्रियतेऽयम्। समवाय इव संयोगोऽपि सम्बन्धः, किन्तु समवायो नित्यः, संयोगस्तु अनित्यः। समवायस्य एतदेव वैशिष्ट्यमुपन्यासटीकायां लक्ष्यते- '**नित्यत्वे सति सम्बन्धत्वं समवायस्य लक्षणम्**'। यदि लक्षणे 'नित्यत्वं' पदं न दीयते तर्हि संयोगसम्बन्धे लक्षणस्य अतिव्याप्तिर्भविष्यति यतोहि संयोगोऽपि सम्बन्धः। संयोगे नित्यत्वाभावात् न तत्र अतिव्याप्तिर्भवति। एवमेव 'नित्यत्व'मात्रमुक्ते सति गगनादिनित्यद्रव्येष्वपि समवायः भवेदतो नित्यद्रव्येषु अतिव्याप्तिवारणाय 'सम्बन्धत्वं' पदमुक्तम्। गगनादौ तु सम्बन्धत्वस्याभावः, अतो हेतोस्तत्रापि अस्य लक्षणस्यातिव्याप्तिरनुपपन्नैव।


**समवायसिद्धिः-** समवायसिद्धिस्तु अनुमानेन भवति न तु प्रत्यक्षेण, प्रत्यक्षसामग्र्याभावात्। अस्य अनुमितौ गुणक्रियादिविशिष्टबुद्धिः अर्थात् विशेषणविशेष्यसम्बन्धविषयिणिविशिष्टबुद्धिर्हेतुस्तथा 'दण्डीपुरूषविशिष्टबुद्धिवत्' इति दृष्टान्तो वर्तते। यथा दण्डो विशेषणं, पुरूषो विशेष्य, अमुयोः सम्बन्धः संयोगः। अस्य विशेषणविशेष्ययुक्तसम्बन्धस्य ज्ञानं विशेषणविशेष्यसम्बन्धविशिष्टज्ञानं कथ्यते तथैव गुणः क्रिया च विशेषणं, गुणवान् क्रियावान् वा विशेष्यः,सम्बन्धः समवायः। एतस्य ज्ञानमपि विशेषणविशेष्यसम्बन्धविषयकविशिष्टज्ञानमस्ति। अत्र समवायसम्बन्धेन विशिष्टबुद्धिर्वर्तते।

**'विशिष्टबुद्धिं प्रति विशेषणज्ञानं हेतुः'** नव्यन्याये[115] तथा विशेषणविशेष्ययोः सम्बन्धज्ञाने एषा विशिष्टबुद्धिर्हेतुः। गुणक्रियादिविशेषणानि विशेष्ये समवायसम्बन्धेन भवन्ति। अतो विशेषणविशेष्यसम्बन्धविशिष्टबुद्धित्वादेव समवायसम्बन्धः अनुमीयते, 'दण्डी पुरूषः' इत्यादेर्विशिष्टबुद्धित्वात् संयोगसम्बन्धज्ञानमिव। अतः समवायो यथार्थभावपदार्थो न तु काल्पनिकः।

**आरेखीयप्रस्तुतिः –**




**चित्र - क्रमाङ्कः ९**




**चित्र - क्रमाङ्कः १०**

( ७.'अभाव'-पदार्थ-विभागोद्देशः )

[115] विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वम्। – नव्यन्यायभाषाप्रदीपः - Text 45

**तर्कसंग्रहः –** अभावश्चतुर्विधः। प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति॥९॥


**उपन्यासः -** अभावो लक्ष्यः। अभावत्वं लक्ष्यताऽवच्छेदकम्। द्रव्यादि-षट्-प्रतियोगिताकाभाववत्त्वं लक्षणम् । तत्प्रमाणं तु नास्ति इति प्रतीतिरेवेति ध्येयम्॥९॥

**हिन्द्यनुवादः –** अभाव लक्ष्य है। अभावत्व-लक्ष्यता अवच्छेदक है। द्रव्यादि छः पदार्थों की प्रतियोगिता वाला होना अभाव है। अभाव के ज्ञान में 'वस्तु नहीं है' ऐसी प्रतीति ही प्रमाण है।

## विश्लेषणम्

**अभावपदार्थविभागोद्देशः -** अभावो भावस्य विरोधी वर्तते। सत्ता,स्थिति,विद्यमानतेति भाव एतेषाम् अनुपस्थितिरेव अभावः। टीकाकारेण अस्य लक्षणे उक्तमेव यत्- **'द्रव्यादिषट्प्रतियोगिताकाभाववत्त्वं लक्षणम्'।** अर्थात् यः द्रव्यादिषट्पदार्थानां प्रतियोगितायुतः,स एव अभावः। द्रव्यादिषट्भावपदार्थाः प्रतियोगिनो भवन्ति अभावस्य कृते। एतेषु भावपदार्थेषु प्रतियोगिता वर्तते तथा अनया प्रतियोगितया सह अभावः सम्बद्धः। अत एव अभावः सप्रतियोगी पदार्थः कथ्यते नव्यन्याये। अभावस्य प्रतियोगी द्रव्यादिभावपदार्थाः यतोहि अत्र भावपदार्थानामभावः। **'यस्याभावः स प्रतियोगी'** इति न्यायानुसारेण भावपदार्थाः प्रतियोगिनो भवन्ति अभावस्य। नव्यन्याये अभावः सप्रतियोगी अतो नव्यन्यायशैल्यां विरचितत्वात् लक्षणे अभावस्य कृते 'प्रतियोगिताकः' पदं प्रयुक्तम्। अभावः स्वाधिकरणे स्वरूपसम्बन्धेन वर्तते किन्तु स्वप्रतियोगिनि प्रतियोगितासम्बन्धेन संयुज्यते।

**आरेखीयप्रस्तुतिः –**




**चित्र - क्रमाङ्कः ११**

**अभावसिद्धिः -** अभावस्य सिद्धिस्तु 'घटो नास्ति','पटो नास्ति' इत्यादेः प्रतीत्या भवति। अस्मात् कारणादेव '**नञ्शब्दजन्यप्रतीतिविषयत्वमभावत्वम्**'[116] इत्यपरं लक्षणमपि दीयते अभावस्य। 'अस्तीति' भावस्य व्यवहारविषयः किन्तु 'नास्ति' इत्यभावस्य। अतः 'न' इति शब्देन उत्पन्नज्ञानस्य विषयेण एव अभावस्य सत्ता निश्चीयते।

116 श्रीनिवासमुखोल्लासिनीटीका – अभावपदार्थविभागोद्देशप्रकरणम्

# द्वितीयोऽध्यायः – 'द्रव्यविवेचनम्'

(अथ लक्षण-परिच्छेदे १.१ पृथिवी-द्रव्य-लक्षणम् )

**तर्कसंग्रहः -** तत्र गन्धवती पृथिवी। सा द्विविधा नित्यानित्या चेति। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा। शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः॥१०॥

**उपन्यासः -** पृथिवी लक्ष्या। पृथ्वीत्वं लक्ष्यताऽवच्छेदकम्। समवाय-सम्बन्धेन गन्धवत्त्वं लक्षणम्। अत्र 'समवायसम्बन्धा'नुपादाने कालिक-सम्बन्धेन जलादावपि सत्त्वादतिव्याप्तिः, अतस्तदुपादानम्। समवाय-सम्बन्धेन जलादौ गन्धवत्त्वाभावान्नातिव्याप्तिः॥

पृथिवीत्व-जाति-सिद्धौ किं प्रमाणम्? इति चेत्, 'गन्धवत्त्वावच्छिन्नकार्यता-निरूपित-समवायि-कारणता किञ्चिद्धर्मावच्छिन्ना,कारणतात्वाद् घटनिरूपित-दण्डनिष्ठ-कारणतावत्' इत्यनुमानमेव।

सा द्विधा नित्या अनित्या च। १. नित्यं लक्ष्यं। नित्यत्वं लक्ष्यताऽवच्छेदकम्। प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं लक्षणम्। सति-अन्तानुक्तौ ध्वंसेऽतिव्याप्तिः अतस्तदुक्तम्, प्रागभावाप्रतियोगित्वस्य ध्वंसेऽभावान्नातिव्याप्तिः। प्रागभावाप्रतियोगित्व-मात्रोक्तौ प्रागभावेऽतिव्याप्तिः अतो 'ध्वंसाप्रतियोगित्वम्' उक्तम्। २. अनित्यं लक्ष्यम्। अनित्यत्वं लक्ष्यताऽवच्छेदकम्। अनित्यत्वं च प्रागभाव-प्रतियोगित्वे सति ध्वंस-प्रतियोगित्वम् । प्रागभाव-प्रतियोगित्व-मात्रमुक्तं चेत्? ध्वंसेऽतिव्याप्तिः,अतो ध्वंसप्रतियोगित्वम् उक्तम्। ध्वंस-प्रतियोगित्वस्य ध्वंसेऽभावान्नातिव्याप्तिः। ध्वंसप्रतियोगित्व-मात्रमुक्तं चेत्? प्रागभावेऽतिव्याप्तिः, ध्वंस-प्रतियोगित्वस्य प्रागभावे सत्वात्, अतः प्रागभाव-प्रतियोगित्वमुक्तम्, प्रागभाव-प्रतियोगित्वस्य प्रागभावेऽभावान्नातिव्याप्तिः॥

शरीरं लक्ष्यम्। शरीरत्वं लक्ष्यताऽवच्छेदकम्। गन्धवत्त्वे सति शरीरत्वं लक्षणम्। गन्धवत्त्वमात्रमुक्तं चेत्? घटेऽतिव्याप्तिः,अतः शरीरत्वमुक्तम्। शरीरत्वस्य घटेऽभावान्नातिव्याप्तिः । शरीरत्वं मात्रमुक्तं चेत्? जलीयशरीरेऽतिव्याप्तिः, तत्रापि शरीरत्वस्य सत्वाद् 'गन्धवत्त्वम्' इत्युक्तम्। एवञ्च 'गन्धवत्त्वे सति शरीरत्वं पार्थिव-शरीरस्य लक्षणम्।' इति पर्यवसन्नम् ॥

पार्थिवेन्द्रियं लक्ष्यम्। पार्थिवेन्द्रियत्वं लक्ष्यताऽवच्छेदकम्। गन्धवत्त्वे सतीन्द्रियत्वं लक्षणम्। गन्धवत्त्वं मात्रमुक्तं चेत्? शरीरेऽतिव्याप्तिः, अत 'इन्द्रियत्वम्' उक्तम्, इन्द्रियत्वस्य पार्थिवशरीरेऽभा- वान्नातिव्याप्तिः। 'इन्द्रियत्व'-मात्रमुक्तं चेत्? जलीयेन्द्रियेऽतिव्याप्तिः, तत्रापीन्द्रियत्वस्य सत्त्वात्। अतो 'गन्धवत्त्वम्' इत्युक्तम्। 'गन्धवत्त्वे सतीन्द्रियत्वं पार्थिवेन्द्रियस्य लक्षणम्।' इति सिद्धम्॥

पार्थिवविषयो लक्ष्यः। पार्थिवविषयत्वं लक्ष्यताऽवच्छेदकम्। 'गन्धवत्त्वे सति विषयत्वं लक्षणम्।' 'गन्धवत्त्वं' मात्रमुक्तं चेत्? पार्थिवेन्द्रियेऽतिव्याप्तिः, तत्रापि गन्धवत्त्वस्य सत्त्वात्, अतो 'विषयत्वम्' उक्तम्। विषयत्वमात्रमुक्तं चेत्? जलीयविषयेऽतिव्याप्तिः,अतो 'गन्धवत्त्वं' उक्तम्। गन्धवत्त्वे सति विषयत्वं पार्थिवविषयस्य लक्षणम्। इति सिद्धम्॥ इति पृथिवी ग्रन्थः॥१०॥

**हिन्द्यनुवादः -** पृथ्वी लक्ष्या है। पृथ्वीत्व लक्ष्यता-अवच्छेदक है। 'समवाय सम्बन्ध से गन्ध जहाँ रहता है' उसे पृथ्वी कहते है। लक्षण में 'समवायसम्बन्ध' यह पद न रखने पर कालिकसम्बन्ध से जलादि में गन्ध होने से अतिव्याप्ति दोष होगा, अतः 'समवायसम्बन्ध' यह पद रखा गया है क्योंकि समवाय सम्बन्ध से जलादि में गन्ध का अभाव होने से अतिव्याप्ति नही होगी।

शंका निवारण - पृथ्वीत्व इस जाति की सिद्धि में क्या प्रमाण है? ऐसी शंका नहीं करनी चाहिए, क्योंकि यहाँ पृथ्वीत्व का अनुमान होता है। जिस प्रकार घट (कार्यता) से निरूपित दण्डनिष्ठकारणता होती है, उसी प्रकार गन्ध से अवच्छिन्न, कार्यता से निरूपित , समवायि (पृथिवी) में रहने वाली कारणता, किसी धर्म से अवच्छिन्न होती है, कारणता के होने से। (यह कारण जिस धर्म से अवच्छिन्न होता है वह "पृथ्वीत्व" है ऐसा अनुमान किया जाता है) पृथ्वी दो प्रकार की होती है - नित्य एवं अनित्य।

नित्य लक्ष्य है, नित्यत्व लक्ष्यता-अवच्छेदक है। 'प्रागभाव का अप्रतियोगी होते हुए ध्वंस का भी जो अप्रतियोगी हो' उसे नित्य कहते है। 'प्रागभावाप्रतियोगित्व' का उपादान न करने पर ध्वंस में अतिव्याप्ति होगी, अतः इसका कथन किया गया। प्रागभाव के अप्रतियोगित्व का ध्वंस में अभाव होने से अतिव्याप्ति नहीं होगी। 'प्रागभावाप्रतियोगित्व' मात्र कहने पर प्रागभाव में अतिव्याप्ति हो जाएगी, अतः ध्वंस का अप्रतियोगी भी कहा गया।

अनित्य लक्ष्य है। अनित्यत्व लक्षयता-अवच्छेदक है। 'प्रागभाव का प्रतियोगी होते हुए ध्वंस का जो प्रतियोगी हो' वह अनित्य है। 'प्रागभाव-प्रतियोगित्व' मात्र कहने पर ध्वंस में अतिव्याप्ति होगी अतः 'ध्वंस-प्रतियोगित्व' कहा गया। 'ध्वंस-प्रतियोगित्व' मात्र इतना ही रखने पर प्रागभाव में अतिव्याप्ति हो जाएगी, इस दोष के परिहारार्थ 'प्रागभाव-प्रतियोगित्व' का ग्रहण किया गया है। 'प्रागभाव-प्रतियोगित्व' का प्रागभाव में न रहने से अतिव्याप्ति दोष नहीं होगा।

शरीर लक्ष्य है। शरीरत्व लक्ष्यता-अवच्छेदक है। 'गन्ध से युक्त होते हुए शरीरत्व से युक्त होना ही' शरीर का लक्षण है। 'गन्धवत्त्व' अर्थात् गन्ध मात्र कहने पर घट में अतिव्याप्ति होगी अतः 'शरीरत्व' कहा गया। शरीरत्व का घट में अभाव होने से लक्षण अतिव्याप्ति दोष से दूषित नहीं होगा। 'शरीरत्व' मात्र कहने पर जलीय-शरीर में अतिव्याप्ति होगी, वहाँ भी 'शरीरत्व' के होने से। इस अतिव्याप्ति के निवारण हेतु लक्षण में 'गन्धवत्त्व' कहा गया। इस प्रकार गन्ध तथा शरीरत्व से युक्त होना, पार्थिवशरीर का लक्षण है।

पार्थिव-इन्द्रिय लक्ष्य है। 'पार्थिव-इन्द्रियत्व' लक्ष्यता-अवच्छेदक है। 'गन्ध तथा इन्द्रियत्व से जो युक्त है' वह पार्थिव-इन्द्रिय है। 'गन्धवत्व/गन्ध' मात्र कहने पर शरीर में अतिव्याप्ति होगी अतः इन्द्रियत्व कहा गया। इन्द्रियत्व का पार्थिव शरीर में अभाव होने से अतिव्याप्ति नहीं होगी। 'इन्द्रियत्व' मात्र कहने पर जलीय इन्द्रिय में अतिव्याप्ति होगी वहाँ भी इन्द्रियत्व के होने से, अतः लक्षण में 'गन्धवत्त्व' पद दिया गया। इस प्रकार गन्ध से युक्त होते हुए इन्द्रियत्व से युक्त होना ही पार्थिव-इन्द्रिय का लक्षण है।

## विश्लेषणम्

**पृथिवीद्रव्यलक्षणप्रकरणम् –** तर्कसंग्रहे उद्देशप्रकरणानन्तरं लक्षणप्रकरणमारभते। सप्तपदार्थेषु द्रव्यं प्रथमं तथा नवद्रव्येषु पृथिवी प्रथमा,अतः आदौ पृथिवी निरूप्यते। लक्षणप्रकरणत्वात्, पृथिव्या लक्षणादेव प्रारम्भं करोति तर्कसंग्रहकारः - 'तत्र गन्धवती पृथिवी'। उपन्यासकारेणापि इदमेव लक्षणं स्वीक्रियते किन्तु कालिकसम्बन्धादौ अतिव्याप्तिवारणाय **'समवायसम्बन्धेन गन्धवत्त्वं पृथिव्या लक्षणम्'** उल्लिख्यते। 'गन्धः' इत्ययं गुणः समवायसम्बन्धेन पृथिव्यां तिष्ठति, अतो हेतो 'गन्धवत्त्वम्' इदं लक्षणं समवायसम्बन्धेनैव स्वलक्ष्यं विशेषयति। यदि लक्षणेऽस्मिन् समवायसम्बन्धः न गृह्यते तर्हि कालिकसम्बन्धेन

(ऋतुदिवसरात्र्यादिगतसम्बन्धेन) वायुजलादौ अपि 'गन्धवत्त्वरूपं' लक्षणं व्याप्यते। यतोहि कालः सर्वेषामाधारो वर्तते उक्तमपि यत् ' **जन्यानां जनकः कालो जगतामाश्रयो मतः'**[117]**।** अतः कालेन सह सर्वेषां सम्बन्धः स्वतो युज्यते। जलादावपि दिवसे विकसिताम्बुजानां गंधसंसर्गत्वाद् रात्रौ कुमुदिनीसुरभिसंयोगाच्च गन्धः उत्पद्यते। अस्मात् कारणादत्रापि गन्धस्य सत्त्वादतिव्याप्तिः। एतद्-व्याप्तिवारणाय लक्षणे समवायसम्बन्धः स्वीकृतो यतोहि जलादौ तु गन्धो विशिष्टकाले संयोगसम्बन्धेन उत्पद्यते न तु समवायसम्बन्धेन।

**आरेखीयप्रस्तुतिः** – चित्रक्रमाँकः '४,५' सदृश एव

जलतेजोवायोरपि सम्बन्धविषयकविश्लेषणं रेखाचित्रञ्च पृथिवीवदेवागन्तव्यम्।

**पृथिवीत्वजातेः सिद्धिः -** लक्षणानन्तरं पृथिव्यां पृथिवीत्वजातिसिद्धौ अनुमानप्रमाणस्योपादेयतां स्वीकुर्वता टीकाकारेण पृथिवीत्वानुमितिः सिद्धान्तमतानुसारं प्रस्तूयते। उपर्युक्तं यत् गन्धः समवायसम्बन्धेन पृथिवीं विशेषयति। अतः कार्यकारणदृष्ट्या गन्धस्य समवायिकारणं पृथ्वी तथा कारणरूपपृथिव्याः कार्यं गन्धः। सम्प्रति कारणं भूते सति पृथिव्यां 'समवायिकारणता' तथा गन्धे 'कार्यता' चेति आहृतधर्मो नियोज्यते। गन्धे स्थिता कार्यता 'गन्धत्वं'[118] इति प्राकृतिकधर्मेण अवच्छिन्ना जायते। आहृतधर्मस्य परस्परनिरूपकत्वात् पृथिव्यां स्थिता समवायिकारणता (आहृतधर्मः) 'गन्धत्वावच्छिन्नकार्यता' इत्यपरेण आहृतधर्मेण निरूपिता अस्ति। अथ च गन्धत्वा-वच्छिन्नकार्यतानिरूपिता इयं समवायिकारणता अपि कारणतात्वाद् (आहृतधर्मत्वात्) केनचिद् धर्मेण अवच्छिन्ना भविष्यति इति निश्चितम्। येन धर्मेण कारणतेयमवच्छिन्ना तत् पृथिवीत्वमेव इति तथैव अनुमीयते यथा घटत्वावच्छिन्नकार्यतानिरूपितदण्डनिष्ठकारणातावच्छेदकं घटत्वम् इति। अनेन प्रकारेण पृथिवीत्वजातिः गन्धसमवायिकारणतावच्छेदकतया सिद्ध्यति। कारणता यद्धर्मावच्छिन्ना स धर्मः कारणतावच्छेदकः तथा या कारणता अवच्छेदिता सा तद्धर्मावच्छिन्ना। गन्धसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्,यतोहि कारणता (आहृतधर्मः) कदापि निरवच्छिन्ना भवत्येव न। अत्र यः किञ्चिद्धर्मः स एव पृथिवीत्वरूपः। अतः


---

117 न्यायसिद्धान्तमुक्तावली - कालविवेचनम्

118 टीकायां 'गन्धवत्त्व'मुक्तं किन्तु अर्थसौकर्यात् अत्र 'गन्धत्वं' गृह्यते। यतोहि गन्धे स्थितकार्यता गन्धत्वेनैव अव- च्छिन्ना भवति न तु गन्धवत्त्वेन। गन्धवत्त्वेन अत्र अर्थ संगतिः न,अतः गन्धत्वं ग्रहीतम्।

कारणतात्वादिति हेतुना पृथिवीत्वजातिः सिद्ध्यते। अन्ये वैशेषिकाचार्या अपि गन्धसमवायिकारणतावच्छे- कत्वादेव पृथिवीत्वजातेः सिद्धिं कुर्वन्ति।[119] न्यायबोधिनीकारेण प्रदत्तं **'गन्धसमानाधिकरण- द्रव्यत्वव्याप्यजातिमत्त्वं'**[120] पृथिव्या लक्षणमपि अन्याक्षरैरुपर्युक्तमतमेव दृढीकरोति।

**आरेखीयप्रस्तुतिः –**




**चित्र-क्रमाँकः १**

**पृथिव्याः भेदः-** प्रथमतः पृथिव्याः भेदद्वयमनुषज्यते, नित्या पृथिवी अनित्या पृथिवी च। अन्नम्भट्टेन नित्यानित्यस्य परिभाषा न दीयते तर्कसंग्रहे। किन्तु दीपिकावत् अथवा अन्यटीकानामिव उपन्यासटीकायामपि लक्ष्यते नित्यानित्यञ्च। ' **प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं**' नित्यस्य लक्षणम्। प्रागभावस्याप्रतियोगिना सह ध्वंसस्यापि अप्रतियोगि यत् वर्तते तदेव नित्यं। प्रागभावस्य प्रतियोगि उत्पत्तियुतं कार्यमस्ति [121]। अथ च यस्योत्पत्तिर्न

---

119 गन्धसमवायिकारणतावच्छेदकत्वेन तत्सिद्धेः। जगदीशतर्कालङ्कारः पद्मनाभमिश्रः,विश्वनाथः,शंकरमिश्रश्च। वैशेषिकदर्शन में पदार्थ-निरूपण – पृ० ६१

120 श्रीनिवासमुखोल्लासिनीटीका - पृथिवीलक्षणप्रकरणम्

121 कार्यं प्रागभावप्रतियोगी। तर्कसंग्रहः - यथार्थानुभवप्रकरणम्

जायते सः प्रागभावस्य अप्रतियोगी। एवमेव यस्य नाशः न भवति स ध्वंसाप्रतियोगी यतोहि 'यस्याभावः सः प्रतियोगी' इति न्यायानुसारं ध्वंसे विनाशस्याभावः, अविनाशित्वात्। अतः विनाशवत् अनित्यवस्तु ध्वंसस्य प्रतियोगी एवञ्च नित्यवस्तु ध्वंसस्य अप्रतियोगि। एवम्प्रकारेण यत् अनादिरनन्तं वर्तते, तदेव नित्यमिति उपन्यासकारमतम्। ध्वंसस्यापि नाशः न भवति अतो हेतोः ध्वंसः स्वस्यापि अप्रतियोगी वर्तते। [122] नित्यलक्षणस्य ध्वंसेऽतिव्याप्तिवारणाय 'प्रागभावाप्रतियोगित्वे सति' इत्युक्तम्। ध्वंसः स्वस्याप्रतियोगी तु किन्तु प्रागभावस्य अप्रतियोगी न,उत्पद्यमानत्वात्। यदि लक्षणे 'प्रागभावाप्रतियोगित्वमात्रमेव' उच्यते तर्हि प्रागभावस्यानुत्पत्तिः कारणात् स्वयं प्रागभावेऽपि लक्षणस्यातिव्यातिर्सभवति। अतो हेतोः 'ध्वंसाप्रतियोगित्वं' युज्यते। प्रागभावस्य ध्वंसाप्रतियोगित्वे अर्थात् अविनश्यत्वेऽभावान्नातिव्याप्तिः। अथेदं नित्यस्य निर्दुष्टलक्षणम्।

अतो परमनित्यं परिभाष्यते- '**प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं**''। यः प्रागभावस्य प्रतियोगि (उत्पत्तिवत्) तथा ध्वंसस्य प्रतियोगि (नाशवत्) वर्तते तदेवानित्यम्। अत्र प्रागभाव- प्रतियोगित्वमात्रमुक्तौ ध्वंसेऽतिव्याप्ति उत्पत्तिः कारणात् तथा ध्वंसस्य प्रतियोगित्वं मात्रमुक्तं चेत्, प्रागभावेऽतिव्याप्तिर्विनाशकारणात्। अत उभयोरेवकथनं विधीयते अनित्यलक्षणे।

नित्या पृथिवी परमाणुरूपा भवति, नित्यत्वात्। **'मूर्तत्वे सति निरयवत्वं परमाणुत्वम्'**।[123] परमाणुर्चक्षुभ्यां ग्रहीतुं न शक्यते। यदा षट् परमाणवः संयुक्ता भवन्ति तदैव रजोरूपेण जालान्तरगते भानुकिरणे द्रष्टुं शक्यन्ते। उक्तं हि –

**जालान्तरगते भानौ सूक्ष्मं यद् दृश्यते रजः।**

**तस्य षष्ठतमो भागः परमाणुः स उच्यते॥**[124]

एतेषां परमाणूनां कोऽपि स्थानविशेषो न अपितु एते सम्पूर्णब्रह्माण्डे व्याप्ताः भवन्तीति। अनित्या पृथिवी कार्यरूपा वर्ण्यते,अनित्यत्वात्। अस्याः कारणं परमाणुरूपा पृथिवी एव। द्विपरमाणुकात् आरभ्य जगति दृश्यमानो व्यवह्रियमाणश्च सकलपार्थिवभागोऽनित्याकार्यरूपा पृथिवी कथ्यते।

जलतेजोवायूनां नित्यानित्यप्रकारेऽपि अनेन प्रकारेणावगन्तव्यमिति।

---

122 सादिरनन्तः प्रध्वंसाभावः। तर्कसंग्रहः - अभावप्रकरणम्

123 श्रीनिवासमुखोल्लासिनीटीका - पृथिवीलक्षणप्रकरणम्

124 तत्रैव

**पृथिव्याः प्रकारान्तरभेदाः -** पार्थिवशरीरं, पार्थिवेन्द्रियं पार्थिवविषयश्च पृथिव्या अवान्तरभेदाः वर्तन्ते। प्रथमं पार्थिवशरीरं लक्ष्यते उपन्यासकारेण - **'गन्धवत्त्वे सति शरीरत्वम्'**। गन्धगुणेन सार्धं यस्मिन् शरीरत्वं वर्तते तत्पार्थिवशरीरम्। लक्षणे यदि गन्धवत्त्वमात्रमुक्तं तर्हि घटपटादिपार्थिवविषयेषु अतिव्याप्तिर्जायते यतोहि घटादावपि गन्धगुणोपस्थिति वर्तते, पार्थिवत्वात् किन्तु तत्र शरीरत्वाभावान्नातिव्याप्तिः। अतो लक्षणे 'शरीरत्वमपि' उक्तम्। अत्र जलीयादिशरीरेऽतिव्याप्ति- वारणाय 'गन्धवत्त्वमपि',जलीयादिशरीरे गन्धस्याभावादतिव्याप्तिर्निराक्रियते उपन्यासकारेण। अतो 'गन्धवत्त्वे सति शरीरत्वमिति' पार्थिवशरीरस्य लक्षणं दोषरहितम्। अत्र पृथिव्याः शरीरस्य च सामान्यलक्षणश्चैकीभूय पार्थिवशरीरस्य लक्षणं सम्पद्यते।

**'गन्धवत्त्वे सतीन्द्रियत्वं'** पार्थिवेन्द्रियस्य लक्षणम्। लक्षणे 'गन्धवत्त्वं' मात्रमुक्ते सति पार्थिवशरीरे अतिव्याप्तिर्जायते। यतोहि उपर्युक्तं यत्,पार्थिवशरीरमपि गन्धयुक्तम्। पार्थिवशरीरेतिव्याप्तेर्वारणाय लक्षणे इन्द्रियत्वमुक्तम्, पार्थिवशरीरे इन्द्रियत्वाभावान्नातिव्याप्तिः। इन्द्रियत्वमात्रमुक्तौ लक्षणं जलीयादीन्द्रियेऽतिव्याप्तं भविष्यति, तत्रापि इन्द्रियत्वात्। अतः गन्धवत्त्वमुक्तम्। जलीयादीन्द्रिये इन्द्रियत्वं त्वास्ति,किन्तु गन्धो न। अतो हेतोस्तत्रापि अतिव्याप्तिनिवारणं जातम्।

पार्थिवशरीरमेन्द्रियस्य च लक्षणात्परं पृथिव्यास्तृतीयप्रकारान्तरभेदस्य पार्थिवविषयस्य वर्णनं कृतम्-**'गन्धवत्त्वे सति विषयत्वम्'**। अत्र विषयत्वमनुक्ते सति पार्थिवेन्द्रियादावतिव्याप्तिस्तथा गन्धवत्त्वमनुक्तौ जलीयवायवीयतेजसीयविषयेऽतिव्याप्तिरुत्पद्यते। अत उभयोरेवोपादानम्। लक्षणे विषयत्वमिति कथनमात्रेणैव शरीरेन्द्रियाभ्यां विषयस्य भिन्नत्वं स्वतः स्फुट्यते यथा अन्नम्भट्टेनाप्युक्तम्- शरीरेन्द्रियभिन्नो विषयः।[125]

अनेन प्रकारेण पृथिवीलक्षणम्, पृथिवीत्वसिद्धिः, नित्यानित्यलक्षणम्, पृथिवीभेदाः, पार्थिवशरीरेन्द्रिविषयाणां लक्षणम् तथा एतेषां लक्षणानां परीक्षादिप्रकरणान्युपस्थितानि अत्र टीकाकारेण।

इमानि शरीरेन्द्रिविषयलक्षणानि जलीयादिशरीरेन्द्रिविषयेष्वपि सामान्यतो वर्तन्त एव।

---

[125] तर्कदीपिका - पृथिवीलक्षणप्रकरणम्

(१.२ जलद्रव्यलक्षणम् )

**तर्कसंग्रहः-** शीतस्पर्शवत्यः आपः। ता द्विविधाः नित्या अनित्याश्च। नित्याः परमाणुरूपाः। अनित्याः कार्यरूपाः। पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात्। शरीरं वरूणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः॥११॥

**उपन्यासः-** आपो लक्ष्याः। अप्त्वं लक्ष्यताऽवच्छेदकं। 'समवायसम्बन्धेन शीतस्पर्शवत्त्वं लक्षणम्।' समवाय-सम्बन्धानुपादाने कालादावपि कालिकसम्बन्धेन शीतस्पर्शवत्त्वस्य सत्त्वादतिव्याप्तिः, अतस्तदुपादानम्। 'समवायसम्बन्धेन शीतस्पर्शवत्त्वं जलस्य लक्षणम्।' इति सिद्धम्।

जलीय-शरीरेन्द्रिय-विषयाणां लक्षणं 'गन्धस्थाने' 'शीतस्पर्शवत्त्वं' निवेश्य पृथिवी-ग्रन्थस्येव। इत्यनुसन्धेयम॥ इति जलग्रन्थः॥११॥

**हिन्द्यनुवादः –** जल लक्ष्य है। जलत्व लक्ष्यताऽवच्छेदक है। 'समवाय सम्बन्ध से शीत स्पर्श जिसमें रहता है' वह जल है । 'समवायसम्बन्ध' इस पद का ग्रहण न करने पर कालादि में भी कालिक सम्बन्ध से शीतस्पर्श के होने से वहाँ भी अतिव्याप्ति हो जाएगी। अतः 'समवाय सम्बन्ध' पद को रखा गया। इस प्रकार 'समवाय सम्बन्ध' से शीतस्पर्श ही जल का लक्षण है, ऐसा सिद्ध हुआ।

जलीय शरीर,इन्द्रिय एवं विषयों के लक्षण पृथ्वी-ग्रन्थ के समान 'गन्ध' के स्थान पर 'शीत-स्पर्श' इस पद को रखकर स्मरण करना चाहिए।

## विश्लेषणम्

**जलद्रव्यलक्षणम् -** पृथिवीसदृशमेव द्वितीयद्रव्यं जलमस्ति। तर्कसंग्रहे 'शीतस्पर्शवत्यः आपः' इति लक्षणं प्रस्तुतम्। अस्मिन् लक्षणे सम्बन्धानुल्लेखेन कालादावतिव्याप्तिर्संभवति, अतः समवाय-सम्बन्धेन' पदमत्र देयमिति चर्चितं पदकृत्ये।[126] संभवत उपन्यासकारेण एतमेव प्रसङ्गं स्मारयित्वा '**समवायसम्बन्धेन शीतस्पर्शवत्त्वं**' जलस्य लक्षणकृतम्। अतो हेतोर्लक्षणे कालादावतिव्याप्तेः परिवर्जनं भवति। जलस्य शरीरेन्द्रियविषयाणां विषये न किमपि विशिष्टविवरणं प्रदत्तमत्र। जलीयशरीर-इन्द्रिय-विषयश्च लक्षणं पार्थिवशरीरादिलक्षणे वर्णिते 'गन्ध'स्थाने शीतस्पर्शवत्त्वम् अनुसृत्य ज्ञेयमिति लाघवात्।

---

126 पदकृत्यम् – जललक्षणप्रकरणम्

( १.३ तेजो द्रव्यलक्षणम् )

**तर्कसंग्रहः** – उष्णस्पर्शवत्तेजः। तद्विविधं नित्यमनित्यञ्चेति। नित्यं परमाणुरूपमनित्यं कार्यरूपम्। पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात्। शरीमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधः। भौमदिव्यौदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादि॥१२॥

**उपन्यास: -** तेजो लक्ष्यम्। तेजस्त्वं लक्ष्यताऽवच्छेदकम्। 'समवाय-सम्बन्धेनोष्ण-स्पर्शवत्त्वं लक्षणम्।' 'समवाय-सम्बन्धा'नुपादाने कालेऽतिव्याप्तिः, अतस्तदुपादानम्। "समवायसम्बन्धेनोष्ण-स्पर्शवत्त्वं तेजसो लक्षणम्"। इति सिद्धम्। तेजसीय-शरीरेन्द्रिय-विषयाणां लक्षणं 'शीतस्पर्शस्थाने' 'उष्णस्पर्श' निवेश्य जलग्रन्थस्येवेत्यनुसन्धेयम्।

अत्र विषयश्चतुर्विधः – १.भौमं नाम भूमिसम्बन्धि २.दिव्यं नाम द्युसम्बन्धित्वम् ३.औदर्यं नाम उदरसम्बन्धित्वम् ४.आकरजं नाम सुवर्णादि रत्नविशेषः। इति। यथायथं लक्षणं बोध्यम्- 'उष्णस्पर्शवत्त्वे सति भौमत्वम्'। इत्यादि ॥ इति तेजोग्रन्थः ॥१२॥

**हिन्द्यनुवादः –** तेज लक्ष्य है। तेजस्त्व लक्ष्यता-अवच्छेदक है। 'जिसमें ऊष्णस्पर्श समवायसम्बन्ध से रहता है' उसे तेज कहते हैं। लक्षण में 'समवायसम्बन्ध' पद का ग्रहण न करने पर काल में अतिव्याप्ति होने से इसका अभिधान किया गया। इस प्रकार समवायसम्बन्ध से ऊष्णस्पर्श ही जल का लक्षण (असाधारण धर्म) है, ऐसा सिद्ध हुआ।

तेजसीय शरीर, इन्द्रिय एवं विषयों के लक्षण जल-ग्रन्थ के समान शीत-स्पर्श के स्थान पर 'उष्ण-स्पर्श' इस पद को रखकर स्मरण करना चाहिए।

तेज के विषय चतुर्विध है, १- भौम तेज- यह भूमि अर्थात भूलोक सम्बन्धी होता है।

२- दिव्य तेज- द्युलोक सम्बन्धी है।

३- औदर्य तेज- उदर से सम्बन्धित होता है।

४- आकरज तेज- सुवर्णादि रत्न विशेष में होता है।

इनका लक्षण भी उसी प्रकार जानना चाहिए जैसे – 'ऊष्ण स्पर्श से युक्त होते हुए भौमत्व से युक्त होना ही भौम तेज है'। इसी प्रकार दिव्यादितेजों का भी लक्षण समझना चाहिए।

## विश्लेषणम्

**तेजद्रव्यलक्षणम् - 'समवायसम्बन्धेन उष्णस्पर्शवत्त्वं'** तेजसः लक्षणम्। उष्णस्पर्शस्तेजस असाधारणगुणो वर्तते। उष्णस्पर्शगुणः समवायसम्बन्धेन तेजस अतिरिक्तं न कस्मिन्नपि द्रव्ये विद्यते। अत उष्णस्पर्श एव तेजस असाधारणधर्म लक्षणं वा कथ्यते। अत्रापि समवायसम्बन्धस्याग्रहणे कालादावतिव्याप्तिवारणं विहितं पृथिवीजललक्षणमिव।

तेजसीयशरीरादिलक्षणमपि न दीयते टीकायाम्। अत्र सूच्यते यत् जलग्रन्थस्येव शीतस्पर्शस्थाने उष्णस्पर्शं निवेश्य एतेषामपि लक्षणमनुसन्धेयम्। वक्तुं शक्यते यत् पुनरुक्तिप्रसङ्गात् लाघव-कारणाच्च उपन्यासकारेण ईदृशमुक्तम्। किन्तु तेजसीयविषयाणां विवरणं कृतमाचार्येण, तेजसीयविषयस्य विभागचतुष्टयं प्राप्तम् - **भौमं,दिव्यं,औदर्यमाकरजञ्च**। (क) भूमिसम्बन्धि यत्तेजस्तत्तु भौमतेजः। तेजस एतस्मिन् विषयप्रभेदे काष्ठदीपकादिपार्थिवपदार्थेन उत्पन्नं तेजो वर्तते। इदं तेजो भूमौ एव भवति। (ख) दिव्यं नाम द्युसम्बन्धितेजः। जलीयेन्धनेन उत्पन्ना विद्युत् तथा सूर्यचन्द्रादिकञ्च तेजो दिव्यतेजसि परिगण्यन्ते। (ग) अस्माकमुदरे भुक्तपरिणामस्य कृते एकं तेजो भवति, 'यज्जठराग्निः' नाम्ना प्रसिद्धः। उदरे सत्वात् इदं तेज औदर्यमभिधीयते। (घ) चतुर्थं वर्तते आकरजतेजः। आकर अर्थात् खनिः, तत्र जातमित्यर्थम् आकरजम्। सुवर्णरजतादिकं खनिजम् आकरजम्। अत एतानि खनिजानि आकरजतेजसि निमज्जितानि।

उपन्यासे एतेषां विषयाणामपि लक्षणं विधीयते। 'उष्णस्पर्शवत्त्वे सति भौमत्वम्' इति भौमतेजसो लक्षणम्। उष्णस्पर्शस्तु तेजसि सर्वदा वर्तत एव किन्तु यदा एतत्तेजः पार्थिवपदार्थेन उत्पद्यते तर्हि तस्मिन् भौमत्वमथवा पार्थिवत्वमपि विद्यते, अतस्तत्तेजो भौमतेजः। भौमतेज- लक्षणमिव यथायथं दिव्यतेजादिकं लक्षणमपि बोध्यमिति टीकाकारेण।

( १.४ वायुद्रव्यलक्षणम् )

**तर्कसंग्रहः -** रूपरहितस्पर्शवान् वायुः। स द्विविधो नित्योऽनित्यश्च। नित्यः परमाणुरूपोऽनित्यः कार्यरूपः। पुनस्त्रिविधः। शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञा लभते॥१३॥

**उपन्यास: -** वायुर्लक्ष्यः। वायुत्वं लक्ष्यताऽवच्छेदकम्। 'समवाय-सम्बन्धेनानुष्णाशीतस्पर्शवत्त्वं लक्षणम्।' सम्बन्ध-व्यावृत्तिस्तु पूर्ववज्ज्ञेया। अनुष्णत्वानुपादानेऽशीत-स्पर्शस्य तेजसि सत्त्वादतिव्याप्तिः, अतो अनुष्ण-स्पर्शवत्त्वम् इत्युक्तम्,अनुष्ण-स्पर्शवत्त्वस्य तेजस्यभावान्नातिव्याप्तिः। अनुष्ण-स्पर्शवत्त्वमात्रमुक्तौ जलेऽतिव्याप्तिः, अतः 'अशीतत्वम्' उक्तम्, अशीत-स्पर्शवत्त्वस्य जलेऽभावान्नातिव्याप्तिः,तस्य शीत-स्पर्शवत्त्वात्। 'अनुष्णाशीत-स्पर्शवत्त्व'-मात्रमुक्तं चेत्? पृथिव्यामतिव्याप्तिः,तत्राप्यनुष्णाशीत-स्पर्शवत्त्वस्य सत्त्वात्, अतः 'अपाकजानुष्णाशीत-स्पर्शवत्त्वं वायोर्लक्षणम्।' इति सिद्धम्॥

तस्य शरीरेन्द्रिय-विषयाणां लक्षणानि तु 'उष्ण-स्पर्श-स्थाने' 'अनुष्णा-शीत-स्पर्शं' निवेश्य तेजो ग्रन्थस्येवेत्यनुसन्धेयम्।

प्राण-वायोः कस्मिन्नन्तर्भावः? इति चेत्? "विषये"। इति द्रष्टव्यम्। अपानादि भेदस्तु प्राणनादि क्रियोपाधिको द्रष्टव्यः पाचक-पाठकादिवत्॥

अत्र शरीरत्वं न जातिः - पृथिवीत्वाभाववति शरीरत्वं वायवीयशरीरे, शरीरत्वाभाववति पृथिवीत्वं घटे परस्परात्यन्ताभाव-समानाधिकरणयोः पृथिवीत्व-शरीरत्वयोः एकत्र=पार्थिवशरीरे समावेशात्साङ्कर्यम्। किन्तु चेष्टाऽऽश्रयत्वम्॥

एवमिन्द्रियत्वं न जातिः - तत्रापि पृथिवीत्वाभाववति चक्षुषि इन्द्रियत्वं, इन्द्रियत्वाभाववति पृथिवीत्वं पटे, इति परस्परात्यन्ताभाव-समानाधिकरणयोः पृथिवीत्वेन्द्रियत्वयोर्घ्राणेन्द्रिये समावेशात्। किन्तु 'शब्देतरोद्भूत-विशेषगुणानाश्रयत्वे सति ज्ञान-कारण-मनः-संयोगाश्रयत्वम् इन्द्रिय-सामान्य-लक्षणम्।' अत्र विशेषण-दलानुपादाने ज्ञान-कारण-मनः-संयोगाश्रयत्वस्यात्मनि सत्त्वादतिव्याप्तिः, अतस्तदुपादानम्। विशेषण-दल-मात्रोक्तौ कालादावतिव्याप्तिः, शब्देतर-विशेष-गुणानां= रूपादीनामनाश्रयत्वात्, अतो विशेष्यदलम्। विशेषण-दले 'शब्देतर'-इत्यनुपादाने श्रोत्रेन्द्रियेऽतिव्याप्तिः, उद्भूत-विशेष्य-गुणस्य शब्दस्याना- श्रयत्वाभावात्, (अतः) शब्देतर-इत्युक्तम्। उद्भूतपदानुपादाने चक्षुरादावतिव्याप्तिः, शब्देतर-विशेष-गुणानां=रूपादीनामनाश्रयत्वाभावात्,अत उद्भूत-इत्युक्तम्। विशेष-पदानुपादाने चक्षुरादावसम्भवः स्यात्, शब्देतरोद्भूतगुणस्य = संयोगस्यानाश्रयत्वाभावात्,अतो 'विशेषगुण' इत्युक्तम्।

विशेष्य-दले ज्ञान-कारणत्वानुपादाने कालादावतिव्याप्तिः, अतस्तदुपादानम्, काल-मनः-संयोगस्य ज्ञान-कारणत्वाभावान्नातिव्याप्तिः। मनः पदमपि तत्रैवातिव्याप्ति-वारणाय। इति ध्येयम्।

विषयत्वं च विषयाकारानुगत-प्रतीति-साक्षिक-स्वरूपसम्बन्ध[साक्षिकत्वरूप][127]-विशेषः॥१३॥

**हिन्द्यनुवादः –** वायु लक्ष्य है। वायुत्व लक्ष्यता-अवच्छेदक है। 'समवाय सम्बन्ध से अनुष्ण एवं अशीत स्पर्श जिसका लक्षण (असाधारण धर्म) है' उसे वायु कहते हैं। सम्बन्ध की व्यावृत्ति यहाँ पूर्ववत् ही ज्ञेय है। लक्षण में 'अनुष्णत्व' का ग्रहण न करने पर 'अशीत स्पर्श' वाले तेज में अतिव्याप्ति होने के कारण 'अनुष्ण-स्पर्शत्व' का भी कथन किया गया। अनुष्ण स्पर्श का तेज में अभाव होने से लक्षण में अतिव्याप्ति नहीं होगी। मात्र 'अनुष्णस्पर्श' का कथन करने पर जल में अतिव्यप्ति होती अतः 'अशीतत्व' भी कहा गया है, अशीत-स्पर्श का जल में अभाव होने के कारण अतिव्याप्ति नहीं होग क्योंकि जल स्पर्श शीत है। 'अनुष्णाशीत-स्पर्श' मात्र उक्त करने पर पृथ्वी में अतिव्याप्ति होगी, वहाँ भी अनुष्णाशीत स्पर्श होने से,इस प्रकार अपाकज एवं अनुष्णाशीत स्पर्श वाला वायु है,ऐसा लक्षण सिद्ध हुआ।

वायवीय शरीर, इन्द्रिय एवं विषयों के लक्षण तेज-ग्रन्थ के समान उष्ण-स्पर्श के स्थान पर 'अनुष्ण एवं अशीत स्पर्श' इस पद को रखकर स्मरण करना चाहिए।

प्राण-वायु का अन्तर्भाव विषय में समझना चाहिए (इसका वर्णन तर्कसंग्रह में द्रष्टव्य है)। अपानादि भेद तो भिन्न-भिन्न क्रियाओं की उपाधि से है जैसे- पाचक, पाठक आदि।

**शरीरत्वादि में जाति का खण्डन -** यहाँ अर्थात् पार्थिव, जलीय, वायवीय और तेजसीय शरीरों में शरीरत्व जाति नहीं है (क्योंकि ये चारों आपस में समवेत नहीं है) उदाहरणस्वरूप वायवीय शरीर में पृथिवीत्व का अभाव है तथा जहाँ पृथिवीत्व है जैसे कि घट में, तो यहाँ

---

[127] शास्त्रिवर्येण तु अत्र 'साक्षिकत्वरूपसम्बन्धः' लिखितः किन्तु अत्र 'साक्षिकस्वरूपसम्बन्धः' भवेत्। यतोहि विषयतायाः लक्षणे स्वरूपसम्बन्धविशेष एव उक्तः न्यायकोशे -'विषयता चात्र विषयः इत्याकारकप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः। (न्यायसिद्धान्तमञ्जरी) पृ० – ७९१। अतः शोधकार्ये 'स्वरूपसम्बन्धविशेष' एव दृष्ट्या हिन्द्यनुवादः विश्लेषणं च कृतम्। संभवतः संपादनत्रुटिवशादेव अत्र 'साक्षिकत्वरूपसम्बन्धः' लिखितः न तु उपन्यासकारेण।

'विषयता च विषयाकारप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः'। (न्यायसिद्धान्तमञ्जरी,प्रत्यक्षखण्डः) Navya nyaya system of logic, page 136.

शरीरत्व का अभाव है। यहाँ दोनो ही अधिकरणों का परस्पर अत्यन्ताभाव है। इन दोनों का समानाधिकरणत्व मात्र पार्थिवशरीर में ही है, पृथिवीत्व और शरीरत्व का समावेश होने से। ( सर्वत्र 'शरीरत्व' जाति नहीं अपितु उपाधि है क्योंकि जाति तो सभी में समवेत रहती है तथा इन चारों प्रकार के शरीरों में समवेतत्व नहीं है )। किन्तु शरीर का सामान्य लक्षण 'चेष्टाश्रयत्व' ही है।

इसी प्रकार इन चारों के इन्द्रियों में इन्द्रियत्व जाति नहीं है। यहाँ भी 'पृथिवीत्व' के अभाव वाले चक्षु में इन्द्रियत्व है तथा इन्द्रियत्व अभाव वाले पट में पृथिवीत्व है। परस्पर अत्यन्ताभाव वाले पृथिवीत्व और इन्द्रियत्व का समानाधिकरण घ्राणेन्द्रिय में है, इन दोनो का समावेश होने से ( न कि अन्य इन्द्रियों में अतः इन चारों महाभूतों की इन्द्रियों में इन्द्रियत्व जाति नहीं है)। अब इन्द्रिय का लक्षण दिया गया है –'शब्दगुण के अतिरिक्त उद्भूत विशेष गुणों का अनाश्रय होने पर ज्ञान के कारण मनःसंयोग का जो आश्रय होता है वह इन्द्रिय-सामान्य है। इन्द्रियलक्षण में 'शब्दगुण के ईतर उद्भूत विशेष गुणों का अनाश्रयत्व' यह विशेषणदल है तथा 'ज्ञान के कारण मनःसंयोग का आश्रयत्व' विशेष्यदल है।

लक्षण में विशेषणदल का ग्रहण न करने पर ज्ञान के कारण मनःसंयोग का आश्रय आत्मा के भी होने से, आत्मा में अतिव्याप्ति हो जाती। अतः विशेषण दल का उपादान किया गया। इसी प्रकार लक्षण में विशेषणदल मात्र के रखने पर शब्देतर विशेष गुणों का अनाश्रयत्व काल में भी होने से, काल में अतिव्याप्ति हो जाएगी। अतः विशेष्यदल को भी लक्षण में रखा गया।

विशेषणदल में 'शब्देतर' पद न रखने पर श्रोत्रेन्द्रिय में अव्याप्ति होती क्योंकि श्रोत्रेन्द्रिय में उद्भूत विशेषगुण शब्द के अनाश्रयत्व का अभाव है (श्रोत्रेन्द्रिय कर्णशष्कुल्यवच्छिन्न आकाश ही है। आकाश में शब्दगुण का आश्रयत्व सदैव रहता है तथा श्रोत्रेन्द्रिय के आकाशस्वरूप होने से उसमें भी शब्दगुण का आश्रयत्व सदैव रहता है अर्थात् अनाश्रयत्व का अभाव होता है)। अतः विशेषणदल में 'शब्देतर' पद रखा गया है। इसी प्रकार 'उद्भूत' पद न देने से चक्षु, घ्राण आदि इन्द्रियों में अव्याप्तिदोष हो जाता। क्योंकि इन इन्द्रियों में शब्दगुण के अतिरिक्त अन्य 'रूप' इत्यादि विशेष गुणों के अनाश्रयत्व का अभाव होता है, तात्पर्य यह है कि इनमें रूपादि विशेष गुणों का आश्रयत्व रहता ही है। 'उद्भूत' पद देने से यह अव्याप्ति नहीं होगी। इस दल में 'विशेष' पद का उपादान न करने पर लक्षण में असम्भव दोष होगा ( तब शब्दगुण

के अतिरिक्त उद्भूत विशेष तथा सामान्य सभी गुणों का अनाश्रयत्व इन्द्रिय में होगा) क्योंकि शब्द से इतर उद्भूत संयोग (ज्ञानकारण मनःसंयोग ) इस सामान्य गुण के आश्रयत्व का भी अभाव हो जाएगा। अतः 'विशेष गुण' कहा गया।

विशेष्यदल में 'ज्ञानकारणत्व' पद न कहने पर कालादि में अतिव्याप्ति हो जाती अतः इसका उपादान किया गया। काल में 'मनःसंयोग के ज्ञानकारणत्व' का अभाव होने से अतिव्याप्ति नहीं होगी। 'मन' पद भी कालादि में अतिव्याप्ति निवारण हेतु प्रयुक्त हुआ है।

अब विषय में विषयत्व जाति का निराकरण हुआ है। विषय के आकार को प्राप्त ज्ञान (विषयी) के बोध का साधन 'स्वरूपसम्बन्ध' विशेष ही विषयत्व अथवा विषयता है।

**विश्लेषणम्**

**वायुद्रव्यलक्षणम् -** पृथिवीजलतेजोमहाभूतद्रव्यस्य लक्षणानन्तरं वायुद्रव्यलक्षणं प्रतिपाद्यते **- 'समवायसम्बन्धेनानुष्णाशीतस्पर्शवत्त्वं लक्षणम्'**। यस्मिन् द्रव्ये समवायसम्बन्धतया अनुष्णाशीतस्पर्शो विद्यते, स वायुः। अत्र कालिकसम्बन्धस्य व्यावृत्तिस्तु पूर्ववद्विहिता। वायौ स्पर्शमात्रं तिष्ठति। स्पर्शोऽयं न तु उष्णो न शीतः। किन्तु अनुष्णाशीतस्पर्शवत्याः पृथिव्या[128] अपि सत्वात्, अतिव्याप्तिर्भवति लक्षणस्य। पृथिव्यामतिव्याप्तिर्वारणाय आचार्येण लक्षणेऽस्मिन् 'अपाकज' इति पदं युज्यते। पृथिव्याः स्पर्शोऽयं पाकजः किन्तु वायौ अपाकजः। अतः अपाकजानुष्णाशीतस्पर्शस्य पृथिव्यामभावान्नातिव्याप्तिः वायोर्लक्षणस्य। एवम्प्रकारेण **'अपाकजानुष्णाशीतस्पर्शवत्त्वं वायोः लक्षणम्'** इति सिद्धम्। उपन्यासटीकायाम् उद्धृतप्रत्येकलक्षणस्य परीक्षा विशिष्टतया कृता उपन्यासकारेण। वायुलक्षणमपि स्वलक्ष्ये संभवति अथवा न, इत्येवं विचार्यते।

लक्षणे 'अनुष्णपदस्य' ग्रहणाभावे तेजसि अतिव्याप्तिर्जायते, यतोहि अशीतस्पर्श अर्थात् उष्णस्पर्शस्तु तत्रापि वर्तते। लक्षणे अनुष्णपदोपादाने तेजस्यतिव्याप्तिर्निराक्रियते। जलेऽतिव्याप्तिनिरासाय 'अशीत'पदमुक्तम्। अनुष्णस्पर्शवत्त्वमात्रमुक्ते सति जलेऽपि अनुष्णत्वसत्वाल्लक्षणमिदमत्रापि व्याप्तं भविष्यति। किन्तु अशीतस्पर्शस्तु जले न, शीतस्पर्शत्वात्। अतो जलेऽतिव्याप्तिर्न संभवति वायोर्लक्षणस्य। इदमपाकजानुष्णाशीतस्पर्शवत्त्वं वायुलक्षणं निर्दुष्टम्।

128 अनुष्णाशीतः पृथिवीवाय्वोः। तर्कसंग्रह - स्पर्शगुणलक्षणप्रकरणम्

तर्कसंग्रहे रूपरहितस्पर्शवान्वायुरिति लक्षणं दीयते वायोः। अस्य लक्षणस्य उपन्यासे प्रदत्तलक्षणात् पार्थक्यम्, इति न वाच्यम्। यतोहि अमुयोर्लक्षणयोरक्षरभिन्नत्वमेव, न तु प्रयोजनम् अथवा तात्पर्यभिन्नत्वम्। अन्नम्भट्टेन वायुलक्षणे पृथिवीजलतेजद्रव्यवारणाय आकाशादिनित्यद्रव्यनिरासाय च क्रमशो रूपरहितः स्पर्शवान् च विशेषणं स्थापितम्।[129] वायुलक्षणस्य इदमेव प्रयोजनमुपन्यासटीकायामपि दृश्यते। तत्र अपाकजपदेन पृथ्वीद्रव्यवारणम्, अनुष्णपदेन तेजोद्रव्यस्य , अशीतपदेन जलद्रव्यस्य तथा स्पर्शपदग्रहणेन आकाशादिनित्यद्रव्याणाञ्च निवारणं क्रियते। अतस्तर्कसंग्रह इव अत्रापि न वायुलक्षणस्य प्रयोजनान्तरम्।

अत्रापि शरीरादिलक्षणे उपर्युक्ततेजोद्रव्यस्येव उष्णस्पर्शस्थाने अनुष्णाशीतस्पर्शं संस्थाप्य बोध्यम्। 'प्राणवायुः' वायोर्तृतीयभेदे विषयेऽन्तर्भाव्यते। असौ प्राणवायुः वैषयिकवायुरूपणैव प्रसिद्धः। यद्यपि प्राणवायुस्त्वेकः किन्तु क्रियाभेदेन प्राणापानसमानोदानव्यानादि संज्ञया अभिहितः।[130] यथा मनुष्य एकः किन्तु पाचनपठनादिकार्यभेदेन पाचकः पाठकादिरुच्चार्यते।

**पार्थिवशरीरादौ जातिखण्डनम् -** पृथिव्यादिचतुष्टयस्य लक्षणं,भेदोपभेदः,शरीरादीनामपि लक्षणञ्च विधाय पार्थिवजलीयतैजसवायवीयानां शरीरेन्द्रियविषयेषु जातिखण्डनप्रकरणं निरूप्य शरीरेन्द्रियविषयस्य च सामान्यलक्षणं प्रतिपाद्यते। अत्र जिज्ञासा उत्पद्यते यत् पार्थिवशरीरादेः वर्णनान्तरमेव शरीरत्वादौ जातिखण्डनविवेचनं किमर्थं न? जिज्ञासाशाम्यर्थं वक्तुं शक्यते यत्  संभवत अर्थक्रमभङ्गवशादाचार्येण चतुष्प्रकाराणां शरीरादीनां निर्वर्ण्य तदनु प्रकरणमिदम् उपस्थाप्यते। चतुष्प्रकारस्य शरीरादिकथने एवं नाकांक्षनीयं यत् अत्र चतुर्षु समवेता शरीरत्व-इन्द्रियत्व-विषयत्वजातिः। शरीरत्वमिति उपाधिः अत्र। अतः शरीरत्वादौ उपाधिः सिद्ध्यते टीकाकारेण। सर्वप्रथमः शरीरे जातिर्निराक्रियते। चतुष्प्रकारकशरीरेषु यत् शरीरत्वं कथ्यते तत्तु न जातिः, अपितु उपाधिः। यतोहि शरीरस्तु सर्वत्र अर्थात् पृथिवीजलतेजोवायौरिति वर्तते। अतो यत्र यत्र शरीरत्वं भवेत्, तत्र तत्र एतेषामपि उपस्थितिः आवश्यकी किन्तु वायवीयशरीरे शरीरत्वं तु विद्यते, परञ्च पार्थिवत्वाभावः। अनेन प्रकारेणैव पार्थिवघटे शरीरत्वाभावः। अत्र

129 दीपिका,न्यायबोधिनी,पदकृत्यम् - वायुलक्षणप्रकरणम्

130 प्राणोऽपानः समानश्चोदान-व्यानौ च वायवः। अमरकोशः – १/२/६७

उपस्थितद्वयोरधिकरणयोरर्थात् वायवीयशरीरे पार्थिवघटे च परस्परान्त्यन्ताभावो वर्तते। यतोहि अमुयोर्भूतभविष्यवर्तमानकस्मिन्नपि काले परस्परसंसर्गो न भविष्यति।[131] एकस्मिन् आधारे अर्थात् 'पार्थिवशरीरे' शरीरत्व-पार्थिवत्वस्य च समावेशः संभवति यदस्माकं शरीरं, न तु सर्वत्र। अत एतेषु चतुर्षु शरीरेषु शरीरत्वमुपाधिर्न तु जातिः। किन्तु शरीरः सर्वत्र चेष्टाश्रयः, अत आचार्येण **चेष्टाश्रयत्वमेव शरीरसामान्यलक्षणं** स्वीक्रियते पदकृत्यवत्।[132]

एवम्प्रकारेण उपर्युक्तेन्द्रियेष्वपि 'इन्द्रियत्वं' न जातिरपितु उपाधिः। यतोहि इन्द्रियं तु एकमेव किन्तु अधिष्ठानभेदात् चक्षुघ्राणादिनाम्ना अभिधीयते। 'इन्द्रियत्वं' चतुर्षु द्रव्येषु विद्यते, स्व-स्वेन्द्रियकारणात्। यदि इन्द्रियत्वं जातिः स्वीक्रियते तर्हि इन्द्रिये द्रव्यचतुष्टयानां समवेतत्वं स्वाभाविकम्। किन्तु चक्षुरिन्द्रिये इन्द्रियत्वं तु अस्ति,परञ्च पृथिवीत्वाभावः दृश्यते। यतोहि चक्षुस्तेजोद्रव्यस्य इन्द्रियमस्ति। अनेन प्रकारेण पार्थिवघटे पृथिवीत्वमस्ति किन्तु इन्द्रियत्वाभावः। पृथिवीत्व-इन्द्रियत्वयोः अधिकरणेऽप्यत्यन्ताभावः। अमुयोः समानाधिकरणत्वं यदि कुत्रापि दृश्यते तत्तु घ्राणेन्द्रियं,सर्वेन्द्रियेषु न। अत इन्द्रियत्वं न जातिः। इन्द्रियजातिनिरसनान्तरं टीकाकारेण इन्द्रियसामान्यलक्षणं प्रतिपाद्यते - **'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्।** शब्दगुणातिरिक्तानां उद्भूतविशेषगुणानाम् अनाश्रयत्वं तथा ज्ञानस्य कारणं मनःसंयोगस्य आश्रयत्वं यस्मिन् वर्तते, तदेव इन्द्रियम्। अत्र लक्षणे भागद्वयमस्ति - प्रथमे तु अनाश्रयो द्वितीये च आश्रय उल्लिख्यते इन्द्रियविशेषणरूपे। रूपरसगन्धस्पर्शशब्दश्च विशेषगुणाः कथ्यन्ते चक्षुरादीन्द्रियाणाम्। इन्द्रियमर्थात् विशेषगुणग्रहणशक्तिः, एषैव शक्तिर्भिन्न-भिन्नाधिकरणेषु तिष्ठति। अत इन्द्रियम् इन्द्रियावयवेभ्यो (घ्राणादीभ्यः) भिन्नम्।[133] यद्यपि इन्द्रिये गुणग्रहणशक्तिकारणात् अनुद्भूतविशेषसामान्यगुणानाम् आश्रयत्वं तु सर्वदैव तथापि यदा कुत्रचिदपि विशेषगुणः (रूपादिपञ्च) उद्भूतः प्रकटितो वा भविष्यति तर्हि तस्य गुणस्य ग्रहणं तस्यैवाश्रयिणः अर्थात् द्रव्यस्य इन्द्रियेण भवति। अत्र ध्यातव्यं यत् पृथिव्यादिपञ्चमहाभूतद्रव्याणां क्रमशः घ्राण-रसना-चक्षु-त्वक्-श्रोत्रेन्द्रियाणि च विद्यन्ते। अतः उद्भूतविशेषगुणस्य आश्रयत्वं तु तत्तत्गुणग्राहकेन्द्रियेषु वर्तते, न सामान्येन्द्रिये। यतोहि

---

131 त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽभावोऽत्यन्ताभावः। अत्यन्ताभावलक्षणम् – तर्कसंग्रहः

132 यद्भोगायतनं तदेव शरीरं, चेष्टाश्रयो वा। पदकृत्यम् - पृथिवीद्रव्यलक्षणम्

133 तर्कसंग्रहः दीपिकाव्याख्यासहितः – पृष्ठम् ३६

इन्द्रियमात्रे तु अनुद्भूतस्थितौ विशेषः सामान्यगुणश्च द्वयोरेव आश्रयत्वं विद्यते। अत एव सामान्येन्द्रियलक्षणे 'उद्भूतविशेष-गुणानाश्रयत्वं' कथ्यते। अत्र 'शब्देतर' पदमपि प्रयुक्तम्। अर्थात् शब्दभिन्नोद्भूतविशेषगुणानाम् अनाश्रयो वर्तते इन्द्रियम्। शब्दगुणस्य अनाश्रयत्वं सामान्येन्द्रिये कदापि भवत्येव न। यतोहि शब्दगुणः श्रोत्रेन्द्रियेन गृह्यते तथा न्यायवैशेषिकदर्शने 'श्रोत्रेन्द्रियं' कर्णशष्कुल्यवच्छिन्नाकाश एव स्वीक्रियते।[134] आकाशे तु शब्दगुणस्याश्रयत्वं सर्वदा,समवायेन शब्दगुणवत्त्वस्य सत्वात्,अतः श्रोत्रेन्द्रियेऽपि। अस्मात् कारणात् इन्द्रियलक्षणे शब्दगुणेतरोद्भूतगुणानाम् अनाश्रयत्वमुक्तम्।

दर्शनेऽस्मिन् ज्ञानोत्पत्तिप्रक्रियायां यदा आत्मनो मनसा सह, मनस इन्द्रियेण सह तथा इन्द्रियस्य विषयेण सह संयोगः भवति तदा आत्मनि विषयज्ञानमुत्पद्यते। अत्र मनसा सह इन्द्रियस्य संयोगोऽपि ज्ञानकारणमिति। अतः इन्द्रियं संयोगस्य आश्रयोऽपि। मनसा सह इन्द्रियसामान्यस्य संयोगो न तु घ्राणादिविशेषेन्द्रियाणां यतोहि एतेषु इन्द्रियेषु तु विशेषगुणस्याश्रयत्वं वर्तते किन्तु 'संयोगस्तु' सामान्यगुणः। अतः संयोगगुणस्याश्रत्वं सामान्येन्द्रिये एव भवितुं शक्नोति। अतो हेतोरिन्द्रियं तु एकमिति सिद्ध्यते आचार्येण।

उपन्यासकारेण लक्षणस्य द्वयमेव विभागं क्रमशः विशेषणदलं विशेष्यदलञ्चेति नाम्ना उच्चार्यते। लक्षणे यदि विशेषणदलं न गृह्यते तर्हि 'ज्ञानकारणमनःसंयोगाश्रयत्वमिति' इन्द्रियसामान्यलक्षणं भवेत्। किन्तु मनसा सह आत्मनोऽपि संयोगो ज्ञानस्य कारणं भवति। अतो मनःसंयोगाश्रयत्वात् आत्मन्यपि अतिव्याप्तिर्भवति। आत्मनि इन्द्रियलक्षणस्यातिव्याप्तिवारणाय विशेषणदलविहितम्। अत्र शब्देतरोद्भूतविशेषगुणाना-श्रयत्वाभावान्नातिव्याप्तिः। यतोहि बुद्ध्यादि नवविशेषगुणानाम् आश्रयस्तु आत्मा (जीवात्मा) सर्वदैव।[135] लक्षणे विशेष्यदलाग्राह्यत्वे सति 'शब्देतरोद्भूतविशेषगुणानाश्रयत्वं' इत्यस्मिनिन्द्रियलक्षणस्य कालादावतिव्याप्तिर्जायते,कालेऽप्युद्भूतविशेषगुणानाम्

---

134 कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। तर्कभाषा - श्रोत्रेन्द्रियप्रकरणम्

135 आत्मनि चतुर्दशगुणाः वर्तन्ते – तस्य गुणा बुद्धि-सुखदुखेच्छाप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागः –प्रशस्तपादभाष्यम् (कन्दलीटीकासहितः) – पृ० २०८, एतेषु आदिनवगुणाः आत्मनः विशेषगुणाः । वैशेषिक दर्शन में पदार्थ-निरूपण – पृ० १९७

अनाश्रयत्वात्।[136] यतोहि कालिकसम्बन्धेन काले सर्ववस्तूनां भावाभावश्च वर्तते। अतः शब्देतरोद्भूतविशेषगुणानाम् आश्रयत्वा भावोऽपि अनेन सम्बन्धेन कालेऽस्त्येव। विशेषणदलग्रहणे नेयमतिव्याप्तिर्यतोहि काले ज्ञान- कारण मनःसंयोगाश्रयत्वस्याभावः। अत्र स्पष्टीक्रियते यत् इन्द्रियेण सह मनसः सम्बन्धः संयोगः,न तु सर्वाधारताप्रयोजकसम्बन्धः।[137] अन्यथा सर्वाधारत्वेन कालोऽपि[138] ज्ञानकारणमनःसंयोगस्य आश्रयः भवितुं शक्यते।

उपन्यासटीकायां पदार्थलक्षणस्य परीक्षा कियत्सूक्ष्मदृष्ट्या प्रतिपादिता, अस्य ज्ञानं तु इन्द्रियलक्षणपरीक्षयैव भवति। आचार्येण लक्षणे प्रयुक्तयोर्विशेषणविशेष्यदलयोः परीक्षणं तु कृतमेव किन्तु तेनैव सह तयोर्मध्ये प्रयुक्तपदानामपि निरीक्षणं दोषत्रयवारणाय विहितम्। 'शब्देतरोद्भूतविशेषगुणानाश्रयत्वं' इत्यस्मिन् विशेषणदले यदि 'शब्देतर'पदस्य ग्रहणं न क्रियते तर्हि 'उद्भूतविशेषगुणानाश्रयत्वम्' अस्य श्रोत्रेन्द्रिये अव्याप्तिर्भविष्यति। यतोहि उद्भूतशब्दगुणस्य अनाश्रयत्वं कदापि इन्द्रिये भवत्येव न। श्रोत्रेन्द्रियस्य आकाशरूपैव सत्वात्, शब्दगुणाश्रयत्वं श्रोत्रेन्द्रियमपि सर्वदा। अतो विशेषणदले 'शब्देतरपदं' प्रयुक्तम्। लक्षणे उद्भूतपदानुपादाने 'शब्देतरविशेषगुणानाश्रयत्वं' इत्यस्य चक्षुर्घ्राणादीन्द्रियेषु अव्याप्तिः। यतोहि तेषु शब्दातिरिक्तं रूपगन्धादिविशेषगुणानाम् अनाश्रयत्वाभावः। अतो लक्षणे 'उद्भूत' इत्युक्तम्। अत्र विशेषपदस्य अनुक्ते सति शब्देतरोद्भूतगुणानाश्रयत्वं भवति। लक्षणमिदम् असंभवदोषग्रस्तम् यतोहि अस्य तात्पर्यं भवति यत् इन्द्रिये सामान्यविशेषश्च कस्यापि गुणस्य आश्रयत्वं नास्ति। वस्तुतः इन्द्रियं सामान्यगुणसंयोगस्य आश्रयम् तु अस्त्येव। अतोऽसम्भवदोषवारणाय विशेषणदले विशेषपदं गृहीतम्।

अधुना 'ज्ञानकारणमनःसंयोगाश्रयत्वमि'ति विशेष्यदलं परीक्षितम्। यदि अत्र 'ज्ञानकारण'पदं न गृह्यते चेत् कालोऽपि सर्वाधारतया मनःसंयोगाश्रयत्वात्, तस्मिन्नपि अतिव्याप्तिर्भविष्यति। अतो लक्षणे ज्ञानकारणमुक्तम्, यतोहि काले मनःसंयोगाश्रयत्वं तु किन्तु ज्ञानकारणत्वं न। काले मनःसंयोगस्य ज्ञानकारणत्वाभावान्नातिव्याप्तिः। दलेऽस्मिन् 'मनः' पदमपि कालस्यैव वारणाय प्रयुक्तम्। यतोहि 'ज्ञानकारणसंयोगाश्रयत्वं' काले भवितुं शक्यते यथा 'घटाभाववत् भूतलम्' इत्यत्र भूतलं विशेष्यस्तथा घटाभावो विशेषणम्। अत्र घटाभावस्य प्रत्यक्षे (ज्ञाने)

---

136 तर्कसंग्रहः दीपिकाव्याख्यासहितः – पृष्ठम् ३७


137 तत्रैव

138 सर्वाधारः कालः – दीपिका, कालद्रव्यलक्षणम्

संयुक्तविशेषणतासंनिकर्षेण नेत्रस्य भूतलेन सह संयोगोऽपि ज्ञानस्य कारणं भवति[139] तथैव 'काले रूपाभावः' तु सिद्धम्। अत्र रूपाभावो विशेष्यस्तथा कालो विशेषणं यतोहि न्यायदर्शने यत्पदं प्रथमान्तं तदेव विशेष्यः[140]। अतः संयुक्तविशेष्यतासंनिकर्षेण चक्षुरिन्द्रियस्य काले सह संयोगः (द्रव्यद्वये संयोगसम्बन्धकारणात् चक्षुषा सह कालस्य संयोगोऽर्हति) अपि रूपाभावस्य प्रत्यक्षे अथवा ज्ञाने कारणं तथा अस्य ज्ञानकारणसंयोगस्याश्रयो अपि कालः।[141]

**आरेखीयप्रस्तुतिः –**

'काले रूपाभावः' इत्यत्र रूपाभावस्य प्रत्यक्षज्ञानम् –




**चित्र-क्रमाँकः २**

अतः ज्ञानकारणसंयोगाश्रत्वं कालेऽपि सत्वात् मनः पदं प्रयुक्तम्। काले ज्ञानकारणमनःसंयोगा- श्रयत्वस्य अभावात् अभावान्नातिव्याप्तिः। अन्यत्र इन्द्रियावयववारणाय अपि मनःपदस्य प्रयोजनमुक्तम्।[142] यतोहि विषयस्य इन्द्रियावयवेन सह संयोगोऽपि ज्ञानस्य कारणात् तत्रापि संयोगाश्रयत्वम्। किन्तु मनःसंयोगाश्रयत्वं तु

---

139 (विशेषणविशेष्यभावो नाम नैकः सन्निकर्षः। अपितु विशेषणत्वं विशेष्यत्वं चेति द्वयम्। अत्राभावविशेषणकप्रत्यक्षे विशेषणत्वं संनिकर्षः। अभावविशेष्यकप्रत्यक्षे विशेष्यत्वं सन्निकर्षः। ताताचार्यः पृ० १३९) उल्लिखितम् - तर्कसंग्रहदीपिकाव्याख्यासहितः - पृ० ११८

A Primer of Navya Nyaya Language and Methodology - Page ४२

140 विशेष्यतावान् विशेष्यः। यथा 'भूतले घटो नास्ती'ति प्रत्यक्षे घटाभावो विशेष्यः। न्यायकोशः – पृ० ७९०

141 (प्रकाशिकाटीका – पृ० ७१) उल्लिखितं तर्कसंग्रहदीपिकाव्याख्यासहितः पृ० ३९

142 तत्रैव - पृ० ३८

इन्द्रियमात्रे एव न तु इन्द्रियावयवेषु, इन्द्रियावयानाम् इन्द्रियभिन्नत्वात्। अतो मनःसंयोगाश्रयत्वाभान्नातिव्याप्तिः तत्र। एवं 'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इति इन्द्रियसामान्यस्य लक्षणं निर्दुष्टमेव।

सम्प्रति पार्थिवादिविषयेषु विषयत्वे जातेः खण्डनं कृत्वा स्वरूपसम्बन्धविशेष उच्यते टीकाकारेण यथा हरिरामतर्कवागीशेनाप्युक्तम्।[143] विषयत्वं विषयता वा न्याये सम्बन्धः स्वीक्रियते न तु जातिस्तथा च सम्बन्धोऽयं विषयस्य आकारप्राप्तज्ञानस्य अर्थात् विषयिणो बोधे कारणमस्ति। यथा 'घटो ज्ञानस्य विषयः' इत्यनुगतप्रतीतिसाक्षिको ज्ञानविषयस्वरूपसम्बन्धविशेष इत्यर्थः। अत्र ज्ञानविषयत्वं च ज्ञानसम्बन्ध एव इति।[144]

एवं पार्थिवादिचतुष्प्रकारेषु शरीरेन्द्रियविषयेषु च शरीरत्वमादिजातिर्न, उपाधिरिति टीकाकारः।

### ( १.५ आकाशद्रव्य-लक्षणम् )

**तर्कसंग्रहः -** शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यञ्च॥१४॥

**उपन्यासः -** आकाशो लक्ष्यः। आकाशत्वं लक्ष्यताऽवच्छेदकम्। 'समवायसम्बन्धेन शब्दगुणवत्त्वं' लक्षणम्। 'समवाय-सम्बन्धा'नुपादाने कालादावतिव्याप्तिः, अतस्तदुपादानम्। श्रोत्रेन्द्रियं लक्ष्यम्। श्रोत्रेन्द्रियत्वं लक्ष्यताऽवच्छेदकम्। 'शब्दाश्रयत्वे सति इन्द्रियत्वं लक्षणम्'। 'इन्द्रियत्व-'मात्रमुक्तम् चेत् चक्षुरादावतिव्याप्तिः। 'शब्दाश्रयत्व'-मात्रमुक्तम् चेत् कालादावतिव्याप्तिः, अत उभयोरूपादानम्॥१४॥

**हिन्द्यनुवादः –** आकाश लक्ष्य है। आकाशत्व लक्ष्यता-अवच्छेदक है। 'समवाय सम्बन्ध से शब्द गुण जिसमें रहता है' उसे आकाश कहते हैं। समवाय सम्बन्ध का ग्रहण न करने पर कालादि में अतिव्याप्ति होने के कारण ही उसका कथन किया गया है। श्रोत्रेन्द्रिय लक्ष्य है। श्रोत्रेन्द्रियत्व लक्ष्यता-अवच्छेदक है । 'शब्द का आश्रय होते हुए इन्द्रिय से युक्त होना ही' श्रोत्रेन्द्रिय का लक्षण है। 'इन्द्रियत्व' मात्र कहने पर चक्षु आदि में अतिव्याप्ति होगी तथा 'शब्दाश्रयत्व' मात्र उक्त होने पर कालादि में अतिव्याप्ति होगी, अतः लक्षण में दोनों पद का उपादान किया गया है।

---

[143] विषयता च स्वरूपसम्बन्धविशेषो ज्ञानादीनां विषयेण, न त्वतिरिक्ता, मानाभावादिति प्राञ्चः।
विषयतावादः - १

[144] न्यायकोशः – पृ० ७९१

## विश्लेषणम्

**आकाशद्रव्यलक्षणम्-** नवद्रव्येषु आकाशं पञ्चमम्। पृथिव्यादारभ्य आकाशपर्यन्तं पञ्चद्रव्यानि भूतान्यपि कथ्यन्ते। **भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्** ।[145] आकाशमपि भूतेष्वेक अतस्तस्मिन्नपि बहिरिन्द्रियेण ग्रहणयोग्यो विशेषगुणस्तिष्ठति, तन्नाम शब्दगुणः। **'समवाय - सम्बन्धेन शब्दगुणवत्त्वम्'** आकाशस्य लक्षणमिति। सम्बन्धव्यावृत्तिस्तु पूर्ववदेव ज्ञेया। आकाशं तु नित्यं एकमेव च, अस्य कार्यरूपो न विद्यते पृथिव्यादिवत्। घटाकाशमठाकाशादिशब्दप्रयोगस्तु उपाधिभेदेन। जातिस्तु अनेकसमवेता भवति किन्तु आकाशं तु एकमेव अतो गगने 'गगनत्वं' न जातिः प्रत्युतोपाधिः।[146] उपाधिः सखण्डोपाधिरखण्डोपाधिश्चेति द्विविधः। यस्य अंशतो विभक्तुं न शक्यते स अखण्डोपाधिः।[147] अत्र गगने गगनत्वमिति अखण्डोपाधिः।[148]

आकाशे इन्द्रियमात्रमेव शरीरादिर्न, तच्चेन्द्रियं श्रोत्रेन्द्रियम्। कर्णविवरवर्ति आकाशमेव श्रोत्रेन्द्रियम् अर्थात् श्रोत्रेन्द्रियं तु कर्णशष्कुल्यवच्छिन्नाकाशमेव नान्यत्किञ्चित्।[149] **'शब्दाश्रयत्वे सतीन्द्रियत्वं'** श्रोत्रेन्द्रियस्य लक्षणम्। अत्र इन्द्रियत्वमात्रमुक्तौ चक्षुरादावतिव्याप्तिस्तत्रापि इन्द्रियत्वस्य सत्वात्, अतः शब्दाश्रयत्वमुक्तं तथा शब्दाश्रयत्वमात्रोपादाने कालादावतिव्याप्तिः सर्वाधारत्वात्, अत इन्द्रियत्वम्। आकाशे एको विशेषगुणशब्दः पञ्च सामान्यगुणसंख्यादयो वर्तन्ते।

### ( १.६ कालद्रव्य-लक्षणम् )

**तर्कसंग्रहः –** अतीतादिव्यवहारहेतुः कालः। स चैको विभुर्नित्यश्च॥१५॥

**उपन्यासः -** कालो लक्ष्यः। कालत्वं लक्ष्यताऽवच्छेदकम्। 'अतीतादिव्यवहारहेतुत्वं' लक्षणम्। 'व्यवहार-हेतुत्वं' मात्रमुक्तम् चेत्? दिश्यतिव्याप्तिः, अतः 'अतीतादि' इत्युक्तम्। अतीतादिव्यवहारहेतुत्वस्य दिश्यभावान्नातिव्याप्तिः॥१५॥

**हिन्द्यनुवादः –** काल लक्ष्य है। कालत्व लक्ष्यता-अवच्छेदक है। 'अतीतादि के व्यवहार का जो

145 न्यायबोधिनी - आकाशद्रव्यलक्षणम्

146 उदयनाचार्येण षट्जातिबाधके यत् 'व्यक्तेरभेदः' जातिबाधकः उक्तः, गगनत्वे तु तदेव।

147 नव्यन्यायभाषाप्रदीपः – Text 3

148 तर्कसंग्रहः तट्टीकानां समीक्षात्मकमध्ययनम् – पृ २२

149 कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। तर्कभाषा - श्रोत्रेन्द्रियनिरूपणम्

हेतु है' उसे काल कहते हैं। 'व्यवहार-हेतुत्व' मात्र कहने पर दिक् में अतिव्याप्ति के कारण 'अतीतादि' पद कहा गया है। दिक् में अतीतादि व्यवहार के हेतुत्व का अभाव होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**कालद्रव्यलक्षणम्-** द्रव्येषु कालः षष्ठस्तथा नित्यद्रव्यपरिगणने द्वितीयः। **'अतीतादिव्यवहारहेतुत्वं कालस्य लक्षणम्'**। अतीतादिरर्थात् भूत-भविष्य-वर्तमानस्य च यो हेतुः स काल एव। हेतोस्तात्पर्यम् असाधारणकारणमिति पदकृत्ये।[150] साधारणकारणानि अष्ट येषु कालोऽप्येकः।[151] किन्तु अतीतादिकस्य व्यवहारे कालः तस्याधारणहेतुः। लक्षणे व्यवहारस्य तात्पर्यं शब्दप्रयोगः[152] यथा घटो आसीत्, घटो भविष्यतीति भाषणमेव व्यवहारः। काललक्षणस्य दिश्यतिव्याप्तिर्न भवेत्, अतो हेतोर्लक्षणे 'अतीतादि' उक्तम्। अन्यथा तु व्यवहारहेतुत्वं दिश्यपि इत्यग्रे वर्णयिष्यते। किन्तु अतीतीदेर्व्यवहारहेतुत्वस्य तत्राभावान्नातिव्याप्तिरिति उपन्यासकारः। अतः कालस्येदं लक्षणं स्वलक्ष्यमेव लक्षयति। कालोऽयं सर्ववस्तूनामाधारः सर्वकार्याणां निमित्तकारणञ्च मन्यते वैशेषिकाचार्यैः।[153] काले संख्यापरिमाणादिः पञ्च सामान्यगुणा एव विद्यन्ते। कालकृतेन परत्वापरत्वेन ज्येष्ठत्वकनिष्ठत्वेन च काल अनुमीयते।

### ( १.७ दिग्द्रव्य-लक्षणम् )

**तर्कसंग्रहः -** प्राच्यादिव्यवहारहेतुर्दिक्। सा चैका विभ्वी नित्या च॥१६॥

**उपन्यासः -** दिग्लक्ष्या। दिग्त्वं लक्ष्यताऽवच्छेदकम्। 'प्राच्यादिव्यवहारहेतुत्वं' लक्षणम्। प्राच्यादि इत्यनुक्तौ व्यवहार-हेतुत्वस्य कालादावपि सत्त्वादतस्तदुक्तम्॥१६॥

**हिन्द्यनुवादः –** दिक् लक्ष्या है। दिक्त्व लक्ष्यता-अवच्छेदक है। 'प्राच्यादि के व्यवहार का हेतु ही' दिक् है। प्राच्यादि पद का अभिधान न करने पर व्यवहार हेतुत्व का कालादि में भी अतिव्याप्ति होती, अतः इसका उपादान किया गया।

---

150 पदकृत्यम् - कालद्रव्यलक्षणम्

151 तर्कसंग्रहः (व्याख्या – आद्याप्रसादमिश्र) पृ० ४१

152 श्रीनिवासमुखोल्लासिनीटीका - कालद्रव्यलक्षणम्

153 अन्नम्भट्टः – दीपिका ( कालद्रव्यलक्षणप्रकरणम् )
गोविन्दाचार्यः – श्रीनिवासमुखोल्लासिनी (तत्रैव )

## विश्लेषणम्

**दिग्द्रव्यलक्षणम् –** वैशेषिकदर्शने कालस्येव दिगपि सर्वकार्यं प्रति निमित्तकारणं मन्यते।[154] यतोहि प्रत्येककार्यं कश्मिंश्चिद् विशिष्टकाले विशिष्टस्थाने चोत्पद्यते। दिग्कृतपरत्वापरत्व-दूरत्वसमीत्वेन च दिश अनुमानं भवति। उपन्यासे **'प्राच्यादिव्यवहारहेतुत्वं'** दिशो लक्षणमुच्यते। अत्र 'प्राच्यादि' पदस्य ग्रहणं कालादावतिव्याप्तिनिराकरणाय क्रियते। यतोहि कालेऽपि अतीतादेः व्यवहारहेतुत्वं पूर्वमुक्तम्। आदिपदस्य तात्पर्यं घटपटादिः संसूच्यन्ते। घटादिरपि दैनिकजीवने नैकव्यवहाराणां हेतुर्भवति। अत अत्र प्राच्यादिग्रहणेन कालादिवारणं भवति, कालादेः प्राच्यादिव्यवहारहेतुत्वस्य अभावत्वात्। लक्षणे हेतुरिति असाधारणकारणं तथा व्यवहारः शब्दप्रयोगः पूर्ववत् बोध्यम्। वस्तुत दिशो विभागो न वर्तते, सा तु एकैव आकाशादिवत् किन्तु लक्षणे प्राच्यादिरिति प्रयोग अर्थात् प्राचीप्रतीचीउदीचीअवाची[155] च विभाग उपाधिभेदेन कृतः। दिश्यपि पञ्च सामान्यगुणाः वर्तन्ते।

( १.८ आत्मद्रव्य-लक्षणम् )

**तर्कसंग्रहः –** ज्ञानाधिकरणमात्मा। स द्विविधो जीवात्मा परमात्मा च। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवात्मा तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च॥१७॥

**उपन्यास:-** आत्मा लक्ष्यः। आत्मत्वं लक्ष्यताऽवच्छेदकम्। 'समवायसम्बन्धेनज्ञानवत्त्वं लक्षणम्'। समवायसम्बन्धानुपादाने विषयतासम्बन्धेन ज्ञानवत्त्वस्य घटे सत्त्वादतिव्याप्तिः, अतस्तदुपादानम्। १. ईश्वरो लक्ष्यः। ईश्वरत्वं लक्ष्यताऽवच्छेदकम्। 'सर्वज्ञत्वे सति परमत्वं लक्षणम्'। परमत्वानुपादाने कस्मिंश्चिद् योगिविशेषेऽतिव्याप्तिः तस्तदुक्तम्। सर्वज्ञत्वानुपादाने साङ्ख्याभिमतप्राधान्येऽतिव्याप्तिः तस्यापि स्वकार्यापेक्षया परमत्वात्, अतः सर्वज्ञत्वम् इति। २. जीवः प्रतिशरीरं भिन्नत्वेन, शरीराणामानन्त्याज्जीवोऽप्यनन्तः ॥१७॥

**हिन्द्यनुवादः –** आत्मा लक्ष्य है। आत्मत्व लक्ष्यता-अवच्छेदक है। 'समवाय सम्बन्ध से ज्ञान का जो आश्रय है' वह आत्मा है। 'समवाय सम्बन्ध' यह पद न रखने पर विषयता सम्बन्ध से ज्ञान का घट में भी होने से घट में अतिव्याप्ति होगी। अतः इसका उपादान किया गया।

---

[154] दीपिका - दिग्द्रव्यलक्षणम्

[155] उदयाचलसंनिहिता या दिक् सा प्राची। अस्ताचलसंनिहिता या दिक् सा प्रतीची। मेरोः संनिहिता या दिक् सा उदीची। मेरोर्व्यवहिता या दिक् सा अवाची इति। न्यायबोधिनी - दिग्द्रव्यलक्षणम्

ईश्वर लक्ष्य है। ईश्वरत्व लक्ष्यता-अवच्छेदक है। 'सर्वज्ञत्व एवं परमत्व से युक्त होना ही' ईश्वर का लक्षण है। लक्षण में 'परमत्व' पद न ग्रहण करने पर किसी 'योगि-विशेष' में अतिव्याप्ति होने के कारण इसका उपादान किया गया। तथा 'सर्वज्ञत्व' इस पद का कथन न करने पर 'सांख्याभिमत प्रधान (प्रकृति)' में अतिव्याप्ति होती, प्रकृति का भी अपने कार्य की अपेक्षा के कारण परमत्व होने से। अतः 'सर्वज्ञत्व' का अभिधान किया गया।

जीव प्रत्येक शरीर में भिन्न–भिन्न होने से, शरीर के आनन्त्य के कारण अनन्त है।

## विश्लेषणम्

**आत्मद्रव्यलक्षणम् -** अष्टमद्रव्यस्य आत्मनो लक्षणमुच्यते -**'समवायसम्बन्धेन ज्ञानवत्त्वं'**। ज्ञानम् अथवा बुद्धिगुणः समवायसम्बन्धेन यस्मिन् द्रव्ये विद्यते स आत्मा। अत उपन्यासकारेण ज्ञानवत्त्वमिति लक्षणं दीयते आत्मनः। एतेन गुणेन सह सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्य- संस्कारश्च तथा पञ्चसामान्यगुणा अपि तिष्ठन्ति आत्मनि। एवम्प्रकारेण चतुर्विंशतिगुणेषु आत्मद्रव्ये चतुर्दशगुणा भवन्ति। तर्कसंग्रहे ज्ञानाधिकरणमात्मा इत्यत्र प्रयुक्तम् अधिकरणपदं समवायसम्बन्धेनैव ज्ञानाश्रयत्वं सूचयति[156] यथा उपन्यासे कथितम्। लक्षणे समवायसम्बन्धस्य अग्रहणे सति घटादौ अपि ज्ञानस्यातिव्याप्तिर्जायते विषयतासम्बन्धेन। यतोहि विषयतासम्बन्धेन ज्ञानस्य (विषयी) अधिकरणं घटादिः (विषयः) वर्तते। 'विषयता' इति नव्यन्यायस्य पारिभाषिकं पदमस्ति। विषये तस्य आहृतधर्मः विषयता वर्तते। ज्ञानेच्छाप्रयत्नश्च सविषयकपदार्थाः कथ्यन्ते।[157] घटपटादिपदार्था विषयास्तथा ज्ञानादि एतेषां दृष्ट्या विषयिणः भवन्ति। नव्यन्याये आहृतधर्मः सम्बन्धस्यापि कार्यं करोति। अतो विषयनिष्ठाहृतधर्मो विषयता विषयिनिष्ठाहृतधर्मो विषयिता च सम्बन्धोऽपि भवन्ति। सम्बन्धः सप्रतियोगिकपदार्थो नव्यन्याये अभावसादृश्यवत्।[158] एतादृशे सम्बन्धे यत आरम्भः स प्रतियोगी तथा यत्रान्तः स अनुयोगी। सप्रतियोगिकसम्बन्धे **'अनुयोगिनिष्ठधर्म सम्बन्धः'**[159] इतिन्यायेन अनुयोगिनि यः आहृतधर्म स एव सम्बन्धो भवति प्रतियोगिना सह अनुयोगिनं योजनाय। यथा - घटो

---

156 अधिकरणपदं समवायेन ज्ञानाश्रयत्वलाभार्थम् – न्यायबोधिनी (आत्मद्रव्यलक्षणम्)


157 गदाधरभट्टाचार्यः – विषयतावादः

158 A Primer of Navya Nyaya Language and Methodology – Page 74

159 A Primer of Navya Nyaya Language and Methodology – Page 62

विषयः, ज्ञानं विषयी। अत्र यदि घटादारभ्यते तर्हि घट अर्थात् विषयः प्रतियोगी, ज्ञानम् अर्थात् विषयी च अनुयोगी तथा ज्ञानादारभ्यते तर्हि विषयी प्रतियोगी विषयोऽनुयोगी च। अनुयोगिनिष्ठधर्मो विषयता वर्तते। अतः विषयी विषयतासम्बन्धेन विषयमन्वेति।

**आरेखीयप्रस्तुतिः –**




**चित्र-क्रमाँकः ३**

सम्बन्धोऽयं वृत्त्यनियामकः[160],अतो हेतोर्विषयविषयिणोर्द्वयोः, विषयो विषयिण आधारो भवितुं शक्यते तथा विषयी विषयस्य। अस्मात् कारणात् आत्मलक्षणे समवायसम्बन्ध उक्त उपन्यासकारेण अन्यथा विषयी अर्थात् ज्ञानं विषयतासम्बन्धेन घटादिरूपविषये आश्रयति।

**ईश्वरचर्चा जीवविवेचनञ्च -** न्यायवैशेषिके आत्मनो विभागद्वयं स्वीक्रियते,एको परमात्मा अपरश्च जीवात्मा। परमात्मा नित्यः एकश्च, जीवात्मा अपि नित्यः किन्तु अनेकः। परमात्मा एव ईश्वरः कथ्यते। '**सर्वज्ञत्वे सति परमत्वम्**' ईश्वरस्य लक्षणम्। सर्वं जानीतीति सर्वज्ञः,दीपिकायां सकलपरमाण्वादिसूक्ष्मदर्शित्वात् ईश्वस्य सर्वज्ञत्वमुच्यते।[161] अर्थात् सूक्ष्मपरमाणूनामपि दर्शनशक्तिकारणात् ईश्वरः परमात्मा वा सर्वज्ञः कथ्यते। परमत्वस्य तात्पर्यम् उच्चतमःसर्वोत्तमः, महत्तम अत्यन्तश्रेष्ठादिः।[162] न्यायवैशेषिके ईश्वरस्य सत्ता एव सर्वोत्तमा उच्चतमा वा। अतः 'सर्वज्ञत्वे सति परमत्वमु'क्तम् ईश्वरस्य लक्षणे। परमत्वस्याग्रहणे

---

160 नव्यन्यायभाषाप्रदीपः – Text 21

161 दीपिका - आत्मद्रव्यलक्षणम्

162 संस्कृत-हिन्दी कोश – पृ० ५७७

कस्मिंश्चिद् योगिविशेषेऽतिव्याप्तिः संभवति यतोहि भारतीयशास्त्रपरम्परायां योगजप्रत्यक्षेण योगिष्वपि 'सर्वज्ञत्वं' स्वीक्रियते[163]किन्तु योगिविशेषे परमत्वाभावान्नातिव्याप्तिः। लक्षणे परमत्वमात्रमुक्तौ सांख्यदर्शने अभिहिता प्रकृतावातिव्याप्तिर्जायते। प्रकृतिरेव प्राधान्यं अत्र।[164] प्रकृतिरत्र कारणरहिता, त्रिगुणात्मिका, अचेतना जडा च, तथा पुरूषो निर्गुण-चेतन-निष्क्रिय-साक्षी च वर्तते।[165] प्रकृतिः पुरूषेण सह संयुज्य कार्यरूपजगत् निर्मीयते। अतः स्वकार्यापेक्षया प्रकृतेः परमत्वं विद्यते। अस्य लक्षणस्य प्रकृतावतिव्याप्तिः न भवेत् चेत् सर्वज्ञत्वमपि विहितम्। प्रकृतौ सर्वज्ञत्वस्याभावात् अतिव्याप्तेः निरसनं जायते। जीवस्य लक्षणं न प्रस्तुतमुपन्यासे। यतोहि तर्कसंग्रहेऽपि जीवस्य संख्यापरिमाणादिकस्य विषये एव चर्चा कृता। संभवतः अतो हेतो उपन्यासकारेणापि संख्यातो जीवप्रकरणमारभते। जीवात्मा तु अनन्तः। अस्याश्रयः सुखदुःखादिभोगायतनं शरीरं तथा प्रतिव्यक्तिशरीरभिन्नत्वेन शरीराणाम् आनन्त्यम्। अत आश्रयानन्त्यात् जीवोऽप्यनन्त इति तर्कशास्त्रसम्मतः सिद्धान्तः। जीवात्मनः परिमाणं विभु स्थितिश्च नित्या वर्तते। जीवात्मनि संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभागः, बुद्धिः, सुखं, दुःखं, इच्छा, द्वेषः, प्रयत्नम्, धर्मः, अधर्मः, भावनाख्यसंस्कार इति चतुर्दशगुणाः वर्तन्ते। परमात्मनि तु पञ्चसामान्यगुणाः बुद्धि-इच्छा-प्रयत्नश्च विद्यते।[166]

( १.९ मनो द्रव्य-लक्षणम् )

**तर्कसंग्रहः -** सुखादुःखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च॥१८॥

**उपन्यासः -** मनो लक्ष्यम्। मनस्त्वं लक्ष्यताऽवच्छेदकम्। 'सुखाद्युपलब्धिसाधनत्वे सतीन्द्रियं मनसो लक्षणम्।' सुखाद्युपलब्धिसाधनत्वं मात्रमुक्तम् चेत्? स्रक्चन्दनादावतिव्याप्तिः, अत 'इन्द्रियत्वम्' उक्तम्। 'इन्द्रियत्व'-मात्रमुक्तम् चेत् ? चक्षुरादावतिव्याप्तिः, अतः 'सुखाद्युपलब्धिसाधनत्वम्' उक्तम्। चक्षुरादौ रूपाद्युपलब्धिसाधनत्वेऽपि सुखाद्युपलब्धिसाधनत्वाभावान्नाव्याप्तिः॥१८॥

---

163 तर्कभाषा (माधुरी हिन्दी व्याख्या सहित) – पृष्ठ ९५-९६

164 'प्रधानं सत्वरजस्तमसां साम्यावस्था' – सांख्यतत्त्वकौमुदी - ३

165 सांख्यकारिका – १३-१९

166 श्रीनिवासमुखोल्लासिनी – (कालद्रव्यलक्षणप्रकरणम् )

**हिन्द्यनुवादः –** मन लक्ष्य है। मनस्त्व लक्ष्यता-अवच्छेदक है। 'सुख-दुखादि के ज्ञान का साधन होते हुए इन्द्रियत्व से युक्त होना ही' मन का लक्षण है। सुखादि के उपलब्धि अथवा ज्ञान का साधन मात्र कहने पर स्रक् (माला), चन्दनादि में अतिव्याप्ति होती अतः 'इन्द्रियत्व' पद का ग्रहण किया गया। मात्र 'इन्द्रियत्व' पद का कथन करने पर चक्षु आदि इन्द्रियों में अतिव्याप्ति के कारण 'सुखाद्युपलब्धिसाधनत्व' कहा गया। चक्षु, घ्राणादि इन्द्रियों में रूपादि के ज्ञान का साधनत्व होने पर भी सुखादिज्ञान के साधनत्व का अभाव है, अतः वहाँ अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**मनद्रव्यलक्षणम् -** द्रव्यपरम्परायाम् अन्तिमद्रव्यं मनस् इति। न्यायवैशेषिके मनः द्रव्यातिरिक्तम् इन्द्रियमपि स्वीक्रियते। यथा चक्षुरादीन्द्रियेण रूपरसादेर्ज्ञानं भवति तथैव मनसा सुखदुःखादि- गुणानाम्। अतः मनसः इन्द्रियत्वं सिद्धं तथा मनसि संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्व- अपरत्ववेगाख्यसंस्कारश्च अष्टगुणानां वृत्तित्वात्, गुणाश्रयो द्रव्यमिति नियमेन द्रव्यत्वमपि सिद्ध्यति। उपन्यासे **'सुखाद्युपलब्धिसाधनत्वे सति इन्द्रियत्वं'** मनसो लक्षणमुच्यते। सुखादेस्तात्पर्यं आत्मस्थाः गुणाः सन्ति।[167] एते गुणाः आन्तरिकाः, अतः एतेषां ज्ञानकरणत्वात् मनोऽन्तरेन्द्रियम् अन्तःकरणञ्च मन्यते। ज्ञानं बुद्धिर्वा पर्यायः उपलब्धेर्याथ्येसूत्रे उक्तमेव।[168] उपलब्धिर्नाम साक्षात्कारोऽपि ज्ञायते।[169] अनेन प्रकारेण सुखदुःखाद्यान्तरिकगुणानां ज्ञानस्य साधनत्वं यस्मिन् इन्द्रिये वर्तते,तदेव 'मनः' इति। सम्प्रति लक्षणस्य परीक्षा कृता आचार्येण - यदि लक्षणे सुखाद्युपलब्धिसाधनत्वमात्रमवदिष्यत् तर्हि स्रक्चन्दनादौ अतिव्याप्तिरभविष्यत्। यतोहि स्रक्चन्दनादिनापि सुखादेरुपलब्धिर्जायते। अत्र आदिपदस्य तात्पर्यमात्मा तथा आत्ममनसंयोगः चास्ति। सुखादिकं प्रति आत्मा समवायिकारणम् आत्ममनःसंयोगश्च असमवायिकारणमस्ति।[170] किन्तु एतेषु कारणेषु इन्द्रियत्वाभावः, अतो लक्षणे

---

167 तर्कसंग्रहः (तन्वीव्याख्यासहितः) – पृ० ६०

168 बुद्धिरूपलब्धिर्ज्ञानमित्यनर्थान्तरम् – न्यायसूत्रम् १/१/१७

169 न्यायबोधिनी - मनद्रव्यलक्षणम्

170 आत्मनः सुखादिकं प्रति समवायिकारणत्वात् – न्यायबोधिनी (मनद्रव्यलक्षणम्)
आत्ममनःसंयोगादिवारणाय इन्द्रियमिति – पदकृत्यम् (तत्रैव)

इन्द्रियत्वपदप्रयोगेन स्रक्चन्दनादावतिव्याप्तेर्निराकरणं जातम्। लक्षणे 'इन्द्रियत्वमेव' उक्तं चेत् चक्षुरादौ अतिव्याप्तिः संभवति इन्द्रियत्वात्। लक्षणमिदं चक्षुरादिपर्यन्तं न व्याप्येत अतः 'सुखाद्युपलब्धिसाधनत्वमपि' युज्यते। अथ च 'सुखाद्युपलब्धिसाधनत्वे सति इन्द्रियत्वं' लक्षणमेतत् मनस एव लक्ष्यते नान्यः कश्चित्।

# तृतीयोऽध्यायः – 'गुणविवेचनम्'

(अथ २. गुण भेद-लक्षण-प्रकरणे १. रूप-लक्षणम्)

**तर्कसंग्रहः –** चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिश-चित्रभेदात्सप्तविधम्। पृथिवीजलतेजोवृत्तिः। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि॥१९॥

**उपन्यासः -** रूपं लक्ष्यम्। रूपत्वं लक्ष्यताऽवच्छेदकम्। 'चक्षुर्मात्र-ग्राह्यत्वे सति विशेष-गुणत्वं' रूपस्य लक्षणम्। 'चक्षुर्मात्र-ग्राह्यत्वं' नाम = चक्षुरितरेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम्। चक्षुर्ग्राह्यत्वे सति गुणत्वस्य संयोगादावपि सत्त्वादतिव्याप्तिः, अतः 'चक्षुरितरेन्द्रियाग्राह्यत्वम्' उक्तम्, संयोगादीनां चक्षुरितर-त्वगिन्द्रिय ग्राह्यत्वान्नातिव्याप्तिः। 'चक्षुर्ग्राह्यत्वा'नुपादाने गुरुत्वादावतिव्याप्तिः, अतः 'चक्षुर्ग्राह्यत्वम्' उक्तम्, तत्र चक्षुर्ग्राह्यत्वाभावान्नातिव्याप्तिः। 'गुणत्वा'नुपादाने रूपत्वेऽतिव्याप्तिः,तत्रापि चक्षुरितरेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वस्य सत्त्वात्,अतस्तदुक्तम्, रूपत्वे गुणत्वाभावान्नातिव्याप्तिः। 'विशेष-'पदानुपादाने प्रभाभित्ति-संयोग- विशेषेऽतिव्याप्तिः,तत्रापि चक्षुरितरेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वे सति गुणत्वस्य सत्त्वात्, अतस्तदुक्तम्,तस्य विशेष-गुणत्वाभावान्नातिव्याप्तिः॥१९॥

**हिन्द्यनुवादः -** रूप लक्ष्य है। रूपत्व लक्ष्यता-अवच्छेदक है। 'चक्षुरिन्द्रिय मात्र से ग्रहण होने वाला विशेष गुण ही' रूप का लक्षण है। 'चक्षुरिन्द्रियमात्र ग्राह्यत्व' से तात्पर्य चक्षु से अतिरिक्त इन्द्रियों से अग्राह्यत्व है। 'चक्षुरिन्द्रिय से ग्राह्य गुण' यह लक्षण देने पर संयोगादि में भी चक्षुरिन्द्रियग्राह्यत्व होने से अतिव्याप्ति होगी अतः 'चक्षु से इतर इन्द्रिय का अग्राह्यत्व' कहा गया। संयोगादि का चक्षु से इतर 'त्वगिन्द्रियग्राहत्व' होने से अतिव्याप्ति नहीं होगी। लक्षण में 'चक्षु इन्द्रिय से ग्राह्य' यह पद न रखने पर गुरुत्वादि में अतिव्याप्ति होगी अतः 'चक्षु इन्द्रियग्राह्य' कहा गया, गुरुत्वादि में चक्षुरिन्द्रिय से ग्राह्यत्व न होने से अतिव्याप्ति नहीं होगी। 'गुणत्व' पद का ग्रहण न करने से 'रूपत्व' (रूप की जाति) में भी चक्षु से भिन्न इन्द्रिय-अग्राह्यत्व होने से अतिव्याप्ति हो जाती, अतः लक्षण में 'गुणत्व' कहा गया। रूपत्व में गुणत्व का अभाव होने से अतिव्याप्ति का निषेध हो गया। 'प्रभाभित्ति-संयोग विशेष' में अतिव्याप्ति निवारण हेतु लक्षण में 'विशेष' पद का उपादान किया गया है। क्योंकि

'प्रभाभित्तिसंयोगविशेष' भी चक्षु से भिन्न इन्द्रियों से अग्राह्य होने के कारण चक्षुमात्र से ग्राह्य है तथा गुण (संयोग होने के कारण) भी है। अतः विशेष पद का अभिधान किया गया है (क्योंकि 'संयोग' सामान्य  गुण है) उसमें 'विशेषगुणत्व' का अभाव होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**रूपगुणलक्षणम्-** चतुर्विंशतिगुणेषु रूपं प्रथमं यतोहि सर्ववस्तूनां प्रत्यक्षे तस्य रूपमपि कारणं भवति।[171] अतः आदौ रूपमेव उल्लिख्यते तर्कसंग्रहे। तेजोद्रव्यस्य विशिष्टगुणोऽयं तथा तेजोद्रव्यस्य इन्द्रियं चक्षुरिति। अतः रूपं चक्षुरिन्द्रियेणैव गृह्यते यथा लक्षणे उक्तमपि - **'चक्षुर्मात्रग्राह्यत्वे सति विशेषगुणत्वं रूपस्य लक्षणम्'।** चक्षुरिन्द्रियेण गृह्यमाणस्तथा गुणत्वजातिमान् यो विशेषगुणः स रूपमेव। चक्षुरिन्द्रियमात्रग्राह्यत्वस्य तात्पर्यमस्ति यत् चक्षुर्भिन्नेभ्यः इन्द्रियेभ्यः अग्रहणीयः। अर्थात् रूपं चक्षुरिन्द्रियेणैव ग्रहीतुं शक्यते न तु अपरैः। यदि अत्र 'मात्रपदं' न कथ्यते तर्हि संयोगादिसामान्यगुणेष्वपि लक्षणमिदम् अतिव्याप्तं भविष्यति। यतोहि संयोगसंख्यापरिमाणादिगुणाः अपि चक्षुरिन्द्रियेण गृह्यन्ते[172] किन्तु मात्रपदस्य उपादाने सति नातिव्याप्तिः। यतोहि एते गुणाः चक्षुरिन्द्रियातिरिक्तं त्वगिन्द्रियेणापि गृह्यन्ते। अन्यटीकासु सांसिद्धिकद्रवत्ववारणाय अपि मात्रपदस्य औचित्यमुल्लिखितम्।[173] लक्षणे चक्षुर्ग्राह्यत्वस्य अग्रहणे 'मात्रविशेषगुणत्व'मिति रूपस्य लक्षणं भवति। पुनः अस्य लक्षणस्य गुरुत्वं, द्रवत्वं, रसः, गन्धादिगुणेषु अतिव्याप्तिर्जायते, स्वस्वद्रव्यस्य विशेषगुणत्वात्। 'चक्षुर्ग्राह्यत्व'मुक्ते सति एतेषु चक्षुर्ग्राह्यत्वस्य अभावात्, न रूपलक्षणस्य अतिव्याप्तिः। न्यायवैशेषिकदर्शने एको नियमः वर्तते यत् **'यो गुणो येनेन्द्रियेण ग्राह्यस्तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण ग्राह्यो भवतीति'**।[174] इति नियमानुसारेण यदि रूपं चक्षुरिन्द्रियेण ग्राह्यस्तर्हि रूपत्वं रूपाभावश्चापि चक्षुरिन्द्रियेणैव गृह्येते इति निश्चितम्।

---

[171] सर्वपदार्थानामभिव्यक्तिनिमित्तत्वादौ रूपं निरूपयति। न्यायकन्दली
(न्यायकन्दलीसंवलितप्रशस्तपादभाष्यम्) , पृ० २५१

[172] पदकृत्यम् – रूपगुणलक्षणप्रकरणम्
तर्कसंग्रहः, व्याख्या आद्याप्रसादमिश्रः – पृ० ३०

[173] न्यायबोधिनी – रूपगुणलक्षणप्रकरणम्
पदकृत्यम् – रूपगुणलक्षणप्रकरणम्

[174] श्रीनिवासमुखोल्लासिनी – रूपलक्षणप्रकरणम्

'रूपत्वजातौ' रूपलक्षणं नातिक्रम्येत अस्मात् कारणादेव लक्षणे 'गुणत्वं' पदस्याभिधानं कृतम्। 'गुणत्वं' तु गुणमात्रे एव न तु रूपत्वे। अतस्तस्मिन् गुणत्वाभावात् रूपलक्षणस्य अतिव्याप्तिर्न संभवति। एवम्प्रकारेण लक्षणे विशेषपदस्यानुपादाने 'चक्षुर्मात्रग्राह्यत्वे सति गुणत्वम्' इति रूपलक्षणस्य प्रभाभित्तिसंयोगेऽतिव्याप्तिः। यतोहि प्रभाभित्तिसंयोगः एवम्विधसंयोगः वर्तते यस्य ग्रहणं मात्रचक्षुरिन्द्रियेणैव भवति न त्वगादीन्द्रियैस्तथा संयोगे गुणत्वमपि, गुणसत्वात्। अतः 'चक्षुर्मात्रग्राह्यत्वे सति गुणत्वम्' इदं रूपलक्षणं प्रभाभित्तिसंयोगेऽपि अतिव्याप्तम्। किन्तु लक्षणे उक्तेन 'विशेष'पदेन निराक्रियते इयमतिव्याप्तिः। यतोहि 'संयोगः' सामान्यगुणोऽस्ति, न विशेषः किन्तु रूपं विशेषगुणः। अतो हेतोः प्रभाभित्तिसंयोगे विशेषगुणत्वाभावान्नातिव्याप्तिः। न्यायबोधिन्यामपि एतदेवोक्तम्।[175] अत्र आकांक्षा भवितुं शक्यते यत् मात्रपदवर्णने एव सामान्यगुणानां वारणमभवत् तर्हि अत्र पुनरुक्तिः किमर्थः? इति चेन्न, यतोहि 'मात्र'पदवर्णनस्य प्रयोजनभिन्नं तथा 'विशेष'पदप्रयोजनं भिन्नम्। मात्रपदस्य अभिधानं मुख्यतश्चक्षुरितरिन्द्रियैः ग्राह्यगुणानां वारणाय कृतं किन्तु विशेषपदं तु साक्षात् सामान्यगुणस्यैव व्यावर्तकम्। अतः द्वयोः पदयोरुपस्थितिः प्रसंगौचित्यत्वात् एव। रूपस्य शुक्लनीलपीतरक्तहरितकपिशचित्रश्च इति सप्तभेदाः तर्कसंग्रहे।

( २.२. रस-गुण-लक्षण-भेदादि-कथनम् )

**तर्कसंग्रहः –** रसनग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात षड्विधः। पृथिवीजलवृत्तिः। पृथिव्यां षड्विधः। जले मधुर एव ॥ २०॥

**उपन्यासः -** रसो लक्ष्यः। रसत्वं लक्ष्यताऽवच्छेदकम्। 'रसन-ग्राह्यत्वे'-सति गुणत्वं' लक्षणम्। 'रसन-ग्राह्यत्व'-मात्रमुक्तौ रसत्वेऽतिव्याप्तिः, अतो 'गुणत्वम्' इत्युक्तम्,रसत्वे गुणत्वाभावान्नातिव्याप्तिः। 'गुणत्व'-मात्रमुक्तौ रूपेऽतिव्याप्तिः, अतो 'रसन-ग्राह्यत्वम्' उक्तम्, रूपे रसन- ग्राह्यत्वाभावान्नतिव्याप्तिः।।२०।।

**हिन्द्यनुवादः -** रस लक्ष्य है। रसत्व लक्ष्यता-अवच्छेदक है। 'रसनेन्द्रिय द्वारा ग्रहणीय गुण ही' रस है। लक्षण में 'रसना द्वारा ग्राह्यत्व' मात्र कहने पर 'रसत्व' (रस की जाति) में

---

175 ननु प्रभाघटसंयोगे रूपलक्षणस्यातिव्याप्तिः तस्य चक्षुर्मात्रग्राह्यगुणत्वादिति चेन्न, गुणपदस्य विशेषगुणपरत्वात्। न्यायबोधिनी - रूपलक्षणप्रकरणम्

अतिव्याप्ति के कारण 'गुणत्व' भी कहा गया। रसत्व में गुणत्व का अभाव होने से अतिव्याप्ति नहीं होगी। मात्र 'गुणत्व' कहने पर रूप आदि में अतिव्याप्ति हो जाती अतः 'रसन-ग्राह्यत्व' कहा गया। रूप में रसनेन्द्रिय का अभाव होने से अतिव्याप्ति नहीं होगी।

## विश्लेषण

**रसगुणलक्षणम् –** न्यायवैशेषिके 'रसः' इति तात्पर्यं 'स्वादः' (Taste) बोध्यः। स्वादस्य प्रत्यक्षं जिह्वाग्रवर्तिरसनेन्द्रियेण भवति। अत एव रसस्य लक्षणमुच्यते – **'रसनग्राह्यत्वे सति गुणत्वं'**। रसना रसनमिति पर्यायवाचिनौ[176] एतस्यार्थः रसनेन्द्रियमेव। रसनया ग्राह्यः इति रसनग्राह्यः। गुणत्वजातियुक्तः यो गुणः रसनेन्द्रियेणैव ज्ञातुं शक्यते स रसः। रसनेन्द्रियेण रसत्वजातेरपि ग्रहणत्वात् लक्षणे 'गुणत्वं' इति पदं दत्तम्। रसत्वे गुणत्वस्याभावात् गुणलक्षणस्य न तस्मिन् अतिव्याप्तिः। लक्षणमिदं रूपादौ न व्याप्येत्, अतः 'रसनग्राह्यत्वम्' उक्तम्। यतोहि गुणत्वं तु चतुर्विंशतिगुणेष्वेव विद्यते। लक्षणे 'गुणत्व'मात्रमुक्ते सति समस्तगुणेषु रसलक्षणस्यातिव्याप्तिः। किन्तु 'रसनग्राह्यत्वम्' इति पदेन नातिव्याप्तिः। यतोहि रसनेन्द्रियं चतुर्विंशतिगुणेषु रसमेव गृह्णाति नान्यम्। रसस्य मधुराम्ललवणकटुकषायतिक्तभेदात् षट् प्रकाराः विद्यन्ते।

( २.३ गन्ध-गुण-लक्षण-भेदादि-कथनम् )

**तर्कसंग्रहः –** घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्च पृथिवीमत्रवृत्तिः ॥२१॥

**उपन्यासः -** गन्धो लक्ष्यः। गन्धत्वं लक्ष्यताऽवच्छेदकम्। 'घ्राण-ग्राह्यत्वे सति गुणत्वं' लक्षणम्। 'घ्राणग्राह्यत्व'-मात्रमुक्तं चेत् ? गन्धत्वेऽतिव्याप्तिः, अतो 'गुणत्वम्' उक्तम्, गन्धत्वे गुणत्वाभावान्नतिव्याप्तिः। 'गुणत्व' मात्रमुक्तं चेत् ? रूपादावतिव्याप्तिः, अतो 'घ्राण-ग्राह्यत्वम्' उक्तम्॥२१॥

**हिन्द्यनुवादः -** गन्ध लक्ष्य है। गन्धत्व लक्ष्यता-अवच्छेदक है। 'घ्राणेन्द्रिय से ग्रहण होने वाला गुण ही' गन्ध का लक्षण है। 'घ्राण-ग्राह्यत्व' मात्र कहने पर 'गन्धत्व' (गन्ध की जाति) में अतिव्याप्ति हो जाती इसलिए 'गुणत्व' पद दिया गया, गन्धत्व में गुणत्व का अभाव होने से अतिव्याप्ति का निषेध हो गया। 'गुणत्व' मात्र कहने पर रूपादि में अतिव्याप्ति होने से लक्षण दुष्ट हो जाता इसी कारण से 'घ्राण-ग्राह्यत्व' भी कहा गया।

---

176 श्रीनिवासमुखोल्लासिनीटीका - रसगुणलक्षणम्

## विश्लेषणम्

**गन्धगुणलक्षणम् –** तृतीयो गुणः गन्धः। **घ्राणग्राह्यत्वे सति गुणत्वं** गन्धस्य लक्षणं दीयते उपन्यासे। घ्राणेन्द्रियेण ग्राह्यः इति घ्राणग्राह्यः। घ्राणेन्द्रियस्य अधिकरणं नासिकायाः अग्रभागः वर्तते। गन्धगुणः अनेन घ्राणेन्द्रियेणैव गृह्यते नान्येन। अतः गन्धस्य लक्षणे घ्राणग्राह्यत्वे सति गुणत्वम् उक्तम्। गोविन्दाचार्येणापि अस्य लक्षणस्यैव प्रतिपादनं क्रियते।[177] अत्र गन्धत्वेऽतिव्याप्तिवारणाय 'गुणत्व'पदं तथा रूपादावतिव्याप्तिवारणाय 'घ्राणग्राह्यत्व'पदमुक्तं पूर्ववत्। गन्धगुणः सुरभि-असुरभिगन्धस्य च भेदेन द्विप्रकारकः वर्तते। गुणोऽयं पृथिवीद्रव्ये एव तिष्ठति। पदकृत्ये तु 'पृथिवीसम्बन्धसत्त्वे गन्धप्रतीतिसत्त्वं, पृथिवीसम्बन्धाभावे गन्धप्रतीत्याभावः' इत्यन्वयव्यतिरेकसम्बन्धः मन्यते पृथिवीगन्धयोर्मध्ये।[178] जलादौ तु गन्धस्योपस्थितिः औपाधिकी, पार्थिवपदार्थसंसर्गात्।

( २.४ स्पर्श-गुण-लक्षण-भेदादि-कथनम् )

**तर्कसंग्रहः –** त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स त्रिविधः शीतोष्णानुष्णाशीतभेदात् । पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले ।उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः। रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यम्। अन्यत्रापाकजं नित्यमनित्यञ्च। नित्यगतं नित्यम्। अनित्यगतमनित्यम् ॥२२॥

**उपन्यासः -** स्पर्शो लक्ष्यः। स्पर्शत्वं लक्ष्यताऽवच्छेदकम्। 'त्वगिन्द्रिय-मात्र-ग्राह्यत्वे सति गुणत्वं' स्पर्शस्य लक्षणम्। 'त्वगिन्द्रिय-मात्र-ग्राह्यत्वम्'-उक्तं चेत् ? स्पर्शत्वेऽतिव्याप्तिः, अतो 'गुणत्वम्' उक्तम्, तत्र गुणत्वाभावान्नातिव्याप्तिः। 'गुणत्व-मात्रमुक्तं चेत् ? गन्धादावतिव्याप्तिः, अतः 'त्वगिन्द्रिय-मात्र-ग्राह्यत्वम्' उक्तम्, तत्र त्वगिन्द्रिय-ग्राह्यत्वाभावान्नातिव्याप्तिः। अत्र 'मात्र'- पदानुपादाने सङ्ख्यादावतिव्याप्तिः, त्वगिन्द्रियग्राह्यत्वे सति गुणत्वस्य सत्वात्, अतो 'मात्र' पदम्, तत्र त्वगितरेन्द्रिय चक्षुर्ग्राह्यत्वान्नातिव्याप्तिः॥२२॥

**हिन्द्यनुवादः -** स्पर्श लक्ष्य है। स्पर्शत्व लक्ष्यता-अवच्छेदक है। 'त्वगिन्द्रिय मात्र से ग्रहण होने वाला गुण ही' स्पर्श का लक्षण है। 'त्वगिन्द्रियमात्र–ग्राह्यत्व' कहने पर स्पर्श का स्पर्शत्व

---

[177] घ्राणग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम्। श्रीनिवासमुखोल्लासिनी - गन्धगुणलक्षणम्

[178] पदकृत्यम् - गन्धगुणलक्षणम्

(स्पर्श की जाति) में अतिव्याप्ति होगी। अतः लक्षण में 'गुणत्व' कहा गया। स्पर्शत्व में गुणत्व का अभाव होने से अतिव्याप्ति नहीं होगी। 'गुणत्व' मात्र देने से गन्धादि अन्य गुणो में अतिव्याप्ति के कारण 'त्वगिन्द्रियमात्र-ग्राह्यत्व' भी कहा गया। गन्धादि गुणो में 'त्वगिन्द्रिय-ग्राह्यत्व' न होने से लक्षण में अतिव्याप्ति नहीं होगा। 'मात्र' पद का उपादान न करने पर संख्यादि में अतिव्याप्ति होती क्योंकि संख्यादि में त्वगिन्द्रिय से ग्राह्य होते हुए 'गुणत्व' का भी भाव है। इसीलिए 'मात्र' पद दिया गया है। संख्यादि का त्वगिन्द्रिय से इतर चक्षुरिन्द्रिय से भी ग्राह्यत्व होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**स्पर्शगुणलक्षणम् -** सामान्यतया केनचित् वस्तुना सह शरीरस्य सम्पर्कः 'स्पर्शः' कथ्यते। **त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं** स्पर्शस्य लक्षणम्। गुणत्वजातिमान् यो गुणः त्वगिन्द्रियमात्रेणैव गृह्यते स स्पर्शः। लक्षणे 'मात्र'पदम् इतरेन्द्रियाणां व्यावर्तकम्। यदि लक्षणे मात्रपदस्य ग्रहणं न क्रियते तर्हि त्वगिन्द्रियग्राह्यत्वे सति गुणत्वम् इत्यस्य स्पर्शलक्षणस्य संख्यादिगुणेषु अतिव्याप्तिरिति उपन्यासकारः। यतोहि संख्यादिसामान्यगुणानामपि ग्रहणं त्वगिन्द्रियेण भवति। किन्तु त्वगिन्द्रियेण सह चक्षुरिन्द्रियेणापि तेषां ग्रहणं संभवतीति रूपलक्षणप्रसंगे उक्तं हि। अत्र मात्रपदोपादानं संख्यादिसामान्यगुणानां वारणं भवति। अतः संख्यादिगुणेषु त्वगितरिन्द्रियचक्षुर्ग्राह्यत्वात् स्पर्शलक्षणस्य नातिव्याप्तिर्यथा न्यायबोधिन्यामपि।[179] लक्षणे स्पर्शत्वेऽतिव्याप्तिवारणाय गुणत्वपदं, गन्धादावतिव्याप्तिवारणाय च 'त्वगिन्द्रियमात्रग्राह्यत्व'मुक्तम्। स्पर्शः त्रिविधः – शीतस्पर्शः, उष्णस्पर्शः अनुष्णाशीतस्पर्शश्च। पृथिवीतेजजलवायुचतुर्षु द्रव्येषु स्पर्शगुणः विद्यते। शीतस्पर्शः जले, उष्णस्पर्शः तेजसि तथा अनुष्णाशीतस्पर्शः पृथिवीवाय्वो।

( २.१-४ रूप-रस-गन्ध-स्पर्श-गुणानामधिष्ठान-विशेष-कथनम् )

**तर्कसंग्रहः -** रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यम् च। अन्यत्रापाकजं नित्यमनित्यञ्च। नित्यगतं नित्यम्, अनित्यगतमनित्यम्॥२३॥

---

179 मात्रपदं संख्यादिसामान्यगुणादावतिव्याप्तिवारणाय। न्यायबोधिनी - स्पर्शगुणलक्षणम्

**उपन्यासः -** रूपादि-चतुष्टयं द्विविधम्- १.पाकजम् २.अपाकजं च इति। १.पाकजं रूपादि चतुष्टयं (क) पृथिव्यामेव, २.अपाकजं (ख) जलादौ। २. तच्च नित्यम् अनित्यं च (अ) परमाण्वादिगतं=नित्यम् (आ) द्व्यणुकादिगतम्=अनित्यम्। १.पाकजं तु सर्वत्रानित्यमेव॥

(२.१.१.) रूप-विशेषस्य लक्षणं 'चक्षुर्ग्राह्यत्वे सति शुक्लत्वादिकं' बोध्यम्।

(२.२.१.) रस-विशेषस्य लक्षणं 'रसन-ग्राह्यत्वे सति मधुरत्वादिकं' बोध्यम्।

(२.३.१.) गन्ध-विशेषस्य लक्षणं 'घ्राण-ग्राह्यत्वे सति सुरभित्वादिकं' बोध्यम्।

(२.४.१.) स्पर्श-विशेषस्य लक्षणं 'त्वगिन्द्रिय-ग्राह्यत्वे सति शीतत्वादिकं बोध्यम्'।

'त्वगिन्द्रिय-मात्र-ग्राह्यत्वम्' उक्तौ शीतत्वेऽतिव्याप्तिः, अतः 'शीतत्वम्' उक्तम्,तत्र शीतत्वाभावान्नातिव्याप्तिः। 'शीतत्व'-मात्रमुक्तौ लक्षण-लक्ष्यताऽवच्छेदकयोरैक्य-प्रसङ्गात् 'त्वगिन्द्रिय-ग्राह्यत्वम्' उक्तम्। एवं पद-कृत्यं रूप-विशेषादावपि बोध्यम्॥२३॥

**हिन्द्यनुवादः -** रूप, रस, गन्ध एवं स्पर्श ये दो प्रकार के होते हैं- पाकज एवं अपाकज। पाकजरूप, पाकजरस, पाकजगन्ध तथा पाकजस्पर्श पृथ्वी में ही रहते हैं। अपाकज रूपादि चतुष्टय जल, तेज एवं वायु में होते हैं। जलादि में रहने वाले अपाकज रूपादि नित्य एवं अनित्य के भेद से दो प्रकार के होते हैं। इनमें नित्य अपाकज रूपादि परमाणु आदि नित्य पदार्थों में रहते हैं तथा अनित्य अपाकज रूपादि अनित्य पदार्थों में ही रहते हैं।

पाकजरूपादि तो सर्वत्र (नित्य एवं अनित्य किसी भी पदार्थ में) अनित्य ही होते हैं।

'चक्षु इन्द्रिय से ग्राह्य होने पर शुक्लत्व से युक्त होना ही' 'शुक्लरूप' का लक्षण है। इसी प्रकार रूप के अन्य भेदों के भी लक्षण समझने चाहिए।

'रसनेन्द्रिय से ग्राह्य होने पर मधुरत्वादि से युक्त ही' रस के भेदों का लक्षण जानना चाहिए।

'घ्राणेन्द्रिय से ग्राह्य होते हुए सुरभित्वादि से युक्त होना ही' गन्धभेदों के लक्षण है।

'त्वगिन्द्रिय से ग्राह्य होते हुए शीतत्वादि वाला होना ही' स्पर्शगुण के भेदों का लक्षण समझना चाहिए। इस लक्षण में 'त्वगिन्द्रिय-ग्राह्यत्व' मात्र कहने पर 'शीतत्व' (शीतस्पर्श की जाति) में अतिव्याप्ति हो जाती अतः 'शीतत्व' भी कहा गया। इसी प्रकार 'शीतत्व' मात्र कहने पर लक्षण तथा लक्ष्यता-अवच्छेदक में ऐक्य का प्रसङ्ग उपस्थित होने के कारण 'त्वगिन्द्रिय-ग्राह्यत्व' कहा गया। रूपादि गुणों के भेदलक्षणों में भी इसी तरह पदकृत्य का अध्याहार करना चाहिए।

## विश्लेषणम्

**रूपादिचतुर्गुणेषु पाकक्रियावर्णनम् -** रूपरसगन्धस्पर्शश्च पुनः पाकजम् अपाकश्चेति दृष्ट्या द्विप्रकारकाः भवन्ति। **पाको नाम विजातीयस्तेजसंयोगः।**[180] यदा तेजद्रव्यस्य विजातीयद्रव्यैः सह अर्थात् पृथिवी-जल-वायुभिः सह संयोगः जायते तदैव पाकक्रिया भवति। सजातीयेन अर्थात् तेजसा सह एव संयोगानन्तरमपि पाकः न भवति। अत एव विजातीयस्तेजसंयोगः पाक उच्यते। साम्प्रतं रूपादिचतुष्टयेषु गुणेषु पाकक्रिया विविच्यते। प्रकरणेऽस्मिन् रूपादिगुणानां स्वरूपान्तरं वर्ण्यते। पाकजं रूपादिः पृथिव्यामेव भवति, जले तथा वायौ न। यतोहि वयं पश्यामः यत् पार्थिवपदार्थेषु (फलशाकादिषु) तेजसंयोगादेतेषां रूपरसगन्धस्पर्शश्च परिवर्तिताः भवन्ति तथा पुनः स्वपूर्वस्वरूपं न प्राप्नुवन्ति। अतः पृथिवीद्रव्ये रूपादिचतुर्गुणाः पाकजाः। जलवाय्वोश्च एवं न दृश्यते। तेजसंयोगेन एतयोः रूपादौ परिवर्तनं न जायते। यद्यपि एतयोः स्पर्शगुणे परिवर्तनं प्रतीयते उष्णस्पर्शत्वात् किन्तु तत्परिवर्तनमौपाधिकम्। किञ्चित्क्षणानन्तरं एतयोः उष्णस्पर्शः पुनः स्वपूर्वस्वरूपमागच्छति। पृथिव्यां पाकजरूपादिः सर्वदैव अनित्यं परिवर्तितत्वात्, किन्तु जलवाय्वोः अपाकजरूपादिः नित्यपरमाणुषु नित्यम्, अनित्यशरीरादौ अनित्यं वर्तन्ते।

अतः परं परिवर्तितचतुर्गुणविशेषस्य भेदानामपि लक्षणं प्रदत्तम् उपन्यासकारेण। सर्वप्रथमः रूपगुणभेदः शुक्लरूपस्य लक्षणम् - **चक्षुर्ग्राह्यत्वे सति शुक्लत्वमिति**। चक्षुरिन्द्रियेण ग्राह्यः शुक्लत्वजातिमान् 'शुक्लरूपः' वर्तते। शुक्लरूपस्य लक्षणमिव अन्यषट् रूपाणां लक्षणमपि बोध्यमिति उपन्यासाचार्यः। तदनु रसगुणभेदानां लक्षणं **'रसनग्राह्यत्वे सति मधुरत्वादिकमि'ति** जानीयात्। गन्धगुणविशेषस्य **'घ्राणग्राह्यत्वे सति सुरभित्वं'** सुरभिगन्धस्य लक्षणम्। अस्य लक्षणस्य इव असुरभिगन्धलक्षणमपि अवगन्तव्यम्। स्पर्शगुणविशेषस्य **'त्वगिन्द्रियग्राह्यत्वे सति शीतत्वम्'** इति शीतस्पर्शलक्षणमिव अशीतस्पर्शादिकं बोध्यम्।

टीकाकारेण एतेषां लक्षणानां परीक्षापि कृता। अत्र शीतस्पर्शलक्षणस्य परीक्षा उदाहरणतया विहिता। शीतस्पर्शस्य लक्षणं 'त्वगिन्द्रियग्राह्यत्वे सति शीतत्वम्' अस्ति। अत्र 'त्वगिन्द्रियग्राह्यत्वं' मात्रमुक्तौ 'शीतत्वे' अर्थात् शीतस्य जातौ अतिव्याप्तिः भवति यतोहि यो गुणः येनेन्द्रियेण ग्राह्यः तस्य जातिरपि तेनैव इन्द्रियेण ग्राह्या। अतः लक्षणे 'शीतत्वमपि'

---

180 न्यायबोधिनी - पाकजापाकजनिरूपणम्

उक्तम्। यदि मात्र'शीतत्वम्' इति शीतस्पर्शलक्षणं दीयते तर्हि शीतः लक्ष्यः तथा शीतत्वं लक्ष्यतावच्छेदकं भवति। अत्र लक्षणमपि शीतत्वं तथा लक्ष्यतावच्छेदकमपि शीतत्वम्। अतः द्वयोरैक्यप्रसङ्गस्य निवारणाय 'त्वगिन्द्रियग्राह्यत्वम्' उक्तम्। अनेन प्रकारेण एव रूपादिगुणानां भेदलक्षणेष्वपि परीक्षा कर्तव्या। संभवत उपन्यासकारेणात्र गौरवदोषात् मात्रशीतस्पर्शलक्षणस्य परीक्षा उदाहरणरूपेण प्रस्तुता।

( २.५ संख्या-गुण-लक्षणम् )

**तर्कसंग्रहः – –** एकत्वादिव्यवहारहेतुः सङ्ख्या। सा नवद्रव्यवृत्तिरेकत्वादिपरार्द्धपर्य्यन्ता। एकत्वं नित्यमनित्यञ्च। नित्यगतं नित्यमनित्यगतमनित्यम्। द्वित्वादिकन्तु सर्वत्रनित्यमेव ॥२४॥

**उपन्यासः -** सङ्ख्या लक्ष्या। सङ्ख्यात्वं लक्ष्यताऽवच्छेदकम्। 'एकत्वादि- व्यवहार-हेतुत्वं' लक्षणम्। 'व्यवहार-हेतुत्वं' मात्रमुक्तौ घटादावतिव्याप्तिः, तत्रापि 'घट' इति व्यवहार-हेतुत्वस्य सत्त्वात्, अत 'एकत्वादि' इत्युक्तम्। 'एकत्वादि' मात्रमुक्तं चेत् ? लक्षण-लक्ष्यताऽवच्छेदकयौरैक्य-प्रसङ्गः, अतो 'व्यवहार-हेतुत्वम्' उक्तम् ॥२४॥

**हिन्द्यनुवादः -** संख्या लक्ष्या है। संख्यात्व लक्ष्यता-अवच्छेदक है। 'एकत्वादि के व्यवहार का हेतु ही' संख्या है। 'व्यवहार-हेतुत्व' मात्र कहने पर घटादि में अतिव्याप्ति हो जाती क्योंकि घट भी व्यवहार का कारण होता है। अतः 'एकत्वादि' कहा गया। एकत्वादि मात्र कहने पर लक्षण तथा लक्ष्यता-अवच्छेदक में ऐक्य हो जाता। इसीलिए 'व्यवहार-हेतुत्व' कहा गया।

## विश्लेषणम्

**संख्यागुणलक्षणम् -** संख्या सामान्यगुणः वर्तते यतोहि संख्या नवद्रव्येषु विद्यते। **'एकत्वादि-व्यवहारहेतुत्वम्'** इति संख्यायाः लक्षणम्। 'एकत्वादिः' अर्थात् एकसंख्याऽऽरभ्य परार्धपर्यन्तम्।[181] वस्तुषु अयमेकः, इमौ द्वौ इत्यादेः व्यवहारस्य यः हेतुः वर्तते स संख्यागुणः। अत्र हेतोः तात्पर्यम् असाधारणकारणम् बोध्यम्।[182] लक्षणे 'व्यवहारहेतुत्वं' मात्रमुक्तौ घटादावतिव्याप्तिः, यतोहि व्यवहारस्य हेतवः विषयदृष्ट्या घटादयोऽपि भवन्ति। घटादिषु अतिव्याप्तिवारणाय 'एकत्वादि' इत्युक्तम्। यदि 'एकत्वं' मात्रस्योपादानं क्रियते तर्हि 'एकत्वं'

181 दीपिका - संख्यागुणप्रकरणम्

182 श्रीनिवासमुखोल्लासिनी - संख्यागुणप्रकरणम्

संख्यायाः लक्षणं भवति तथा संख्या लक्ष्या। अत्र लक्ष्यतावच्छेदकम् 'संख्यात्वं' अस्ति, प्राकृतिकधर्मत्वात्। लक्षणेऽस्मिन् 'एकत्वं' संख्यायाः विशेषणम् इत्यपि वक्तुं शक्यते। नव्यन्याये प्राकृतिकधर्मातिरिक्तं विशेषणमपि अवच्छेदकं भवति। उक्तं हि नव्यन्याभाषाप्रदीपे – **अवच्छेदकपदस्य क्वचिद् विशेषणमित्यर्थः**[183]**।** अतोऽत्र लक्ष्यतायाः अवच्छेदकं एकत्वमपि भवितुं शक्यते, लक्ष्यस्य विशेषणत्वात्। यतोहि विशेषणमपि लक्ष्यतावच्छेदक इव विशेष्यस्य लक्षणस्य वा नियामकधर्म भवति। अतो हेतोः संख्यात्वातिरिक्तं संख्यायाः विशेषणम् अर्थात् एकत्वमपि लक्ष्यतावच्छेदकं भविष्यति। अतः लक्षण-लक्ष्यतावच्छेदकस्य चैक्यत्वात् 'व्यवहारहेतुत्वं' इत्युक्तम्।

एकत्वसंख्या नित्यानित्यभेदेन द्विविधा। नित्याकाशादिषु एकत्वसंख्या नित्या, आश्रयस्य नित्यत्वात्। अनित्यघटादिषु एकत्वसंख्या अनित्या, आश्रयस्य नाशत्वात्। द्वित्वादिकसंख्या तु सर्वत्रानित्यैव, अपेक्षाबुद्धिजन्यत्वात्। अयमेकः अयमेकः, इमौ द्वौ इत्याकारकानैकत्वविषयिणी अपेक्षाबुद्धिः।[184]

(२.६ परिमाण-गुण-लक्षण-भेद-कथनम् )

**तर्कसंग्रहः –** मानव्यवहारकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्। अणु महद्दीर्घं ह्रस्वञ्चेति ॥२५॥

**उपन्यासः -** परिमाणं लक्ष्यम्। परिमाणत्वं लक्ष्यताऽवच्छेदकम्। 'मान-व्यवहारासाधारण-कारणत्वं' लक्षणम् । व्यवहारासाधारण-कारणत्वस्य घटादावपि सत्त्वादतिव्याप्तिः,अतो 'मान-व्यवहार-'इत्युक्तम्।मान-व्यवहार-कारणत्वस्य कालादावपि सत्त्वादतिव्याप्तिः, अतः 'असाधारण'-इत्युक्तम्, असाधारणत्वं च, [कार्यत्वावच्छिन्न][185]कार्य-विशेष-निष्ठ-धर्मावच्छिन्न-कार्यता-निरूपित-कारणता-शालित्वम्तस्य कालादावभावान्नातिव्याप्तिः, तस्य कार्य-सामान्य-कारणतात्वात्।

---

183 नव्यन्यायभाषाप्रदीपः – Text 43

184 अनेकैकत्वबुद्धिर्या सपेक्षाबुद्धिरिष्यते - भाषापरिच्छेदः – १०९ (वैशेषिक दर्शन में पदार्थ-निरूपण – पृ० ३७०)

185 मूलपाठे लक्षणेऽस्मिन् 'कार्यत्वाच्छिन्न' पदमपि दत्तमारम्भे। किन्तु अस्य पदस्य अर्थसंगतिः असाधारणस्य लक्षणे न भवति। न्यायबोधिन्यामपि असाधारणस्य लक्षणे एतत्पदं न प्रयुक्तम्। अतः पदमिदं त्यक्त्वा एव अर्थनिर्धारणं कृतं हिन्द्यनुवादे।

अणु-व्यवहारासाधारण-कारणत्वम् अण्वादि-परिमाण-विशेषाणां लक्षणं बोध्यम् ॥२५॥

**हिन्द्यनुवादः –** परिमाण लक्ष्य है। परिमाणत्व लक्ष्यता-अवच्छेदक है। 'मान (माप) के व्यवहार का असाधारण कारण' परिमाण है। व्यवहार का असाधारण कारण मात्र कहने पर घटादि में अतिव्याप्ति होने के कारण 'मान-व्यवहार' भी कहा गया। मान-व्यवहार का कारण मात्र कहने पर कालादि में अतिव्याप्ति हो जाती अतः 'असाधारण' पद कहा गया। 'कार्यविशेष में रहने वाले धर्म से अवच्छिन्न कार्यता से निरूपित कारणता वाला कारण ही' असाधारणकारण है। असाधारणकारणत्व का कालादि में अभाव होने से अतिव्याप्ति नहीं होगी क्योंकि कालादि में कार्य का साधारण कारणत्व होने से।

## विश्लेषणम्

**परिमाणगुणलक्षणम् -** सर्वद्रव्यवृत्तिकारणात् परिमाणमपि सामान्यगुणः वर्तते। उपन्यासे परिमाणस्य लक्षणं **मानव्यवहारासाधारणकारणत्वं** दीयते। मानस्य तात्पर्यं परिमितिः अर्थात् मानं वर्तते।[186] 'इदमणु', 'इदं महत्' इत्यादिकस्य यदसाधारणं कारणमस्ति तदेव परिमाणम्। लक्षणे व्यवहारासाधारणकारणत्वं मात्रमुक्तौ घटादौ अतिव्याप्तिः यतोहि घटादिविषयाः व्यवहारस्य हेतुः तथा एते साधारणकारणेभ्यः भिन्ना अपि अतः व्यवहारासाधारणकारणत्वं घटपटादिरपि। किन्तु घटादौ मानव्यवहारस्य कारणत्वं न विद्यते। अतः घटादौ अतिव्याप्तिनिरसनाय लक्षणे 'मानव्यवहारः' इत्युक्तम्। मानव्यवहारकारणत्वमात्रमुक्ते सति कालादिसाधारणकारणेष्वपि अतिव्याप्तिः यतोहि कश्मिंश्चिदपि कार्ये व्यवहारे वा अष्टसाधारणकारणानि भवन्त्येव न्याये।[187] अतः लक्षणे असाधारणपदं युज्यते। कालादौ असाधारणत्वाभावान्नातिव्याप्तिः। सम्प्रति असाधारणपदस्य प्रसंगकारणात् असाधारणकारणस्य लक्षणं कृतमुपन्यासाचार्यैः - कार्यविशेषनिष्ठधर्मावच्छिन्नकार्यतानिरूपितकारणता शालिकारणमसाधारणकारणम् इति। अर्थात् कार्यविशेषे स्थितेन प्राकृतिकधर्मेण अवच्छिन्नकार्यता निरूपितकारणता यस्मिन् कारणे तिष्ठति, तत्तु असाधारणकारणम्। अस्य विस्तृतविवेचनं करणप्रकरणान्तर्गते कृतम्। परिमाणस्य चतुर्भेदाः सन्ति – अणु, महत्, दीर्घं, ह्रस्वञ्च। अण्वादिपरिमाणविशेषाणां

---

186 पदकृत्यम् - परिमाणगुणप्रकरणम्

187 श्रीनिवासमुखोल्लासिनीटीका - कारणनिरूपणम्

भेदानां वा लक्षणम् **'अणुव्यवहारासाधारणकारणत्वम्'** अणुपरिमाणस्य लक्षणमिव ज्ञातव्यम्।

(२.७ पृथक्त्व-गुण-लक्षणम्)

**तर्कसंग्रहः –** पृथग्व्यवहारकारणं पृथक्त्वम्। सर्वद्रव्यवृत्तिः ॥२६॥

**उपन्यासः -** पृथक्त्वं लक्ष्यम्। पृथक्त्वत्वं लक्ष्यताऽवच्छेदकम्। 'पृथग्व्यवहारासाधारण-कारणत्वं' लक्षणम्। व्यवहारासाधारण-कारणत्वस्य घटादावपि सत्त्वात् 'पृथक्'-इत्युक्तम्। पृथग्व्यवहार-कारणत्वस्य कालादावपि सत्त्वादतिव्याप्तिः, अतः 'असाधारण' इत्युक्तम, तत्रासाधारण-कारणत्वाभावान्नातिव्याप्तिः ॥२६॥

**हिन्द्यनुवादः -** पृथक्त्व लक्ष्य है। पृथक्त्वत्व लक्ष्यता-अवच्छेदक है। 'पृथक् व्यवहार का असाधारण कारण होना ही' पृथक्त्व का लक्षण है। व्यवहार के असाधारण कारणत्व का घटादि में भी अतिव्याप्ति होने से लक्षण में 'पृथक्' पद कहा गया। 'पृथक् व्यवहार का कारणत्व' कालादि में भी होने से लक्षण में अतिव्याप्ति हो जाती अतः 'असाधारण' पद कहा गया। कालादि में असाधारणकारणत्व का अभाव होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**पृथक्त्वगुणलक्षणम् -** सप्तमो गुणः पृथक्त्वम्। संख्यापरिमाणयोरिव अयमपि सामान्यगुणः। द्वयोः द्रव्ययोः परस्परभिन्नत्वं यः प्रकटीकरोति स गुणः पृथक्त्वमेव। अतो हेतोरुपन्यासकारेण **'पृथग्व्यवहा- रासाधारणकारणत्वं'** पृथक्त्वगुणस्य लक्षणमुच्यते। 'एकं वस्तुः अपरस्मात् पृथक्' इति व्यवहार एव पृथक्व्यवहारः। अस्य व्यवहारस्यैव असाधारणकारणं पृथक्त्वमस्ति। लक्षणे 'पृथक्'पदानुपादाने घटादावतिव्याप्तिः तथा असाधारणपदस्य अग्रहणे कालादिसाधारणकारणेषु अतिव्याप्तिः। अतः लक्षणे अतिव्याप्तिदोषनिवारणाय उभयमेव उपादीयते। पृथक्त्वगुणस्य न कोऽपि भेदः प्राप्यते।

(२.८ संयोग-गुण-लक्षणम्)

**तर्कसंग्रहः –** संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः ॥२७॥

**उपन्यासः -** संयोगो लक्ष्यः। संयोगत्व लक्ष्यताऽवच्छेदकम्। 'संयुक्त-व्ययवहार-हेतुत्वं' लक्षणम्। 'व्यवहार-हेतुत्वम्' इत्युक्तौ घटादावतिव्याप्तिः,अतः 'संयुक्त' इत्युक्तम् ॥२७॥

**हिन्द्यनुवादः -** संयोग लक्ष्य है। संयोगत्व लक्ष्यता-अवच्छेदक है। 'संयुक्त व्यवहार का हेतु होना ही' इसका लक्षण है। लक्षण में 'व्यवहारहेतुत्व' मात्र कहने पर घटादि में अतिव्याप्ति हो

जाती, अतः 'संयुक्त' पद भी कहा गया।

## विश्लेषणम्

**संयोगगुणलक्षणम् -** वस्तुद्वयस्य परस्परमेलनमेव संयोगः। संयोगोऽपि सामान्यगुणः। **'संयुक्तव्यवहारहेतुत्वं'** संयोगस्य लक्षणम्। 'इमौ द्वौ संयुक्तौ' इत्यादिव्यवहारः संयुक्तव्यवहारः कथ्यते। अस्य हेतुः यः गुणः सः संयोगः। अत्र हेतुरित्यस्यार्थः असाधारणकारणमेव बोध्यम्। प्रशस्तपादभाष्ये इदमेव लक्षणं सरलतया प्रस्तूयते यत् **'अप्राप्तयोः प्राप्तिः संयोगः'।**[188] उपन्यासस्य संयोगलक्षणे 'संयुक्त'इति पदस्य ग्रहणं घटादावतिव्याप्तिः निरावरणाय क्रियते। तर्कसङ्ग्रहे संयोगस्य भेदाः नोल्लिखिताः किन्तु दीपिकायां अस्य भेदद्वयं स्वीकृतम् – कर्मजसंयोगः संयोगजसंयोगश्च।[189] प्रशस्तपादभाष्ये कर्मजसंयोगस्यापि अन्यतरकर्मजः उभयकर्मजश्च प्रभेदाः परिगण्यन्ते।[190]

(२.९ विभाग-गुण-लक्षणम्)

**तर्कसंग्रहः –** संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः॥२८॥

**उपन्यासः -**विभागो लक्ष्यः। विभागत्वं लक्ष्यताऽवच्छेदकम्। 'सयोग-नाशकत्वे सति गुणत्वं लक्षणम्। 'संयोग-नाशकत्वम्' उक्तं चेत् ? कालादावतिव्याप्तिः,अतो 'गुणत्वम्' उक्तम्। 'गुणत्व'-मात्रमुक्तं चेत् ? रूपादावतिव्याप्तिः, अतः 'संयोग-नाशकत्वम्' उक्तम् ॥२८॥

**हिन्द्यनुवादः -** विभाग लक्ष्य है। विभागत्व लक्ष्यता-अवच्छेदक है। 'संयोग का नाशकत्व जिस गुण में हो' उसे विभाग कहते है। 'संयोगनाशकत्व' मात्र कहने पर कालादि में अतिव्याप्ति के कारण 'गुणत्व' पद कहा गया। 'गुणत्व' मात्र कहने पर रूपादि अन्य गुणो में अतिव्याप्ति होती, अतः 'संयोग- नाशकत्व' कहा गया।

## विश्लेषणम्

**विभागगुणलक्षणम् -** विभागः पञ्चसामान्यगुणेष्वन्तिमः। **'संयोगनाशकत्वे सति गुणत्वं'** विभागस्य लक्षणं कृतम् उपन्यासे। येन गुणेन वस्तुद्वयोः संयोगः विनश्यते स विभागः। अत्र कालादावतिव्याप्तिवारणाय 'गुणत्वमिति' दीयते यतोहि कालः सर्वाधारत्वेन सर्वकार्यैः सह कालिकसम्बन्धेन युज्यते अतः संयोगनाशेऽपि। अत्र आदिपदेषु संभवतः

[188] प्रशस्तपादभाष्यम् – पृ० ३६७

[189] दीपिका – संयोगगुणप्रकरणम्

[190] प्रशस्तपादभाष्यम् – पृ० ३६७

दिगादिसाधारणकारणानि भवितुम् अर्हन्ति किन्तु एतेषु गुणत्वाभावान्नातिव्याप्तिः। अत्र शंका भवितुं शक्यते यत् साधारणकारणेषु तु ईश्वरेच्छा, ईश्वरप्रयत्नादिः गुण एव। अतः एतेषु संयोगलक्षणस्यातिव्याप्तिः संभवति। अस्यैव अतिव्याप्तिवारणाय पदकृत्यटीकायाम् असाधारणपदमपि लक्षणे देयमित्युक्तम्।[191] अतः उपन्यासस्य लक्षणेऽपि असाधारणपदं नियोज्य अर्थनिर्धारणं करणीयम् अतिव्याप्तिदोषवारणाय। न्यायबोधिन्यां तु गुणत्वपदस्योपादानं क्रियायाः अतिव्याप्तिवारणाय वर्णितं, क्रियायामपि संयोगनाशकत्वात्।[192] एवम्प्रकारेणैव यदि लक्षणे 'संयोगनाशकत्वम्' इतिपदस्य ग्रहणं न क्रियते तर्हि रूपरसादिष्वपि गुणत्वस्य सत्वात्, तत्रापि अतिव्याप्तिर्जायते अतः तदुक्तम्। रूपादिषु संयोगनाशकत्वाभावात् नातिव्याप्तिः। संयोगस्य इव विभागोऽपि द्विविधः – कर्मजविभागः विभागजविभागश्च।[193]

(२.१० पर- २.११ अपर-गुण-लक्षण-भेदाधिष्ठानानि)

**तर्कसंग्रहः –** परापरव्यवहारासाधारणकारणे परत्वापरत्वे पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते द्विविधे दिक्कृते कालकृते च। दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम् ॥२९॥

**उपन्यासः-** परत्वापरत्वे लक्ष्ये। परत्वापरत्वत्वे लक्ष्यताऽवच्छेदके। 'परापर-व्यवहारासाधारण-कारणत्वे लक्षणे। 'असाधारण-'पदं कालादि-वारणाय। घटादि-वारणाय 'परापर' इति॥

अत्र गुण-द्वय-सहोच्चारणं परस्पर-सापेक्षत्वादिति ज्ञेयम्। 'ज्येष्ठ' इत्याद्युदाहरणं बोध्यम्॥२९॥

**हिन्द्यनुवादः -** परत्व-अपरत्व लक्ष्य है। परत्वत्व और अपरत्वत्व लक्ष्यता अवच्छेदक है। 'पर-अपर व्यवहार का असाधारण कारणत्व जिनमें होता है' वही पर एवं अपर है। लक्षण में प्रयुक्त 'असाधारण' पद कालादि में अतिव्याप्ति के निवारण हेतु तथा 'पर-अपर' पद घटादि में अतिव्याप्ति के निवारण हेतु ग्रहण किया गया है।

यहाँ लक्षण में दो गुणों का एक साथ उच्चारण, इनमें एक दूसरे की अपेक्षा होने से किया गया है, ऐसा समझना चाहिए। इनके उदाहरण 'ज्येष्ठ-कनिष्ठादि' हैं।

---

[191] ईश्वरेच्छादिवारणाय असाधारणेत्यपि बोध्यम्। पदकृत्यम् - विभागगुणप्रकरणम्

[192] न्यायबोधिनी - विभागगुणप्रकरणम्

[193] तर्कदीपिका - विभागगुणप्रकरणम्

## विश्लेषणम्

**परत्वापरत्वगुणलक्षणम् -** अत्र गुणद्वयस्य उल्लेखः सार्धमेव क्रियते परत्वापरत्वञ्च। परत्वं दशमो तथा अपरत्वम् एकादशो गुणः। उपन्यासकारेण **'परापरव्यवहारासाधारण-कारणत्वे परत्वापरत्वयोः लक्षणे'** इत्युक्तम्। परः अर्थात् दूरम् अपरश्च समीपमिति। 'अयमस्मात् दूरम्' इति प्रकारकपरव्यवहारस्य यः असाधारणकारणम्, स परत्वगुणः। 'अयमस्मात् समीपम्' इत्याकारकापरव्यवहारस्य असाधारणं कारणं य गुणः सः अपरत्वम्। लक्षणेऽस्मिन्नपि 'असाधारणपदं' कालादिसाधारणकारणवारणाय तथा 'परापर' इति घटादिवारणाय प्रस्तुतं पूर्ववत्। परगुणेन साकम् अपरगुणस्योच्चारणम् अमुयोः परस्परापेक्षा बुद्धित्वात् मन्यते। एतयोः सापेक्षत्वादेव टीकाकारेण अत्र एते सहोच्चार्येते। यथा - ज्येष्ठकनिष्ठादिमाध्यमेन ज्ञायत एव। यतोहि कनिष्ठापेक्षया एव ज्येष्ठस्य अस्तित्वमिति कालकृतं परत्वापरत्वम्। एवम्प्रकारेणैव एकवस्तु द्वितीयवस्त्वपेक्षया मत्पार्श्वं अथवा द्वितीयवस्त्वापेक्षया पूर्ववस्तु मद्दूरमिति दिक्कृतम्। परत्वापरत्वे पृथिवीजलतेजोवाय्वाकाशमनश्चेति पञ्चद्रव्येषु वर्तेते। एते दिक्कृत-कालकृतभेदेन च द्विविधे। दिक्कृतपरत्वं दूरस्थः कालकृतपरत्वञ्च ज्येष्ठः, दिक्कृतापरत्वं समीपस्थः कालकृतापरत्वञ्च समीपस्थ इति।

(२.१२ गुरुत्व-लक्षणम्)

**तर्कसंग्रहः –** आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति ॥३०॥

**उपन्यासः-** गुरुत्वं लक्ष्यम्। गुरुत्वत्वं लक्ष्यताऽवच्छेदकम् 'आद्यपतनासमवायि-कारणं' लक्षणम्। द्वितीयादि-पतनासमवायि-कारणे वेगादावतिव्याप्तिवारणाय 'आद्य-पतन' इत्युक्तम्। 'आद्य-पतन-कारणत्वम्' इत्युक्तौ समवायि-कारणेऽतिव्याप्तिः,अतः 'असमवायि' इत्युक्तम् ॥३०॥

**हिन्द्यनुवादः -** गुरुत्व लक्ष्य है। गुरुत्वत्व लक्ष्यता-अवच्छेदक है। 'वस्तु के आदि (प्रथम) पतन का असमवायि कारण' गुरुत्व है। द्वितीयादि पतन के असमवायि कारण वेगादि में अतिव्याप्ति निवारण हेतु लक्षण में 'आद्य पतन' कहा गया है। लक्षण में 'आद्य पतन का कारण' मात्र कहने पर समवायि कारण में अतिव्याप्ति हो जाती अतः 'असमवायि' पद का उपादान किया गया है।

## विश्लेषणम्

**गुरुत्वगुणलक्षणम् -** चतुर्विंशतिगुणेषु गुरुत्वं द्वादशो गुणः। एतस्य लक्षणे उपन्यासकारेण उक्तं यत् **'आद्यपतनासमवायिकारणत्वं गुरुत्वस्य लक्षणम्'**। कस्यचिदपि वस्तुनः पतने प्रथमपतनं, द्वितीयपतनं, तृतीयपतनमित्यादिक्रमेण बहूनि पतनानि भवन्ति। तत्र प्रथमपतनमेव आद्यपतनम् एवञ्च तस्य पतनस्य यदसमवायिकारणं तत् गुरुत्वमेव इत्याशयः। यदि लक्षणे 'आद्य'पदस्य उपादानं न क्रियते तर्हि संस्कारगुणस्य भेदे वेगेऽतिव्याप्तिः भविष्यति यतोहि वस्तुनः द्वितीयतृतीयादिपतनस्यासमवायिकारणं वेग एव।[194] किन्तु वेगे आद्यपतनासमवायिकारणत्वस्य अभावान्नातिव्याप्तिः। लक्षणे 'असमवायि'पदस्य अग्रहणे समवायिकारणे अतिव्याप्तिः, तस्यापि कारणतात्वात्। समवायिकारणेऽतिव्याप्तेः निवारणाय असमवायि पदमुक्तम्। अतः 'आद्यपतनासमवायिकारणं' गुरुत्वलक्षणमिति सिद्धम्।

(२.१३ द्रवत्व-लक्षणम्)

**तर्कसंग्रहः -** आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद्विविधम्। सांसिद्धिकं नैमित्तिकञ्च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम्। तेजसि सुवणादौ ॥३१॥

**उपन्यासः -** द्रवत्वं लक्ष्यम्। द्रवत्वत्वं लक्ष्यताऽवच्छेदकम्। 'आद्य-स्यन्दनासमवायिकारणत्वं' लक्षणम् । द्वितीयादि-स्यन्दनासमवायि-कारणे = वेगादावतिव्याप्ति-वारणाय 'आद्य' इत्युक्तिः। अत्र 'असमवायि'-पदानुपादाने आद्य-स्यन्दन-समवायिकारणेऽतिव्याप्तिः,अतस्तदुपादानम्। (1) 'सांसिद्धिकं (२) नैमित्तिकं चेति विभागोक्तिः। (1) सांसिद्धिकं जले०' इत्याद्याश्रयोक्तिः॥३१।।

**हिन्द्यनुवादः -** द्रवत्व लक्ष्य है। द्रवत्वत्व लक्ष्यता-अवच्छेदक है। 'आद्यस्यन्दन का असमवायि कारण ही' द्रवत्व है। लक्षण में द्वितीयादि स्यन्दन के असमवायि कारण वेगादि में अतिव्याप्ति वारण हेतु 'आद्य' पद प्रयुक्त हुआ है। 'असमवायि' पद का ग्रहण न करने पर आद्यस्यन्दन के समवायिकारण में अतिव्याप्ति हो जाती अतः 'असमवायि' पद कहा गया। द्रवत्व दो प्रकार का है- सांसिद्धिक और नैमित्तिक। सांसिद्धिक द्रवत्व का जल में तथा नैमित्तिक का पृथ्वी आदि में रहना आश्रयोक्ति है।

**विश्लेषणम्**

[194] द्वितीयादिपतनासमवायिकारणं वेगः। पदकृत्यम् - संस्कारलक्षणप्रकरणम्

**द्रव्यत्वगुणलक्षणम् - 'आद्यस्यन्दनासमवायिकारणत्वं'** द्रवत्वस्य लक्षणम्। स्यन्दनं नाम स्रवणक्रिया। आद्यायाः स्यन्दनक्रियायाः असमवायिकारणमेव द्रवत्वम्। अस्य पदकृत्यं तु गुरूत्वलक्षणस्य इव अवगन्तव्यम्। अस्य सांसिद्धिकनैमित्तिकश्च भेदोऽऽश्रयभेदेन वर्तते। पृथिवी-जल-तेजोद्रव्येषु वृत्तिः द्रवत्वस्य। सांसिद्धिकं द्रवत्वं जलमात्रे तथा नैमित्तिकं पृथिवीतेजसोः आश्रयति।

( २.१४ स्नेह-लक्षणम् )

**तर्कसंग्रहः -** चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः॥३२॥

**उपन्यासः -** स्नेहो लक्ष्यः। स्नेहत्वं लक्ष्यताऽवच्छेदकम्। 'चूर्णादि-पिण्डी-भाव-हेतुत्वे सति गुणत्वं' लक्षणम्। 'चूर्णादि-पिण्डी-भाव-हेतुत्व-'मात्रोक्तौ चूर्णेऽतिव्याप्तिः, अतो 'गुणत्वम्' उक्तम्। 'गुणत्व'-मात्रमुक्तं चेत् ? रूपादावतिव्याप्तिरिति बोध्यम्॥३२॥

**हिन्द्यनुवादः -** स्नेह लक्ष्य है। स्नेहत्व लक्ष्यता-अवच्छेदक है। 'चूर्णादि के पिण्डी भाव का कारण होते हुए गुण होना ही' स्नेह का लक्षण है। 'चूर्णादि के पिण्डी भाव का हेतु' मात्र कहने पर स्वयं चूर्ण में अतिव्याप्ति हो जाती, अतः 'गुणत्व' भी कहा गया एवं 'गुणत्व' मात्र कहने पर रूपादि में अतिव्याप्ति होती, इसलिए 'चूर्णादि पिण्डी भाव-हेतुत्व' का अभिधान किया गया।

## विश्लेषणम्

**स्नेहगुणलक्षणम् -** चतुर्दशो गुणो स्नेहः। **'चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वम्'** स्नेहस्य लक्षणम्। चूर्णस्य तात्पर्यं पिष्टम्। **पिण्डीभावो नाम चूर्णादेर्धारणाऽऽकर्षणहेतुभूतो विलक्षणः संयोग इति**।[195] सामान्यशब्देषु पिण्डीभावस्य तात्पर्यं संयोगविशेषः वक्तुं शक्यते यथा पदकृत्यटीकायामपि उक्तम्।[196] चूर्णादिशब्देन धूल्यादयश्च परिगणितुं शक्यन्ते। अत्र जलमिश्रणेन जायमानो विलक्षणः संयोगविशेष एव पिण्डीभावः। अस्य संयोगविशेषस्य हेतुः[197] यो गुणः स स्नेहः। लक्षणे चूर्णादिपिण्डीभावहेतुत्वं मात्रमुक्तौ चूर्णेऽतिव्याप्तिः, यतोहि चूर्णादीनां पिण्डीभावे चूर्णादेरपि हेतुत्वम्। चूर्णं विना चूर्णस्यपिण्डीभावत्वाभावात्। अतः

---

195 न्यायबोधिनी - स्नेहलक्षणप्रकरणम्

196 पिण्डीभावः संयोगविशेषः...। पदकृत्यम् - स्नेहलक्षणप्रकरणम्

197 न्यायबोधिन्यां हेतुरित्यर्थः असाधारणकारणं तथा पदकृत्यटीकायां निमित्तकारणम् उल्लिखितम्।

लक्षणे 'गुणत्वं' पदं दीयते। चूर्णे गुणत्वाभावान्नातिव्याप्तिः। दीपिकाद्यन्यटीकासु गुणपदस्य ग्रहणं कालादावतिव्याप्तिवारण उल्लिखितम्।[198] लक्षणे गुणत्वमात्रमुक्ते सति रूपाद्यन्यगुणेषु अतिव्याप्तिः, अतश्चूर्णादिपिण्डीभावहेतुत्वम् उक्तम्। अस्य आश्रयः जलद्रव्यमात्रमेव।

(२.१५ शब्द-गुण-लक्षणम् )

**तर्कसंग्रहः** -श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधो ध्वन्यात्मको वर्णात्मकश्च। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः॥३३॥

**उपन्यासः** - शब्दो लक्ष्यः। शब्दत्वं लक्ष्यताऽवच्छेदकम्। 'श्रोत्र-ग्राह्यत्वे सति गुणत्वं' लक्षणम्। श्रोत्र-ग्राह्यत्वस्य शब्दत्वेऽपि सत्त्वात्, गुणत्वस्य तदितर-गुणेऽपि सत्वादुभयोरप्युपादानम्॥ (१)'ध्वन्यात्मको(२) वर्णात्मकश्च'। इति विभागोक्तिः। 'संस्कृतभाषाऽऽदिरूपः।' इति स्वरूप-कथनम्।

'आकाश-मात्र-वृत्तिः' शब्दः। पृथिव्यादि-त्रय-वृत्तिः रूपं [द्रवत्वञ्च][199]। रसो, गुरुत्वं च पृथिवी-जल- वृत्तिनी। पृथिवी-मात्र-वृत्तिर्गन्धः। स्पर्शः पृथिव्यादि-चतुष्टय-वृत्तिः। सङ्ख्यादि-विभागान्ता नव-द्रव्य-वृत्तयः। स्नेहो जल-मात्र-वृत्तिः। [परत्वापरत्वञ्च][200] पृथिवी-जल-तेज-वायु-मनश्च वृत्तिः॥३३॥

**हिन्द्यनुवादः** - शब्द लक्ष्य है। शब्दत्व लक्ष्यता-अवच्छेदक है। 'श्रोत्रेन्द्रिय से ग्रहण होने वाला गुण ही' शब्द है। 'श्रोत्र-ग्राह्यत्व' शब्दत्व (शब्द की जाति) में भी होने से एवं 'गुणत्व' शब्दगुण से भिन्न रूपादिगुणों में भी होने से शब्द के लक्षण में 'श्रोत्र–ग्राह्यत्व' एवं 'गुणत्व' दोनो ही पद का ग्रहण किया गया है। शब्द दो प्रकार का होता है- ध्वन्यात्मक शब्द एवं वर्णात्मक शब्द।

'संस्कृतभाषादिरूप' से वर्णात्मकशब्द का स्वरूप कहा गया है। अब ऊपर वर्णित गुणों का आश्रय संक्षिप्त रूप से प्रस्तुत किया गया है।

---

198 दीपिका, न्यायबोधिनी, पदकृत्यम् - स्नेहलक्षणप्रकरणम्

199 यद्यपि उपन्यासे 'द्रव्यत्वम्' न, किन्तु पृथिवीजलतेजोवृत्तिः द्रव्यत्वस्य अपि। अतः एतस्य परिगणनमपि आवश्यकम्। उपन्यासटीकायाः पाण्डुलिपिसंपादकेनापि संसूच्यत इदम्। - तर्कसंग्रहः (बालप्रबोधिनी-उपन्यासटीकासहितः) , सं०- शिवनारायणशास्त्री, पृ० २७

200 एतयोरपि परिगणनं मूलग्रन्थे न, किन्तु पञ्चदशगुणेषु परत्वापरत्वे अपि, अतः तयोरपि परिगणनं प्रासङ्गिकमत्र। शिवनारायणशास्त्रिवर्येणापि उल्लिखितमेतत्। - तत्रैव

शब्द मात्र आकाश में रहता है।

रूप, द्रवत्व- पृथ्वी, जल, तेज इन तीन द्रव्य में रहते हैं।

रस एवं गुरुत्व - पृथ्वी एवं जल में रहते हैं।

गन्ध - पृथ्वी मात्र में रहता है।

स्पर्श - पृथ्वी, जल, तेज, वायु में रहता है।

संख्यादि से विभाग पर्यन्त- सभी द्रव्यों में रहते हैं।

स्नेह - मात्र जल में रहता है।

परत्व एवं अपरत्व- पृथ्वी, जल, तेज, वायु तथा मन में रहते है।

**विश्लेषणम्**

**शब्दगुणलक्षणम् -** आकाशद्रव्यस्य विशेषगुणः शब्दः। अत एव शब्दः आकाशमात्रे तिष्ठति। आकाशं द्रव्येण सह महाभूतमपि अस्ति । पञ्चमहाभूतेषु आकाशमहाभूतस्य इन्द्रियं श्रोत्रेन्द्रियं वर्तते। श्रोत्रेन्द्रियेण आकाशस्य गुणः शब्दः गृह्यते। अतः शब्दस्य लक्षणमेव वर्तते यत् **'श्रोत्रग्राह्यत्वे सति गुणत्वं'** लक्षणम्। श्रोत्रस्य अर्थः श्रोत्रेन्द्रियमेव। यो गुण येन इन्द्रियेण ग्राह्यः, तस्य गुणस्य जातिरपि तेनैव इन्द्रियेण ग्राह्या इति नियमेन 'शब्दत्वजातौ' अपि श्रोत्रग्राह्यत्वात्, लक्षणस्य अतिव्याप्तिः। शब्दत्वेऽतिव्याप्तिः व्यावर्तनाय एव गुणत्वपदं प्रदत्तं लक्षणे। शब्दत्वे गुणत्वाभावान्नातिव्याप्तिः। लक्षणे गुणत्वमात्रस्य सत्वात् अन्यगुणेऽतिव्याप्तिः, अतो हेतोः श्रोत्रग्राह्यत्वस्योपादानम्।

अतः परम् उपन्यासकारेण उपर्युक्तपञ्चदशगुणाः केषु द्रव्येषु तिष्ठन्ति ? एतस्यै स्पष्टतायै एका सूची प्रदत्ता। यस्यां गुणगुणिनोः संक्षिप्तवर्णनं प्राप्यते। अस्याः सूच्या उल्लेखः हिन्द्यनुवादे कृतः, अतः पुनरुक्तिवशात् न अत्र प्रस्तूयते।

(२.१६ बुद्धि-गुण-लक्षण-भेदादि-कथनम्)

**तर्कसंग्रहः –** सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः। सा द्विविधा। स्मृतिरनुभवश्चेति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः। स द्विविधो यथार्थोऽयथार्थश्चेति।

**उपन्यासः –** बुद्धिर्लक्ष्या। बुद्धित्वं लक्ष्यताऽवच्छेदकम्। 'सर्व-व्यवहार-हेतुत्वे सति ज्ञानत्वं' लक्षणम्। 'सर्व-व्यवहार-हेतुत्व'-मात्रोक्तौ कालादावतिव्याप्तिः,अतो 'ज्ञानत्वम्' उक्तम्। 'ज्ञानत्व'-मात्रोक्तौ ज्ञान-स्वरूपे ब्रह्मण्यतिव्याप्तिः, अतः 'सर्वव्यवहार हेतुत्वम्' उक्तम्, अत्र

'हेतुत्वं' चोपादान-विधयेति बोध्यम्॥

'द्विविधा' इति विभागोक्तिः – (१) स्मृतिर्लक्ष्या। स्मृतित्वं लक्ष्यताऽवच्छेदकम्। 'संस्कार-जन्यत्वे' सति "ज्ञानत्वं" लक्षणम्। 'संस्कार-जन्यत्व-'मात्रोक्तौ संस्कारध्वंसेऽतिव्याप्तिः,अतः 'ज्ञानत्वम्' उक्तम्। 'ज्ञानत्व-'मात्रमुक्तं चेत्? अनुभवेऽतिव्याप्तिः,अतः 'संस्कार-जन्यत्वम्' उक्तम् ।

(२) अनुभवो लक्ष्यः। अनुभवत्वं लक्ष्यताऽवच्छेदकम्।स्मृति-भिन्नत्वे सति 'ज्ञानत्वं' लक्षणम्। 'स्मृति-भिन्नत्व'- मात्रोक्तौ घटादावतिव्याप्तिः, अतो 'ज्ञानत्वम्' उक्तम्। 'ज्ञानत्व'-मात्रोक्तौ स्मृतावतिव्याप्तिः,अतः 'स्मृति-भिन्नत्वे सति' विशिष्टमुपात्तम्। 'स द्विविध' इति विभागोक्तिः।

**हिन्द्यनुवादः –** बुद्धि लक्ष्य है। बुद्धित्व लक्ष्यता-अवच्छेदक है। 'सभी व्यवहार का हेतु होते हुए जो ज्ञानत्व से युक्त हो' उसे बुद्धि कहते है। 'सर्व व्यवहार का हेतु' मात्र कहने पर कालादि में अतिव्याप्ति हो जाती अतः 'ज्ञानत्व' भी कहा गया। 'ज्ञानत्व' मात्र कहने पर ज्ञानस्वरूप ब्रह्म में अतिव्याप्ति के कारण 'सर्व व्यवहार का हेतु' इस पद का भी उपादान किया गया है। यहाँ 'हेतु' उपादानकारण के प्रकार से जानना चाहिए। (संभवतः यहाँ 'हेतु' का 'उपादानकारणत्व' से तात्पर्य 'ब्रह्म में उपादानकारणत्व' का होना है। क्योंकि सर्वव्यवहार का हेतु वेदान्त में 'ब्रह्म' भी है, किन्तु वहाँ ब्रह्म उपादान कारण है तथा न्याय में 'बुद्धि का सर्वव्यवहारहेतुत्व' से तात्पर्य सभी प्रकार के व्यवहार का असाधारण कारण है। अतः 'ब्रह्म' में बुद्धिलक्षण की अतिव्याप्ति न हो इसलिए ब्रह्म में सर्वव्यवहारहेतुत्व उपादानकारण से समझना चाहिए न कि असाधारणकारण से।)

बुद्धि के दो भेद है – स्मृति एवं अनुभव। स्मृति लक्ष्य है। स्मृतित्व-लक्ष्यता अवच्छेदक है। 'जो ज्ञान संस्कार से जन्य होता है' उसे स्मृति कहते है। लक्षण में 'संस्कार जन्य' मात्र कहने पर 'संस्कारध्वंस' में अतिव्याप्ति हो जाती अतः 'ज्ञानत्व' भी कहा गया। इसी प्रकार 'ज्ञानत्व' मात्र कहने पर 'अनुभव' में अतिव्याप्ति के कारण 'संस्कार जन्य' इस पद का भी ग्रहण किया गया।

अनुभव लक्ष्य है। अनुभवत्व लक्ष्यता-अवच्छेदक है। 'स्मृति से भिन्न होते हुए ज्ञानत्व से युक्त होना' ही अनुभव का लक्षण है। 'स्मृतिभिन्नत्व' मात्र कहने पर घटादि में अतिव्याप्ति हो जाएगी इसीलिए 'ज्ञानत्व' कहा गया है तथा 'ज्ञानत्व' मात्र रखने पर 'स्मृति' में अतिव्याप्ति

होने से 'स्मृति भिन्नत्व' ऐसा उच्चारित किया गया है। यह दो प्रकार का होता है- यथार्थ तथा अयथार्थ अनुभव।

## विश्लेषणम्

**बुद्धिगुणलक्षणम् -** न्यायवैशेषिकदर्शने 'बुद्धिगुणः' प्रमुखः यतोहि सम्पूर्णा प्रमाणमीमांसा गुणेऽस्मिन्नेव अंतर्भाव्यते। बुद्धिरिति षोडशो गुणः। बुद्धिः, उपलब्धिः, ज्ञानञ्च पर्यायाः।[201] उपन्यासे **'सर्वव्यवहारहेतुत्वे सति ज्ञानत्वं'** बुद्धिलक्षणं कृतम्। अत्र व्यवहारस्य तात्पर्यं शब्दप्रयोगः यतोहि ज्ञानं विना शब्दप्रयोगासम्भवः। अतः शब्दप्रयोगरूपव्यवहारहेतुत्वं बुद्धेः लक्षणम्।[202] अस्माकं जीवने सर्वव्यवहाराणां शब्दप्रयोगानां वा हेतुः बुद्धिरिति। यद्यपि बुद्धिः ज्ञानञ्च पर्यायः तथापि लक्षणे द्वयोः पृथक् प्रयोगः सांख्याभिमतबुद्धिज्ञानयोः भेदनिराकरणाय कृतः इति वक्तुं शक्यते।[203]

बुद्धिलक्षणे 'सर्वव्यवहारहेतुत्वं' मात्रोक्ते सति कालादावतिव्याप्तिः जायते यतोहि कालदिगादिरपि साधारणकारणत्वात् सर्वव्यवहारहेतवः वर्तन्ते। अतः लक्षणे 'ज्ञानत्वम्' इत्युक्तम्। कालादौ ज्ञानत्वाभावान्नातिव्याप्तिः। अनेन प्रकारेण यदि लक्षणे 'ज्ञानत्वं' मात्रमुक्तं चेत् 'ब्रह्मणि' अतिव्याप्तिः। यतोहि वेदान्तदर्शने ब्रह्म ज्ञानस्वरूपमेव भवति।[204] उपनिषद्वाक्यमपि **'सत्यं ज्ञानमनन्तं ब्रह्म'** इति प्रकीर्तयति।[205] ब्रह्मणि अतिव्याप्तिवर्जनाय लक्षणे 'सर्वव्यवहारहेतुत्वमिति' उपादीयते। उपन्यासकारेण कृतपरीक्षया बुद्धिलक्षणे सर्वव्यवहारहेतुत्वं ज्ञानत्वञ्च पदद्वयोः औचित्यं सिद्धमिति।

**स्मृतिलक्षणम् -** बुद्धेः स्मृतिरनुभवश्चेति भेदद्वयं वर्तते। प्रथमः स्मृतिः लक्ष्यते – **'संस्कारजन्यत्वे सति ज्ञानत्वं'** स्मृतिलक्षणम्। लक्षणे प्रयुक्तः 'संस्कारः' चतुर्विंशतिगुणेषु अन्तिमः। संस्कारस्य भेदत्रयेषु भावनाख्यः संस्कारः अनुवर्तनीयः अत्र। भावनासंस्कारेण यज्ज्ञानमुत्पद्यते तत्तु स्मृतिः। संस्कारध्वंसोऽपि संस्कारजन्यः भवति।[206] तस्मिन् अतिव्याप्तिः

---

201 न्यायसूत्रम् -१/१/१७

202 न्यायबोधिनी - बुद्धिलक्षणप्रकरणम्

203 श्रीनिवासमुखोल्लासिनी - बुद्धिलक्षणप्रकरणम्

204 सच्चिदानन्दानन्ताद्वयं ब्रह्म - वेदान्तसारः

205 तैत्तिरीय उपनिषद् – २/१/१

206 ध्वंसम्प्रति प्रतियोगिनः कारणत्वात्..। न्यायबोधिनी - स्मृतिलक्षणप्रकरणम्

न भवेदतः लक्षणे ज्ञानत्वमुक्तम्। संस्कारध्वंसः संस्कारजन्यस्तु वर्तते किन्तु ज्ञानं न अपितु अभावः। अतो हेतोः न अत्र अतिव्याप्तिः। यदि लक्षणे 'ज्ञानत्वं' मात्रोच्यते तर्हि अनुभवेऽतिव्याप्तिः। पूर्वमुक्तं यत् ज्ञानं द्विविधः, तत्र अनुभवेऽपि ज्ञानत्वात् लक्षणेऽतिव्याप्तिदोषः संभवति। अतः 'संस्कारजन्यम्' अपि कथितम्। अनुभवः संस्कारस्य जनकः न तु जन्यः किन्तु स्मृतिस्तु संस्कारजन्या। एवम् अनुभवे संस्कारजन्यत्वाभावान्नातिव्याप्तिः। यद्यपि उपन्यासटीकायां स्मृतिलक्षणे 'मात्र'पदं न दीयते किन्तु तर्कसंग्रहे तु तथैव पाठः। यतोहि 'मात्रम्' इति पदेन प्रत्यभिज्ञायाम् अतिव्याप्तिवारणं भवति। अतः 'संस्कारमात्रजन्यत्वं' विवक्षणीयम् इति पदकृत्यकारेणापि उच्यते।[207]

**अनुभवलक्षणम् -** ज्ञानस्य द्वितीयो भेदः अनुभवः **'स्मृतिभिन्नत्वे सति ज्ञानत्वम्'** अनुभवस्य लक्षणम्। स्मृतिज्ञानाद् भिन्नं सकलज्ञानमनुभवः कथ्यते। यथा पूर्वमुक्तं यत् स्मृतिः संस्कारजन्या तथा अनुभवः संस्कारजनकः। अतः द्वयोः  ज्ञानयोः भिन्नत्वं तु सुस्पष्टमेव। 'स्मृतिभिन्नत्वं' मात्रोक्तौ स्मृतिभिन्नः यत्किञ्चिद् घटपटादि सर्वमनुभवः भवति। घटपटादावतिव्याप्तिनिरसनाय अनुभवलक्षणे 'ज्ञानत्वमपि' प्रयुक्तम्। घटपटादिः विषयः न तु विषयी (ज्ञानम्)। अतः ज्ञानत्वाभावात् न तत्रातिव्याप्तिः। 'ज्ञानत्व'मात्रग्रहणे स्मृतावतिव्याप्तिः ज्ञानत्वात्। अस्मात् कारणात् स्मृतिभिन्नत्वे सतीति उच्चार्य अनुभवलक्षणेऽपि लक्षणदोषः निराक्रियते टीकाकारेण। ज्ञानस्य इव अनुभवस्यापि द्वौ भेदौ स्तः – यथार्थानुभवः अयथार्थानुभवश्च।

**तर्कसंग्रहः-** तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा रजते इदं रजतमिति ज्ञानम्। सैव प्रमेत्युच्यते।

**उपन्यासः –** (क) यथाऽर्थानुभवो लक्ष्यः। यथाऽर्थानुभवत्वं लक्ष्यताऽवच्छेदकम्। 'तद्वति तत्प्रकारकत्वं' लक्षणम्। अस्ति चेदं लक्षणम् - रजते 'इदं रजतम्' इत्यत्र 'रजतत्ववद्विशेष्यकत्वे सति रजतत्व-प्रकारकत्वम्' इति लक्ष्ये लक्षण-सङ्गतिः।" 'सति'-अन्त-"मात्रोक्तौ रजते 'इदं रङ्गम्' इत्याकारक-भ्रमेऽतिव्याप्तिः। रजतत्ववद्विशेष्यकत्वस्य सत्त्वात्,अतो विशेष्य-दलम्। 'विशेष्य-दल'-मात्रोक्तौ रङ्गे 'इदं रजतम्' इत्याकारक-भ्रमेऽतिव्याप्तिः,रजतत्व-प्रकारकत्वस्य सत्त्वात्,अतः 'सति'-अन्तम्,तत्र रजतत्ववद्विशेष्यकत्वस्याभावन्नातिव्याप्तिः। कालिकसम्बन्धेन

[207] पदकृत्यम् – स्मृतिलक्षणप्रकरणम्

रजतत्ववद्रङ्ग-विशेष्यक-समवाय-सम्बन्धेन रजतत्वप्रकारक-भ्रमेऽतिव्याप्तिः,तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य सत्त्वात्, अतः 'समवाय-सम्बन्धेन तद्वद्विशेष्यकत्वं' निवेश्यम्,तत्र समवाय-सम्बन्धेन रजतत्ववद्विशेष्यकत्वाभावान्नातिव्याप्तिः। रजते कालिक-सम्बन्धेन रङ्गत्व-प्रकारक-रजतविशेष्यक-भ्रमेऽतिव्याप्ति-वारणाय 'समवाय-सम्बन्धेन तत्प्रकारकत्वं' निवेश्यम्,तत्र समवाय-सम्बन्धेन रजतत्व-प्रकारकत्वाभावान्नातिव्याप्तिः। रङ्ग-रजतयोः 'इमे रजत-रङ्गे' इत्याकारक-विपरीत-भ्रमेऽतिव्याप्तिः,तत्र समवाय-सम्बन्धेन रजतत्ववद्विशेष्यकत्वे सति समवाय-सम्बन्धेन रजतत्व-प्रकारकत्वस्य सत्त्वात्, अतः 'तत्सम्बन्धावच्छिन्न-तद्वद्विशेष्यकत्वावच्छेदेन तत्सम्बन्धेन तत्प्रकारकत्वम्' निवेश्यम्,तत्र तद्वद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वाभावान्नातिव्याप्तिः। एवं च 'तद्रजतम्' इत्याकारक-स्मृतावतिप्याप्तिः, तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य सत्त्वात्, अतः 'अनुभवत्वम्' अपि निवेश्यं, तत्रानुभवत्वाभावान्नातिव्याप्तिः। एवं च "तत्सम्बन्धावच्छिन्न-तद्वद्विशेष्यकत्वावच्छेदेन तेन सम्बन्धेन तत्प्रकारकानुभवत्वं प्रमाया लक्षणम्"। इति पर्यवसन्नम्।

**हिन्द्यनुवादः –** यथार्थानुभव लक्ष्य है। यथार्थानुभवत्व लक्ष्यता-अवच्छेदक है। 'जिस धर्मी में जो धर्म है,उस धर्मी में उसी धर्म का ज्ञान (प्रकार) होना' ही यथार्थानुभव का लक्षण है। इस लक्षण का 'रजत में 'रजत' है' इस यथार्थानुभव अर्थात् लक्ष्य में, 'रजतत्व से युक्त रजत/विशेष्य के होने पर इसमें रजतत्व प्रकारक (रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वं) अनुभव होना ही लक्षण संगति है। यदि यहाँ 'रजतत्व से युक्त रजत (विशेष्य) का होना' इस पूर्वार्ध अथवा विशेषण दल मात्र को यथार्थ अनुभव का लक्षण माना जाए तो 'रजत में 'रङ्ग' है' इस विपर्यय ज्ञान में भी अतिव्याप्ति हो जाएगी क्योंकि यहाँ भी 'रजतत्व से युक्त रजत इस विशेष्य के होने से'। इसीलिए विशेष्य दल अर्थात् 'रजतत्व-प्रकारकत्व' को भी लक्षण में ग्रहण किया गया है। इसी प्रकार लक्षण में मात्र विशेष्य दल (रजतत्वप्रकारकत्वं) को रखने पर 'रङ्ग में 'रजत' है' इस प्रकार के भ्रम में अतिव्याप्ति हो जाती, यहाँ भी रजतत्व से युक्त रजत प्रकार होने से। अतः 'रजतत्ववद्विशेष्यकत्व' भी कहा गया। 'रङ्ग में रजत' इस उदाहरण में 'रजतत्व' से युक्त विशेष्यकत्व का अभाव होने से यथार्थानुभव लक्षण की इसमें अतिव्याप्ति नहीं होगी। कालिक सम्बन्ध से 'रजतत्व विशेषण

से युक्त रङ्ग (विशेष्य)' में समवाय सम्बन्ध से होने वाला 'रजतत्व' प्रकारक ज्ञान भ्रम है किन्तु यहाँ भी 'रजतत्ववद्विशेष्य में रजतत्व प्रकारक' ज्ञान होने से यथार्थ अनुभव लक्षण की अतिव्याप्ति होगी। अतः लक्षण में समवायसम्बन्ध से 'रजतत्व' विशेषण का रजतविशेष्य (तद्वद्विशेष्यकत्व) में उपस्थिति हो, ऐसा कहना चाहिए। उपर्युक्त 'रजतत्व युक्त रङ्ग' इस उदाहरण में समवाय सम्बन्ध से रङ्ग अर्थात् विशेष्य में 'रजतत्व' इस विशेषण का अभाव होने से अतिव्याप्ति नहीं होगी। इसी प्रकार कालिक सम्बन्ध से 'रङ्गत्व प्रकार से युक्त रजत अथवा विशेष्य' में समवाय सम्बन्ध से होने वाले 'रङ्गत्व' विशेषण का ज्ञान भ्रम है। किन्तु यहाँ भी पूर्ववत् स्थिति होने से अतिव्याप्ति होगी। अतः समवाय सम्बन्ध से रजतविशेष्य में 'रजतत्व' प्रकार की भी उपस्थिति हो ऐसा कहना चाहिए। 'रङ्गत्व प्रकार से युक्त रजत (विशेष्य) में' समवाय सम्बन्ध से रङ्गत्व प्रकारक अभाव होने से अतिव्याप्ति नहीं होगी। 'रङ्ग-रजत' में 'रजत-रङ्ग' इस प्रकार के विपरीत भ्रम में भी समवाय सम्बन्ध से रजतत्ववद्विशेष्य में समवाय सम्बन्ध से रजतत्व प्रकारक ज्ञान होने से अतिव्याप्ति होगी। अतः समवाय सम्बन्ध से अवच्छिन्न रजतत्व युक्त विशेष्यता के सम्बन्ध (निरूप्य-निरूपकभाव सम्बन्ध) से रजतत्व-प्रकारता हो, लक्षण में ऐसा कहना चाहिए।


इसी प्रकार 'वह रजत' इस तरह के स्मृतिज्ञान में भी तद्वद्विशेष्यकत्व एवं तत्प्रकारकत्व होने से यथार्थानुभव लक्षण की अतिव्याप्ति होगी। अतः लक्षण में 'अनुभवत्व' पद भी देना चाहिए। स्मृति में अनुभव का अभाव होने से अतिव्याप्ति नहीं होगी। इस प्रकार "समवाय सम्बन्ध से अवच्छिन्न रजतत्ववद्विशेष्यता के सम्बन्ध (निरूप्य-निरूपक) से रजतत्व प्रकारक अनुभव ही होना ही" प्रमा का लक्षण है।

## विश्लेषणम्

**यथार्थानुभवलक्षणम् -** तर्कसंग्रहे अनुभवस्य यथार्थानुभवभेदे एव न्यायवैशेषिकस्य प्रमाणप्रक्रिया विहिता अन्नम्भट्टेन। अर्थमनतिक्रम्य इति यथार्थम्। सामान्यतः अस्यार्थः वास्तविकम्, सत्यं सत्यानुरूपश्च प्रभृतयः भवन्ति। अतः यत्प्रत्यक्षज्ञानम् अनुभवो वा सत्यं वास्तविकञ्च एवं तदेव यथार्थानुभवः। उपन्यासकारेण यथार्थानुभवस्य लक्षणं **'तद्वति तत्प्रकारकत्वम्'** इति न्यायवैशेषिकशास्त्रानुगतमेव दीयते। अत्र 'तत्' इति पदेन पदार्थस्य स्वरूपाधायकधर्मः अथवा विशेषणं गृह्यते। 'तद्वान्' इति स्वरूपाधायकधर्मेण युक्तः पदार्थः

तथा 'तद्वति' अर्थात् स्वरूपाधायकधर्मयुक्तपदार्थे। सम्प्रति तस्मिन् पदार्थे तस्य धर्मस्यैव प्रकाररूपे कृतं ज्ञानमेव 'यथार्थानुभवः'। 'रजते इदं रजतम्' इति ज्ञानं यथार्थानुभवः। अत्र रजतस्य स्वरूपाधायकधर्मः विशेषणं वा 'रजतत्वम्'। रजतत्वयुक्तरजते अथवा विशेष्ये रजतत्वप्रकारकज्ञानमेव 'रजते इदं रजतम्' इत्यस्य यथार्थानुभवं द्योतयति। अस्मिन् लक्ष्ये **'रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वम्'** इति लक्षणसमन्वयः विहितः।

**आरेखीयप्रस्तुतिः –** 'रजते इदं रजतम्'






**चित्रक्रमाँकः – १**

यथार्थानुभवस्य लक्षणपरीक्षा आचार्येण इदमेव लक्षणमवलम्ब्य प्रस्तूयते। अत्र रजतत्ववद्विशेष्यकत्वं विशेषणदलं तथा रजतत्वप्रकारकत्वं विशेष्यदलरूपेण उपस्थापितम्। यदि मात्र'रजतत्ववद्विशेष्यकत्व'मेव यथार्थानुभवस्य लक्षणमुच्यते तर्हि 'रजते इदं रङ्गम्' इत्याकारकभ्रमेऽपि अतिव्याप्तिः भविष्यति यतोहि अत्रापि 'रजतत्वम्' इति स्वरूपाधायकधर्मेण युक्तं रजतविशेष्यकत्वस्य सत्वात्।

**आरेखीयप्रस्तुतिः –**

‘रजते इदं रङ्गम्’ –





**चित्रक्रमाँकः – २**


इयमतिव्याप्तिवर्जनाय एव लक्षणे ‘तत्प्रकारकत्वम्’ इति विशेष्यदलमुक्तम्। ‘रजते इदं रङ्गम्’ इत्यत्र रजतत्वप्रकारः न अपितु रङ्गत्वप्रकारः,अतः रजतत्वप्रकारकत्वाभावान्नातिव्याप्तिः अत्र।

लक्षणे विशेष्यदलमात्रमुक्ते सति ‘तत्प्रकारकत्व’मिति यथार्थानुभवस्य लक्षणं भवति। किन्तु लक्षणेऽस्मिन् अतिव्याप्तिदोषं दर्शयति टीकाकारः। अस्य ‘रङ्गे इदं रजतम्’ इत्याकारकभ्रमेऽतिव्याप्तिः यतोहि अत्रापि रजतत्वप्रकारकत्वस्य सत्वात्। अतः विशेषणदलं प्रयुक्तम्।

**आरेखीयप्रस्तुतिः-**

**'रङ्गे इदं रजतम्'**





**चित्रक्रमाँकः – ३**

'रङ्गे इदं रजतम्' अस्मिन् रजतत्वप्रकारस्तु वर्तते किन्तु रजतत्ववद्विशेष्यकत्वं न अपितु रङ्गत्ववद्विशेष्यकत्वमस्ति। अत्र रजतत्ववद्विशेष्यकत्वस्याभावात् यथार्थानुभवलक्षणे न अतिव्याप्तिदोषः। अतः लक्षणे विशेषणविशेष्यदलयोः औचित्यत्वादेव कथनम् न तु वाग्विकल्पत्वात्। विशेषणविशेष्यदलयोः कथनमिव समवायसम्बन्धस्यापि उच्चारणस्य औचित्यमस्ति यथार्थानुभवलक्षणे अन्यथा कालिकसम्बन्धेन अतिव्याप्तिदोषः भवति। यतोहि कालिकसम्बन्धेन सर्वत्र सर्वं तिष्ठति तथा च इदमपि यथार्थज्ञानं भवतीति[208] न्यायानुसारं कालिकसम्बन्धेन रजतत्वविशेषणयुक्तं रङ्गविशेष्यकज्ञानं यथार्थज्ञानं भवति। किन्तु कालिकसम्बन्धेन रजतत्ववद्विशेष्ये समवायसम्बन्धेन रजतत्वप्रकारकज्ञानं भ्रमज्ञानं वर्तते।


**आरेखीयप्रस्तुतिः –**

[208] नव्यन्यायभाषाप्रदीपः - Text 18

कालिकसम्बन्धेन रजतत्ववद्विशेष्यकत्वम् -




कालिकसम्बन्धेन रजतत्ववद्विशेष्यकत्वे सति समवायसम्बन्धेन रजतत्वप्रकारकत्वम् -




**चित्रक्रमाँकः ४**


अत्रापि तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य सत्वात्, यथार्थानुभवलक्षणस्य अत्र अतिव्याप्तिः न भवेत्। अतः लक्षणे समवायसम्बन्धेन 'तद्वद्विशेष्यकत्वं' कथनीयमित्युपन्यासकारः। उपर्युक्तोदाहरणे समवाय- सम्बन्धेन 'तद्वद्विशेष्यकत्वम्' न अपितु कालिकसम्बन्धेन। अतः न अत्रातिव्याप्तिः यथार्थानुभवलक्षणस्य।

**आरेखीयप्रस्तुतिः –** चित्रक्रमाँकः '२' सदृश एव


अनेन प्रकारेणैव 'रजते' कालिकसम्बन्धेन रङ्गत्वप्रकारकज्ञानं यथार्थं किन्तु रङ्गत्वप्रकारकरजते समवायसम्बन्धेन रङ्गत्वविशेषणयुक्तं रजतविशेष्यकज्ञानं भ्रमः।

**आरेखीयप्रस्तुतिः –**

कालिकसम्बन्धेन रजतत्वप्रकारकत्वम् -




समवायसम्बन्धेन रजतत्ववद्विशेष्यकत्वे सति कालिकसम्बन्धेन रजतत्वप्रकारकत्वम् -




**चित्रक्रमाँकः ५**

अस्मिन् भ्रमेऽपि तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य सत्वादतिव्याप्तिः यथार्थानुभवलक्षणस्य। अत्र अतिव्याप्तेः निराकरणाय उपन्यासकारेणोक्तं यत् 'तत्प्रकारकत्वमपि' निवेश्यं तद्वद्विशेष्यकत्वमिव। अत्र समवायसम्बन्धेन तत्प्रकारकत्वाभावान्नातिव्याप्तिः।

**आरेखीयप्रस्तुतिः –** चित्रक्रमाँकः '२' सदृश एव

एवम्प्रकारेण लक्षणे दोषनिवारणाय 'समवायसम्बन्धेन तद्वद्विशेष्यकत्वे सति समवायसम्बन्धेन तत्प्रकारकत्वम्' अवगन्तव्यं न तु अन्येन सम्बन्धेन इति

उपन्यासकारस्याशयः।

अधुना लक्षणेऽस्मिन् निरूप्य-निरूपकभावसम्बन्धः अपि युज्यते आचार्येण। अर्थात् समवायसम्बन्धेन तद्वन्निष्ठविशेष्यतानिरूपितं समवायसम्बन्धेन तन्निष्ठप्रकारताशालिज्ञानं यथार्थानुभवः। तर्कसङ्ग्रहोपरि नव्यन्यायस्य अपराटीकान्यायबोधिन्यामपि एतदेवोक्तम्।[209] अन्यथा तु 'रङ्गरजतयोः' इत्यस्मिन् समूहालम्बनज्ञाने 'इमे रजतरङ्गे' इत्याकारकासमूहालम्बनभ्रमस्य अथवा विपरीतभ्रमस्य सत्वात्, अस्मिन् भ्रमे यथार्थनुभवलक्षणम् अतिव्याप्तं भविष्यति। अत्र सर्वप्रथमं समूहालम्बनस्य चर्चा आवश्यकी। नव्यन्याये समूहालम्बनम् एकप्रकारस्य ज्ञानं वर्तते। समूहालम्बनज्ञानमपि यथार्थज्ञानं भवति। नव्यन्याये ज्ञानमिदं प्रकारद्वयेन परिभाष्यते। प्रथमं तु **'नानाप्रकारतानिरूपितं नानामुख्यविशेषताशालिज्ञानं समूहालम्बनज्ञानम्'।**[210] एतदेव न्यायबोधिन्यां **'नानामुख्यविशेषताशालिज्ञानं'**[211] तथा नव्यन्यायभाषाप्रदीपे **'प्रत्येकप्रकारता-निरूपिता पृथक् विशेष्यता यस्मिन् तत्तु समूहालम्बनम्'** इति कथ्यते। समूहालम्बने नानाप्रकारतानिरूपिता नानाविशेष्यता भवति किन्तु संशये नानाप्रकारता निरूपिता एकैव विशेष्यता भवतीति संशयात् समूहालम्बनस्य भेदः।[212] यदा एकस्मिन्नेव विशेष्ये नैकासां प्रकारतानां ज्ञानं एकसार्धमेव भवति तदा 'एकप्रकारता निरूपिता पृथक् विशेष्यता' तथा 'अपरप्रकारता निरूपिता पृथक् विशेष्यता' इत्यादिप्रकारकस्य ज्ञानं समूहालम्बनज्ञानमिति। यथा - भूतलं विशेष्यः, अमुष्मिन् विशेष्ये घटः, पटः, कटश्च नैकाः प्रकारताः (विशेषणानि) विद्यन्ते। साम्प्रतं घटनिष्ठप्रकारता- निरूपितपृथक्भूतलनिष्ठविशेष्यता, पटनिष्ठप्रकारतानिरूपितपृथक्भूतलनिष्ठविशेष्यता तथा कटनिष्ठ-प्रकारतानिरूपितपृथक्भूतलनिष्ठविशेष्यता वर्तते। अत्र नानाप्रकारतानिरूपितनानामुख्यविशेष्यता वर्तते। अत एव इदं ज्ञानं समूहालम्बनम्। लक्षणे प्रयुक्तस्य 'मुख्यविशेष्यता' इति पदस्य तात्पर्यं वर्तते यत् 'या विशेषता प्रकारतारूपा न भवति

---

[209] तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमिति निष्कर्षः। न्यायबोधिनी - यथार्थानुभवलक्षणम्

[210] (गदाधरीव्युत्पत्तिवादः) – न्यायकोशः, पृष्ठः ९७५


[211] न्यायबोधिनी – यथार्थानुभवप्रकरणम्

[212] नव्यन्यायभाषाप्रदीपः – Text 52

न्यायकोशः पृष्ठः - ९७५

सा मुख्यविशेष्यता भवति।[213] उपर्युक्तोदाहरणे घटपटादिरपि घटत्वपटत्वादिदृष्ट्या विशेष्यः, अतः तेषु विशेष्यता विद्यते तथा भूतलदृष्ट्या घटादिः प्रकारः, अतः अमीषु प्रकारता अपि। अतः एतेषां विशेष्यता प्रकारतारूपा वर्तते। किन्तु भूतले या विशेष्यता सा तु न प्रकारतासहिता। अतो हेतोः भूतलनिष्ठविशेष्यता एव मुख्यविशेष्यता भवति। इदं तु प्रथमप्रकारकं समूहालम्बनज्ञानम्, अतः परं द्वितीयप्रकारकं – **'नानाविशेष्यता-निरूपितनानाप्रकारताशालिज्ञानं समूहालम्बनम्'।**[214] अर्थात् यदा भिन्न-भिन्नविशिष्येषु पृथक्-पृथक् प्रकारकस्य ज्ञानं एकस्मिन्नेव काले भवति तदा समूहालम्बनज्ञानस्य द्वितीयप्रकारः। यथा – 'भूतलं घटवत् महानसञ्च वह्निमत्। अत्र भूतलं महानसञ्च भिन्न-भिन्नविशेष्यौ स्तः। एतयोः क्रमशः घटः वह्निश्चेति पृथक्-पृथक्प्रकारस्य ज्ञानमेकसार्धमेव भवति। इदमेव ज्ञानं नानाविशेष्यतानिरूपितनानाप्रकारताशालिसमूहालम्बनम्। अत्र यस्मिन् विशेष्ये यस्य प्रकारकस्य ज्ञानं भवति, सा विशेष्यता तामेव प्रकारतां निरूपयति न तु अपरप्रकारताम् इति ध्यातव्यम्।

**आरेखीयप्रस्तुतिः –**





**चित्रक्रमाँकः ६**

213 नव्यन्याय के पारिभाषिक पदार्थ – पृष्ठः १३५


214 न्यायकोशः – पृष्ठः ९७५

उपन्यासकारेण प्रदत्ते 'रङ्गरजतयोः' इत्युदाहरणे द्वितीयप्रकारकसमूहालम्बनज्ञानं वर्तते। यतोहि अत्र विशेष्यताद्वय-प्रकारताद्वयस्य च ज्ञानं एकसार्धमेव भवति। अत्र रङ्गत्ववन्निष्ठविशेष्यता- निरूपिता-रङ्गत्वनिष्ठप्रकारता तथा रजतत्ववन्निष्ठविशेष्यता-निरूपिता-रजतत्वनिष्ठप्रकारता वर्तते। यदि यथार्थानुभवलक्षणे 'तद्वन्निष्ठविशेष्यतानिरूपिता तन्निष्ठप्रकारता' अर्थात् 'रजतत्ववन्निष्ठविशेष्यता-निरूपिता-रजतत्वनिष्ठप्रकारता' न कथ्येत तर्हि 'इमे रजतरङ्गे' इत्यस्मिन् विपरीतभ्रमे अथवा समूहालम्बनभ्रमे अतिव्याप्तिः भविष्यति। यतोहि द्वयोः आहृतधर्मणोः निरूप्य-निरूपकभावसत्वात्, काचिदपि विशेष्यता काञ्चिदपि प्रकारतां निरूपयिष्यति। अतः तत्र भ्रमज्ञानं भविष्यति। 'रङ्गरजतयोः' इति समूहालम्बनज्ञाने रजतत्ववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारतायाः अभावादेव 'इमे रजतरङ्गे' इति समूहालम्बनभ्रमस्योत्पत्तिः भवति। अत्र 'रङ्गत्वनिष्ठविशेष्यतानिरूपिता रजतत्वनिष्ठप्रकारता' तथा 'रजतत्वनिष्ठविशेष्यतानिरूपिता रङ्गत्वनिष्ठप्रकारता' वर्तते।

**आरेखीयप्रस्तुतिः –** ' रङ्गरजते '



रङ्गरजतयोः 'इमे रजतरङ्गे'




**चित्रक्रमाँकः ७**

किन्तु अस्मिन् समूहालम्बनभ्रमेऽपि 'समवायसम्बन्धेन रजतत्ववद्विशेष्यकत्वे सति समवायसम्बन्धेन रजतत्वप्रकारकत्वस्य' तथा 'समवायसम्बन्धेन रङ्गत्ववद्विशेष्यकत्वे सति समवायसम्बन्धेन रङ्गत्वप्रकारकत्वस्य' सत्वात्, यथार्थानुभवलक्षणस्य अतिव्याप्तिः भविष्यति। लक्षणे 'तद्वन्निष्ठविशेष्यतानिरूपिता तत्प्रकारता' इत्युक्ते 'इमे रजतरङ्गे' इत्यस्मिन्नातिव्याप्तिः। यतोहि अत्र रजतत्ववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारतायाः तथा रजतत्ववन्निष्ठ- विशेष्यतानिरूपितरजतत्वनिष्ठप्रकारतायाः अभावस्य सत्वात्।

उपन्यासकारेण 'तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारता' इत्यस्मिन् स्थाने 'तद्वद्विशेष्यकत्वावच्छेदेन तत्सम्बन्धेन तत्प्रकारकत्वम्' उक्तम्। अत्र तद्ववद्विशेष्यकत्वस्य तात्पर्यं रजतत्वविशेषणयुक्तविशेष्यता, तत्सम्बन्धेन अर्थात् रजतत्वविशेषणयुक्तविशेष्यताः निरूप्य-निरूपकसम्बन्धेन कृतं रजतत्वप्रकारताशालिज्ञानमेव यथार्थानुभवः।

पुनश्च 'तद्रजतम्' इत्याकारकस्मृतिज्ञानेऽतिव्याप्तिवारणाय यथार्थानुभवलक्षणे अनुभवत्वमपि निवेश्यमिति टीकाकारेणोक्तम्। यतोहि 'तद्रजतम्' अस्मिन्नपि रजतत्ववद्विशेष्यकत्वं तथा रजतत्वप्रकारकत्वं वर्तते। किन्तु लक्षणे 'अनुभवपद'मुक्ते सति स्मृतौ

अनुभवत्वाभान्नातिव्याप्तिः। पदकृत्येऽपि वर्णितमिदम्।[215] एवमुपर्युक्तदोषान् निराकृत्य **तत्सम्बन्धावच्छिन्न (समवायसम्बन्धावच्छिन्न)- तद्ववद्विशेष्यकत्वावच्छेदेन तत्सम्बन्धेन (विशेष्यतानिरूपिता/ निरूप्यनिरूपकसम्बन्धेन)- तत्प्रकारकत्वानुभवत्वं'** प्रमायाः अथवा यथार्थानुभवस्य निर्दुष्टं लक्षणं प्रतिपादितमुपन्यासकारेण। यथार्थनुभवलक्षणस्य परीक्षा टीकाकारेण कियत्गूढतया कृता। अस्य परिचायकानि तु लक्षणपरीक्षायां वर्णितानि 'रजते इदं रङ्गम्', 'रङ्गे इदं रजतम्', 'कालिकसम्बन्धः', 'रङ्गरजतयोः' 'इमे रजतरङ्गे', 'तद्रजतम्' इत्युदाहरणान्येव वर्तन्ते।

**तर्कसंग्रहः-** तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा शुक्तौ 'इदं रजतम्' इति ज्ञानम्। सैव अप्रमेत्युच्यते ॥३४॥

**उपन्यासः –** (ख) अयथार्थानुभवो लक्ष्यः। अयथार्यानुभवत्वं लक्ष्यताऽवच्छेदकम्। 'तदभाववति तत्प्रकारकानुभवत्वं' लक्षणम्। अस्ति चेदं लक्षणम् - शुक्तौ 'इदं रजतम्' इत्याकारक- ज्ञानेऽतिव्याप्तिः[216], तदभाववच्छुक्ति-विशेष्यकत्वे सति रजतत्वप्रकारकत्वात्। 'तत्प्रकारकत्व'-मात्रोक्तौ 'इदं रजतम्' इत्याकारक-प्रमायामतिव्याप्तिः,तत्प्रकारकत्वस्य तत्र सत्त्वात्,अतः 'तदभाववद्विशेष्यकत्वम्' उक्तम्। 'तदभाववद्विशेष्यकत्व-'मात्रोक्तौ 'रजतत्वाभाववद् भूतलम्' इत्याकारक-ज्ञानेऽतिव्याप्तिः, तदभाववद्भूतल-विशेष्यकत्वस्य सत्त्वात्,अतः 'तत्प्रकारकत्वम्' उक्तम्। 'द्रव्यं संयोगि' इत्याकारक-प्रमायामतिव्याप्तिः, तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य सत्त्वात्, संयोगस्याव्याप्य-वृत्तित्वात्, अतः भ्रम-लक्षण-घटकीभूताभावे 'प्रतियोगि-व्यधिकरणत्वं' विशेषणं देयम्, 'संयोगि' इत्याकारक-प्रमायां संयोगाभावस्य प्रतियोगि-समानाधिकरणत्वान्नातिव्याप्तिः। 'संयोग-सम्बन्धेन रजतत्वाभाववद्रजत-विशेष्यक-रजतम्' इत्याकारक-ज्ञानेऽतिव्याप्ति-वारणाय 'समवाय-सम्बन्धावच्छिन्न-प्रतियोगिताकत्वम्' अप्यभावे विशेषणं बोध्यम्। कालिक-सम्बन्धेन रजतत्वाभाववद्रजत-विशेष्यक-समवाय-सम्बन्धेन रजतत्व-प्रकारक-रजत-प्रमायामतिव्याप्ति-वारणाय 'तदभाववद्' इत्यत्र 'दैशिक-सम्बन्धेन तदभाववत्त्वं' बोध्यम्। एवं च "

---

[215] पदकृत्यम् - यथार्थानुभवप्रकरणम्

[216] अत्र लक्षणसंगतिः कर्तव्या न तु परीक्षा यतोहि यथार्थानुभव लक्षणे एवमेव कृतम्। अतिव्याप्तिदोषनिवारणाय अत्र किमपि प्रसङ्गः नोपलब्धः, अतः लक्षणसंगतिरेव अत्र विहिता हिन्द्यनुवादे विश्लेषणे च।

'तत्सम्बन्धावच्छिन्न-प्रतियोगिताक-प्रतियोगि-व्यधिकरण-दैशिक-विशेषणता-सम्बन्धेन तदभाववद्विशेष्यकत्वे सति तत्सम्बन्धेन तत्प्रकारकत्वं' भ्रम-लक्षणम्"। इति पर्यवसन्नम्। प्रकारतायां 'तत्सम्बन्धावच्छिन्नत्वा'नुपादाने समवायसम्बन्धेन रजतत्वाभाववच्छुक्ति-विशेष्यक-कालिकसम्बन्धेन रजतत्वप्रकारक-प्रमायामतिव्याप्तिः, अतस्तदुपादानम् । इति ध्येयम् ॥३४॥


**हिन्द्यनुवादः-** अयथार्थानुभव लक्ष्य है। अयथार्थानुभवत्व लक्ष्यता-अवच्छेदक है। 'जिस धर्मी में जिस धर्म का अभाव है,उसमें उसी धर्म का ज्ञान होना ही' अयथार्थानुभव का लक्षण है। इस लक्षण का 'शुक्ति में 'रजत' है' इस अयथार्थानुभव अथवा लक्ष्य में, 'शुक्तिकात्व से युक्त शुक्तिका (विशेष्य) में रजतत्व प्रकारक (रजतत्वाभावद्शुक्तिविशेष्यकत्वे सति रजतत्वप्रकारकत्वं) अनुभव होना ही लक्षण संगति है। लक्षण में 'तत्प्रकारकत्व' मात्र कहने पर 'यह रजत है' इस प्रकार के यथार्थानुभव में अतिव्याप्ति हो जाएगी, यहाँ भी 'तत्प्रकारकत्व' होने से। अतः 'तदभाववद्विशेष्यकत्व' भी कहा गया। 'तदभाववद्विशेष्यकत्व' मात्र कहने पर 'रजतत्व अभाव वाला भूतल' इस ज्ञान में अतिव्याप्ति होती, यहाँ भी 'तदभाववद्विशेष्यकत्व' होने से, इसीलिए 'तत्प्रकारकत्व' का ग्रहण किया गया है लक्षण में। पुनः 'द्रव्य संयोग वाला है' इस प्रमा में भी संयोग की अव्याप्य वृत्ति होने से 'तदभाववद्विशेष्यकत्व' होते हुए 'तत्प्रकारकत्व' है। अतः यहाँ भी अयथार्थानुभव लक्षण की अतिव्याप्ति होगी। अतः भ्रमलक्षण अथवा अयथार्थानुभव लक्षण में प्रयुक्त अभाव हेतु 'प्रतियोगि-व्यधिकरण' विशेषण देना चाहिए। 'द्रव्य संयोग वाला है' इस प्रमा में संयोग के अभाव का प्रतियोगि-समानाधिकरण होने से अतिव्याप्ति की निवृत्ति हो जाती है। संयोग सम्बन्ध से 'रजतत्व अभाव वाले रजतविशेष्य में रजत का बोध' इस प्रकार के ज्ञान में अतिव्याप्ति निवारण हेतु लक्षण में 'समवाय सम्बन्ध से अवच्छिन्न प्रतियोगिता वाला अभाव' ऐसा कहना चाहिए। इसी प्रकार कालिक सम्बन्ध से 'रजतत्वाभाव वाले रजत में' समवाय सम्बन्ध से 'रजतत्व प्रकारक' बोध वाले प्रमा में अतिव्याप्ति न हो अतः अभाव के विशेषण में 'दैशिक सम्बन्ध (स्वरूपसम्बन्ध)' भी रखना चाहिए। इस प्रकार "समवाय सम्बन्ध से अवच्छिन्न, प्रतियोगी-व्यधिकरण तथा दैशिक विशेषणता सम्बन्ध वाले अभाव अर्थात् 'रजतत्वाभाव' से युक्त विशेष्य (रजत) में समवाय सम्बन्ध से अवच्छिन्न ही रजतत्व प्रकार

का ज्ञान होना ” भ्रम अथवा अयथार्थानुभव का लक्षण है। लक्षण में प्रयुक्त प्रकारता भी तत्सम्बन्धावच्छिन्न (समवाय सम्बन्ध से अवच्छिन्न) कही गयी है। ऐसा न करने पर समवाय सम्बन्ध से 'रजतत्वाभाव वाली शुक्ति में कालिक सम्बन्ध से रजतत्व प्रकारक बोध होना' इस प्रमा में अतिव्याप्ति हो जाती। अतः 'तत्सम्बन्धावच्छिन्न तत्प्रकारकत्व' कहा गया।

## विश्लेषणम्

**अयथार्थानुभवलक्षणम् -** यस्मिन् यद्धर्मो नास्ति, तस्मिन् तद्धर्मस्य ज्ञानमेव अयथार्थज्ञानम् - **तदभाववति तत्प्रकारकानुभवत्वं'** अयथार्थानुभवस्य लक्षणम्। अत्रापि 'तत्'पदस्य अर्थः पदार्थस्य स्वरूपाधायकधर्म एव। यथा शुक्तौ इदं रजतम् इति अयथार्थज्ञानम्। शुक्तौ तस्य स्वरूपाधायकधर्मः शुक्तित्वं न तु रजतत्वम् किन्तु शुक्तौ रजतत्वप्रकारकज्ञानमेव भवति। अतः **रजतत्वाभाववच्छुक्तिविशेष्यकत्वे सति रजतत्वप्रकारकज्ञानमेव** 'शुक्तौ इदं रजतम्' इत्यस्य अयथार्थानुभवः सिद्ध्यते।

**आरेखीयप्रस्तुतिः –** 'शुक्तौ इदं रजतम्'





**चित्रक्रमाँकः ८**

एवम्प्रकारेण 'शुक्तौ इदं रजतम्' इत्यस्मिन् लक्ष्ये रजतत्वाभाववच्छुक्तिविशेष्यकत्वे सति रजतत्वप्रकारकत्वम् इति लक्षणसमन्वयः। यदि लक्षणे 'तत्प्रकारकत्व'मात्रोच्यते तर्हि 'इदं रजतम्' अस्मिन् यथार्थानुभवेऽपि रजतत्वप्रकारकत्वे सति अयथार्थानुभवलक्षणस्य अतिव्याप्तिः भविष्यति। अतः लक्षणे 'तदभाववद्विशेष्यकत्वमपि' उक्तम्। एवम्प्रकारेण तदभाववद्विशेष्यकत्वमात्रोक्तौ 'रजतत्वाभाववद् भूतलम्' इत्यस्मिन् उदाहरणेऽतिव्याप्तिः।

यतोहि अत्रापि 'तदभाववत्' अर्थात् 'रजतत्वाभाववत्', विशेष्यस्य अर्थात् भूतलस्य सत्वात्। किन्तु अत्र 'रजतत्वप्रकारकत्वं' न, अत एव इत्याकारकज्ञानादौ अयथार्थलक्षणस्य अतिव्याप्तिवारणाय लक्षणे तत्प्रकारकत्वमपि संयोजितम्।

पुनः अस्मिन् लक्षणेऽपि अतिव्याप्तिदोषस्य संभावना व्यक्ता उपन्यासकारेण। 'द्रव्यं संयोगि' इत्याकारकयथार्थानुभवे अस्य लक्षणस्य अतिव्याप्तिः, अत्रापि तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य सत्वात्। यतोहि प्रस्तुते उदाहरणे प्रयुक्तपदं 'संयोगः' अव्याप्यवृत्तिः। स्वात्यन्ताभावेन सह एकस्मिन्नेवाधिकरणे यस्य वृत्तिः भवति, सः अव्याप्यवृत्तिः।[217] संयोगो अपि स्वात्यन्ताभावेन सह समानाधिकरणे तिष्ठति अर्थात् अस्य वृत्तिः सकलाधिकरणे न व्याप्ता भवति। अत एव संयोगोऽव्याप्यवृत्तिः। अव्याप्यवृत्तौ भावः अभावश्च एकस्मिन्नेवाधिकरणे वर्तेते। नव्यन्यायभाषाप्रदीपे **'स्वाधारेऽपि यस्याभावो वर्तते, सः अव्याप्यवृत्तिः'** इति उच्यते[218] तथा अव्याप्यवृत्तिरेव प्रतियोगिसमानाधिकरणम् इति नाम्ना अपि ज्ञायते।[219] अनेन प्रकारेण यत्र संयोगः वर्तते तत्रैव संयोगाभावोऽपि। अतो हेतोः संयोगस्य अव्याप्यवृत्तित्वं सिद्धम्। 'द्रव्यं संयोगि' इत्युदाहरणेऽपि संयोगः संयोगाभावश्च स्थितौ, संयोगस्य अव्याप्यवृत्तित्वात्।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः ९**

अत्र 'संयोगाभाववद्विशेष्यकत्वे सति संयोगप्रकारकत्वम्' इति यथार्थानुभवः। अतः अयथार्थानुभलक्षणस्य अत्र अतिव्याप्तिर्भवति। अस्मात् कारणात् लक्षणे प्रयुक्ते अभावे


217 स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वम् – तर्कदीपिका, संयोगगुणलक्षणम्

218 नव्यन्यायभाषाप्रदीपः – Text 33

219 नव्यन्यायभाषाप्रदीपः – Text 35

‘प्रतियोगिव्यधिकरणत्वम्’ अदः विशेषणं दातव्यमिति टीकाकारः। प्रतियोगिव्यधिकरणं नाम व्याप्यवृत्तिः[220] अर्थात् यत्र भावः अभावो वा सम्पूर्णाधिकरणं व्याप्य तिष्ठति न तु अधिकरणस्य एकांशम्। अयथार्थानुभवलक्षणे यः अभावः सः तु प्रतियोगिव्यधिकरणमेव तथा ‘द्रव्यं संयोगि’ इत्यत्र संयोगाभावः प्रतियोगिसमानाधिकरणम्। अतः ‘द्रव्यं संयोगि’ इत्याकारकप्रमायां प्रतियोगिव्यधिकरणत्वाभावान्नातिव्याप्तिः। यथा यथार्थानुभवे समवायसम्बन्धेन रजते रजतत्वस्य भावः वर्तते। तथैव अयथार्थानुभवे समवायसम्बन्धेनैव शुक्तिकायां रजतत्वाभावोऽपि भवति न तु संयोगादिसम्बन्धेन। संयोगसम्बन्धेन ‘शुक्तिकायां रजतत्वाभावः’ इति प्रमा यतोहि शुक्तिकायां तु रजतत्वाभावः सर्वसम्बन्धैः वर्तते अतः संयोगेनापि। अतः एवम्प्रकारकज्ञाने अयथार्थानुभवलक्षणस्य अतिव्याप्तिवारणाय उपन्यासकारेण समवायसम्बन्धावच्छिन्न- प्रतियोगिताकत्वमपि लक्षणे प्रयुक्तस्य अभावस्य विशेषणं दत्तम्। यतोहि येन सम्बन्धेन रजते ‘रजतत्वस्य’ भावः, स एव सम्बन्धः शुक्तिकायां रजतत्वाभावस्य प्रतियोगितावच्छेदकः अर्थात् शुक्तिविशेष्ये रजतत्वाभावः समवायसम्बन्धेनैव न तु अन्यतरकेनचित् सम्बन्धेन। अतः समवायसम्बन्धेन रजतत्वाभाववच्छुक्तिविशेष्ये समवायसम्बन्धेन रजतत्वप्रकारकत्वमेव अयथार्थानुभवः।

**आरेखीयप्रस्तुतिः -**






**चित्रक्रमाँकः १०**

[220] तत्रैव

पुनः कालिकसम्बन्धेनापि अयथार्थानुभवलक्षणस्य यथार्थज्ञाने अतिव्याप्तिः दर्श्यति आचार्येण। यतोहि कालिकसम्बन्धेन 'रजते रजतत्वाभावः' इति यथार्थानुभवः।[221] अमुष्मिन् रजते समवायसम्बन्धेन रजतत्वप्रकारकज्ञानमपि यथार्थः।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः ११**

अतः अत्रापि 'तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य' सत्वात् अयथार्थानुभवलक्षणस्य अतिव्याप्तिः भवति। एतस्य निराकरणाय उपन्यासकारेण 'दैशिकसम्बन्धेन' तदभाववद्विशेष्यकत्वं कथितम् अर्थात् कश्मिंश्चित् नियतस्थाने रजतत्वाभाववद्विशेष्यकत्वमस्ति। यतोहि कालिकसम्बन्धेन सर्वं सर्वत्र वर्तते। किन्तु दैशिकसम्बन्धत्वमुक्ते सति कालिकसम्बन्धस्य निवारणं जातम्। दैशिकसम्बन्धेन कस्मिंश्चित् स्थानविशेषे रजतत्वाभाववद्विशेष्यस्य प्रसङ्गः उपस्थितो भवति न तु कालिकसम्बन्धेन कुत्रचिदपि उपलब्धः रजतत्वाभाववद्विशेष्यस्य। यद्यपि अन्यत्र कालिकसम्बन्धेन रजतत्वाभाववद्रजतविशेष्यकत्वे सति समवायसम्बन्धेन रजतत्वप्रकारकत्वं' भवितुम् अर्हति


[221] नव्यन्यायभाषाप्रदीपः - Text 18

किन्तु दैशिकसम्बन्धेन अवच्छिन्ननियतदेशविशेषे न। अस्मात् कारणादेव दैशिकसम्बन्धेन 'रजतत्वाभाववच्छुक्तिविशेष्यकत्वमपि' भणितम्।

एवम्प्रकारेण समवायसम्बन्धेन अवच्छिन्नप्रतियोगिताकस्य रजतत्वाभावस्य रजतत्वभावसमा- नाधिकरणत्वं न भवेत् अर्थात् प्रतियोगिव्यधिकरणत्वं भवेत्। पुनश्च दैशिकविशेषणता अथवा दैशिकस्वरूपसम्बन्धेन अर्थात् स्वरूपसम्बन्धतयैव तस्मिन् देशे रजतत्वाभाववच्छुक्तिकाविशेष्ये समवायसम्बन्धावच्छिन्नं रजतत्वप्रकारकत्वम् अनुभव एव अयथार्थानुभवलक्षणम्। अत्र प्रकारता समवायसम्बन्धावच्छिन्ना उक्ता। यतोहि एतस्य अनुपादाने समवायसम्बन्धेन रजतत्वाभावच्छुक्तिविशेष्ये कालिकसम्बन्धेन रजतत्वप्रकारतायाः यज्ज्ञानं भवति तत्तु यथार्थज्ञानम्। अत अस्मिन् यथार्थज्ञानेऽतिव्याप्तिवारणाय तत्सम्बन्धावच्छिन्नप्रकारकत्वम् अर्थात् समवायसम्बन्धावच्छिन्नप्रकारकत्वम् उच्यते टीकाकारेण।

इदमेव निष्कर्षरूपेण प्राप्तमयथार्थानुभवस्य निर्दुष्टलक्षणं नव्यन्यायशैल्यां प्रस्तुतमुपन्यासकारेण- 'तत्सम्बन्धावच्छिन्न-प्रतियोगिताक-प्रतियोगिव्यधिकरण - दैशिकविशेषणतासम्बन्धेन तदभावव- द्विशेष्यकत्वे सति तत्सम्बन्धेन तत्प्रकारकत्वं भ्रम- लक्षणम्' इति।

**आरेखीयप्रस्तुतिः**




अयथार्थज्ञानम् **चित्रक्रमाँकः १२**

(२-१ ६ बुद्धि-गुण लक्षणे (क) यथार्थानुभवस्य लक्षणम् )

**तर्कसंग्रहः -** यथार्थनुभवश्चतुर्विधः। प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधम्।

प्रत्यक्षानुमानोपमानशब्दभेदात्॥ ३५॥

**उपन्यासः -** 'यथार्थानुभवश्चतुर्विधः' इत्यादिना विभागोक्तिः। 'तत्करणमपि चतुर्विधम्' इत्यादिना करण-विभागोक्तिः॥ ३५॥

**हिन्द्यनुवादः –** 'यथार्थानुभव चार प्रकार का है', इस वाक्य के द्वारा यथार्थानुभव का विभाग किया गया है। 'यथार्थानुभव के करण भी चार है', इससे करण का विभाग किया गया है।

**विश्लेषणम्**

**यथार्थानुभवभेदकथनम् -** अनुभवप्रकारस्य विवेचनान्तरं यथार्थानुभवस्य भेदाः प्रदर्श्यन्ते। यथार्थानुभवस्य प्रत्यक्षज्ञानम्, अनुमितिज्ञानम्, उपमितिज्ञानं तथा शाब्दज्ञानम् इति चतुर्भेदाः वर्तन्ते। एतेषां ज्ञानानां कृते चतुष्करणमपि - प्रत्यक्षम्, अनुमानम्, उपमानं शब्दश्च। एतान्येव एव प्रमाणानि कथ्यन्ते यतोहि तर्कदीपिकायां **'प्रमायाः करणं प्रमाणम्'** इति प्रमाणसामान्यस्य लक्षणं प्रस्तुतम्।[222] अतः तर्कसंग्रहे उपन्यासे च 'तत्करणम्' इत्यस्य तात्पर्यं प्रमाकरणम् अर्थात् ज्ञानस्य साधनम् एव बोध्यम्। साम्प्रतम् इत एव न्याय-वैशेषिकदर्शनस्य प्रमाणमीमांसा आरभते तर्कसंग्रहग्रन्थे।

( २.१६ बुद्धि-विवरणे यथार्थानुभव-प्रकरणे करण-कार्य-कारणानां लक्षणानि )

**तर्कसंग्रहः -** असाधारणं कारणं करणम्।

**उपन्यासः -** करणं लक्ष्यम्। करणत्वं लक्ष्यताऽवच्छेदकम्। 'व्यापारवत्त्वे सत्यसाधारण-कारणत्वं' लक्षणम्।अस्ति चेदं लक्षणम् - (अ) प्रत्यक्ष-ज्ञान-करणे इन्द्रियार्थ-संयोगो व्यापारः, तादृश-व्यापारवत्वे सति 'अयं घट' इत्याकारक-ज्ञानं प्रत्यसाधारणत्वमिन्द्रियादावस्ति, इति लक्षण-समन्वयः।एवं ( आ) 'पर्वतो वह्निमान्' इत्याकारकानुमितिं प्रति 'वह्नि-व्याप्य-धूमवान् पर्वत' इत्याकारक-व्यापारवत्त्वे सत्यसाधारण-कारणत्वस्य व्याप्ति-ज्ञाने सत्त्वात्।(इ) 'गवयो गवय-पद-वाच्य' इत्याकारकोपमितिं प्रत्यतिदेश-वाक्यार्थ-स्मरण-रूप-व्यापारवत्त्वे सत्यसाधारण-कारणत्वस्य 'गो-सदृशो गवय' इति सादृश्य-ज्ञाने सत्त्वात्। (ई)

[222] तर्कदीपिका - यथार्थानुभवविभागप्रकरणम्

'गवानयनानुकूल-कृतिमान्' इत्याकारक-शाब्द-बोधं प्रति पद-जन्य-पदार्थोपस्थिति-रूप-व्यापारवत्त्वे सत्यसाधारण-कारणत्वस्य पद-ज्ञानेऽपि सत्त्वात्।

अत्र 'व्यापारवत्त्व-'मात्रोक्तौ घटेऽतिव्याप्तिः, अतः 'असाधारण-'इत्यादि प्रत्यक्ष-ज्ञानं प्रति विषयस्य साधारण-कारणत्वेनासाधारण-कारणत्वाभावान्नातिव्याप्तिः, तस्यानुमित्यादि-साधारणत्वादिति बोध्यम् । अत्र 'असाधारण-' पदानुपादाने कालेऽतिव्याप्तिः, अतस्तदुपादानम् ॥

व्यापारो लक्ष्यः। व्यापरत्वं लक्ष्यताऽवच्छेदकम्। 'तज्जन्यत्वे सति तज्जन्यजनकत्वं' लक्षणम्। अस्ति चेदं लक्षणम् – (अ) व्यापार-सामान्ये जन्ये इन्द्रियजन्यत्वे सतीन्द्रिय जन्यम् 'अयं घट' इत्याकारकज्ञानम्, तज्जनकत्वस्य चेन्द्रियार्थसन्निकर्षे सत्त्वात्,(आ) व्याप्ति-ज्ञान-जन्यत्वे सति व्याप्ति-ज्ञान-जन्य-'पर्वतो वह्निमान्-' इत्याकारकानुमिति-जनकत्वस्य 'वह्नि-व्याप्य-धूमवान्' इत्याकारक-परामर्शे व्यापारे सत्त्वात्, (इ) सादृश्य- ज्ञान-जन्यत्वे सति सादृश्य-ज्ञान-जन्य-'गवयो गवय-पद-वाच्य'-इत्याकारक-ज्ञान-जनकत्वस्यातिदेश-वाक्यार्थ- स्मरण-रूप-व्यापारे सत्त्वात्, (ई) पद-ज्ञान-जन्यत्वे सति पद-ज्ञान -जन्य-शाब्द-बोधात्मक-ज्ञान-जनकत्वस्य पद-जन्य-पदार्थोपस्थिति-रूप-व्यापारेऽपि सत्त्वाल्लक्षण-समन्वयः।

'तज्जन्यत्व-' मात्रोक्तौ 'अयं घट' इत्याकारक-ज्ञानेऽतिव्याप्तिः, इन्द्रियजन्यत्वस्य तत्र सत्त्वात्, अतः 'तज्जन्य-जनकत्वम्' इत्युक्तम्। तावन्मात्रोक्तौ इन्द्रियेऽतिव्याप्तिः, इन्द्रिय-जन्य-ज्ञान-जनकत्वस्य तत्र सत्त्वात्,अतः 'तज्जन्यत्वे सति [तज्जन्यजन्यत्वे सति][223]' इत्युक्तम् ॥

**हिन्द्यनुवादः -** करण लक्ष्य है। करणत्व लक्ष्यता-अवच्छेदक है। जो 'असाधारण कारण व्यापार वाला होता है' उसे ही करण कहते है। करण के इस लक्षण का 'प्रत्यक्षादि ज्ञान' इस लक्ष्य में लक्षण-समन्वय इस प्रकार है – (अ) 'अयं घटः' इस प्रत्यक्ष ज्ञान में 'इन्द्रियार्थ संयोग' व्यापार है तथा 'इन्द्रिय' असाधारण कारण है। (आ) 'पर्वतो वह्निमान्' इस अनुमिति ज्ञान में 'वह्नि व्याप्य धूमवान् पर्वत' व्यापार है तथा 'व्याप्तिज्ञान' असाधारण कारण है। (इ) 'गवयो गवय-पद-वाच्यः' इस उपमिति ज्ञान में 'अतिदेश वाक्यार्थ स्मरण' व्यापार है तथा 'गो सदृश गवय' यह 'सादृश्यज्ञान' असाधारण कारण है। (ई) 'गवानयनानुकूल कृतिमान्' इस

223 मूलग्रन्थे 'तज्जन्य-जन्यत्वे सति' उक्तम्। किन्तु अत्र 'तज्जयन्त्वे सति' भवेत् लक्षणदृष्ट्या न तु 'तज्जन्य-जन्यत्वे सति'। यतोहि व्यापारलक्षणे आचार्येण 'तज्जयन्त्वे सति' इत्येवोक्तम्।

शाब्दबोध के प्रति ‘पद- जन्य पदार्थोपस्थिति’ व्यापार है तथा ‘पदज्ञान’ असाधारण कारण है।

करण के लक्षण में ‘व्यापारवत्त्व’ मात्र कहने पर घट (विषय) में अतिव्याप्ति होने के कारण ‘असाधारणकारणत्व’ भी कहा गया। क्योंकि ज्ञान के विषय (घटादि) का प्रत्यक्ष,अनुमिति इत्यादि ज्ञानों में साधारण कारणतया उपस्थित होने से, किन्तु इनमें असाधारणकारणत्व का अभाव होने से अतिव्याप्ति का निवारण हो जाता है। इसी प्रकार लक्षण में ‘असाधारण’ पद न देने पर काल में अतिव्याप्ति हो जाती अतः इसका उपादान किया गया।

व्यापार लक्ष्य है। व्यापारत्व लक्ष्यता-अवच्छेदक है। “कर्ता या करण (तत्) से उत्पन्न होते हुए जो, कर्ता या करण से ही जन्य कार्य का जनक हो”, उसे व्यापार कहते है। अब ‘प्रत्यक्षादि प्रमा’ के करण मे प्रयुक्त ‘व्यापार’ इस लक्ष्य में व्यापारलक्षण की संगति इस प्रकार है - (अ) इन्द्रिय (करण) से उत्पन्न होने वाला ‘इन्द्रियार्थ सन्निकर्ष’, ‘इन्द्रिय’ (करण) से जन्य ‘अयं घटः’ इत्याकारक प्रत्यक्षज्ञान का जनक होने से व्यापार है। (आ) व्याप्तिज्ञान(करण) से जन्य होने वाला ‘वह्नि व्याप्य धूमवान् पर्वत’ यह ‘लिङ्गपरामर्श’, व्याप्तिज्ञान (करण) से ही जन्य ‘पर्वतो वह्निमान्’ इत्याकारक अनुमितिज्ञान का जनक होने से व्यापार है। (इ) सादृश्यज्ञान(करण) से जन्य होने वाला ‘अतिदेश-वाक्यार्थ-स्मरण’, सादृश्यज्ञान (करण) से ही जन्य ‘गवयो गवय-पद-वाच्य’ इस उपमिति ज्ञान का जनक होने से व्यापार है। (ई) पदज्ञान (करण) से उत्पन्न होते हुए ‘पद-जन्य पदार्थोपस्थिति’, पदज्ञान(करण) से ही उत्पन्न ‘गवानयनानुकूल कृतिमान्’ इस शाब्दबोध का जनक होने से व्यापार है।


व्यापार के लक्षण में ‘तज्जन्यत्व’ मात्र कहने से ‘अयं घटः’ इस ज्ञान में अतिव्याप्ति हो जाएगी, क्योंकि यह भी ‘इन्द्रियजन्य’ है अतः ‘तज्जन्य-जनकत्व’ भी कहा गया। ‘तज्जन्य-जनकत्व’ मात्र कहने पर इन्द्रिय में अतिव्याप्ति हो जाती क्योंकि ‘इन्द्रिय से जन्य ज्ञान का जनकत्व’ इन्द्रिय में होने से। इसीलिए ‘तज्जन्यत्वे सति’ का अभिधान किया गया है।

## विश्लेषणम्

**करणलक्षणम् -** यथार्थानुभवस्य साधनप्रसङ्गे ‘करणम्’ इति नवीनपदं प्रयुक्तम् अन्नम्भट्टेन। अतः अस्य अर्थज्ञानाय प्रमाणवर्णनात् पूर्वं करणविवेचनं आवश्यकम्। कस्मिंश्चिदपि कार्यस्य

उत्पत्तौ यदसाधारणं कारणं भवति तदेव करणमुच्यते तर्कसंग्रहग्रन्थे।[224] न साधारणम् इति असाधारणम् अर्थात् विशिष्टकारणमेव असाधारणं कारणम्। अत्र उल्लेखनीयमस्ति यत् असाधारणकारणस्य इव कार्यस्य साधारणकारणमपि विद्यते। ईश्वर-ईश्वरज्ञान-ईश्वरेच्छा-ईश्वरप्रयत्न-प्रागभाव-काल-दिग्-अदृष्टश्च अष्टसंख्यकानि साधारणकारणानि सन्ति। कार्यसामान्यं प्रति साधारणकारणानि भवन्ति अर्थात् जगतः सकलकार्यं प्रति एतेषां कारणता सर्वदैव वर्तते अतो हेतोः न्यायबोधिन्यां **कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वम्** इति साधारणकारणस्य लक्षणं दत्तम्।[225] अर्थात् कार्यमात्रं प्रति ईश्वरादीनि कारणानि। कार्ये तस्य प्राकृतिकधर्मः कार्यत्वं तथा आहृतधर्मः कार्यता वर्तते। अतः कार्यत्वावच्छिन्नकार्यतया निरूपितकारणता यस्मिन् कारणे विद्यते तत्तु साधारणं कारणम्। किन्तु तत्तत्कार्यविशेषं प्रति विशेषकारणान्येव असाधारणकारणानि अर्थात् असाधारणकारणेषु सकलकार्यं प्रति न कारणत्वम् अपितु कस्मिंश्चित् विशेषकार्ये। अतः अस्य कारणता कार्यत्वभिन्नविशेषधर्मावच्छिन्नकार्यतया निरूपिता भवति – **कार्यत्वातिरिक्तधर्मा-वच्छिन्नकार्यता निरूपितकारणताशालित्वम् इति।**[226] अथ च घटं प्रति ईश्वरादीनि साधारणकारणानि तथा दण्डचक्रकुलालादीनि असाधारणकारणानि भवन्ति।

**आरेखीयप्रस्तुतिः –**




[224] असाधारणं कारणं करणम् – तर्कसंग्रहः, करणलक्षणम्

[225] न्यायबोधिनी - करणलक्षणप्रकरणम्

[226] तत्रैव

**चित्रक्रमाँकः १३**

उपन्यासटीकायां तु एतादृशेषु असाधारणकारणेष्वेव यत्कारणं व्यापारवत् भवति तदेव करणम् उपात्तम् - **'व्यापारवत्त्वे सत्यसाधारणकारणत्वं'** करणस्य लक्षणम्। व्यापारपदम् अग्रे लक्षयिष्यते आचार्येण अतः तत्रैव अस्य विश्लेषणं करिष्यते, पुनरुक्तिकारणात् न अत्र। व्यापारयुक्तासाधारणकारणस्य आशयः कार्योत्पत्तौ कारणेषु 'सर्वथाविशिष्टं कारणं' वर्तते अर्थात् येन कारणेन विना कार्यस्य उत्पत्तिरेव न संभवति तत्तु व्यापारवदसाधारणकारणम् अर्थात् करणम्। यतोहि असाधारणकारणानि तु अनेकानि अतः तेषु येन कारणेन सद्यः कार्यप्राप्तिः जायते तदेव करणमुच्यते न्यायवैशेषिके।

**करणलक्षणस्य चतसृषु प्रमासु अनुप्रयोगः -** साम्प्रतम् उपन्यासकारेण अस्य करणलक्षणस्य संगतिः चतसुषु प्रमासु अनुषज्यते। सर्वप्रथमं प्रत्यक्षज्ञाने व्यापारवदसाधारणकारणस्य उपस्थितिः प्रदर्शिता। 'अयं घटः' इत्यस्मिन् प्रत्यक्षज्ञाने व्यापारः इन्द्रियार्थसंयोगः (इन्द्रियजन्यत्वे सति इन्द्रियजन्यस्य प्रत्यक्षज्ञानस्य जनकत्वात्) तथा असाधारणकारणम् इन्द्रियादिः वर्तते। तदनु 'पर्वतो वह्निमान्' इत्यनुमितिज्ञाने व्यापारः 'वह्निव्याप्यधूमवान् पर्वत्' इति परामर्शः (व्याप्तिज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्यानुमितिज्ञानस्य जनकत्वात् ) तथा असाधारणकारणं 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इति व्याप्तिज्ञानमस्ति। अतः परं 'गवयो गवय-पद-वाच्यम्' अस्मिन् उपमितिज्ञाने अतिदेशवाक्यार्थस्मरणं व्यापारः (सादृश्यज्ञानजन्यत्वे सति सादृश्यज्ञानजन्योपमितिज्ञानस्य जनकत्वात्) सादृश्यज्ञानञ्च असाधारणं कारणं वर्तते। चतुर्थयथार्थज्ञाने अर्थात् 'गवानयनानुकूलकृतिमान्' इति शाब्दज्ञाने आचार्येण व्यापारः पदजन्यपदार्थोपस्थितिः (पदज्ञानजन्यत्वे सति पदज्ञानजन्यशाब्दज्ञानस्य जनकत्वात्) एवञ्च असाधारणकारणं पदज्ञानम् उल्लिख्यते। कारिकावल्यामपि शाब्दबोधे पदजन्यपदार्थस्मरणपूर्वकं पदज्ञानमेव करणम् उच्यते।

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**


**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।**[227]

अत्र द्वारस्य अर्थः व्यापार एव तथा पदार्थधीः इत्यस्य तात्पर्यं पदज्ञानजन्यपदार्थस्य धीः अर्थात् स्मृतिज्ञानम्। अतः पदज्ञानजन्यपदार्थज्ञानविषयकस्मरणयुतं पदज्ञानं शाब्दबोधे फले

[227] कारिकावली - ८१

वा करणम् अस्ति। अनेन प्रकारेण उपन्यासाचार्येण करणस्य लक्षणेन सह तस्य चतुर्विधज्ञाने उपस्थितिरपि संसूच्यते।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः १४**

करणलक्षणे यदि 'व्यापारवत्त्वं' मात्रोच्यते तर्हि घटेऽतिव्याप्तिः यतोहि प्रत्यक्षज्ञाने घटोऽपि व्यापारेण युक्तः भवति। प्रत्यक्षज्ञाने 'इन्द्रियार्थसंयोगः' इत्यस्मिन् व्यापारे इन्द्रियातिरिक्तं घटः अर्थो वा अपि एतेन व्यापारेण सह सम्बद्धः भवति। तथा च 'घटः' प्रत्यक्षज्ञानं प्रति साधारणकारणं स्वीक्रियते यतोहि स्वस्य ज्ञानं प्रति विषयस्य (घटस्य) साधारणकारणत्वात्। अतः एतस्मिन्नपि करणलक्षणस्य अतिव्याप्तिः जायते। अमुष्मै अतिव्याप्तिदोषवर्जनाय एव लक्षणे 'असाधारणकारणत्वम्' उक्तम्। घटे (विषये) असाधारणकारणत्वाभात् न अतिव्याप्तिः। एवम्प्रकारेणैव अनुमितिज्ञानादावपि विषयस्य असाधारणकारणत्वाभावात् करणत्वं न स्वीकरणीयम्। लक्षणे असाधारणपदस्य अनुपादाने 'व्यापारवत्वे सति कारणत्वम्' इति लक्षणम् भवति। किन्तु सर्वाधारप्रयोजकसम्बन्धेन कालो अपि व्यापारवत्कारणमस्ति अतः कालेऽतिव्याप्तिः। अत्रातिव्याप्तिनिराकरणाय लक्षणे 'असाधारणपदम्' उक्तम्। कालः असाधारणकारणं न अपितु साधारणकारणम्, अतः न तत्रातिव्याप्तिः।

**व्यापारलक्षणम् -** सम्प्रति व्यापारस्य लक्षणं प्रस्तुतम् उपन्यासकारेण – **'तज्जन्यत्वे सति**

**तज्जन्यजनकत्वं'** लक्षणम्। अत्र 'तत्'पदस्य अर्थः कारणं गृह्यते। इदानीम् अस्य अर्थः भवति, यः स्वयं कारणाज्जन्यो अस्ति तथा कारणादेव जन्यस्य अन्यकार्यस्य जनको अपि अस्ति स व्यापारः कथ्यते। यथा चक्रभ्रमणः चक्राज्जन्यः तथा चक्रादेव जन्यस्य अन्यकार्यस्य अर्थात् घटस्य जनको अपि। यतोहि चक्रस्य भ्रमणं विना घटं निर्मातुं न शक्यते। अतः चक्रभ्रमणः व्यापार इति। एतेन व्यापारयुतमेव चक्रं घटस्य असाधारणकारणम् अर्थात् करणं भवति। चक्रस्य इव भ्रमणव्यापारो अपि कारणं न भवेदतः उपन्यासकारेण 'व्यापारवत्' इति असाधरणकारणस्य विशेषणं प्रयुक्तम्। कार्यस्य कृते व्यापारः अनिवार्ये सत्यपि कारणं न अपितु व्यापार एव।

आचार्येण व्यापारलक्षणस्य समन्वयः चतुर्विधज्ञानकरणस्य व्यापारे कृतः। 'अयं घटः' 'इत्याकारकप्रत्यक्षज्ञाने' कार्ये वा व्यापारः इन्द्रियार्थसंयोगः तथा इन्द्रियम् असाधारणकारणम् उक्तं पूर्वम्। इन्द्रियजन्यः इन्द्रियार्थसंयोगः वर्तते तथा अयमेव इन्द्रियार्थसन्निकर्षः इन्द्रियजन्यस्य घटप्रत्यक्षस्य जनको अपि अस्ति। अतः 'अयं घटः' प्रत्यक्षज्ञाने इन्द्रियार्थसंयोग एव व्यापारः। 'पर्वतो वह्निमान्' इत्यस्मिन् अनुमितिज्ञाने 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इति व्याप्तिज्ञानाज्जन्यः 'वह्निव्याप्यधूमवान् पर्वतः' परामर्शः तथा अयमेव परामर्शः व्याप्तिज्ञानाज्जन्यस्य 'पर्वतो वह्निमान्' अनुमितिज्ञानस्य जनकः। अतः अनुमितिज्ञाने परामर्श एव व्यापारः इति व्यापारलक्षणसंगतिः। 'गवयो गवयपदवाच्यः' इत्याकारकोपमितिज्ञाने 'गो सदृशो गवय' इति सादृश्यज्ञानजन्यत्वे सति, सादृश्यज्ञानजन्यस्य 'गवयो गवयपदवाच्यः' इत्युपमितिज्ञानस्य जनकोऽतिदेशवाक्यार्थस्मरणमेव व्यापारः वर्तते। 'गवानयनानुकूलकृतिमान्' इति शाब्दबोधं प्रति पदज्ञानजन्यत्वे सति पदज्ञानजन्यशाब्दबोधस्य जनकत्वात् पदजन्यपदार्थोपस्थितिः व्यापार अस्ति शाब्दबोधे। एवम्प्रकारेण चतुष्प्रमाकरणेषु व्यापारलक्षणम् अनुप्रयुज्य व्यापारस्योपस्थितिः प्रदर्शिता आचार्येण।

उपन्यासकारेण व्यापारलक्षणस्य परीक्षा अपि कृता। 'तज्जन्यत्वे सति तज्जन्यजनकत्वम्' अस्मिन् व्यापारलक्षणे यदि 'तज्जन्यत्व'-मात्रस्य ग्रहणं क्रियते तर्हि कारणात् यः उत्पन्नः भवति स एव व्यापारः कथ्यते। एतादृशावस्थावायाम् 'अयं घटः' इत्याकारकज्ञाने अतिव्याप्तिः भविष्यति यतोहि ज्ञानमिदमपि इन्द्रियादिकारणैः उत्पन्नत्वात् 'व्यापारः' भवितुं

शक्यते। अतः तज्जन्य-जनकत्वमपि उक्तम्। 'अयं घटः' ज्ञानेऽस्मिन् इन्द्रियजन्यस्य जनकत्वाभावसत्वात् न अतिव्याप्तिः। तथा लक्षणे 'तज्जन्य-जनकत्वं' मात्रकथने इन्द्रियेऽतिव्याप्तिः, अत्रापि इन्द्रियजन्यज्ञानस्य जनकत्वात्। अतो हेतोः 'तज्जन्यत्वे सत्यपि' उपादीयते लक्षणे। एवम्प्रकारेण परीक्षणसाफल्यादेव निर्दुष्टत्वं सूच्यते व्यापारलक्षणस्य।

**तर्कसंग्रहः -** कार्यनियतपूर्ववृत्तिकारणम्।

**उपन्यासः -** कारणं लक्ष्यम्, कारणत्वं लक्ष्यताऽवच्छेदकम्। 'कार्य-नियत-पूर्व-वृत्तित्वं' लक्षणम्। अत्र 'कार्य-पूर्व-वृत्तित्व-'मात्रोक्तौ रासभादावतिव्याप्तिः, अतो 'नियत' इत्युक्तम्। 'नियतत्व-'मात्रोक्तौ गगनादावतिव्याप्तिः, अतः 'पूर्व-वृत्तित्वम्' उक्तम्। 'पूर्व-वृत्तित्व-'मात्रोक्तौ दण्ड-रूपादावतिव्याप्तिः, अतो 'नियत-पूर्व-वृत्तित्वम्'[अनन्यथासिद्धम्][228] इति विशिष्टमुपात्तम्, 'नियतत्वं' च कार्यताऽवच्छेदक-सम्बन्धावछिन्न-कार्यताऽवच्छेदकावच्छिन्न-कार्याधिकरण-वृत्ति।

कारणताऽवच्छेदक-सम्बन्धावच्छिन्न-प्रतियोगिताऽवच्छेदकावच्छिन्न-प्रतियोगिताको योऽभावः, तादृशाभाव-प्रतियोगिताऽनवच्छेदक-धर्मवत्त्वरूप-नियम-घटित-कारणत्वं कारणसामान्यलक्षणम्

अस्ति चेदं लक्षणम् - घटनिष्ठकार्यतानिरूपित-दण्डनिष्ठकारणतायां कार्यता[कारणता][229]ऽवच्छेदकीभूत- समवायसम्बन्धावच्छिन्न- कार्यताऽवच्छेदकीभूतघटत्वावच्छिन्न-घटाधिकरणकपाल- निष्ठोयोऽभावः – नहि कारणताऽवच्छेदकीभूत-स्व-सयुंक्त-चक्र-भ्रमिता-सम्बन्धावच्छिन्नकारणताऽवच्छे- दकीभूत- दण्डत्वावच्छिन्नाभावः, अपितु घटाभावः[पटाभावः][230], तस्य प्रतियोगिताऽवच्छेदकं = घटत्वम्, अनवच्छेदको यो धर्मो =

---

228 अन्यपाण्डुलिपिप्रतीषु 'अनन्यथासिद्धमपि' प्रयुक्तमत्र। - (शास्त्रिवर्येण उपन्यासटीकायाः कृतपाठभेदः पृ० ३५) किन्तु पाठभेदेऽस्मिन् अस्य पदस्य उल्लेखः न कृतः। अतः अर्थसौविध्यानुसारं अनन्यथासिद्धपदस्यापि कारणलक्षणस्य अर्थनिर्धारणे प्रयोगः कर्तुं शक्यते।

229 अत्र कार्यतावच्छेदकः आसीत् किन्तु कारणलक्षणदृष्ट्या कारणतावच्छेदकः भवेत्। यतोहि कारणलक्षणेऽपि 'कारणतावच्छेदकः' एव उक्तः उपन्यासकारेण। अतः अत्र 'कारणतावच्छेदकः' इति संसोधितरूपम्।

230 अत्र पटाभावः उक्तं मूलपुस्तके किन्तु तत्रैव उदाहरणस्य आरम्भे 'घटकार्यम्' इत्युच्यते। अतः कार्याभावः घटस्यैव भविष्यति न तु पटस्य। संभवतः संपादनत्रुटिवशात् अत्र 'पटाभावः' उक्तः। अत एव अर्थसम्बद्धदृष्ट्या अत्र 'घटाभावः' कृतं मया।

दण्डत्वम्, तद्वत्त्वे सति कारणत्वस्य दण्डे सत्त्वाल्लक्षण-समन्वयः।

अनवच्छेदक-धर्मवत्त्व-मात्रोक्तौ गगनेऽतिव्याप्तिः, अतः 'कारणत्वम्' उक्तम्। 'कारणत्व-' मात्रोक्तौ लक्षण-लक्ष्यताऽवच्छेदकयोरैक्य-प्रसङ्गः, अतो विशिष्टमुपात्तम्॥

**हिन्द्यनुवादः -** कारण लक्ष्य है। कारणत्व लक्ष्यता-अवच्छेदक है। 'कार्य (की उत्पत्ति) से निश्चित पूर्ववृत्ति वाले पदार्थ' को कारण कहते है। लक्षण में 'कार्य-पूर्ववृत्तित्व' मात्र कहने पर गर्दभादि अन्य कारणों में अतिव्याप्ति होने से 'नियत' पद का उपादान किया गया है। इसी प्रकार 'नियतत्व' मात्र का ग्रहण करने पर गगनादि में (इनके नित्य होने से कार्य से पूर्व इनकी भी उपस्थिति निश्चित होने से) अतिव्याप्ति के निवारण हेतु 'पूर्ववृत्तित्व' कहा गया। लक्षण में 'पूर्ववृत्तित्व' मात्र कहने पर दण्ड के रूपादि मे भी अतिव्याप्ति होती। अतः '(अनन्यथासिद्ध) नियत-पूर्ववृत्तित्व' को उच्चरित किया गया।

नियत का लक्षण – कार्यतावच्छेदक सम्बन्ध से अवच्छिन्न तथा कार्यता के अवच्छेदक से अवच्छिन्न जो कार्य है, उस कार्य के अधिकरण अर्थात् कारण में जो रहता है, उसे ही नियत कहते है।

कारणलक्षण - कारणता के अवच्छेदक सम्बन्ध से अवच्छिन्न होने वाली प्रतियोगिता, तथा उस प्रतियोगिता के अवच्छेदक से अवच्छिन्न प्रतियोगिता वाला जो अभाव (कार्य का अभाव) है। वह अभाव प्रतियोगिता के अनवच्छेदक धर्म 'कारणत्व' से अनवच्छिन्न है (क्योंकि वह प्रतियोगिता के अवच्छेदक धर्म कार्यत्व से अवच्छिन्न है)। अतः इस प्रकार के अभाव का निश्चित रूप से प्रतियोगिता अनवच्छेदक धर्म वाला होना ही कारण का लक्षण है।

अब इस लक्षण का समन्वय निम्न उदाहरण पर किया गया है – घट का कार्यरूप भाव होने पर उसमें रहने वाली कार्यता से निरूपित दण्डनिष्ठ कारणता में, कार्यता के अवच्छेदक समवाय सम्बन्ध से अवच्छिन्न तथा कार्यता के अवच्छेद धर्म घटत्व से अवच्छिन्न होने वाला घटकार्य है। तथा इस प्रकार के घटरूप कार्य का ही अभाव (प्रागभाव) घट के अधिकरण कपाल ( क्योंकि घट के निर्माण में दण्ड के ही समान कपाल,चक्र भ्रमण आदि भी कारण है ) में है। यह अभाव कारणता के अवच्छेदक कपालसंयुक्तचक्रभ्रमिता सम्बन्ध से अवच्छिन्न तथा कारणता के अवच्छेदक धर्म दण्डत्वादि (कारणत्व) से अवच्छिन्न नहीं है अर्थात् यह अभाव प्रतियोगिता के अनवच्छेदक धर्म 'कारणत्व' से अनवच्छिन्न है जैसा कि कारण लक्षण में कहा

गया है। यह अभाव दण्डत्व (कारणत्व) से अवच्छिन्न न होकर पटत्व (कार्यत्व) से अवच्छिन्न है क्योंकि दण्ड में पटाभाव है अर्थात् कारण में कार्य का अभाव है। अतः पटाभाव की प्रतियोगिता का अवच्छेदक पटत्व है तथा अनवच्छेदक दण्डत्व है। इस प्रकार 'दण्ड में अथवा कारण में कार्याभाव का अनवच्छेदक धर्म वाला होने पर कारणत्व का होना' ही लक्षण समन्वय है।

लक्षण मे 'अनवच्छेदक धर्म वाला' मात्र कहने पर गगन में अतिव्याप्ति हो जाती अतः कारणत्व भी कहा गया तथा 'कारणत्व' मात्र ग्रहण करने पर लक्षण तथा लक्ष्यता अवच्छेदक एक हो जाते इसी कारण से कार्याभाव के अनवच्छेदक धर्म से युक्त कारणत्वविशिष्ट कहा गया।

## विश्लेषणम्

**कारणलक्षणम् -** 'प्रमाकरणं प्रमाणम्' अस्य निरूपणार्थं करणलक्षणं प्रतिपादितम्। अमुष्य लक्षणे कारणपदप्रयुक्तम् अतः करणमवगन्तुम् कारणस्वरूपस्य ज्ञानम् आवश्यकं भवति। अतो हेतोः सम्प्रति उपन्यासकारः कारणलक्षणम् अददात् – **कार्यनियतपूर्ववृत्तित्वं लक्षणम्।** अर्थात् यस्मिन् क्षणे कार्यमुत्पद्यते तत्क्षणात् पूर्वकाले एव यस्य निश्चितेन वृत्तिः स्थितिर्वा भवति तदेव कारणम् इति। यदि अत्र 'नियत'पदस्य उच्चारणं न क्रियते तर्हि गर्दभादिषु अन्यकारणेषु अतिव्याप्तिः यतोहि मृत्तिकानयनाय तेषामपि वृत्तिः घटकार्यस्य पूर्वं भवितुं शक्यते। अतः 'नियतपदम्' उक्तम्। गर्दभादेः उपस्थितिः कार्यपूर्वे नियता अथवा निश्चिता न अस्ति अर्थात् गर्दभस्य उपस्थितिः तत्र भवितुं शक्यते न वा। अतः अत्र नियतत्वाभावान्नातिव्याप्तिः। यदि नियतत्वं कारणलक्षणम् उच्यते तर्हि गगनादिनियतपदार्थेषु अपि अतिव्याप्तिः, यतोहि गगनादिरपि नियतः। अतो हेतोः पूर्ववृत्तित्वमपि उक्तम्। गगनादिनियतपदार्थानां कार्यपूर्ववृत्तिमात्रं न अपितु परवृत्तिरपि। अतः न ते कारणानि भवितुं शक्नुवन्ति।

अन्यटीकासु पूर्ववृत्तित्वपदेन कार्येऽतिव्याप्तिः निराकृता।[231] लक्षणे पूर्ववृत्तित्वमात्रमुक्ते सति दण्डरूप-दण्डजात्यादौ अतिव्याप्तिः भवति। अतः नियतपूर्ववृत्तित्वम् उच्यते। यद्यपि शिवनारायणशास्त्रिमहोदयेन उक्तं यत् अत्र उपन्यासटीकायाः अन्यपाण्डुलिपिषु 'अनन्यथासिद्धकार्यनियतपूर्ववृत्तित्वम्' इत्यस्ति। दण्डरूपादौ अतिव्याप्तिनिवारणाय

---

231 पदकृत्यं न्यायबोधिनी च - कारणलक्षणप्रकरणम्


'अनन्यथासिद्धः' इति पदमेव योग्यं यतोहि नियतपूर्ववृत्तित्वं तु दण्डरूपादेरपि दण्डेऽस्ति। किन्तु एते कार्यं प्रति अनन्यथासिद्धाः न अपितु अन्यथासिद्धाः। न अन्यथासिद्धत्वम् इति अनन्यथासिद्धत्वम्। कार्यस्य उत्पत्तौ यानि कारणानि अनावश्यकानि वर्तन्ते तानि तु अन्यथासिद्धकारणानि कथ्यन्ते।[232] घटकार्ये दण्डं तु आवश्यकं न तु दण्डरूपादिः। अतः दण्डम् अनन्यथासिद्धकारणं तथा दण्डरूपादिकम् अन्यथासिद्धकारणम्। लक्षणे अनन्यथासिद्धपदप्रयोगेन दण्डरूपादौ अनन्यथासिद्धाभावान्नातिव्याप्तिः। अतः अनन्यथासिद्धकार्यनियतपूर्ववृत्तित्वं कारणलक्षणम् इति सिद्धम्। अतः परम् अस्मिन् लक्षणे प्रयुक्तनियतपदस्य परिभाषा दीयते आचार्येण – '**नियतत्वं च कार्यतावच्छेदकसम्बन्धावच्छिन्न-कार्यतावच्छेदकावच्छिन्न-कार्याधिकरणवृत्ति**'। येन सम्बन्धेन कार्यं स्वाधिकरणे विद्यते सः सम्बन्धः कार्यतावच्छेदकसम्बन्धः एवञ्च कार्यस्य प्राकृतिकधर्मः कार्यतावच्छेदकः कथ्यते। एवम्प्रकारेण कार्यतावच्छेदकसम्बन्धावच्छिन्नं तथा कार्यतावच्छेदकावच्छिन्नं यत्कार्यं वर्तते। तस्य कार्यस्याधिकरणे अर्थात् कारणे कार्यातिरिक्तं यस्य वृत्तिर्भवति तत्तु नियतमिति।

उपन्यासकारेण इदं कारणलक्षणं पुनः नव्यन्यायशैल्यामपि प्रस्तूयते। निम्नलक्षणे प्राधान्यतया 'कारणे कार्याभावः' अर्थात् 'कार्यस्य प्रागभावः' इत्यस्यैव प्रतिष्ठापनं कृतम्। अतः अस्य माध्यमेनैव न्यायवैशेषिकस्य असत्कार्यवादसिद्धान्तो अपि प्रस्तुतः उपन्यासाचार्येण। जगति सर्वकार्याणां किमपि कारणं भवति। अत्र कारणे समवाय्यसमवायिनिमित्तञ्च कारणत्रयम् अपेक्षितम्। कारणं केनचित् सम्बन्धेनैव कार्यम् उत्पादयति यथा पटरूपकार्योत्पत्तिः समवायसम्बन्धेन 'तन्तवः' कुर्वन्ति। स एव सम्बन्धः कारणस्थकारणताया अवच्छेदकः भवति। न्यायवैशेषिकदर्शने कारणे कार्यस्य अभावः मन्यते। असत्कार्यम् अर्थात् 'नास्ति कार्यस्य सत्ता' इति नियमात् कारणे कार्यस्य सत्तायाः अभावः। अतः न्यायवैशेषिकाः असत्कार्यवादिनः प्रख्याताः। कारणे कार्याभावात् कार्यं प्रतियोगी तथा कारणम् अनुयोगी अस्ति। अतः अत्र कार्यनिष्ठप्रतियोगिताकः अभावः वर्तते। अयम् प्रतियोगिताकाभावः कारणतायाः अवच्छेदकसम्बन्धावच्छिन्नः तथा प्रतियोगितायाः अवच्छेदकधर्मावच्छिन्नः अर्थात् कार्यत्वाच्छिन्नः भवति। किन्तु अयमेव अभावः प्रतियोगितायाः अनवच्छेदकधर्मेण

[232] तर्कभाषा (माधुरीव्याख्यासहितः) – पृ ० २३

अर्थात् कारणत्वधर्मेण अनवच्छिन्नः भवति। अतः एतादृशाभावप्रतियोगितायाः अनवच्छेदकनियतधर्मः कारणत्वं यस्मिन् वर्तते तदेव कारणं कथ्यते उपन्यासकारमते। यथा घटरूपकार्ये दण्डचक्रमृत्तिकाकपालादीनि कारणानि सन्ति। कारणेऽस्मिन् कारणत्रयस्य स्थितिः पृथक्-पृथक्भवति किन्तु एतैः निर्मितस्य सम्बद्धरूपसामान्यकारणस्य कार्योत्पत्तिं प्रति केनचित्सम्बन्धेन कारणता वर्तते तथा कारणे कार्यस्य अभावो अपि तेनैव सम्बन्धेन भवति। अतः तत्सम्बन्धः कार्यनिष्ठप्रतियोगिताकस्य अभावस्य अवच्छेदकः अप्यस्ति। अनेन प्रकारेण कपालः समवायसम्बन्धेन घटकार्यं जनयति। अतः घटे कार्यता, कपाले कारणता तथा एतयोः अवच्छेदकः समवायसम्बन्धः विद्यते। घटभावस्य स्थितौ इयं दण्डादिनिष्ठकारणता घटनिष्ठकार्यतया निरूपिता वर्तते। (इतः मूलकारणलक्षणस्य संगतिः प्रदर्श्यते ) किन्तु अभावस्य स्थितौ घटस्य अधिकरणे अर्थात् अस्यां दण्डकपालादिनिष्ठकारणतायां कारणतावच्छेदकसमवायसम्बन्धावच्छिन्नः तथा कार्यतावच्छेदकघटत्वधर्मावच्छिन्नः यो प्रतियोगिताकः अभावः (घटस्य प्रागभावः) वर्तते। स अभावः कारणतायाः अवच्छेदक-कपाल(स्व)-संयुक्तचक्र- भ्रमितासम्बन्धावच्छिन्नः (समवायसम्बन्धेतर सम्बन्धः) तथा कारणतावच्छेदकदण्डत्वादिधर्मावच्छिन्नः न अस्ति। अपितु प्रतियोगितावच्छेदकघटत्वधर्मावच्छिन्नः अभावः वर्तते। अतः घटप्रतियोगिताकस्य अभावस्य अवच्छेदकं घटत्वं तथा अनवच्छेदकं दण्डत्वं वर्तते। यतोहि कारणे (दण्डे) कार्यं (घटः) न विद्यते अत एव दण्डत्वं घटनिष्ठप्रतियोगिताकाभावस्य अनवच्छेदकमस्ति। एवम्प्रकारेण दण्डे/दण्डकपालादौ प्रतियोगिताकाभावानवच्छेदकधर्मदण्डत्ववत्त्वे सति कारणत्वमपि विद्यते अतः अत्र कारणलक्षणसमन्वयः।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः १५**

यदि ‘अनवच्छेदकधर्मवत्त्वं’ मात्रकारणस्य लक्षणम् उच्यते तर्हि गगनेऽतिव्याप्तिर्जायिते यतोहि गगनस्यापि किमपि अवच्छेदकं नास्ति अर्थात् गगनम् अनवच्छेदकधर्मयुतमेव वर्तते। अतः गगनेऽतिव्याप्तिवारणाय ‘कारणत्वमपि’ उक्तम्। गगने कारणत्वाभावान्नातिव्याप्तिः तथा कारणलक्षणे ‘कारणत्व’मात्रग्रहणे लक्षण-लक्ष्यतावच्छेदकयोर्मध्ये ऐक्यं जायते यतोहि अत्र कारणं लक्ष्यं तथा कारणत्वं लक्ष्यतावच्छेदकम्। अतः लक्षणमपि कारणत्वं लक्ष्यतावच्छेदकमपि कारणत्वञ्च भविष्यति। अतो हेतोः ‘अनवच्छेदकधर्मवत्त्वे सती’ति विशिष्टमुपात्तम्। अनेन प्रकारेण उपन्यासाचार्येण नव्यन्यायशैल्यन्वितं असत्कार्यवादप्रतिपादकञ्च कारणलक्षणं प्रस्तुतम्।

**तर्कसंग्रहः -** कार्यं प्रागभावप्रतियोगि।

**उपन्यासः -** कार्यं लक्ष्यम् । कार्यत्वं लक्ष्यताऽवच्छेदकम् । ‘प्रागभाव-प्रतियोगित्वं’ लक्षणम्।


अस्ति चेदं 'घट'रूपकार्ये, प्रागभाव-प्रतियोगित्वस्य तत्र सत्त्वात्।

**हिन्द्यनुवादः-** कार्य लक्ष्य है। कार्यत्व लक्ष्यतावच्छेदक है। 'प्रागभाव का प्रतियोगी होना' ही कार्य का लक्षण है। 'घट रूप कार्य' में यह लक्षण समन्वित है क्योंकि यहाँ भी प्रागभाव-प्रतियोगित्व विद्यमान है।

## विश्लेषणम्

**कार्यलक्षणम् -** कारणलक्षणे कार्यपदं प्रयुक्तम्। अतः कार्यं किम् ? इत्यकांक्षया कार्यलक्षणं दीयते - **'प्रागभावप्रतियोगित्वं'**। वस्तूत्पत्तेः प्राक् पूर्वं वा विद्यमानस्य तस्य वस्तुन अभाव एव प्रागभावः। 'इह कार्यो भविष्यती'त्याकारका या प्रतीतिः भवति। तस्याः प्रतीतेः विषय एव प्रागभावः कथ्यते व्यवहारे किन्तु सिद्धान्ते अनादिः सान्तः प्रागभाव उच्यते।[233] **यस्याभावः स प्रतियोगीत्युच्यते।** प्रतियोगी अर्थात् विरोधी अवगन्तव्यः। यस्य प्रागभावः वर्तते स एव प्रागभावस्य प्रतियोगी। यथा घटस्य प्रागभावः अतः घटः प्रागभावस्य प्रतियोगी विरोधी वा। यतोहि घटस्य उत्पत्तिकारणात् प्रागभावः समाप्तो भविष्यति। अतः घटः प्रागभावस्य प्रतियोगीति तथा अयमेवघटः कार्यमुच्यते। अनेन प्रकारेण प्रागभावस्य प्रतियोगी एव कार्यपदवाच्यमिति आशयः।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः १६**

**तर्कसंग्रहः -** कारणं त्रिविधम्। समवाय्यसमवायिनिमित्तभेदात्। यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा - तन्तवः पटस्य पटश्च स्वगत रूपादेः। कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायिकारणं यथा तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य। तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य ॥

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं, तदेव करणम्॥३६॥

---

233 तर्कसंग्रहः - प्रागभावलक्षणम्

**उपन्यासः -** 'कारणं त्रिविधम्' इति विभागोक्तिः। (१) समवायि-कारणं-लक्ष्यम्। समवायि-कारणत्वं लक्ष्यताऽवच्छेदकम्। 'समवेत-कार्य-जनकत्वं' लक्षणम्। ('यत्समवेतत्वे सति कार्यमुत्पद्यते, तत्समवायि-कारणम्। 'इतिलक्षणम्। " 'यत्कार्यमुत्पद्यते।' इत्येवास्तु, 'समवेतत्वे सति' इति किमर्थम् ?" इति चेत् ? ध्वंसेऽतिव्यातिः, अतः 'समवेत०' इति। तावन्मात्रोक्तौ सामान्येऽतिव्याप्तिः, अतः 'कार्यमुत्पद्यते।' इति। इत्थं च 'समवाय-सम्बन्धावच्छिन्न-कार्यता-निरूपित-तादात्म्य-सम्बन्धावच्छिन्न-कारणता = समवायिकारणता। 'यथा (क) तन्तव०' इति तन्तु-समवेतस्यपटस्योत्पत्तेः (ख) पटः स्वगतरुपादेः' इति 'समवायि-कारणम्' इत्यनुषज्यते।)

(२) असमवायिकारणं लक्ष्यम्। असमवायि-कारणत्वं लक्ष्यताऽवछेदकम्। 'कार्यैकार्थ-कारणैकार्थान्यतर-प्रत्यासत्त्या कार्याधिकरणे सम्बद्धं सत्कार्य-जनकत्वम्' असमवायिकारणस्य लक्षणम्। (क) पटं प्रति तन्तुः समवायिकारणम्, स्वस्मिन्समवेत-कार्य-जनकत्वात्, तन्तु-संयोगोऽसमवायिकारणम्, स्वकार्येण = पटेन सह एकस्मिन्नर्थे = तन्तौ समवायसम्बन्धेन 'सम्बद्धं सत्पट-जनकत्वस्य सत्त्वात्। (ख) तन्तु-रूपंपट-रूपस्य–तन्तु-रूपाधिकरणं = तन्तुः, तस्यकार्यं = पटरूपम्, तस्याधिकरणं पटः, अनयोर्व्यधिकरणत्वादव्याप्तिः, अतः 'कारणैकार्थ-प्रत्यासत्त्या' इत्युक्तम्। एवञ्च स्वं = पटरूपं, स्वकारणं = पटः, स्वकारणेनैकस्मिन्नर्थे = तंतौ समवायसम्बन्धेन सम्बद्धस्य तन्तुरूपस्य स्वकार्य = पट-रूपजनकत्वान्नाव्याप्तिः[अतिव्याप्तिः][234]। 'कारणैकार्थ-प्रत्यासत्ति- मात्रोक्तौ तन्तु-संयोगेऽतिव्याप्तिः, अतः 'अन्यतर-'इत्युक्तम्

(३ ) निमित्त-कारणं लक्ष्यम्। निमित्तकारणत्वं लक्ष्यताऽवच्छेदकम्। '(1) समवायि-कारण-भिन्नत्वेसति, (२) असमवायि-कारणभिन्नत्वे सति कारणत्वं लक्षणम्। 'समवायि-कारण' भिन्नत्वोक्तौ असमवायिकारणेऽतिव्याप्तिः, अतः 'असमवायि-कारण-भिन्नत्वम्' उक्तम्। 'असमवायि-कारण-भिन्नत्व-'उक्तौ समवायिकारणेऽतिव्याप्तिः, अतः 'समवायि-कारणभिन्नत्वम्' उक्तम्। उभय-भिन्नत्वोक्तौ घटेऽतिव्याप्तिः, अतः 'कारणत्वम्' उक्तम्॥३६॥

**हिन्द्यनुवादः-** कारण के तीन प्रकार है। समवायिकारण, असमवायिकारण और

[234] यद्यपि मूलग्रन्थे अत्र अतिव्याप्तिः किन्तु एतस्य वर्णनस्य उपरि अव्याप्तिदोषस्य प्रसङ्गोपस्थितः। अतः दोषनिराकरणमपि अव्याप्तिदोषस्यैव भवेत्। अतो हेतोः अत्र 'अव्याप्तिः' इति कृता। पाठभेदेऽपि शास्त्रिवर्येण उक्तम् यत् सरस्वतीभवनकोषे प्राप्तपाण्डुलिपीष्वपि 'ति' इति लिखितमपि हरितालिकया लोपितम्।

निमित्तकारण। समवायिकारण लक्ष्य है। समवायिकारणत्व लक्ष्यतावच्छेदक है। 'समवेत-कार्य-जनकत्व' ही इसका लक्षण है। (जिसमें समवेत होकर कार्य की उत्पत्ति होती है,उसे समवायिकारण कहते है)। यदि 'जिसमें कार्य उत्पन्न होता है' यही लक्षण हो तो 'समवेतत्व' यह पद क्यों रखा गया है? ऐसा नहीं कहना चाहिए क्योंकि इसे न रखने पर 'ध्वंस' में अतिव्याप्ति हो जाती। अतः इसका उपादान किया गया। इसी प्रकार 'समवेतत्व' मात्र ही कहे तो 'सामान्य' में अतिव्याप्ति हो जाती अतः 'कार्यजनकत्व' भी रखा गया। इस प्रकार 'समवाय सम्बन्ध से अवच्छिन्नकार्यता से निरूपित एवं तादात्म्य सम्बन्धावच्छिन्न कारणता' ही समवायिकारणता है। जैसे कि - तन्तु में समवेत होकर पट की उत्पत्ति तथा पट में समवेत होकर पटरूप की उत्पत्ति के समय तन्तु एवं पट में समवायिकारणता है।

असमवायिकारण लक्ष्य है। असमवायिकारणत्व लक्ष्यता अवच्छेदक है। कार्य अथवा कारण के साथ ही कार्य के अधिकरण में सम्बद्ध होकर जो कार्य को उत्पन्न करता है, वही असमवायि कारण है। (क) पट के प्रति तन्तु समवायि कारण है, स्वयं में ही समवेत कार्य का जनक होने से। एवं उसी पट के प्रति तन्तुसंयोग असमवायिकारण है, अपने कार्य पट के साथ एक ही (कार्य के) अधिकरण तन्तु में समवाय सम्बन्ध से सम्बद्ध होकर पट का जनक होने से। (ख) पटरूप के प्रति तन्तुरूप असमवायिकारण है। तन्तुरूप का अधिकरण तन्तु है तथा पटरूप का अधिकरण पट है। यहाँ पर तो कार्य एवं कारण का अधिकरण भिन्न होने से लक्षण में अव्याप्ति दोष हो रहा है, अतः 'कारण के साथ अधिकरण में सम्बद्ध हो' ऐसा कहा गया। इस प्रकार पटरूप अपने समवायिकारण पट में है तथा यह कारण अपने अधिकरण तन्तु में है। अब इस समवायिकारण पट के साथ इसी के अधिकरण में समवाय सम्बन्ध से सम्बद्ध होने से तन्तुरूप पटरूप का जनक है। अतः अव्याप्ति नहीं होगी। लक्षण में 'कारण के अधिकरण के अत्यन्त समीप' मात्र कहने से तन्तुसंयोग में अतिव्याप्ति हो जाती अतः अन्यतर (कार्य या कारण दोनों में से किसी एक के साथ) ऐसा कहा गया।

निमित्तकारण लक्ष्य है। निमित्तकारणत्व लक्ष्यता अवच्छेदक है। 'समवायिकारण से भिन्न होते हुए तथा असमवायिकारण से भिन्न होते हुए जिसमे कारणत्व' हो उसे निमित्तकारण कहते है। यहाँ 'समवायिकारण से भिन्न' मात्र कहने पर 'असमवायिकारण' में अतिव्याप्ति तथा मात्र 'असमवायिकारण से भिन्न' कहने पर 'समवायिकारण' में अतिव्याप्ति हो जाती।

अतः दोनों का उपादान किया गया है लक्षण में। यहाँ 'उभयभिन्नत्व' मात्र कहने पर घट में अतिव्याप्ति न हो जाए, अतः 'कारणत्व' का कथन किया गया है।

## विश्लेषणम्


**कारणत्रयविवेचनम् -** करणलक्षणे प्रयुक्तकारणप्रसङ्गादत्र कारणस्य विभागमाह - समवायिकारणम्, असमवायिकारणं , निमित्तकारणञ्चेति भेदात् त्रिविधं वर्णितं कारणम्। सर्वस्मिन् कार्ये एतेषां त्रयाणां कारणता भवत्येव।

**समवायिकारणम् - समवेतकार्यजनकत्वं** समवायिकारणस्य लक्षणं दीयते टीकाकारेण। समवेतम् अर्थात् समवायसम्बन्धेन वर्तमानम्। कारणे समवायसम्बन्धेन सम्बद्धं भूत्वा कार्यम् उत्पद्यते, तत्तु समवायिकारणमिति। इदमेव लक्षणं एवम्प्रकारेणापि वक्तुं शक्यते यथा **यत्समवेतत्वे सति कार्यमुत्पद्यते, तत्समवायिकारणम्।** यस्मिन् समवेतम् इति यत्समवेतं तथा समवायसम्बन्धेन वर्तमानमिति समवेतम्। अतः यस्मिन् कारणे समवायसम्बन्धेन वर्तमानं सत् कार्यमुत्पद्यते तदेव कारणं समवायिकारणं कथ्यते। सम्प्रति लक्षणेऽस्मिन् 'समवेतत्वे सति' अस्य पदस्य प्रयोजनं वर्ण्यते। 'समवेतत्वे सति' इति पदं कार्यध्वंसातिव्याप्तिवारणाय प्रयुक्तम्। यदि लक्षणे 'समवेतत्वे सति' इति पदं न प्रयुज्यते तर्हि 'यस्मिन् कार्यमुत्पद्यते अर्थात् कारणे कार्यं उत्पद्यते' इत्येव समवायिकारणलक्षणम्। कार्यध्वंसस्य कारणं स्वयं कार्यमपि भवति। अतः स्वकारणे अर्थात् कार्ये कार्यध्वंसरूपकार्यम् उत्पद्यते। अस्याम् अवस्थायां कार्यध्वंसोऽपि समवायिकारणं भवति किन्तु 'समवेतत्वे सति' पदप्रयोगात् अतिव्याप्तिः निवारिता यतोहि कार्यध्वंसः स्वकारणे स्वरूपसम्बन्धेन सम्बद्ध्यते ध्वंसाभावात्, न तु समवायसम्बन्धेन। एवम्प्रकारेण 'समवेतत्वं' मात्रोक्तौ सामान्येऽतिव्याप्तिः जायते। यतोहि सामान्यमपि समवेतं भवति अतः तस्मिन् अपि समवेतत्वं विद्यते। अतो हेतोः 'कार्यमुत्पद्यते' इत्यपि उक्तम्। अतः 'यत्समवेतत्वे सति कार्यमुत्पद्यते' इति समवायिकारणस्य दोषरहितलक्षणम्। इत्थञ्च लक्षणं नव्यन्यायशैल्याम् एवं प्रस्तूयते आचार्येण- **'समवायसम्बन्धावच्छिन्न-कार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणता समवायिकारणता'** इति। न्याबोधिन्यामपि इदमेव लक्षणं समवायिकारणस्य सामान्यलक्षणमुच्यते।[235] नव्यन्याये चतुर्विधम् अवच्छेदकं (धर्म-देश-सम्बन्ध-कालश्च)स्वीक्रियते यस्मिन् एकः सम्बन्धो अपि। कारणे कार्यं येन सम्बन्धेन उत्पन्नं

235 न्यायबोधिनी - समवायिकारणलक्षणप्रकरणम्

भवति तत्सम्बन्धः तस्य कार्यस्य अवच्छेदकः भवति। समवायिकारणे समवायसम्बन्धेन कार्यम् उत्पद्यते अतः कार्ये स्थितकार्यतायाः अवच्छेदकः समवायसम्बन्धः। कारणे उत्पद्यमानस्य कार्यस्याभावस्तु प्रसिद्धः किन्तु कारणे कारणस्याभावः न। यतोहि न्यायशास्त्रे कारणे कारणं तादात्म्यसम्बन्धेन स्थितमस्ति इति मन्यते।[236] अतः कारणनिष्ठकारणता तादात्म्यसम्बन्धावच्छिन्ना वर्तते। एवम्प्रकारेण समवायसम्बन्धावच्छिन्न-कार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणता एव समवायिकारणता वर्तते तथा एषा समवायिकारणता यस्मिन् तिष्ठति तदेव समवायिकारणम्।

**आरेखीयप्रस्तुतिः –** ‘समवायिकारणम्’




**चित्रक्रमाँकः १७**

समवायिकारणस्य उदाहरणद्वयमुल्लिखितम् अत्र यथा (क) तन्तु पटस्य समवायिकारणम्। तन्तुषु समवायसम्बन्धेन सम्बद्धं सत् पटस्योत्पत्तिः, अतः तन्तवः पटस्य समवायिकारणम्। अत्र अवयव (तन्तुः)-अवयविनोः(पटः) समवायसम्बन्धः तिष्ठति। (ख) पटः पटरूपस्य समवायिकारणम्। पटरूपं पटे समवेतत्वे सति उत्पद्यते अतः पटः पटरूपं प्रति समवायिकारणमिति लक्षणसमन्वयः। अत्र गुणगुणिनोः (पटरूप-पटयोश्च) समवायसम्बन्धः विद्यते। समवायिकारणं सर्वदा द्रव्यमेव भवति।[237] उपर्युक्तोदाहरणयोः अपि पटः तन्तुश्च

---

[236] समवायसम्बन्धेन घटाधिकरणे कपालादौ(कारणे) , कपालादेः (कारणस्य) तादात्म्यसम्बन्धेनैव सत्वात् – न्यायबोधिनी, समवायिकारणलक्षणप्रकरणम्

[237] वैशेषिकदर्शन में पदार्थनिरूपण – पृष्ठः ४४


द्वयमेव द्रव्यम्।

**असमवायिकारणम् -** समवायिकारणानन्तरम् असमवायिकारणं लक्ष्यते – **'कार्यैकार्थ-कारणैकार्थान्यतरप्रत्यासत्त्या कार्याधिकरणे सम्बद्धं सत् कार्यजनकत्वम्'** असमवायिकारणस्य लक्षणम्। यत्कारणं कार्येण वा कारणेन सह एकस्मिन्नेव अधिकरणे कार्याधिकरणे वा समवायेन सम्बद्धं भूत्वा कार्यं जनयति, तत्कारणम् असमवायिकारणं कथ्यते। लक्षणे कार्याधिकरणम् उक्तमाचार्येण यतोहि एकार्थप्रत्यासत्ति तदेव निर्मीयते यदा समानतत्वद्वयम् (कार्यद्वयम्) एकस्मिन्नेव अधिकरणे (कारणे) तिष्ठति। अत्रापि उदाहरणद्वयमाध्यमेन कारणमिदमवबोध्यते। प्रथमन्तु कार्येणेत्येतदुदाहरति - पटरूपकार्यं प्रति तन्तुसंयोगः असमवायिकारणम् । पटस्य समवायिकारणं तन्तुः, तन्तौ समवेतपटस्य जनकत्वात्। अत्र कार्येण अर्थात् पटेन सार्धं एकस्मिन्नधिकरणे तन्तौ समवेतत्वात् तन्तुसंयोगः असमवायिकारणम्। यतोहि अत्र पटस्यापि अधिकरणं तन्तुः तथा तन्तुसंयोगस्य अपि। पटः अपि कार्यं तथा तन्तुसंयोगः अपि कार्यं, एते कार्ये एकस्मिन्न कारणे तन्तौ विद्येते। अतः अत्र एकार्थप्रत्यासत्तिः भवति। द्वितीयन्तु कारणेन सहेत्येतदुदाहरति - पटरूपं प्रति तन्तुरूपम् असमवायिकारणम्। अत्र पटरूपस्य समवायिकारणं पटः तथा अस्य कारणस्य पटस्य अधिकरणं तन्तुः वर्तते एवं तन्तुरूपस्यापि अधिकरणं तन्तुरेव। एतेन समवायिकारणेन सह एकस्मिन्नेव अधिकरणे तन्तौ तन्तुरूपमपि स्थितम्। अतः तन्तुरूपं पटरूपस्य असमवायिकारणम्। अत्रापि पटः अपि कार्यं (यद्यपि पटरूपदृष्ट्या कारणं किन्तु तन्तुदृष्ट्या कार्यं) तथा तन्तुरूपम अपि कार्यं, एते कार्ये एकस्मिन्न कारणे तन्तौ विद्येते। अत एव एकार्थप्रत्यासत्तिः निर्मीयते। यदि असमवायिकारणस्य लक्षणे 'कारणैकार्थप्रत्यासत्त्या' इत्यस्य ग्रहणं न क्रियते तर्हि तन्तुरूपस्यासमवायिकारणत्वे अव्याप्तिदोषः संभवति। यतोहि तन्तुरूपस्य अधिकरणं तन्तुः तथा पटरूपस्य अधिकरणं पटः। एतयोः द्वयोः अधिकरणं तु भिन्नं किन्तु लक्षणे 'एकस्मिन्नाधिकरणे समवेतकारणस्य कार्यजनकत्वम्' उक्तम्। अत्र अनयोर्व्यधिकरणत्वादव्याप्तिः अतः 'कारणैकार्थप्रत्यासत्त्या' अर्थात् कारणेन सार्धं समानाधिकरणे समवेतत्वं सत् कारणमपि असमवायिकारणम् उच्यते। एवञ्च पटरूपस्य समवायिकारणेन पटेन सह समवायेन सम्बद्धं सत् तन्तुरूपस्य पटरूपजनकत्वात् तन्तुरूपस्य असमवायिकारणत्वे नातिव्याप्तिः। एवम्प्रकारेण यदि 'कारणैकार्थप्रत्यासत्ति'मात्रोच्यते तर्हि

तन्तुसंयोगेऽपि अतिव्याप्तिः। यतोहि तन्तुरूपमिव तन्तुसंयोगो अपि पटरूपकार्यस्य कारणेन पटेन सह तन्तुषु तिष्ठति। अतः तन्तुसंयोगो अपि पटरूपस्य असमवायिकारणं भविष्यति किन्तु 'अन्यतर' इति पदेन नेयमतिव्याप्तिः। यतोहि एतेन पदेन कार्यसमानाधिकरणत्वस्य विकल्पं प्राप्यते एवं पटकार्यसामानाधिकरण्यं तन्तुसंयोगे वर्तते। अतः तन्तुसंयोगः पटस्य असमवायिकारणं न तु पटरूपस्य।

**आरेखीयप्रस्तुतिः –**

' असमवायिकारणम् '




**चित्रक्रमाँकः १८**

असमायिकारणं सर्वदा गुणः कर्म च स्तः। गुणः गुणं प्रति तथा द्रव्यं प्रति असमवायिकारणं

भवति तथा कर्म गुणमात्रं प्रत्येव।

**निमित्तं कारणम् -** तृतीयं कारणं निमित्तकारणं वर्तते। '**समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं**' निमित्तकारणस्य लक्षणम्। सर्वस्यापि कार्यस्य नैकानि कारणानि भवन्ति। तेषु कारणेषु किञ्चित् समवायिकारणं, किञ्चिदसमवायिकारणञ्च भवति। एतदुभयभिन्नानि सर्वाण्यपि कारणानि निमित्तकारणान्तर्गते परिगण्यन्ते। यथा पटकार्ये तन्तुः समवायिकारणं, तन्तुसंयोगः असमवायिकारणम् एवं तुरीवेमाकुलालादिकं सर्वं निमित्तकारणमिति। लक्षणेऽस्मिन् समवायि-असमवायिकारणयोश्च अतिव्याप्तिवारणाय उभयोरेव भिन्नत्वस्य उपादानं क्रियते। उभयोः भिन्नत्वमात्रोक्ते सति घटपटादिष्वपि अतिव्याप्तिः, समवाय्यसमवायिकारणभिन्नत्वात्। अतः लक्षणे 'कारणत्वम्' उक्तम्। घटपटादि एतद्भिन्नं किन्तु कारणं न, कारणत्वाभावान्नातिव्याप्तिः अत्र। सर्वकार्यस्य उत्पत्तौ निमित्तकारणस्यापि तथैव सहभागिता भवति यथा अन्यकारणस्य।

एवम्प्रकारेण एतेभ्यः एव कारणत्रयेभ्यः कार्यं समुत्पद्यते तथा एतेषु मध्ये यदसाधारणकारणं भवति तदेव कारणं करणं भवतीति निष्कर्षः।

(२.१६ बुद्धि-विवरणे यथार्थानुभव-भेदस्य प्रत्यक्षस्य सकरणस्य लक्षणम्)

**तर्कसंग्रहः -** तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। तद्विविधम्। निर्विकल्पकं सविकल्पकञ्चेति। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथेदं किञ्चित्। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयम्। ब्राह्मणोऽयम्। श्यामोऽयम्। पाचकोऽयमिति॥३७॥

**उपन्यासः –** प्रत्यक्षज्ञानं लक्ष्यम्। प्रत्यक्षज्ञानत्वं लक्ष्यताऽवच्छेदकम्। '**इन्द्रियार्थ-सन्निकर्ष-**जन्यत्वे सति ज्ञानत्वं' लक्षणम्। '**इन्द्रियार्थसन्निकर्ष-जन्यत्व-**'मात्रोक्तौ सन्निकर्षध्वंसेऽतिव्याप्तिः, अतो 'ज्ञानत्वम्' उक्तम्। 'ज्ञानत्व-'मात्रौक्तौ अनुमित्यादाव[अनुमितौ][238]तिव्याप्तिः, ज्ञानत्वस्य तत्र सत्त्वात, अतः 'सन्निकर्ष-जन्यत्वम्' उक्तम्। सन्निकर्ष-जन्यत्वस्य तत्राभावान्नातिव्याप्तिः॥३७॥

**हिन्द्यनुवादः -** प्रत्यक्षज्ञान लक्ष्य है। प्रत्यक्षज्ञानत्व लक्ष्यता अवच्छेदक है। इन्द्रियार्थ सन्निकर्ष

[238] संपादितपुस्तके 'अनुमितौ' आसीदत्र, किन्तु पाठभेदे 'अनुमित्यादौ' इत्यपि वर्णितम्। अतः अर्थानुकूलत्वात् एतदेव गृहीतम्।

से जन्य होते हुए ज्ञानत्व से युक्त होना ही प्रत्यक्षज्ञान का लक्षण है। 'इन्द्रियार्थ सन्निकर्ष से जन्य' मात्र कहने पर सन्निकर्षध्वंस में अतिव्याप्ति हो जाती अतः ज्ञानत्व भी कहा गया। लक्षण में 'ज्ञानत्व' मात्र रखने पर अनुमिति आदि ज्ञान में अतिव्याप्ति होने के कारण 'सन्निकर्ष-जन्यत्व' कहा गया। 'सन्निकर्ष-जन्यत्व' का अनुमिति आदि ज्ञानों अभाव होने से अतिव्याप्ति नहीं होती।

## विश्लेषणम्

**प्रत्यक्षप्रकरणम् -** चतुर्विधज्ञानेषु सर्वप्रथमं प्रत्यक्षज्ञानं व्याख्यायितम् अन्नम्भट्टेन। अतः प्रत्यक्षज्ञानस्य करणं प्रत्यक्षप्रमाणमपि चतुर्षु प्रमाणेषु आद्यम्। 'प्रत्यक्ष'पदं प्रत्यक्षप्रमाणं प्रत्यक्षज्ञानं द्वयोरेव कृते प्रयुज्यते। प्रत्यक्षज्ञानं षड्विधं भवति - चाक्षुष-रासन-घ्राणज-त्वाच-श्रावण-मानसप्रत्यक्षञ्च। एतेषां प्रत्यक्षज्ञानानां व्यापारवदसाधारणं कारणं अर्थात् करणं चक्षुरादीन्द्रियाणि। अतः तदेव प्रत्यक्षप्रमाणम् अर्थात् इन्द्रियमेव प्रत्यक्षप्रमाणम् इति वक्तुं शक्यते। यतोहि **प्रत्यक्षज्ञानकरणं प्रत्यक्षप्रमाणम्** उच्यते तर्कसंग्रहे। उपन्यासटीकायां प्रत्यक्षप्रमाणस्य न किमपि लक्षणं प्रस्तूयते। प्रकरणक्रमभङ्गानिष्टप्रसङ्गात् तर्कसंग्रहस्यैव प्रत्यक्षप्रमाणलक्षणम् उपरि प्रस्तुतं मया।

टीकायां प्रत्यक्षज्ञानस्य लक्षणम् **'इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वम्'** दीयते। इन्दियं चक्षु-रसना-घ्राण-त्वक्-श्रोत्र-मनश्च, एते षडिन्द्रियं ज्ञानेन्द्रियमुच्यते। एतेषु चक्षुः त्वक् मनश्च द्रव्यगुणद्वयमेव ग्रहणं, रसना,श्रोत्रं, घ्राणश्च गुणमात्रमेव गृह्णन्ति। अर्थस्य तात्पर्यं विषयः अर्थात् घटपटादिः, सन्निकर्षश्च संयोगसमवायादिसम्बन्धः।[239] चक्षुरादीन्द्रियैः सह घटादिविषयस्य संयोगादिसम्बन्धः, एतेन सम्बन्धेन जन्यं यत्ज्ञानं विद्यते तदेव प्रत्यक्षज्ञानं प्रत्यक्षप्रमा वा। अमुष्मिन् लक्षणे 'इन्द्रियार्थसन्निकर्षजन्यत्वं' मात्रोक्ते सति इन्द्रियार्थसन्निकर्षध्वंसे अतिव्याप्तिः भवति यतोहि सन्निकर्षध्वंसोऽपि सन्निकर्षजन्यमेव। अतः 'ज्ञानत्वं' उक्तम्, सन्निकर्षध्वंसस्तु ज्ञानं नापितु अभावः। अतः तस्मिन् ज्ञानत्वाभावात् नातिव्याप्तिः। अत्र 'ज्ञानत्वम्' इत्येव ग्रहणं चेत् अनुमित्यादिज्ञानेऽतिव्याप्तिः। अतः 'सन्निकर्षजन्यत्वम्' उच्यते। अनुमित्यादिज्ञाने इन्द्रियार्थसन्निकर्षजन्यत्वस्य अभावात्

---

239 सम्बन्धः सन्निकर्षः। स च विभिन्नयोर्वस्तुनोः विशेषण-विशेष्यभावप्रयोजकः। नव्यन्यायभाषाप्रदीपः – Text 7

नातिव्याप्तिः। एवम्प्रकारेण इन्द्रियार्थसन्निर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षप्रमायाः निर्दुष्टलक्षणम्।

(२. १६ बुद्धि-गुण-विवरणे प्रत्यक्ष-हेतु-सन्निकर्षाणां लक्षणानि)

**तर्कसंग्रहः-** प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसंनिकर्षः षड्विधः। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः। घटरूपप्रत्यक्षजनने संयुक्तसमवायः संनिकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः संनिकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायः संनिकर्षः। कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभावः संनिकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्॥ ३८॥

**उपन्यासः –** 'प्रत्यक्षज्ञान-हेतुरिन्द्रियार्थ-सन्निकर्षः षड्विधः'। इति विभागोक्तिः। (१) विषयता-सम्बन्धेन द्रव्यविषयक-लौकिक-प्रत्यक्षत्वावच्छिन्नं प्रति संयोगः सन्निकर्षः कारणम्। (२) गुणकर्मसामान्यविषयक-विषयतासम्बन्धेन लौकिक-प्रत्यक्षत्वावच्छिन्नं प्रति संयुक्तसमवायः सन्निकर्षः कारणम्। (३) गुणत्व- कर्मत्व- विषयक- विषयता-सम्बन्धावच्छिन्न -लौकिक-प्रत्यक्षत्वावच्छिन्नं प्रति संयुक्तसमवेतसमवायः सन्निकर्षः कारणम्। (४) शब्द-विषयक-विषयता-सम्बन्धावच्छिन्नलौकिक-प्रत्यक्षत्वावच्छिन्नं प्रति समवायसन्निकर्षः कारणम्। (५) शब्दत्व-विषयक-विषयता-सम्बन्धावच्छिन्न-लौकिक-प्रत्यक्षत्वावच्छिन्नं प्रति समवेतसमवायः सन्निकर्षः कारणम्। (६) अभाव-विषयक-विषयता-सम्बन्धावच्छिन्न-लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति विशेषण-विशेष्य-भावः सन्निकर्षः कारणम्॥ ३८॥

**हिन्द्यनुवादः –** प्रत्यक्ष ज्ञान का हेतु इन्द्रियार्थ सन्निकर्ष छः प्रकार का है। १. विषयता सम्बन्ध के द्वारा द्रव्य विषय से जुडने वाले लौकिकप्रत्यक्षत्व से अवच्छिन्न, (लौकिक) प्रत्यक्ष (ज्ञान अथवा विषयी) के प्रति 'संयोग सन्निकर्ष' कारण है। २.विषयता सम्बन्ध के द्वारा गुण, कर्म तथा सामान्य विषय वाले लौकिकप्रत्यक्षत्व से अवच्छिन्न प्रत्यक्ष के प्रति


'संयुक्तसमवायसन्निकर्ष' कारण है। ३. विषयता सम्बन्ध के द्वारा 'गुणत्व' तथा 'कर्मत्व' अर्थात् जाति विषय से जुडने वाले  लौकिकप्रत्यक्षत्व से अवच्छिन्न प्रत्यक्ष के प्रति 'संयुक्तसमवेतसमवायसन्निकर्ष' कारण है। ४.  शब्दविषय वाले तथा विषयता सम्बन्ध से अवच्छिन्न एवं लौकिकप्रत्यक्षत्व से अवच्छिन्न प्रत्यक्ष (विषयी) के प्रति 'समवायसन्निकर्ष' कारण है। ५. शब्दत्वविषयक तथा  विषयता सम्बन्धावच्छिन्न एवं लौकिकप्रत्यक्षत्व से अवच्छिन्न प्रत्यक्ष के प्रति 'समवेतसमवायसन्निकर्ष' कारण है। ६. अभावविषयक विषयता सम्बन्ध से अवच्छिन्न तथा लौकिकप्रत्यक्षत्व से अवच्छिन्न प्रत्यक्ष के प्रति 'विशेषण-विशेष्यभावसन्निकर्ष' कारण होता है।

## विश्लेषणम्

**षड्विधसन्निकर्षः-** नैयायिकानां मते यदा इन्द्रियेण सह अर्थस्य सन्निकर्षः भवति तदा न केवलं द्रव्येण सह (अर्थः) अपितु तस्य गुण-जाति-अभावेन च सहापि सन्निकर्षः जायते। अतः अमुना इन्द्रियार्थसन्निकर्षेण भावपदार्थः अभावपदार्थश्चापि ज्ञायते। न्यायपरम्परायाः अनुपालनं कुर्वता अन्नम्भट्टेन वस्तुनः पूर्णस्वरूपप्रत्यक्षाय संयोगः, समवायः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवेतसमवायः, विशेषण-विशेष्यभावश्चेति षड्विधसन्निकर्षः परिगण्यते। अमीषु आद्यपञ्चसन्निकर्षः भावपदार्थस्य ज्ञाने कारणं, अन्तिमसन्निकर्षः अभावपदार्थस्य ज्ञाने कारणं भवति। एतेषामेव सन्निकर्षाणां नव्यन्यायशैल्यन्वितं टीकनं प्राप्यते उपन्यासे।

**संयोगसन्निकर्षः –** द्रव्यद्वयोर्मध्ये संयोगसम्बन्धः भवतीति न्यायः। यथा घटेन सह इन्द्रियस्य सन्निकर्षः संयोगः। अत्र घटो द्रव्यं तथा इन्द्रियमपि। अतः एतयोः सन्निकर्षेण उत्पन्नं प्रत्यक्षम्प्रति संयोगसन्निकर्षः कारणमस्ति। उपन्यासकारेण एतदेव कथनं किञ्चित्पृथकतया प्रस्तुतम् - द्रव्यं विषयः तथा तस्य प्रत्यक्षं विषयी, ज्ञानत्वात्। अतः प्रत्यक्षं द्रव्येण सह विषयतासम्बन्धेन युज्यते। एवम्प्रकारेण विषयतासम्बन्धेन द्रव्यविषयकं लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति अर्थात् प्रत्यक्षं प्रति संयोगसन्निकर्षः कारणं भवति।


**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः १९**

**संयुक्तसमवायसन्निकर्षः-**द्रव्यस्य गुणकर्मजातिप्रत्यक्षज्ञाने संयुक्तसमवायसन्निकर्षः कारणमिति। यतोहि एते समवायसम्बन्धेन द्रव्येण सह संयुज्यन्ते एवञ्च द्रव्यं संयोगसम्बन्धेन इन्द्रियम्प्रति युज्यते। इन्द्रियं द्रव्येण सह संयुक्तं भूत्वा, द्रव्ये समवेतगुणाद्यैः सह सम्बद्धः जातः। अत एव सन्निकर्षोऽयं संयुक्तसमवायसन्निकर्षः उच्यते। गुणकर्मजातयश्च द्रव्यमाधृत्य एव तिष्ठन्ति। अस्मात् कारणात् एतैः सह सन्निकर्षात्पूर्वम् इन्द्रियस्य द्रव्येण साकं सन्निकर्षः अनिवार्यः। यथा चक्षुरिन्द्रियं घटेन (द्रव्येण) सह संयुक्तं भूत्वा, तस्मिन् समवेत घटरूप(गुण)-विषयककर्म-घटत्वजातेश्च प्रत्यक्षज्ञानं कारयति। अतः सन्निकर्षोऽयं संयुक्तसमवायसन्निकर्ष इति नाम्ना प्रसिद्धः। उपन्यासे एवम्प्रकारेण वर्णितमिदम् - गुणकर्मसामान्यश्च विषयः तथा तेषां प्रत्यक्षं विषयी, ज्ञानत्वात्। प्रत्यक्षज्ञानं एतैस्सह विषयतासम्बन्धेन युज्यते। एवम्प्रकारेण विषयतासम्बन्धेन गुणकर्मसामान्यविषयकं लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति अर्थात् लौकिकप्रत्यक्षं प्रति संयुक्तसमवायसन्निकर्षः कारणं भवति।


**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः २०**

**संयुक्तसमवेतसमवायसन्निकर्षः-** गुणस्य तथा कर्मणो जातिप्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षः कारणं भवति। यथा चक्षुरिन्द्रियेण सह घटस्य संयोगः, तस्मिन् संयुक्ते घटे घटरूपं समवेतं तथा घटरूपे रूपत्वजातिः समवेता। अतो घटरूपत्वप्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षस्य कारणता उच्यते। अत्र गुणत्वं कर्मत्वञ्च विषयः तथा एतयोः प्रत्यक्षज्ञानं विषयी। प्रत्यक्षज्ञानं एतैः सह विषयतासम्बन्धेन युज्यते। एवम्प्रकारेण विषयतासम्बन्धेन गुणत्व-कर्मत्वविषयकं लौकिक- प्रत्यक्षत्वावच्छिन्नं प्रति अर्थात् लौकिकप्रत्यक्षं प्रति संयुक्तसमवेतसमवायसन्निकर्षः कारणम्।

**आरेखीयप्रस्तुतिः –**





**चित्रक्रमाँकः २१**

**समवायसन्निकर्षः –** गुणगुणिनोः मध्ये 'समवायसन्निकर्षः' इति नियमात्, श्रोत्रेन्द्रियेण शब्दसाक्षात्कारे शब्दगुणज्ञाने वा समवायसन्निकर्षः साधनं मन्यते। समवायसम्बन्धेन शब्दः आकाशे तिष्ठति यतोहि शब्दः गुणः आकाशश्च गुणी। न्यायवैशेषिके श्रोत्रेन्द्रियमपि कर्णविवर-वर्त्याकाशमेव[240]। शब्दः आकाशस्य गुणत्वात् श्रोत्रेन्द्रियस्यापि गुणः। अतः गुणगुणिनोः समवायात्, द्वयोर्मध्ये समवायसन्निकर्षः। सम्प्रति विषयतासम्बन्धेन शब्दविषयकं लौकिकप्रत्यक्षं प्रति समवायसन्निकर्षः कारणं भवति।

**आरेखीयप्रस्तुतिः –**


240 कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात्...। तर्कसंग्रहः – समवायसन्निकर्षः कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। तर्कभाषा - श्रोत्रेन्द्रियप्रकरणम्




**चित्रक्रमाँकः २२**

**समवेतसमवायसन्निकर्षः -** श्रोत्रेन्द्रियेण सह शब्दगुणः समवायेन संयुज्यते तथा शब्दगुणे समवायसम्बन्धेन शब्दत्वजातिः विद्यते। अतः श्रोत्रेन्द्रियेण शब्दत्वजातिप्रत्यक्षे समवेतसमवायः सन्निकर्षः जायते। एवम्प्रकारेण विषयतासम्बन्धेन शब्दत्वविषयकं लौकिकप्रत्यक्षम्प्रति समवेतसमवायसन्निकर्षः कारणं भवति।

**आरेखीयप्रस्तुतिः -**




**चित्रक्रमाँकः २३**


**विशेषण-विशेष्यभावसन्निकर्षः-** सन्निकर्षोऽयम् अभावपदार्थस्य प्रत्यक्षज्ञानं कारयति।

विशेषणतायाः विशेष्यतायाश्च भाव एव विशेषणविशेष्यभावः। अस्य सन्निकर्षस्य अपरनाम विशेषणतासन्निकर्षः।[241] एषः सम्बन्धः प्रकारद्वयेन भवति यथा **'घटाभाववद् भूतलम्'** इत्यत्र घटाभावः विशेषणम् एवं भूतलं विशेष्यः, अतो हेतोः अत्र विशेषणभावसन्निकर्षः। अथ च **'भूतले घटाभावः'** अस्मिन् वाक्ये विशेष्यभावसन्निकर्षः यतोहि न्यायदर्शने प्रथमान्तः विशेष्यः अन्यविभक्तिकान्तश्च विशेषणम्। अत एव घटाभावः विशेष्यः प्रथमविभक्तित्वात् एवं भूतलं विशेषणम्, सप्तम्यन्तत्वात्। अत्र ध्यातव्यं यत् भूतलेन सह चक्षुरिन्द्रियस्य संयोगसम्बन्धः एवं भूतले विशेषणतया सम्बद्धघटाभावस्य प्रत्यक्षज्ञाने चक्षुरिन्द्रियेण संयुक्तविशेषणतासन्निकर्षः कारणम्। अनेन प्रकारेण भूतलेन सह विशेष्यतया सम्बद्धाभावस्य प्रत्यक्षं संयुक्तविशेष्यतासन्निकर्षेण भवति। उपर्युक्तं तु द्रव्याभावप्रत्यक्षस्य सन्निकर्षः वर्णितः न तु गुणाद्यभावप्रत्यक्षज्ञानानाम्। गुणकर्मसामान्याभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणतासन्निकर्षः, गुणत्व-कर्मत्वाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसम-वेतविशेषणतासन्निकर्षः वर्तते।[242] अनेन प्रकारेणैव शब्दाभावप्रत्यक्षे समवेतविशेषणतासन्निकर्षः एवं शब्दत्वाभावप्रत्यक्षे समवेतसमवेतविशेषणतासन्निकर्षः भवतीति वक्तुं शक्यते। उपन्यासकारेण अयं सन्निकर्षः एवम्वर्णितः – विषयतासम्बन्धेन अभावविषयकं विषयिनम् अर्थात् प्रत्यक्षज्ञानम्प्रति विशेषणविशेष्यभावसन्निकर्षः कारणं भवतीति।

**आरेखीयप्रस्तुतिः –**

241 न्यायबोधिनी - विशेषणविशेष्यभावसन्निकर्षः

242 तत्रैव




**चित्रक्रमाँकः २४**

( इन्द्रियं प्रत्यक्ष-प्रमाणम् )

**तर्कसंग्रहः -** एवं संनिकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्॥३९॥

**उपन्यासः-** करणं = चक्षुरादिकम् इति बोध्यम् ॥

**हिन्द्यनुवादः -** इन छः सन्निकर्षों से उत्पन्न प्रत्यक्षज्ञान का असाधारण कारण अर्थात् करण चक्षु, घ्राण आदि इन्द्रियाँ है।

## विश्लेषणम्

**प्रत्यक्षप्रकरणनिष्कर्षः -** एवम्प्रकारेण उपरिवर्णितं षट्सन्निकर्षजन्यं ज्ञानमेव प्रत्यक्षज्ञानं कथ्यते। अस्य प्रत्यक्षज्ञानस्य व्यापारवदसाधारणकारणम् अर्थात् करणं चक्षु-रसना-घ्राण-त्वक्-श्रोत्र-मनश्च इन्द्रियाणि सन्ति।

॥ इति प्रत्यक्षोपन्यासः ॥३९॥

(२.१६ बुद्धि-विवरणे यथार्थानुभव-द्वितीय-भेदस्यानुमितेः सकरणस्य लक्षणम्)

**तर्कसंग्रहः - ** अनुमितिकरणमनुमानम्। परामर्शजन्यं ज्ञानमनुमितिः।व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः। यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः। व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता॥४०॥

**उपन्यासः -** अनुमानं लक्ष्यम्। अनुमानत्वं लक्ष्यताऽवच्छेदकम्। 'अनुमितिकरणत्वं' लक्षणम्। 'करणत्व'मात्रोक्तौ कुठारेऽतिव्याप्तिः, तत्रच्छेदन-करणत्वस्य सत्वात्, अतो 'मितिकरणत्वम्' उक्तम्। 'मितिकरणत्व'मात्रोक्तौ चक्षुरादावतिव्याप्तिः, मितिर्=ज्ञानम्, तत्करणत्वस्य तत्र सत्वात, अतः 'अनुमितिकरणत्वम्' उक्तम्। 'अनु = पश्चात् + मिति = अनुमितिः, तत्करणम् = अनुमितिकरणम् इति व्युत्पत्त्या पश्चाज्ज्ञान-करणत्वस्य चक्षुरादौ सत्वादतिव्याप्ति तदवस्थयैव, अतः 'अनुमितित्व – रूप – जात्यवच्छिन्न - कार्यता- निरूपितकारणता-शालित्वम्= अनुमानम्।' इति ध्येयम्।

**हिन्द्यनुवादः -** अनुमान लक्ष्य है। अनुमानत्व लक्ष्यता-अवच्छेदक है। 'अनुमिति का करण' ही अनुमान है। लक्षण में 'करणत्व' मात्र कहने पर कुठार में अतिव्याप्ति हो जाती। क्योंकि कुठार में भी छेदनक्रिया का करणत्व है। अतः 'मितिकरणत्व' अर्थात् 'ज्ञानकरणत्व' कहा गया। इसी प्रकार लक्षण में 'मितिकरणत्व' मात्र रखने पर 'चक्षु' आदि इन्द्रियों में अतिव्याप्ति हो जाती, क्योंकि उनमें भी ज्ञान का 'करणत्व' होता है। अतः लक्षण में 'अनुमितिकरणत्व' कहा गया। अनु का अर्थ है 'पश्चात्' तथा मिति का तात्पर्य है ज्ञान। इस प्रकार 'पश्चात् होने वाले ज्ञान का करण' ही अनुमितिकरण है। इस व्युत्पति से भी 'चक्षु' आदि इन्द्रियों में पश्चात्ज्ञानकरणत्व होने से अतिव्याप्तिदोष की संभावना बनी ही रहती है (क्योंकि अनुमितिज्ञान में चक्षु आदि इन्द्रियों का भी सामान्यकरणत्व तो होता ही है तथा अनुमिति ज्ञान प्रत्यक्ष के पश्चात् ही होता है, अतः अनुमिति में प्रयुक्त इन्द्रियों का भी करणत्व पश्चात् ही होगा क्योंकि इसके पूर्व उन इन्द्रियों का उसी वस्तु के साथ अन्यत्र प्रत्यक्ष हुआ रहता है) अतः अनुमितित्व जाति से अवच्छिन्न कार्यता से निरूपित कारणता वाला करण ही अनुमान का लक्षण है ऐसा समझना चाहिए।

## विश्लेषणम्


**अनुमानलक्षणम् –** न्यायवैशेषिकदर्शनस्य प्रमाणचतुष्टयमहत्ता दर्शनवाङ्मये प्रसिद्धा एव। किन्तु तेष्वपि अनुमानप्रमाणं सर्वाधिकं महत्त्वपूर्णं स्थानं भजते अत्र। अनुमानं चतुर्षु प्रमाणेषु द्वितीयं प्रमाणं वर्तते। दर्शनेऽस्मिन् प्रत्येकज्ञानस्य किमपि करणं स्वीक्रियते। तत्करणमेव तस्मिन्ज्ञाने प्रमाणम्।[243] एवम्प्रकारेण अनुमानम् अनुमितिज्ञानस्य करणरूपे एव स्वीक्रियते। उपन्यासे अनुमानस्य एतदेव सामान्यलक्षणं कृतम् – **'अनुमितिकरणत्वम् अनुमानम्'।** उपरि अनुमितिज्ञाने व्यापारवदसाधारणं कारणम् अर्थात् करणं 'व्याप्तिज्ञानं' कथितम्। अतः लिङ्गपरामर्शयुक्तव्याप्तिज्ञानमेव अनुमानप्रमाणमिति वक्तुं शक्यते।[244] अस्मिन् लक्षणे कुठारादौ अतिव्याप्तिवारणाय एव 'मितिकरणत्वम्' उक्तम्। यतोहि मात्र'करणत्वम्' इति उक्ते सति तत्रापि काष्ठच्छेदनक्रियायाः करणत्वं विधीयते किन्तु 'मिति' इति पदं प्रयुज्य अतिव्याप्तिः निवार्यते यतोहि तत्र ज्ञानस्य (मितेः) करणत्वं नापितु छेदनक्रियायाः करणत्वं। अतो न अत्रातिव्याप्तिः। किन्तु लक्षणे 'मितिकरणत्व'मात्रोक्ते सत्यपि चक्षुरादीन्द्रियेषु अतिव्याप्तिः यतोहि एते अपि प्रत्यक्षज्ञानस्य करणम्। अतः 'अनुमितिकरणत्वं' अनुमानस्य लक्षणं विहितम्। किन्तु अधुना अपि इन्द्रियादौ तथैव अतिव्याप्तिः यथा पूर्वम्। अतः उपन्यासकारेण अनुमानस्य विशिष्टलक्षणं प्रस्तूयते यत् - **'अनुमितित्वरूपजात्यवच्छिन्नकार्यतानिरूपितकारणताशालित्वम् अनुमानम्।**' अत्र अनुमानम् असाधारणकारणरूपेण प्रस्तुतं तथा अनुमितिः तस्य कार्यरूपेण प्रस्तुता। अतः अनुमितौ कार्यता तथा सा कार्यता अनुमितित्वावच्छिन्ना अस्ति। अनुमानकारणम् अतः तस्मिन् कारणता विद्यते। सम्प्रति अनुमितित्वावच्छिन्नकार्यता अनुमाननिष्ठकारणतां निरूपयति, आहृतधर्मत्वात्। निष्कर्षतया वक्तुं शक्यते यद् अनुमितित्वावच्छिन्नकार्यतया निरूपिता कारणता यस्मिन् असाधारणकारणे तिष्ठति तदेव अनुमानमिति। इदं लक्षणम् अनुमानमात्रेणैव लक्ष्यते नान्येन केनापि। अतः अस्मिन्नेवानुमानलक्षणे दोषत्रयरहितत्वम् असाधारणधर्मत्वञ्च वर्तते।

**आरेखीयप्रस्तुतिः –**

---

243 प्रमायाः करणं प्रमाणम्। - तर्कदीपिका

244 अनुमानं व्याप्तिज्ञानम्। - न्यायबोधिनी, अनुमानलक्षणप्रकरणम्




**चित्रक्रमाँकः २५**

**उपन्यासः -** अनुमितिर्लक्ष्या। अनुमितित्वं लक्ष्यताऽवच्छेदकम्। 'परामर्श-जन्यत्वे सति ज्ञानत्वं' लक्षणम्। 'परामर्श-जन्यत्वस्य' तत्र सत्वात्। अतो 'ज्ञानत्वम्' उक्तम्।[245] 'ज्ञानत्व'-मात्रोक्तौ प्रत्यक्ष- ज्ञानेऽतिव्याप्तिः, ज्ञानत्वस्य तत्र सत्वात, अतः 'परामर्शजन्यत्वम्' उक्तम्। 'स्थाणुर्वा, पुरुषो वा?' इति संशयानन्तरं 'स्थाणुत्व-व्याप्यवक्र- कोटरादिमान्।' इति परामर्शानन्तरं जायमाने 'अयं स्थाणुः।' इति प्रत्यक्षेऽतिव्याप्तिः, परामर्श- जन्यत्वे सति ज्ञानत्वस्य तत्र सत्वात्, अतः 'अनुमितित्वं' निवेश्यम्, तत्रानुमितित्वाभावान्नातिव्याप्तिः,तत्र तत्सत्वे प्रमाणाभावात्, अनुमितौ तत्सत्वे तु 'अनुमिनोमि।' इत्याकारकानुव्यवसाय एव मानम्।

**हिन्द्यनुवादः -** अनुमिति लक्ष्य है। अनुमितित्व लक्ष्यतावच्छेदक है। 'जो ज्ञान परामर्श जन्य होता है' उसे अनुमिति कहते है। इस लक्षण में 'परामर्शजन्य' मात्र् कहने पर 'परामर्शध्वंस' में अतिव्याप्ति हो जाती इसीलिए 'ज्ञानत्व' का भी कथन किया गया। 'परामर्शध्वंस' में 'ज्ञानत्व' का अभाव होने से अतिव्याप्ति नहीं होती है। ज्ञानत्व मात्र कहने पर 'प्रत्यक्षज्ञान' में अतिव्याप्ति हो जाती अतः 'परामर्शजन्य' कहा गया है। किन्तु 'परामर्शजन्य ज्ञान ही अनुमिति है' अनुमिति के इस लक्षण का भी 'प्रत्यक्षज्ञान' में अतिव्याप्ति दिखायी गयी है, प्रत्यक्षज्ञान के भी परामर्शजन्य होने से। जैसे – 'यह स्थाणु है अथवा पुरुष है' इस प्रकार के संशय के बाद

---

245 पंक्तिरियं 'कस्मिन्' अतिव्याप्तिदोषनिवारणं करोति 'ज्ञानत्वं' पदेन इति न उक्तम्। किन्तु उपन्यासाचार्यस्य वर्णनशैल्यानुसारं 'परामर्शध्वंसः' निवार्यते अत्र इति वक्तुं शक्यते यतोहि आचार्येण इतः पूर्वं 'तज्जन्यः तत्ध्वंसस्य सत्वात्' ध्वंसस्य निराकरणं क्रियते यत्र कुत्रचित्। पदकृत्येऽपि एतदेवोक्तम् - (अनुमितिलक्षणप्रकरणम्)। अतः अत्रापि 'परामर्शजन्यः परामर्शध्वंसस्यापि सत्वात्' ध्वंस एव अपवार्यते अनुमितिलक्षणस्य अतिव्याप्तिदोषप्रसङ्गो। एतदनुसारेणैव अर्थः क्रियते हिन्द्यनुवादे विश्लेषणे च।

'अयं स्थाणुः' इसका प्रत्यक्षज्ञान 'स्थाणुत्वव्याप्य- वक्रकोटरादिमान् अयं स्थाणुः' इस परामर्श से ही होता है। (यहाँ 'स्थाणुत्व' साध्य अर्थात् व्यापक है, 'वक्रतादि' हेतु या लिङ्ग है तथा 'स्थाणु' पक्ष है। क्योंकि व्याप्ति से विशिष्ट पक्षधर्मता का ज्ञान ही परामर्श होता है अतः 'स्थाणुत्व' से व्याप्य वक्रकोटरादि वाले 'स्थाणु' का ज्ञान होना ही इस प्रत्यक्ष में परामर्श है। इसी परामर्श से जन्य 'यह स्थाणु है' ऐसा प्रत्यक्ष होता है।) अतः प्रत्यक्षज्ञान में अनुमितिलक्षण के निवारण हेतु 'अनुमितित्व' भी कहना चाहिए। इस प्रकार प्रत्यक्ष में 'अनुमितित्व' का अभाव होने से अतिव्याप्ति नहीं होगी क्योंकि प्रत्यक्ष में 'अनुमितित्व' के होने का कोई प्रमाण नहीं है। किन्तु अनुमिति में 'मैं अनुमिति करता हूँ' इस प्रकार का अनुव्यवसायात्मक ज्ञान ही 'अनुमितित्व' के होने का प्रमाण है।

## विश्लेषणम्

**अनुमितिलक्षणम् –** अनुमानेन उत्पद्यमानं ज्ञानमनुमितिः वर्तते। प्रत्यक्षज्ञानस्य पश्चादेव अस्य ज्ञानं कर्तुं शक्यते। 'अनुमितिः' इत्यस्य अन्वर्थ एव 'अनु' अर्थात् पश्चात् (प्रत्यक्षस्य अनन्तरं) मितिरिति ज्ञानम्। प्रत्यक्षज्ञानस्य पश्चात् यज्ज्ञानं भवति तदेव अनुमितिज्ञानम्। अस्यैव करणं अनुमानं वर्तते – '**अनुमीयते अनेन अनुमानेन इत्यनुमितिः'**। अयन्तु अनुमितेः व्युत्पत्यर्थः वर्तते किन्तु सिद्धान्तदृष्ट्या लिङ्गपरामर्शात् उत्पन्नं ज्ञानमेव अनुमितिः कथ्यते – **परामर्शजन्यत्वे सति ज्ञानत्वं** अनुमितेः लक्षणम्। अनुमितिज्ञाने परामर्शः महत्त्वपूर्णः घटकः वर्तते। परामर्शोऽपि एकप्रकारकं ज्ञानमस्ति। अस्मिन् व्यापक-व्याप्यविशिष्टपक्षस्य अधिकरणस्य वा ज्ञानं भवति।[246] एतस्मात् ज्ञानात् उत्पन्नत्वाद् उपन्यासकारेण '**परामर्शजन्यं ज्ञानम्**' अनुमितिरित्युच्यते। यदि लक्षणे 'परामर्शजन्य'मात्रमुच्यते तर्हि परामर्शध्वंसेऽतिव्याप्तिः भविष्यति यतोहि कस्यचिदपि वस्तुनः ध्वंसः तस्मादेव उत्पद्यते। अतः लक्षणे ज्ञानत्वमपि उपादीयते। अनेन प्रकारेण यदि ज्ञानत्वमात्रम् अनुमितेः लक्षणं दीयते तर्हि अनुमित्यतिरिक्ते प्रत्यक्षादिज्ञानेऽतिव्याप्तिः अतो हेतोः 'परामर्शजन्यम्' इति। किन्तु 'परामर्शजन्यत्वे सति ज्ञानत्वम्' अस्य लक्षणस्यापि प्रत्यक्षज्ञानेऽतिव्याप्तिः प्रदर्शिता। यतोहि संशयस्य अनन्तरं यदा प्रत्यक्षज्ञानमुत्पद्यते तदा तज्ज्ञानं परामर्शजन्यमेव भवतीति तर्कः दीयते अत्र। यथा – स्थाणुर्वा पुरूषो वा ? संशयेऽस्मिन् 'अयं स्थाणुः' इत्याकारकप्रत्यक्षज्ञानं

[246] व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। तर्कसंग्रहः - परामर्शलक्षणम्

‘स्थाणुत्व-व्याप्य-वक्रकोटरादिमान् अयं स्थाणुः’ इति परामर्शानन्तरमेव भवति यथा ‘पर्वतो वह्निमान्’ इदम् अनुमितिज्ञानं ‘वह्नि-व्याप्य-धूमवानयं पर्वतः’ इति परामर्शजन्यः। उपर्युक्तोदाहरणे स्थाणुत्वं साध्यं (व्यापकम्), वक्र-कोटरादिमत्त्वं हेतु (व्याप्यम्) तथा स्थाणुः पक्षः वर्तते। यतोहि ‘व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः’ अतः अत्रापि ‘स्थाणुत्वव्याप्यवक्र-कोटरादिमान् अयं स्थाणुः’ इति परामर्शः। एतस्मात् उत्पन्नं ‘स्थाणुत्वविशिष्टस्थाणुः’ इति ज्ञानं तु प्रत्यक्षं नानुमितिः। अतः अनुमितिलक्षणस्य प्रत्यक्षज्ञानेऽपि अतिव्याप्तिः। प्रत्यक्षज्ञानेऽतिव्याप्तिनिवारणाय अनुमितिलक्षणे ‘अनुमितित्व’पदमपि योजनीयमित्युच्यते उपन्यासकारेण। यतोहि अनुमितिज्ञाने एव अनुमितित्वस्य भावः वर्तते। अनुमितिज्ञाने ‘अहम् अनुमिनोमि’ इत्याकारकानुव्यवसायात्मकज्ञानमेव अनुमितित्वस्थितौ प्रमाणम्। प्रत्यक्षज्ञाने तु ‘अहं स्थाणुं साक्षात्करोमि’ एतादृशानुव्यवसायात्मकज्ञानं भवति न तु ‘स्थाणुम् अनुमिनोमि’ इति ज्ञानम्। अतः परामर्शजन्यान्तरमपि द्वयोः अनुव्यवसायः भिन्नः। एवम्प्रकारेण प्रत्यक्षज्ञाने अनुमितित्वस्य सत्त्वे न किमपि प्रमाणमस्ति किन्तु अनुमितौ तु तस्याः अनुव्यवसाय एव अनुमितित्वं प्रमाणयति। अतः अनुमितिलक्षणे ‘अनुमितित्वम्’ इति पदं नियुज्य प्रत्यक्षेऽतिव्याप्तिः निवार्यते। अतः ‘परामर्शजन्यत्वे सति अनुमितित्वज्ञानत्वम्’ इति अनुमितिलक्षणं वक्तुमर्हामः।

**उपन्यासः -** परामर्शो लक्ष्यः। परामर्शत्वं लक्ष्यताऽवच्छेदकम्। ‘व्याप्ति-विशिष्ट-पक्षधर्मता-ज्ञानत्वं’ लक्षणम्। ‘व्याप्ति-विशिष्टत्व’मात्रोक्तौ ‘धूमो वह्नि-व्याप्य’ इत्याकारक-ज्ञानेऽव्याप्तिः तत्र व्याप्ति- विशिष्ट-ज्ञानत्वस्य सत्वात्, अतः ‘पक्ष-धर्मताकत्वम्’ उक्तम्। ‘पक्ष-धर्मताकत्व’मात्रोक्तौ, ‘धूमवान्पर्वत’ इत्याकारक-ज्ञानेऽतिव्याप्तिः, तत्र पक्ष-धर्मताकत्वस्य सत्वात्, अतो ‘व्याप्ति-विशिष्टत्वम्’ उक्तम्। ‘ज्ञानत्व’-मात्रोक्तावनुमितावातिव्याप्तिः, अतो ‘व्याप्ति-विशिष्ट-पक्ष धर्मकताकत्वमुक्तम्, तत्र व्याप्ति-विशिष्ट-पक्ष-धर्मकताकत्वाभावान्नातिव्याप्तिः। ‘वह्नि-व्याप्य-धूमवानयं पर्वतोवह्निमान्’ इत्याकारकानुमितावतिव्याप्तिः, व्याप्ति-विशिष्ट-पक्षधर्मता- ज्ञानत्वस्य सत्वात्, अतः ‘परामर्शत्वं’ निवेश्यम्, परामर्शत्वस्य तत्राभावान्नातिव्याप्तिः। परामर्शत्वं जाति विशेषः। तत्प्रमाणं तु ‘परामर्शयामि’ इत्याकारकानुव्यवसाय एव।

**हिन्द्यनुवादः –** परामर्श लक्ष्य है। परामर्शत्व लक्ष्यता-अवच्छेदक है। 'व्याप्ति से विशिष्ट पक्षधर्मता का ज्ञान ही' परामर्श है। लक्षण में 'व्याप्तिविशिष्ट' मात्र कहने पर 'धूमो वह्नि-व्याप्य' अर्थात् 'धूम का वह्नि व्याप्य होना' इस ज्ञान को भी परामर्श कहा जाने लगेगा क्योंकि यहाँ भी व्यापक (वह्नि) एवं व्याप्य (धूम) से युक्त व्याप्ति-विशिष्टज्ञान होने से। अतः लक्षण में 'पक्षधर्मताकत्व' का भी ग्रहण किया गया। इसी प्रकार 'पक्षधर्मताकत्व' मात्र ग्रहण करने पर 'धूमवान् पर्वतः' इस प्रकार के ज्ञान में भी अतिव्याप्ति हो जाती क्योंकि यहाँ भी हेतु (धूम) के पक्षवृत्तित्व अर्थात् 'पर्वत में वृत्ति' का ज्ञान हो रहा है। अतः यहाँ भी पक्षधर्मता है। इसीलिए परामर्श के लक्षण में 'व्याप्ति-विशिष्टत्व' भी कहा गया। 'ज्ञानत्व' मात्र कहने पर अनुमिति इत्यादि ज्ञान भी परामर्श हो जाते, अतः 'व्याप्ति से विशिष्ट पक्षधर्मता का ज्ञान' यह परामर्श का लक्षण दिया गया। अनुमिति आदि ज्ञानों में 'व्याप्तिविशिष्टपक्षधर्मताकत्व' का अभाव होने से अतिव्याप्ति नहीं होगी। पुनः 'व्याप्ति से विशिष्ट पक्षधर्मता का ज्ञान ही परामर्श है' इस लक्षण में भी अतिव्याप्तिदोष का कथन किया गया है। प्रस्तुत लक्षण 'वह्निव्याप्यधूमवानयं पर्वतो वह्निमान्' इस अनुमिति में भी 'व्याप्ति से विशिष्ट पक्षधर्मता का ज्ञान होने से' अर्थात् 'वह्नि से युक्त धूम वाले पर्वत का ज्ञान अनुमिति में भी होने से' अतिव्याप्त हो रहा है। इस अतिव्याप्ति निवारण हेतु परामर्श के लक्षण में 'परामर्शत्व' भी कहना चाहिए क्योंकि 'परामर्शत्व' का अनुमिति में अभाव होने से अतिव्याप्ति नहीं होगी। 'परामर्शत्व' जाति विशेष है। इसके होने में 'मैं परामर्श करता हूँ' इस प्रकार का अनुव्यवसायज्ञान ही प्रमाण है।

## विश्लेषणम्

**परामर्शलक्षणम् –** सामान्यतः संस्कृतवाङ्मये परामर्शस्य बहवोऽर्थाः प्रचलिताः यथा – विचारः, चिन्तनम्, विमर्शः, आकर्षणम्, आक्रमणमादिः।[247] किन्तु न्यायवैशेषिकदर्शने 'परामर्श' इति पारिभाषिकं पदं वर्तते। अत्र परामर्शः अनुमानस्य अभिन्नावयवरूपेण तिष्ठति। उपन्यासे परामर्श एवं लक्ष्यते - **'व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं'** परामर्शस्य लक्षणम्। व्याप्तिः

[247] संस्कृत-हिन्दी कोश – पृष्ठम् ४७९

अर्थात् व्याप्यस्य व्यापकस्य च साहचर्यनियमः।[248] पक्षधर्मता इत्यर्थः हेतोः व्याप्यस्य वा सन्दिग्धसाध्याधिकरणे (पक्षे) वृत्तित्वस्य ज्ञानम्।[249] एवम्प्रकारेण व्याप्य-व्यापकसाहचर्यविशिष्टस्य हेतोः अर्थात् व्याप्यस्य पक्षे वृत्तिविषयकं यज्ज्ञानमुत्पद्यते तदेव परामर्शः। अधुना परामर्शलक्षणस्य परीक्षा विहिता आचार्येण। यदि अत्र 'व्याप्तिविशिष्टत्व'मात्रम् उच्यते तर्हि 'धूमो वह्निव्याप्यः' इदं ज्ञानमपि परामर्शः भविष्यति यतोहि अत्रापि व्याप्य-व्यापकयोश्च साहचर्यनियमस्तु अस्त्येव। अत एव 'पक्षधर्मताकत्वम्' उक्तम्। इदं ज्ञानं व्याप्तिविशिष्टन्तु किन्तु पक्षधर्मतायुतं न। अतः न अत्रातिव्याप्तिः परामर्शलक्षणस्य। एवम्प्रकारेण 'पक्षधर्मताकत्व'मात्रोक्तौ 'धूमवान्पर्वतः' एतादृशज्ञानेऽतिव्याप्तिः जायते हेतोः व्याप्यस्य वा पर्वते वृत्तित्वात्, अतो हेतोः 'व्याप्तिविशिष्टत्वम्' उपात्तम्। 'धूमवान्पर्वतः' इत्यत्र व्याप्तिविशिष्टत्वाभावान्नातिव्याप्तिः। परामर्शलक्षणे 'ज्ञानत्व'मात्रोक्ते सति स्वयमनुमितिज्ञानेऽतिव्याप्तिः , अतः 'व्याप्तिविशिष्टपक्षधर्मताकत्वम्' इत्यस्य उपादानम्। किन्तु एतत्ग्रहणेऽपि 'वह्निव्याप्यधूमवान् अयं पर्वतो वह्निमान्' एवम्प्रकारकानुमितिज्ञाने तु अतिव्याप्तिः भवत्येव यतोहि व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य अर्थात् 'वह्निव्याप्यधूमवान् अयं पर्वतः' इत्यस्य ज्ञानस्य अनुमितिज्ञानेऽपि सत्त्वात्। अतो हेतोः लक्षणे 'परामर्शत्वं' अर्थात् परामर्शस्य जातिविशेषः अपि कथनीयः। एतस्य कथने उपर्युक्तानुमितौ परामर्शत्वस्य अभावात् अतिव्याप्तिदोषः न भविष्यति यतोहि 'परामर्शत्वं' तु परामर्शे एव तिष्ठति न तु अनुमितौ। उपन्यासकारेण परामर्शत्वस्यापि प्रमाणं 'अहं परामर्शयामि' इति अनुव्यवसायात्मकज्ञानेनैव संसूच्यते।

**उपन्यासः -** पक्ष-धर्मता-ज्ञानं लक्ष्यम्। पक्षधर्मताज्ञानत्वं लक्ष्यताऽवच्छेदकम्। 'धूम-प्रकारक-पक्ष[पर्वत][250]-विशेष्यकत्वं' लक्षणम्। 'धूम-प्रकारकत्व'-मात्रौक्तौ 'धूमवान्महानसः' इत्याकारकज्ञानेऽतिव्याप्तिः, धूम-प्रकारकत्वस्य तत्र सत्वात्, अतः 'पक्ष[पर्वत]-विशेष्यकत्वम्'

---

[248] 'यत्र यत्र धूमः (व्याप्यः) तत्र तत्र वह्निः (व्यापकः)' इति साहचर्यनियमो व्याप्तिः। तर्कसंग्रह - व्याप्तिलक्षणम्

[249] व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता। तर्कसंग्रह - पक्षधर्मतालक्षणम्

[250] अत्र अन्यप्रतीसु 'पर्वत' इत्युक्तम्। अर्थसंगतिदृष्ट्या अपि 'पर्वतविशेष्यकत्वं' भवेत् यतोहि अग्रे 'धूमप्रकारकत्वं' कथितम्। किन्तु सम्पूर्णपदकृत्ये 'पक्ष' इत्यस्ति। अतः अत्र पदद्वयं नियोज्यते।

उक्तम्, महानसस्य पक्षत्वाभावान्नातिव्याप्तिः। 'पक्ष[पर्वत]-विशेष्यकत्व-'मात्रोक्तावनुमितावतिव्याप्तिः, अतो 'धूमप्रकारकत्वम्' उक्तम्, तत्र धूमप्रकारकत्वाभावान्नातिव्याप्तिः॥

**हिन्द्यनुवादः -** पक्षधर्मताज्ञान लक्ष्य है। पक्षधर्मताज्ञानत्व लक्ष्यता अवच्छेदक है। 'धूम प्रकार का पक्ष [पर्वत] विशेष्य वाला होना ही' पक्षधर्मता का लक्षण है अर्थात् धूम का अपने अधिकरण (पक्ष) में रहना ही पक्षधर्मता है। लक्षण में 'धूमप्रकारकत्व' मात्र कहने पर 'धूमवान् महानसं' इस ज्ञान में भी धूम के प्रकार होने से अतिव्याप्ति हो जाती अतः 'पक्ष [पर्वत] विशेष्यकत्व' का भी उच्चारण किया गया। 'महानस' रूप विशेष्य में पक्षत्व (सन्दिग्ध साध्य अर्थात् वह्नि की सत्ता) का अभाव होने से अतिव्याप्ति का निवारण हो जाता है। इसी भाँति लक्षण में मात्र 'पक्ष [पर्वत] विशेष्यकत्व' का ग्रहण करने पर अनुमिति ('पर्वतो वह्निमान्') में अतिव्याप्ति हो जाएगी। इस अतिव्याप्ति के निवारण हेतु ही पक्षधर्मता के लक्षण में 'धूमप्रकारकत्व' का भी उपादान किया गया है। उपर्युक्त अनुमिति में धूमप्रकारकत्व नहीं है। अतः अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**पक्षधर्मतालक्षणम् -** परामर्शनिरूपणानन्तरं पक्षधर्मता निरूपिता टीकाकारेण यतोहि परामर्शलक्षणे पक्षधर्मताज्ञानमभिहितम्। अतः पक्षधर्मताज्ञानमित्यत्र पक्षधर्मता का ? इत्याकांक्षया तत्स्वरूपं निरूपयति यत् **'धूमप्रकारकपक्ष[पर्वत]विशेष्यकत्वं'** पक्षधर्मता। अर्थात् यत्र पक्षः (सन्दिग्धसाध्यं यत्र सः पक्षः[251]) विशेष्यः, तस्मिन् विशेष्ये धूमप्रकारत्वस्य वृत्तिरेव पक्षधर्मता। तर्कसंग्रहेऽपि धूमस्य व्याप्यस्य वा पर्वतादौ अथवा पक्षरूपविशेष्ये वृत्तित्वमेव पक्षधर्मता कथ्यते।[252] अत्र व्याप्यस्य धूमस्य वा नाम व्याप्त्याश्रयः। यतोहि व्याप्तेः आश्रयः व्याप्यः एवं स व्याप्यः धूमादिः।[253] एतस्य धूमस्यैव पर्वते अर्थात् पक्षरूपविशेष्ये (वह्निरूपसन्दिग्धसाध्यत्वात् पर्वतः पक्षः एवं अस्मिन्नेव पर्वते धूमस्य वृत्तित्वात् पर्वतः विशेष्यो अपि) आधेयत्वमेव पक्षधर्मता। लक्षणे 'धूमप्रकारत्व'मात्रोक्ते सति 'धूमवान्महानस'

---

[251] तर्कसंग्रहः - पक्षलक्षणम्

[252] तत्रैव

[253] पदकृत्यम् - पक्षधर्मतालक्षणम्

इत्यत्रापि धूमप्रकारकत्वस्य सत्त्वात्, पक्षधर्मता भविष्यति। अतः 'पक्षविशेष्यकत्वं' उच्चारितम्। 'धूमवान्महानसम्' अत्र धूमप्रकारकत्वम् अस्ति किन्तु पक्षविशेष्यकत्वं न यतोहि महानसे साध्यं (वह्निः) सन्दिग्धं न अपितु निश्चितः। अतः महानसं सपक्षः अस्ति पक्षः न। एतादृशसपक्षरूपविशेष्येऽतिव्याप्तिवर्जनाय एव लक्षणे 'पक्ष[पर्वत]विशेष्यकत्वम्' इत्युच्यते। महानसे पक्षत्वाभावात् अत्र पक्षधर्मतालक्षणस्य नातिव्याप्तिः। यदि 'पक्ष[पर्वत]विशेष्यकत्वम्' इत्येव पक्षधर्मतायाः लक्षणं कथितं तर्हि अनुमितिज्ञानेऽतिव्याप्तिः यतोहि अत्रापि पक्ष[पर्वत]विशेष्यकत्वं तु भवत्येव। किन्तु 'धूमप्रकारकत्वं' उक्ते सति नेयमतिव्याप्तिः, अनुमितौ धूमप्रकारकत्वाभावात्। अतः पक्षधर्मतायाः 'धूमप्रकारक-पक्ष[पर्वत]विशेष्यकत्वम्' इदं लक्षणमपि तर्कसंग्रहकारस्यैव आशयं विवेचयन् स्वनिर्दुष्टतां साधयति।

**उपन्यासः -** व्याप्तिर्लक्ष्या। व्याप्तित्वं लक्ष्यताऽवच्छेदकम्। 'साहचर्य-नियमत्वं' लक्षणम्। साहचर्यं= सामानाधिकरण्यम्। नियमश्च = हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिताऽनव-च्छेदकधर्मवत्वम्। एवं च 'हेतुः = धूमः, तत्समानाधिकरणोयोऽन्त्यन्ताभावः – नहि वह्न्यत्यन्ताभावः, अपि तु घटात्यन्ताभावः - तादृशाभावप्रतियोगी घटः, प्रतियोगिताऽवच्छेदकं = घटत्वम्, अनवच्छेदकं = वह्नित्वम्, तदवच्छिन्न-सामानाधिकरण्यं धूमेऽस्ति।' इति लक्षण- समन्वयः।

'नास्ति च धूमवान् वह्नेः' इत्यत्र 'हेत्वधिकरणम् = अयो-गोलकम्, तदवृत्तिर्योऽत्यन्ताभावो= धूमात्यन्ताभावः, तत्प्रतियोगिताऽवच्छेदकमेव = साध्यताऽवच्छेदकीभूतं धूमत्वम् इति नातिव्याप्तिः। अत्र साध्यताऽवच्छेदके 'प्रतियोगिताऽनवच्छेदकत्वानुपादाने 'वह्निमान्धूमात्' इत्यत्र 'हेत्वधिकरणं = पर्वतः, तद्-वृत्तिः 'एक-सत्त्वेऽपि द्वयं नास्ति' इति रीत्या वह्नि-घटोभयात्यान्ताभावः, तस्य प्रतियोगी = वह्निः साध्यम्, अप्रतियोगि न भवति।' इत्यव्याप्तिः, अतस्तदुपादाने च 'हेत्वधिकरणं = पर्वतः, तद्वृत्तिः = विद्यमानो योऽत्यन्ताभावो = वह्निघटोभयात्यन्ताभावः, तत्प्रतियोगि = उभयम्, प्रतियोगिताऽवच्छेदकम् = उभयत्वम्, अनवच्छेदकं = साध्यताऽवच्छेदकं वह्नित्वं भवति।' इति नाव्याप्तिः।

**हिन्द्यनुवादः –** व्याप्ति लक्ष्य है। व्याप्तित्व लक्ष्यता अवच्छेदक है। 'साहचर्य नियम' ही व्याप्ति का लक्षण है। 'समानाधिकरण्य' ही साहचर्य है एवं हेतु के समानाधिकरण के अत्यन्ताभाव

की प्रतियोगिता का अनवच्छेदक धर्म (साध्यतावच्छेदक) का होना ही नियम है। ('व्याप्ति' का यही सिद्धान्त लक्षण इस प्रकार समझना चाहिए – हेतु के समानाधिकरण के अत्यन्ताभाव की प्रतियोगिता का अनवच्छेदक जो साध्यतावच्छेदक है, उससे अवच्छिन्न साध्य का समानाधिकरण्य हेतु में होना ही व्याप्ति है।) अब इस लक्षण का निम्न उदाहरण (पर्वतो वह्निमान् धूमात्) में समन्वय किया गया है। जैसे कि धूम हेतु है, उसका समानाधिकरण (साध्य) है वह्नि, इस समानाधिकरण का जो अत्यन्ताभाव पर्वत पर है वह वह्नि का अत्यन्ताभाव नहीं है अपितु घट का अत्यन्ताभाव है। अतः इस अत्यन्ताभाव का प्रतियोगी हुआ घट एवं प्रतियोगिता अवच्छेदक हुआ घटत्व। इस प्रतियोगिता का अनवच्छेदक हुआ 'वह्नित्व' जो कि वह्नि के साध्य होने से साध्यता का अवच्छेदक भी है। इस साध्यतावच्छेदक (वह्नित्व) से अवच्छिन्न साध्य है (वह्नि) है। इस प्रकार इस वह्नि का समानाधिकरण्य धूम में ही होने से इस उदाहरण में व्याप्ति लक्षण की संगति निर्दुष्ट है।

अब इस व्याप्ति लक्षण की परीक्षा 'नास्ति च धूमवान् वह्नेः' इस उदाहरण में की गयी है। (यहाँ पर हेतु है 'वह्नि' एवं साध्य है 'धूम'। वह्नि (हेतु) का अधिकरण महानसादि के अतिरिक्त अयो-गोलक भी होता है) अतः यहाँ हेतु का अधिकरण 'अयो-गोलक' लिया गया है, अयो-गोलक में रहने वाला जो अत्यन्ताभाव है वह धूमात्यन्ताभाव है। इस अभाव का प्रतियोगी है धूम, अतः प्रतियोगिता का अवच्छेदक हुआ 'धूमत्व' जो कि साध्यतावच्छेदक भी है। (जबकि साध्यतावच्छेदक प्रतियोगिता का अनवच्छेदक होता है ) अतः प्रस्तुत असद् हेतु स्थल में व्याप्तिलक्षण की अतिव्याप्ति नहीं होगी।

यदि व्याप्ति के लक्षण में साध्यतावच्छेदक के विशेषण के रूप में 'प्रतियोगितानवच्छेदक' का ग्रहण न किया जाए तो 'वह्निमान् धूमात्' इस सद् हेतु स्थल में भी व्याप्तिलक्षण की अव्याप्ति होगी। क्योंकि 'एकसत्त्वेऽपि द्वयं नास्ति' अर्थात् 'किसी अधिकरण में एक वस्तु के होने पर भी उसके साथ उच्चरित दूसरी वस्तु के न होने पर, दोनों का अभाव होता है' न्यायदर्शन के इस नियमानुसार हेतु के अधिकरण 'पर्वत' पर रहने वाला जो अत्यन्ताभाव है वह 'वह्नि-घट उभय का अत्यन्ताभाव' है (यद्यपि यहाँ पर वह्नि-घट उभयाभाव है, किन्तु इस अभाव का प्रतियोगी वह्नि, घट तथा उभय एवं प्रतियोगिता अवच्छेदक वह्नित्व, घटत्व तथा उभयत्व तीनों ही माने जाएगे। इनमें से किसी एक का ग्रहण भी यथाप्रसङ्ग प्रतियोगी के रूप में

किया जा सकता है।) व्याप्तिलक्षण में अव्याप्तिदोष सिद्ध करने हेतु इन तीनों मे 'प्रतियोगी' के रूप में वह्नि का ग्रहण किया गया है, अप्रतियोगी के रूप में नहीं। अतः यहाँ पर प्रतियोगिता का अवच्छेदक 'वह्नित्व' हुआ जो कि साध्यता का भी अवच्छेदक है। इस प्रकार 'वह्निमान् धूमात्' इस सद् हेतु स्थल में भी वह्नि अर्थात् साध्य का ही अभाव सिद्ध होने से 'व्याप्ति लक्षण' अव्याप्त हो गया। इसी अव्याप्ति निवारण हेतु साध्यतावच्छेदक को प्रतियोगितानवच्छेदक कहा गया अर्थात् साध्यता का अवच्छेदक वही होना चाहिए जो प्रतियोगिता का अनवच्छेदक हो, अवच्छेदक नहीं। ऐसा कहने पर हेतु के अधिकरण पर्वत में जो 'वह्नि-घट उभयात्यन्ताभाव' है इसका प्रतियोगी 'उभय' अतिव्याप्तिनिवारण की दृष्टि से प्रासङ्गिक प्रतियोगी होगा तथा प्रतियोगिता-अवच्छेदक होगा 'उभयत्व' (चूँकि 'वह्नित्व' को मानने से साध्यतावच्छेदक ही प्रतियोगितावच्छेदक हो जाता जबकि उसे प्रतियोगिता अनवच्छेदक होना चाहिए, इसी नियम के कारण 'उभयत्व' का ग्रहण किया गया।) एवं अनवच्छेदक होगा 'वह्नित्व' जो कि साध्यतावच्छेदक है। अतः अव्याप्तिदोष नहीं होगा।

## विश्लेषणम्

**व्याप्तिलक्षणम् –** परामर्शलक्षणे 'व्याप्तिविशिष्ट' इति पदं प्रयुक्तम्। अत एव क्रमशः व्याप्तिलक्षणं प्रतिपाद्यते इदानीम्। सामान्यतः व्याप्तिर्नाम '**साहचर्यनियमत्वम्'** इत्युच्यते टीकाकारेण। साहचर्यमित्युक्तौ आकाङ्क्षा जायते कस्य साहचर्यम् ? इति चेत् हेतु-साध्ययोश्च साहचर्यमवगन्तव्यम्। साहचर्यमेव सामानाधिकरण्यं कथ्यते। अतः सरलभाषायां हेतुसाध्यसामानाधिकरण्यनियम एव व्याप्तिरिति।[254] किन्तु उपन्यासकारेण व्याप्तिलक्षणस्य सकला परीक्षा '**हेतुसामानाधिकरणात्यन्ता- भावप्रतियोगिताऽनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति'**[255] व्याप्तेः मूलसिद्धान्तव्याप्तिलक्षणमवलम्ब्य एव क्रियते इति ध्यातव्यम्। अत्र हेतोः समानाधिकरणे विद्यमानस्य अत्यन्ताभावस्य **प्रतियोगितायाः अनवच्छेदकमेव साध्यतावच्छेदकं'** भवतीति प्रामुख्येन अवगन्तव्यम्।


---

254 तर्कदीपिका - व्याप्तिलक्षणम्

255 तत्त्वचिन्तामणि – अनुमानप्रकरणे सिद्धान्तव्याप्तिविचारप्रसङ्गः

**आरेखीयप्रस्तुतिः –** 'प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकम्'

'पर्वतो वह्निमान् धूमात्'




**चित्रक्रमाँकः २६**

अस्मिन् प्रसङ्गे सर्वप्रथमं 'पर्वतो वह्निमान् धूमात्' इत्यत्र लक्षणसमन्वयः प्रदर्शितः। तदनु 'नास्ति च धूमवान् वह्नेः' इत्यस्मिन् असद्-हेतुस्थले व्याप्तिलक्षणस्य अतिव्याप्तिः निराकृता। उचितव्याप्तौ हेतुः व्याप्यः तथा साध्यः व्यापकः भवति। किन्तु अत्र हेतुः व्यापकः साध्यश्च व्याप्यः इति सत्त्वात् असद्-हेतुस्थलमिदम्। 'असद्-हेतुः' इत्यर्थः 'न सद्-हेतुः' अर्थात् हेत्वाभासः। अत्र 'वह्निः' इति हेतुः नापितु व्याप्यत्वासिद्ध हेत्वाभासः, उपाधियुक्तत्वात्। यतोहि साध्यव्यापकत्वात् (यत्र यत्र धूमस्तत्र तत्र आर्द्रेन्धनसंयोगः) एवञ्च साधनाव्यापकत्वात् (यत्र यत्र वह्निस्तत्र तत्र नार्द्रेन्धनसंयोगः) आर्द्रेन्धनसंयोगः अत्र वह्निरूपहेतोः उपाधिरूपेण उपस्थितः (यत्र यत्र आर्द्रेन्धनसंयुक्तो वह्निः तत्र तत्र धूमः)। अतः सोपाधिकहेतोः सत्त्वात् उपर्युक्तस्थले व्याप्यत्वासिद्धहेत्वाभासः। अत्र व्याप्तिलक्षणस्य अतिव्याप्तिसंभावना निराक्रियते।

पुनः **'एकसत्त्वेऽपि द्वयं नास्ति'** इति न्यायसिद्धान्तेन व्याप्तिलक्षणे अव्याप्तिदोषं प्रदर्श्य तस्य परिवर्जनं कृतम्। 'एकसत्त्वेऽपि द्वयं नास्ति' इति सिद्धान्तं 'एकस्याभावेन उभयस्यैव अभावः'

बोध्यते। अस्मिन् विषये नव्यन्यायभाषाप्रदीपेऽपि एवं कथितम् – **'गृहे केवलस्य पटस्य सत्त्वेऽपि घटस्याभावेन पटघटोभयस्यापि अभावोऽस्त्येव एकाभावेन उभयाभावस्य अवश्यम्भावित्वात्'**[256]। उपर्युक्तसिद्धान्तमाधृत्य 'पर्वते वह्निघटोभयात्यन्ताभावः' अनेन दृष्टान्तेन 'पर्वतो वह्निमान् धूमात्' इत्यत्र वह्निरूपसाध्यस्य अभावः वर्तते। अतः अस्मिन् सद्-हेतुस्थलेऽपि व्याप्तिलक्षणस्य अव्याप्तिं प्रकटीकृत्य अव्याप्तिदोषस्य निवारणं क्रियते व्याप्तिलक्षणस्य। एवम्प्रकारेण व्याप्तिलक्षणपरीक्षायां पूर्वम् अतिव्याप्तिदोषस्य पश्चादव्याप्तिदोषस्य च परीक्षणं विहितम् उपन्यासकारेण।

**उपन्यासः -** हेत्वधिकरणं = धूमावयवः, तद्वृत्तिर्योऽत्यन्ताभावः, स साध्यताऽवच्छेदक - सम्बन्धेन वह्न्यत्यन्ताभावः, तादृशाभाव- प्रतियोगिताऽवच्छेदकमेव = साध्यताऽवच्छेदकम्।' इति अव्याप्तिः। अतो 'हेतुताऽवच्छेदक'-सम्बन्धेन हेत्वधिकरणं बोध्यम्। एवं च 'हेतुताऽवच्छेदकी- भूत- संयोग- सम्बन्धेन हेत्वधिकरणं= पर्वतः न तु धूमावयवः- तद्- वृत्तिर् = घटात्यन्ताभावः, तस्य प्रतियोगिताऽवच्छेदकं= घटत्वम्, अनवच्छेदकं =साध्यताऽवच्छेदकं वह्नित्वम्। इति नाव्याप्तिः[अतिव्याप्तिः][257]।

'द्रव्य गुण-कर्मान्यत्व-विशिष्ट-सत्तात्वात्' इत्यत्र 'विशिष्ट-सत्तायाः शुद्ध-सत्तायाश्चैक्याद्धेतुत्वा-वच्छेदकीभूत-समवायसम्बन्धेन हेत्वाधिकरणं = गुणः, तद्वृत्तिर् = द्रव्यत्वात्यन्ताभावः, तस्य प्रतियोगिताऽवच्छेदकमेव साध्यताऽवच्छेदकं द्रव्यत्वत्वम् [द्रव्यत्वम्][258]। इत्यव्याप्तिः, अतो हेतुताऽवच्छेदकावच्छिन्न हेत्वाधिकरणं बोध्यम्, एवं च 'हेतुताऽवच्छेदकी-भूत-विशिष्ट-सत्तात्वावच्छिन्न-विशिष्ट-हेतुताऽवच्छेदकसमवाय-सम्बन्धावच्छिन्न-विशिष्ट-सत्ता-रूप-हेत्वाधिकरणं = द्रव्यमेव- न तु गुणः - तद् वृत्तिर् = गुणत्वात्यन्ताभावः,

---

256 नव्यन्यायभाषाप्रदीपः – Text 26

257 अत्र 'अतिव्याप्तिः' लिखितमासीत् किन्तु एतत्पूर्वम् अव्याप्तिदोषः उत्थापितः। अतः निवारणमपि अव्याप्तिदोषस्यैव न तु अतिव्याप्तिदोषस्य। पाठभेदे अपि 'अव्याप्तिदोषः' चर्च्यते। अतः 'अव्याप्तिदोषः' इत्येव कृतमत्र।

258 संपादितपुस्तके अत्र 'द्रव्यत्वम्' किन्तु अर्थसंगत्यानुसारेण न युक्तत्वात् 'द्रव्यत्वत्वम्' इति प्रयुज्यते।

तत्प्रतियोगितावच्छेदकं = गुणत्वत्वम् [गुणत्वम्][259] अनवच्छेदकं = द्रव्यत्वत्वम् [द्रव्यत्वम्][260]। इति नाव्याप्तिः।

**हिन्द्यनुवादः –** हेतु का अधिकरण धूमावयव है अर्थात् 'पर्वतो वह्निमान् धूमात्' यहाँ पर संयोगसम्बन्ध से पर्वत धूम का अधिकरण है किन्तु उसके अतिरिक्त धूम का अधिकरण समवायसम्बन्ध से धूमावयव भी है, क्योंकि उन्ही से धूम का निर्माण होता है ( यहाँ 'धूम' अवयवी एवं 'धूमपरमाणु' अवयव है। न्यायदर्शन में अवयवी अपने अवयव में समवायसम्बन्ध से रहता है। इसीलिए धूम अथवा अवयवी का अधिकरण धूमावयव है)। इस अधिकरण (धूमावयव) में रहने वाला जो अत्यन्ताभाव है। वह साध्यतावच्छेदक सम्बन्ध अथवा संयोगसम्बन्ध से वह्नि का अत्यन्ताभाव है। इस अभाव वाली प्रतियोगिता का अवच्छेदक 'वह्नित्व' है जो कि साध्यता का अवच्छेदक ही है। अतः 'पर्वतो वह्निमान् धूमात्' इस सद् हेतु स्थल में भी अव्याप्तिदोष होगा। इसीलिए यहाँ पर हेतुतावच्छेदक सम्बन्ध से ही हेतु अपने अधिकरण में रहता है, ऐसा समझना चाहिए किसी अन्य सम्बन्ध से नहीं। यहाँ पर हेतुता अवच्छेदक सम्बन्ध संयोग है क्योंकि उसी सम्बन्ध से हेतु अधिकरण में है। अतः हेतुतावच्छेदक संयोगसम्बन्ध से हेतु का अधिकरण जानना चाहिए। इस प्रकार हेतुतावच्छेदक संयोगसम्बन्ध से यहाँ हेतु (धूम) का अधिकरण पर्वत है धूमावयव नहीं। अब पर्वत पर रहने वाला जो अत्यन्ताभाव है वह घटात्यन्ताभाव है (न कि वह्न्यत्यन्ताभाव)। अतः प्रतियोगिता का अवच्छेदक 'घटत्व' हुआ एवं अनवच्छेदक हुआ 'वह्नित्व' जो कि साध्यतावच्छेदक है। इसलिए अव्याप्ति दोष का निराकरण हो जाता है।

अब हेतुतावच्छेदक सम्बन्ध के कहने पर भी 'द्रव्यं गुण-कर्मान्यत्व-विशिष्टसत्तात्वात्' इस सद् हेतु के उदाहरण में अव्याप्तिदोष प्रदर्शित किया गया है। (यहाँ पर 'द्रव्य' अधिकरण है, द्रव्य में समवायसम्बन्ध से रहने वाला 'द्रव्यत्व' साध्य है तथा 'विशिष्टसत्ता' हेतु है। न्यायशास्त्र में विशिष्टसत्ता एवं शुद्धसत्ता की अवधारणा है। शुद्धसत्ता द्रव्यगुणकर्म तीनों में एक साथ रहती है तथा विशिष्टसत्ता तीनों में पृथक्-पृथक् रहती है। किन्तु दोनो ही 'सत्ता' होने से भिन्न नहीं मानी जाती है।) उपर्युक्त उदाहरण में विशिष्टसत्ता एवं शुद्धसत्ता का ऐक्य मानने पर

[259] उपर्युल्लिखितपादटिप्पणीवत्

[260] तथैव

हेतुतावच्छेदक सम्बन्ध अर्थात् समवायसम्बन्ध से तो हेतु का अधिकरण 'गुण' भी हुआ (क्योंकि द्रव्य के अतिरिक्त गुण तथा कर्म में भी शुद्धसत्ता रहती है)। गुण में 'द्रव्यत्व' का अत्यन्ताभाव है, अतः प्रतियोगिता का अवच्छेदक 'द्रव्यत्वत्व' हुआ जो कि साध्यता (द्रव्यत्व) का भी अवच्छेदक है। अतः व्याप्तिलक्षण यहाँ अव्याप्त होने से दुष्ट है।

इसी कारण व्याप्तिलक्षण में हेतु को अपने अधिकरण में हेतुतावच्छेदकसम्बन्ध से अतिरिक्त हेतुतावच्छेदकधर्म से भी अवच्छिन्न समझना चाहिए, ऐसा उपन्यासकार के द्वारा कहा गया है। यहाँ पर हेतु है 'विशिष्टसत्ता' अतः हेतुतावच्छेदक हुआ 'विशिष्टसत्तात्व'। इसप्रकार हेतुतावच्छेदकधर्म 'विशिष्टसत्तात्व' से अवच्छिन्न तथा हेतुतावच्छेदक समवायसम्बन्ध से अवच्छिन्न विशिष्टसत्ता का अधिकरण हुआ 'द्रव्य' न कि गुण। अब अधिकरण अर्थात् 'द्रव्य' में रहने वाला अत्यन्ताभाव 'गुणत्व' का हुआ। अतः प्रतियोगितावच्छेदक 'गुणत्वत्व' हुआ तथा अनवच्छेदक हुआ 'द्रव्यत्वत्व' जो कि साध्यतावच्छेदक है। इसलिए व्याप्तिलक्षण की अव्याति इस सद् हेतु में नहीं होती है।


## विश्लेषणम्

**हेत्वधिकरणविचारः –** व्याप्तौ हेतुः सर्वप्रधानं वर्तते यतोहि हेतुरेव व्याप्तेः आश्रयः। अत एव हेतुः व्याप्त्याश्रयो अपि कथ्यते।[261] प्रसङ्गेऽस्मिन् अस्य हेतो एव अधिकरणस्य विवेचनं कृतम्। हेतोः स्वस्मिन् अधिकरणे नियमनाय हेतुतावच्छेदकसम्बन्धः तथा हेतुतावच्छेदकधर्मः उपस्थापितः। यो हेतुः स्वाधिकरणे हेतुतावच्छेदकसम्बन्धेन हेतुतावच्छेदकधर्मेण च तिष्ठति, स एव व्याप्तिलक्षणे सद्-हेतुः भवति। **येन सम्बन्धेन हेतुः अधिकरणे विद्यते स एव सम्बन्धः हेतुतावच्छेदकसम्बन्धः** भवति। यथा 'पर्वतो वह्निमान् धूमात्' अत्र हेतुः (धूमः) संयोगसम्बन्धेन अधिकरणे (पर्वते) वर्तते अतः संयोगसम्बन्धः हेतुतावच्छेदकसम्बन्धः अस्ति अस्मिन् स्थले।

261 व्याप्यः नाम व्याप्त्याश्रयः। स च धूमादिरेव। पदकृत्यम् - पक्षधर्मतालक्षणम्

**आरेखीयप्रस्तुतिः –** ‘हेतुतावच्छेदकसम्बन्धः’

‘पर्वतो वह्निमान् धूमात्’




**चित्रक्रमाँकः २७**


यदि हेतोः अधिकरणवृत्तिसम्बन्धः न निश्चीयते तर्हि ‘पर्वतो वह्निमान् धूमात्’ इत्यत्र धूमस्य अधिकरणं धूमावयव अपि भवितुं शक्यते यतोहि धूमः (अवयवी) धूमपरमाणुषु (धूमावयवेषु) अपि तिष्ठति। न्यायशास्त्रस्य सिद्धान्तः वर्तते यत् अवयवी अवयवे तिष्ठति यथा मनुष्यः करपादादिषु तिष्ठति। अतः धूमोऽपि धूमावयवेषु विद्यते। एवम्प्रकारेण धूमस्य पर्वतातिरिक्तम् अधिकरणं धूमावयव अप्यस्ति। धूमावयवे वह्नेः अत्यन्ताभावः, अतः ‘वह्निः’ प्रतियोगी ‘वह्नित्वं’ प्रतियोगितावच्छेदकम्। एवञ्च यत् प्रतियोगितावच्छेदकं तदेव साध्यतावच्छेदकम्। व्याप्तिलक्षणे तु प्रतियोगितानवच्छेदकं साध्यतावच्छेदकं वर्णितम्। अतः अस्मिन् सद्-हेतुस्थले व्याप्तिलक्षणम् अव्याप्तम्। अत एव ‘हेतुतावच्छेदकसम्बन्धः’ इत्युक्तम्। धूमः संयोगसम्बन्धेन पर्वते तिष्ठति तथा समवायसम्बन्धेन धूमावयवे। अतः ‘पर्वतो वह्निमान् धूमात्’ इत्यत्र हेतुतावच्छेदकसम्बन्धः संयोग एव न तु अन्यः। एवञ्च हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे पर्वते वह्न्यत्यन्ताभावः न अपितु घटाभावः। अतः ‘वह्नित्वं’ प्रतियोगितानवच्छेदकं तथा साध्यतावच्छेदकमपि। अतः नात्र व्याप्तिलक्षणस्य अव्याप्तिः।

हेतुतावच्छेदकसम्बन्धातिरिक्तो हेतुः हेतुतावच्छेदकधर्मेणापि अवच्छिन्नो भूत्वा स्वाधिकरणे भवेत् इत्यपि निश्चीयते। **हेतोः प्राकृतिकधर्म एव हेतुतावच्छेदकधर्मः कथ्यते**। यदि हेतुतावच्छेदकधर्मावच्छिन्नहेतुः न कथ्यते तर्हि ‘द्रव्यं गुण-कर्मान्यत्व-विशिष्टसत्तात्वात्’

इत्यस्मिन् सद्-हेतुस्थलेऽपि व्याप्तिलक्षणस्य अव्याप्तिः भविष्यति। अत्र विशिष्टसत्ता हेतुः, द्रव्यम् अधिकरणम्, द्रव्यत्वं साध्यम्। किन्तु अयं हेतुः **'विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात्'** इति नियमात् शुद्धसत्तायाः अधिकरणे अर्थात् गुणेऽपि विद्यते। विशिष्टसत्ता द्रव्य-गुण-कर्मत्रयेषु च पृथक्-पृथक् वर्तते किन्तु शुद्धसत्ता सम्मिलितरूपेणैव। शुद्धसत्ता विशिष्टसत्ता च सत्तात्वेन नातिरिच्यते। अस्मात् कारणात् 'विशिष्टसत्ता' इत्यस्य हेतोः अधिकरणं द्रव्यस्य अतिरिक्तगुणं गृहीत्वा गुणे द्रव्यत्वात्यन्ताभावः प्रदर्श्यते। अत्र द्रव्यत्वं प्रतियोगि, द्रव्यत्वत्वञ्च प्रतियोगितावच्छेदकम्। एवम्प्रकारेण प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकम्। अतः अत्र व्याप्तिलक्षणमव्याप्तम्। अतो हेतोः 'हेतुतावच्छेदकावच्छिन्नम्' इत्युक्तम्। अत्र हेतुः 'विशिष्टसत्ता' अतः हेतुतावच्छेदकधर्मः विशिष्टसत्तात्वम्। अथ च विशिष्टसत्तात्वं विशिष्टसत्तायां वर्तते न तु शुद्धसत्तायाम्। यद्यपि द्वयोः ऐक्यं स्वीक्रियते तथापि द्वयोः प्राकृतिकधर्मेण तु उभयोर्पृथक्त्वं जायते एव। एवम्प्रकारेण विशिष्टसत्तात्वावच्छिन्नविशिष्टसत्तारूपहेत्वधिकरणं द्रव्यं वर्तते। द्रव्ये गुणत्वाभावः, अतः गुणत्वं प्रतियोगि, गुणत्वत्वम् प्रतियोगितावच्छेदकं तथा साध्यतावच्छेदकं 'द्रव्यत्वत्वं' प्रतियोगितानवच्छेदकं वर्तते। अतो व्याप्तिलक्षणस्य अस्मिन् सद्-हेतुस्थले नाव्याप्तिः।

**आरेखीयप्रस्तुतिः –** 'हेतुतावच्छेदकधर्मः'

'द्रव्यं गुण-कर्मान्यत्वविशिष्टसत्तात्वात्'




**चित्रक्रमाँकः २८**

**उपन्यासः -** एवं च 'हेतुताऽवच्छेदकीभूत-संयोग सम्बन्धावच्छिन्न-हेतुताऽवच्छेदकीभूत-धूमत्वावच्छिन्न-धूम-रूप- हेत्वधिकरणं = पर्वतः, तद्वृत्तिः समवायसम्बन्धेन

वह्न्यत्यन्ताभावः, तस्य प्रतियोगिताऽवच्छेदकमेव= साध्यताऽवच्छेदक- वह्नित्वम्।' इत्यव्याप्तिः, अतो हेत्वधिकरण- वृत्यभावे साध्यताऽवच्छेदक-सम्बन्धावच्छिन्न- प्रतियोगिताकत्वं बोध्यम्, तथा च 'हेतुताऽवच्छेदक-सम्बन्धेन हेतुताऽवच्छेदकी- भूत- धूमत्वावच्छिन्न- धूमाधिकरण- पर्वत- वृत्तिः, साध्यताऽवच्छेदकी- भूत-संयोग- सम्बन्धावच्छिन्न- प्रतियोगिताको= घटात्यन्ताभावः नहि वह्न्यत्यन्ताभावः, संयोग- सम्बन्धेन वह्नेः सत्वात्- तत्प्रतियोगिताऽवच्छेदकं = घटत्वम्, अनवच्छेदकं= साध्यताऽवच्छेदकं वह्नित्वम्।' इति नाव्याप्तिः।

एवं 'विशिष्ट-सत्तावान् जातेः' इत्यत्र 'हेतुताऽवच्छेदकीभूत- समवायसम्बन्धावच्छिन्न- हेतुताऽवच्छेदक- जातित्वावच्छिन्न-जाति-रूप-हेत्वाधिकरणम् = गुणः, तदवृत्तिः = साध्यताऽवच्छेदकीभूत-समवाय- सम्बन्धावच्छिन्न- प्रतियोगिकाभावः नहि विशिष्ट- सत्तात्वावच्छिन्न- प्रतियोगिताकाभावः, विशिष्ट-सत्तायाः शुद्ध-सत्तायाश्चैक्यात्, अपितुद्रव्यत्वात्यन्ताभावः - तस्य प्रतियोगिताऽवच्छेदकं द्रव्यत्वत्वम्, अनवच्छेदकं= विशिष्ट- सत्तात्वम्।' इत्यतिव्याप्तिः, अतः'प्रतियोगिताऽवच्छेदकावच्छिन्न- प्रतियोगिताकत्वं हेत्वधिकरण- वृत्यभावे विशेषणं देयम्, तथा च हेतुताऽवच्छेदक- समवाय- सम्बन्धावच्छिन्न- हेतुताऽवच्छेदक- जातित्वाच्छेदक- जातित्वावच्छिन्न- जाति- रूप - हेत्वाधिकरण-गुणवृत्तिः साध्यताऽवच्छेदक- सम्बन्धावच्छिन्न- प्रतियोगिताऽवच्छेदक- विशिष्ट सत्तात्वावच्छिन्न- प्रतियोगिताक-विशिष्ट- सत्ताभावः, तत्प्रतियोगिताऽवच्छेदकमेव = साध्यताऽवच्छेदकम्, अनवच्छेदकं न भवति; इति नातिव्याप्तिः।

**हिन्द्यनुवादः –** 'पर्वतो वह्निमान् धूमात्' यहाँ पर हेतुता अवच्छेदकसम्बन्ध 'संयोगसम्बन्ध' से अवच्छिन्न तथा हेतुता अवच्छेदकधर्म 'धूमत्व' से अवच्छिन्न धूमरूप हेतु का अधिकरण पर्वत है। इस अधिकरण में समवायसम्बन्ध से 'वह्नि' का अत्यन्ताभाव है। इस अभाव की प्रतियोगिता का अवच्छेदक 'वह्नित्व' है जो कि साध्यता का अवच्छेदक है। यहाँ पर व्याप्तिलक्षण अव्याप्त हो रहा है। अतः हेतु के अधिकरण में रहने वाला अभाव साध्यतावच्छेदकसम्बन्ध (यहाँ साध्य / वह्नि संयोगसम्बन्ध से अपने अधिकरण में रहता है अतः संयोगसम्बन्ध ही साध्यतावच्छेदक सम्बन्ध है।) से अवच्छिन्न प्रतियोगिता वाला ही

समझना चाहिए। इस उदाहरण में जो वह्न्यत्यन्ताभाव है वह समवायसम्बन्ध से है, साध्यतावच्छेदक सम्बन्ध से नहीं। अतः हेतुतावच्छेदकसंयोगसम्बन्ध से अवच्छिन्न तथा हेतुतावच्छेदकधर्मधूमत्व से अवच्छिन्न धूम के अधिकरण पर्वत में रहने वाला घटात्यन्ताभाव ही साध्यतावच्छेदकसंयोगसम्बन्ध से अवच्छिन्न प्रतियोगिता वाला है, वह्नि का अत्यन्ताभाव नहीं क्योंकि संयोगसम्बन्ध से वह्नि पर्वत पर विद्यमान है। अतः उसी सम्बन्ध से उसका अभाव नहीं हो सकता। घटात्यन्ताभाव के प्रतियोगिता का अवच्छेदक 'घटत्व' है तथा अनवच्छेदक 'वह्नित्व' है। इस प्रकार प्रतियोगिता अनवच्छेदक के ही साध्यतावच्छेदक होने से यहाँ अव्याप्ति नही हुई।

अभाव की प्रतियोगिता को साध्यतावच्छेदकसम्बन्ध मात्र से अवच्छिन्न करने पर 'विशिष्टसत्तावान् जातेः' इस असद् हेतु स्थल में भी व्याप्तिलक्षण की अतिव्याप्ति होगी। अतः हेतु के अधिकरण में प्रतियोगितावच्छेदक धर्म से भी युक्त प्रतियोगिता वाला अभाव हो ऐसा अभाव का विशेषण देना चाहिए। क्योंकि 'विशिष्टसत्तावान् जातेः' यहाँ पर हेतु व्यापक है एवं साध्य व्याप्य है ('जाति' द्रव्य-गुण-कर्म तीनों में रहती है जबकि 'विशिष्टसत्ता' किसी एक में)। इस असद् हेतु स्थल में भी हेतुतावच्छेदक समवायसम्बन्ध से अवच्छिन्न तथा हेतुतावच्छेदकधर्म जातित्व से अवच्छिन्न 'जाति' हेतु है एवं इस हेतु का अधिकरण 'गुण' है। इस अधिकरण में रहने वाला अभाव साध्यतावच्छेदक समवायसम्बन्ध से अवच्छिन्न प्रतियोगिता वाला 'द्रव्यत्व' का अत्यन्ताभाव है। 'विशिष्टसत्तात्व' से अवच्छिन्न प्रतियोगिता वाला अभाव नहीं। 'क्योंकि विशिष्टसत्ता एवं शुद्धसत्ता दोनों एक ही होती है' इस नियम के होने से। (यद्यपि हेतु के अधिकरण 'गुण' में  हम द्रव्य में रहने वाली विशिष्टसत्ता का अभाव ग्रहण कर सकते थे जिससे अतिव्याप्ति का निवारण हो जाता। किन्तु उसके ग्रहण में पूर्वपक्ष ने यह समस्या रखी कि 'शुद्धसत्ता एवं विशिष्टसत्ता के एक होने से' गुण में विशिष्टसत्ता का अभाव मानने से शुद्धसत्ता का भी अभाव होने पर स्वयं गुण की जाति का भी अभाव हो जाएगा जो कि 'असम्भव' है। अतः गुण में 'द्रव्यत्वाभाव' का कथन किया गया विशिष्टसत्ताभाव का नहीं।) द्रव्यत्वाभाव का प्रतियोगी है 'द्रव्यत्व', प्रतियोगिता-अवच्छेदक है 'द्रव्यत्वत्व' एवं प्रतियोगितानवच्छेदक हुआ 'विशिष्टसत्तात्व' जो कि साध्यतावच्छेदक भी है। अतः इस असद् हेतु स्थल में भी 'व्याप्तिलक्षण' के घटित होने से इसमें अतिव्याप्तिदोष हो


जाएगा। इस अतिव्याप्तिनिवारण के लिए ही हेतु के अधिकरण में स्थित प्रतियोगिता वाले अभाव में 'प्रतियोगिता के अवच्छेदक से अवच्छिन्न प्रतियोगिता वाला अभाव' यह विशेषण भी देना चाहिए। ऐसा कहने पर 'विशिष्टसत्तावान् जातेः' इसमें हेतुतावच्छेदकसमवायसम्बन्ध से अवच्छिन्न एवं हेतुतावच्छेदकधर्मजातित्व से अवच्छिन्न 'जाति' रूप हेतु के अधिकरण 'गुण' में रहने वाला साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्न एवं प्रतियोगितावच्छेदक धर्म 'विशिष्टसत्तात्व' अर्थात् द्रव्य में रहने वाली विशिष्टसत्ता का प्राकृतिकधर्म 'विशिष्टसत्तात्व' से अवच्छिन्न प्रतियोगिता वाला 'विशिष्टसत्ताभाव' है। इसकी प्रतियोगिता का अवच्छेदक 'विशिष्टसत्तात्व' है, अनवच्छेदक नही। और यही 'साध्यतावच्छेदक' भी है। अतः यहाँ अतिव्याप्ति नहीं होगी। (यहाँ 'धर्म' के ग्रहण होने से विशिष्टसत्ता एवं शुद्धसत्ता के ऐक्य का नियमन हो गया क्योंकि विशिष्टसत्तात्व से अवच्छिन्न तो 'विशिष्टसत्ता' ही होगी न कि शुद्धसत्ता, क्योंकि उसके 'शुद्धसत्तात्व' से अवच्छिन्न होने के कारण । जैसे – 'नीलघट एवं पीतघट' में 'घट' मात्र कहने पर तो दोनों का ग्रहण हो जाएगा किन्तु 'नीलघटत्व' कहने पर मात्र 'नीलघट' का बोध होगा अर्थात् 'नीलघटत्व' इस धर्म ने समस्त घटों से इसे पृथक् कर दिया।)

## विश्लेषणम्

**हेत्वधिकरणे वृत्तिप्रतियोगिताकात्यन्ताभावस्य विवेचनम् –** हेत्वधिकरणचर्चानन्तरं सम्प्रति हेत्वधिकरणे यस्य प्रतियोगिनः अत्यन्ताभावः विद्यते तस्य अभावस्यापि नियमनं क्रियते उपन्यासाचार्येण। स अत्यन्ताभावः साध्यतावच्छेदकसम्बन्धावच्छिन्नः तथा प्रतियोगितावच्छेदकाव- च्छिन्नः भवति। **साध्यः येन सम्बन्धेन अधिकरणे तिष्ठति स सम्बन्धः साध्यतावच्छेदकसम्बन्धः भवति**। यथा 'पर्वतो वह्निमान् धूमात्' इत्यत्र वह्निः (साध्य) संयोगसम्बन्धेन पर्वते विद्यते अतः संयोगसम्बन्धः साध्यतावच्छेदकसम्बन्धः वर्तते।

**आरेखीयप्रस्तुतिः-** 'साध्यतावच्छेदकसम्बन्धः'

'पर्वतो वह्निमान् धूमात्'




**चित्रक्रमाँकः २९**

अनेन सम्बन्धेनैव अत्र प्रतियोगिनः अत्यन्ताभावः भवेत् अन्यथा अस्मिन् सद्-हेतुस्थलेऽपि व्याप्तिलक्षणस्य अव्याप्तिः भविष्यति। यतोहि पर्वते संयोगसम्बन्धेन वह्निः विद्यते किन्तु समवायसम्बन्धेन वह्न्यत्यन्ताभावः। नव्यन्याये अस्याः प्रक्रियाया सिद्धान्तः वर्तते यत् - **एकत्र एकेन सम्बन्धेन वर्तमानस्यापि सम्बन्धान्तरेण अभावो वर्तते**[262]। इदं सम्बन्धकृतवैलक्षण्यं कथ्यते नव्यन्याये। अनेन सिद्धान्तेन पर्वते वह्नेः संयोगसम्बन्धेन वर्तमाने सत्यपि अन्यसम्बन्धेन अर्थात् समवायसम्बन्धेन अभावः अस्ति। अतः वह्निः प्रतियोगी भविष्यति। एवम्प्रकारेण अत्र साध्यतावच्छेदकं वह्नित्वमेव प्रतियोगितावच्छेदकं। अतः व्याप्तिलक्षणमत्र अव्याप्तम्। अतो हेतोः साध्यतावच्छेदकसम्बन्धावच्छिन्न-प्रतियोगिताकः अत्यन्ताभाव उच्यते। अत्र साध्यतावच्छेदकसम्बन्धः संयोगः न तु समवायः, अत्र संयोगसम्बन्धेन न वह्न्यत्यन्ताभावः अपितु घटात्यन्ताभावः। प्रतियोगितावच्छेदकं घटत्वं, प्रतियोगितानवच्छेदकं वह्नित्वं तथा वह्नित्वमेव साध्यतावच्छेदकम्। अतः 'पर्वतो वह्निमान् धूमात्' नात्र व्याप्तिलक्षणस्य अव्याप्तिः।


---

262 नव्यन्यायभाषाप्रदीपः – Text 26

साध्यतावच्छेदकसम्बन्धेन सह प्रतियोगितावच्छेदकधर्मेणापि अत्यन्ताभावः अवच्छिन्नः भवेत् इत्युक्तं टीकाकारः। **प्रतियोगिनः प्राकृतिकधर्म एव प्रतियोगितावच्छेदक धर्म** कथ्यते। यदि अत्यन्ताभावः प्रतियोगितावच्छेदकधर्मेण न अवच्छिन्नः भवति तर्हि 'विशिष्टसत्तावान् जातेः' इति असद्धेतुस्थलेऽपि व्याप्तिलक्षणस्य अतिव्याप्तिः भवति। अत्र हेतुः (जातिः) व्यापकः तथा साध्यः (विशिष्टसत्ता) व्याप्यः। विशिष्टसत्ता द्रव्यगुणकर्मसु पृथक्-पृथक् (द्रव्यविषयकविशिष्टसत्ता, गुणविषयकविशिष्टसत्ता, कर्मविषयकविशिष्टसत्ता) वर्तते किन्तु जातिः त्रिषु विद्यते। अतः स्थलमिदम् असद्-हेतुस्थलमस्ति। अत्र जातिरूपहेतोः अधिकरणं गुणः। गुणे (द्रव्यविषयक) विशिष्टसत्तात्वस्य अभावः स्वीकरणीयः किन्तु विशिष्टसत्ता शुद्धसत्तायाश्चैक्यत्वात् यदि विशिष्टसत्तात्वस्य अभावः मन्यते तर्हि गुणेऽपि शुद्धसत्तायाः अर्थात् गुणत्वजातेः अभावः भवति। अतः गुणे द्रव्यत्वस्य अत्यन्ताभावः कथितः। प्रतियोगी द्रव्यत्वं, प्रतियोगितावच्छेदकं द्रव्यत्वत्वं तथा प्रतियोगितानवच्छेदकं विशिष्टसत्तात्वं यत् साध्यतावच्छेदकम्। अतः अत्रापि व्याप्तिलक्षणस्य समन्वयत्वात् अतिव्याप्तिदोषः। अस्य अतिव्याप्तिदोषस्य निवारणाय एव प्रतियोगितावच्छेदकधर्मावच्छिन्नः इति अत्यन्ताभावस्य विशेषणं दत्तम्। अधुना यदि विशिष्टसत्तायाः अत्यन्ताभावः अत्र स्वीक्रियते तर्हि स विशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकः विशिष्टसत्ताभावो भवति। अतः अस्या सत्तायाः अभावत्वे सति न शुद्धसत्ताया अपि अभावः यतोहि शुद्धसत्ता प्रतियोगितावच्छेदक-धर्मविशिष्टसत्तात्वाच्छिन्ना न अपितु शुद्धसत्तात्वावच्छिन्ना। अतः द्वयोः ऐक्यस्य निवारणात् 'विशिष्टसत्तावान् जातेः' इत्यत्र विशिष्टसत्ताभावः (गुणरूपाधिकरणे द्रव्यसम्बन्धिविशिष्टसत्ताभावः), प्रतियोगि विशिष्टसत्ता, प्रतियोगितावच्छेदकं विशिष्टसत्तात्वं यत् साध्यतावच्छेदकं वर्तते। अतः नात्र व्याप्तिलक्षणस्य अतिव्याप्तिः।

**आरेखीयप्रस्तुतिः –** 'प्रतियोगितावच्छेदकधर्मः'

'गुणः विशिष्टसत्तावान् जातेः' -




**चित्रक्रमाँकः ३०**

एवम्प्रकारेण व्याप्तिलक्षणे दोषत्रयवारणाय प्रत्युक्तहेत्वधिकरणविद्यमानात्यन्ताभावस्य साध्यतावच्छे- दकसम्बन्धावच्छिन्न-प्रतियोगितावच्छेदकावच्छिन्नश्च इति नियामकस्थितिद्वयं प्रकथितं टीकाकारेण।

**उपन्यासः -** अभावे 'हेत्वधिकरण-वृत्तित्वं' च = 'दैशिक-विशेषणता-सम्बन्धेन' बोध्यम्। अन्यथा 'वह्निमान्धूमादू' इत्यत्र हेत्वधिकरण = पर्वते साध्यताऽवच्छेदक-संयोगसम्बन्धावच्छिन्न-साध्यताऽवच्छेदक-वह्नित्वावच्छिन्न- प्रतियोगिताको= वह्न्यत्यन्ताभावो वह्निशून्यदेशे विद्यमानः, तस्यैव कालिक- सम्बन्धेन सत्वात्तत्प्रतियोगिताऽवच्छेदकं वह्नित्वं = साध्यताऽवच्छेदकम्, अनवच्छेदकं न भवति।' इत्यव्याप्तिः, तन्निवेशे च धूमाधिकरणं = पर्वत- वृत्तिर्दैशिक- विशेषणता- सम्बन्धेन संयोग-सम्बन्धावच्छिन्न-घटत्वावच्छिन्न-प्रतियोगिताको= घटात्यान्ताभाव एव- नहि वह्न्यत्यन्ताभावः, तेन संबन्धेन तस्य विरोधात् - तत्प्रतियोगिताऽनवच्छेदकं साध्यताऽवच्छेदकं भवति।' इति नाव्याप्तिः।

**हिन्द्यनुवादः –** हेतु के अधिकरण में 'अभाव' का वृत्तित्व दैशिकविशेषणतासम्बन्ध अर्थात् स्वरूपसम्बन्ध से ही समझना चाहिए किसी अन्य सम्बन्ध से नहीं। अन्यथा 'वह्निमान्

धूमाद्' इस सद् हेतु स्थल पर हेतु के अधिकरण 'पर्वत' में साध्यतावच्छेदक संयोगसम्बन्ध से अवच्छिन्न एवं साध्यतावच्छेदकधर्म 'वह्निनत्व' से अवच्छिन्न प्रतियोगिता वाला जो 'वह्नि का अत्यन्ताभाव' है। वह अभाव पर्वत पर नहीं है (क्योंकि इसी सम्बन्ध एवं धर्म से अवच्छिन्न वह्नि का 'पर्वत' पर भाव है।) अपितु 'पर्वत' के अतिरिक्त वह्निशून्य देश में 'वह्न्यत्यन्ताभाव' है। किन्तु इसी 'वह्न्यत्यन्ताभाव' का ही कालिकसम्बन्ध से 'पर्वत' पर विद्यमानता है। ऐसा होने पर 'वह्न्यत्यन्ताभाव' की प्रतियोगिता का अवच्छेदक 'वह्निनत्व' हुआ, अनवच्छेदक नहीं। प्रतियोगितावच्छेदक के ही साध्यतावच्छेदक होने से इस सद् हेतु में स्थल में 'व्याप्तिलक्षण' नहीं घटित हुआ। अतः इस लक्षण में अव्याप्तिदोष की संभावना होगी। किन्तु दैशिकविशेषणतासम्बन्ध अथवा स्वरूपसम्बन्ध का ग्रहण करने पर 'धूम' (हेतु) के अधिकरण पर्वत में रहने वाला साध्यतावच्छेदकसंयोगसम्बन्ध से अवच्छिन्न तथा साध्यतावच्छेदकधर्म 'घटत्व' से अवच्छिन्न 'घटात्यन्ताभाव' ही दैशिकविशेषणतासम्बन्ध से पर्वत पर है, वह्न्यभाव नहीं। क्योंकि संयोगसम्बन्ध से 'वह्नि' के 'पर्वत' पर उपस्थित होने से, स्वरूपसम्बन्ध से 'वह्नि के अत्यन्ताभाव' का विरोध हो रहा है। अतः घटात्यन्ताभाव की प्रतियोगिता का अवच्छेदक हुआ 'घटत्व' एवं अनवच्छेदक 'वह्निनत्व' हुआ। यहाँ प्रतियोगितानवच्छेदक के ही साध्यतावच्छेदक होने से अव्याप्ति नहीं हुई।

## विश्लेषणम्

**हेत्वधिकरणे वृत्त्यभावसामान्यस्य सम्बन्धचर्चा -** न्यायदर्शने स्वरूपसम्बन्धेन अभावः स्वाधिकरणे तिष्ठतीति मन्यते।[263] अत्र स्वरूपसम्बन्धस्य ज्ञानं प्रायः अभावस्य सम्बन्धरूपेण भवति। अतः उपन्यासाचार्येणापि व्याप्तिलक्षणान्तर्गते हेत्वधिकरणे यो अत्यन्ताभावः विद्यते स अभावो अपि स्वरूपसम्बन्धेन अथवा दैशिकविशेषणतासम्बन्धेन मन्यते। यदि एवं न कथ्यते चेत् 'पर्वतो वह्निमान् धूमात्' अत्रापि व्याप्तिलक्षणस्य अव्याप्तिर्जायते। यतोहि स्वरूपसम्बन्धेन वह्न्यत्यन्ताभावः वह्निशून्यदेशे वर्तते न तु पर्वते किन्तु कालिकसम्बन्धेन तु पर्वते वह्न्यत्यन्ताभावः भवत्येव। अत्र वह्निः प्रतियोगी तथा प्रतियोगितावच्छेदकं वह्निनत्वं यत् साध्यतावच्छेदकमपि। अतः अत्र व्याप्तिलक्षणम् अव्याप्तम्। अस्मात् कारणादेव

[263] अभावादेः सम्बन्धः स्वरूपसम्बन्धः। यथा 'भूतले पटो नास्ती' त्यादौ भूतले पटाभावस्य स्वरूपसम्बन्धः प्रतीयते। नव्यन्याभाषाप्रदीपः – Text 10

स्वरूपसम्बन्धेन अत्यन्ताभावः भवेत् हेत्वधिकरणे इत्युच्यते। स्वरूपसम्बन्धेन न वह्न्यत्यन्ताभावः अपितु घटात्यन्ताभावः। अत एव 'पर्वतो वह्निमान् धूमात्' इत्यस्मिन् सद्-हेतुस्थलेऽपि व्याप्तिलक्षणस्य संगतिः वर्तते।

**उपन्यासः -** साध्यताऽवच्छेदके प्रतियोगिताऽनवच्छेदकत्वं 'साध्यताऽवच्छेदकताघटक-सम्बन्धेन' बोध्यम्। अन्यथा धूमाधिकरण= पर्वत वृत्ति= घटात्यन्ताभाव- प्रतियोगितायां कालिकादि संबन्धेन साध्यताऽवच्छेदकीभूत- वह्नित्वस्यावच्छेदकत्वादव्याप्तिः। तन्निवेशे च धूमाधिकरणं = पर्वत-वृत्ति = घटात्यान्ताभावप्रतियोगितायां साध्यताऽवच्छेदकता- घटक-समवाय- सम्बन्धेन वह्नित्वस्यानवच्छेदकत्वान्नाव्याप्तिः।

**हिन्द्यनुवादः –** साध्यतावच्छेदक में जो 'प्रतियोगितानवच्छेदकत्व' धर्म है वह 'साध्यतावच्छेदकता- घटकसम्बन्ध' से ही जानना चाहिए, अन्य सम्बन्ध से नहीं अर्थात् 'साध्यतावच्छेदक' जो कि प्रतियोगिता का अनवच्छेदक बन रहा है उसमें 'अनवच्छेदकत्व' सदैव साध्यतावच्छेदकताघटकसम्बन्ध से होता है। ('पर्वतो वह्निमान् धूमात्' यहाँ पर साध्यतावच्छेदकताघटकसम्बन्ध समवायसम्बन्ध है)। अन्यथा 'धूम' के अधिकरण 'पर्वत' में रहने वाला 'घटात्यन्ताभाव' की प्रतियोगिता का अवच्छेदक कालिकसम्बन्ध से साध्यतावच्छेदक 'वह्नित्व' हो जाएगा। इस सद् हेतु स्थल पर भी प्रतियोगितावच्छेदक साध्यतावच्छेदक के ही होने पर अव्याप्तिदोष होगा। अतः 'प्रतियोगितानवच्छेदकत्व साध्यतावच्छेदकघटकसम्बन्ध अर्थात् समवायसम्बन्ध से ही हो' व्याप्तिलक्षण में ऐसा निवेश करना चाहिए। ऐसा करने पर धूम के अधिकरण 'पर्वत' पर रहने वाला 'घटात्यन्ताभाव' की प्रतियोगिता का अवच्छेदक साध्यतावच्छेदकघटकसम्बन्ध से 'घटत्व' होगा, 'वह्नित्व' नहीं। 'वह्नित्व' के प्रतियोगितानवच्छेदक होने से अव्याप्ति नहीं होगी।


## विश्लेषणम्

**साध्यतावच्छेदकस्य विशेषणसम्बन्धपरीक्षा -** व्याप्तिलक्षणे प्रतियोगितानवच्छेदकमेव साध्यतावच्छेदकं कथ्यते। अत्र प्रतियोगितानवच्छेदकं साध्यतावच्छेदकस्य विशेषणरूपेण प्रयुक्तम्। साध्यतावच्छेदकस्य प्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदकताघटकसम्बन्धेन एव बोध्यम् इत्युच्यते उपन्यासकारेण। **येन सम्बन्धेन साध्यतावच्छेदकः स्वाधिकरणे तिष्ठति**

**स साध्यतावच्छेदकताघटकसम्बन्धः।** 'पर्वतो वह्निमान् धूमात्' इत्यत्र साध्यतावच्छेदकं 'वह्नित्वं' समवायसम्बन्धेन स्वस्मिन् अधिकरणे 'वह्नौ' विद्यते। अतः अत्र समवायसम्बन्धः साध्यतावच्छेदकताघटकसम्बन्धः तथा अनेनैव सम्बन्धेन 'वह्नित्वं' इति साध्यतावच्छेदकस्य प्रतियोगितानवच्छेदकमस्ति।

**आरेखीयप्रस्तुतिः-** 'साध्यतावच्छेदकताघटकसम्बन्धः'

'पर्वतो वह्निमान् धूमात्' -




**चित्रक्रमाँकः ३१**

यदि एवं न उच्यते तर्हि कालिकसम्बन्धेन पर्वते घटात्यन्ताभावस्य प्रतियोगितावच्छेदकं 'वह्नित्वं' अपि भवितुं शक्यते। अतः प्रतियोगितावच्छेदकस्यैव साध्यतावच्छेदकत्वात् व्याप्तिलक्षणमत्र अव्याप्तम्। किन्तु साध्यतावच्छेदकताघटकसम्बन्धेन 'वह्नित्वं' न प्रतियोगितावच्छेदकम् अपितु प्रतियोगितानवच्छेदकं। साध्यतावच्छेदकताघटकसम्बन्धेन अर्थात् समवायसम्बन्धेन घटात्यन्ताभावस्य प्रतियोगितावच्छेदकं 'घटत्वम्'। अतः व्याप्तिलक्षणे नाव्याप्तिदोषः। अत्र आचार्येण कृतस्य विशेषणसम्बन्धस्यापि परीक्षणं पुनः उपन्यासटीकायां कृतलक्षणपरीक्षायाः निकषमेव वदति।

**उपन्यासः -** एवं 'धूमवान् वह्नेः।' इत्यत्र हेतुताऽवच्छेदक-संयोग-संबन्धावच्छिन्न-हेतुताऽवच्छेदक- वह्नित्वावच्छिन्न- वह्नि- रूप हेत्वाधिकरणायो- गोलक-वृत्तिघटात्यन्ताभाव- प्रतियोगितायां साध्यताऽवच्छेदकता- घटक-

समवायसम्बन्धेनानवच्छेदकं यद् धूमत्वं[264], कालिक-सम्बन्धेन तदवच्छिन्नास्यायो गोलकीय-रूपादिसामानाधिकरण्यस्य वह्नौ सत्वादतिव्याप्तिः, इति 'तदवच्छिन्नत्वम्' अपि 'साध्यताऽवच्छेदकता-घटक'-सम्बन्धेन बोध्यम्, तथा च हेत्वधिकरणायोगोलक-वृत्ति-साध्यताऽवच्छेदक-सम्बन्धावच्छिन्न-प्रतियोगिताऽवच्छेदकावच्छिन्न-प्रतियोगिताको = घटाभावः, तत्प्रतियोगितायां समवाय-संबन्धेनानवच्छेदकं = धूमत्वम्, समवाय-सम्बन्धेन तदवच्छिन्नो = धूमः, तत्सामानाधिकरण्यस्य वह्नावसत्वान्नातिव्याप्तिः।

**हिन्द्यनुवादः –** साध्यतावच्छेदक के 'प्रतियोगितानवच्छेदकत्व' धर्म को साध्यतावच्छेदकता-घटकसम्बन्ध से वर्णित करने के अनन्तर साध्यतावच्छेदकावच्छिन्न अर्थात् साध्य का भी साध्यतावच्छेदकताघटकसम्बन्ध (समवायसम्बन्ध) से ही सामानाधिकरण्य में अवस्थिति होती है, अन्य किसी सम्बन्ध से नहीं, ऐसा समझना चाहिए। अन्यथा 'धूमवान् वह्नेः' इस असद् हेतु स्थल पर भी हेतुतावच्छेदकसंयोगसम्बन्ध से अवच्छिन्न एवं हेतुतावच्छेदकवह्नित्वावच्छिन्न वह्निरूपहेतु के अधिकरण अयोगोलक पर घटात्यन्ताभाव है (यद्यपि यहाँ पर धूम का भी अभाव है किन्तु घटादि का भी, अतः घटात्यन्ताभाव का ग्रहण किया गया)। इस अभाव की प्रतियोगिता में साध्यतावच्छेदकताघटक-समवायसम्बन्ध से जो अनवच्छेदक है वह 'धूमत्व' है (क्योंकि इस प्रतियोगिता का अवच्छेदक साध्यतावच्छेदकताघटकसमवायसम्बन्ध से 'घटत्व' है)। इस 'धूमत्व' से अवच्छिन्न वह्नि का कालिकसम्बन्ध से समानाधिकरण्य 'वह्नि' में होने से, यहाँ व्याप्तिलक्षण की अतिव्याप्ति होती है। अतः साध्यतावच्छेदकता से अवच्छिन्न अर्थात् साध्य भी साध्यतावच्छेदकता-घटक-समवायसम्बन्ध से ही सामानाधिकरण्य में रहता है। इस प्रकार यहाँ हेतु (वह्नि) के अधिकरण 'अयोगोलक' में साध्यतावच्छेदक-संयोगसम्बन्धावच्छिन्न एवं प्रतियोगितावच्छेदकधर्मघटत्वावच्छिन्न प्रतियोगिता वाला घटात्यन्ताभाव है। इसकी प्रतियोगिता का समवायसम्बन्ध से अर्थात् साध्यतावच्छेदकताघटकसम्बन्ध से अनवच्छेदक 'धूमत्व' है। पुनः इसी साध्यतावच्छेदकताघटकसम्बन्ध अर्थात् समवायसम्बन्ध के द्वारा 'धूमत्व' से अवच्छिन्न 'धूम' का समानाधिकरण्य 'वह्नि' में न होने से अतिव्याप्ति नहीं होगी।

---

264 अत्र अर्थसंगतिकारणात् 'धूमत्वं' कृतम् अन्यथा मूलग्रन्थे तु 'धूमवत्वं' प्रदत्तम्। पाठभेदेऽपि 'धूमत्वं' इत्यस्य चर्चा कृता।

## विश्लेषणम्

**साध्यतावच्छेदकावच्छिन्नस्य सम्बन्धविवेचनम् -** व्याप्तिलक्षणे साध्यतावच्छेदकस्य प्रतियोगितानवच्छेदकत्वे सम्बन्धनिर्धारणानन्तरं साध्यतावच्छेदकेन यो अवच्छिन्नः भवति अर्थात् साध्यः, तस्यापि नियामकसम्बन्धस्य परीक्षा क्रियते उपन्यासकारेण। साध्यतावच्छेदकावच्छिन्नसाध्ये अपि साध्यतावच्छेदकताघटकसम्बन्धेनैव अवच्छिन्नत्वं बोध्यम्। अन्यथा 'पर्वतो धूमवान् वह्नेः' इति असद्-हेतुस्थलेऽपि व्याप्तिलक्षणस्य अतिव्याप्तिर्जायते। यतोहि अत्र घटात्यन्ताभावस्य साध्यतावच्छेदक-ताघटकसमवायसम्बन्धेन प्रतियोगितानवच्छेदकं साध्यतावच्छेदकं 'धूमत्वं' वर्तते। सम्प्रति कालिकसम्बन्धेन धूमत्वावच्छिन्नायोगोलकीयत्वस्य सामानाधिकरण्यं 'वह्नौ' सत्त्वात्, अतिव्याप्तिदोषः जायते व्याप्तिलक्षणे यतोहि इदं असद्-हेतुस्थलं वर्तते। अतो हेतोः 'तदवच्छिन्नत्वम्' अपि साध्यतावच्छेदकताघटकसम्बन्धेन उक्तम् न तु अन्यसम्बन्धेन। अत्र घटात्यन्ताभावस्य प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं 'धूमत्वं' वर्तते तथा साध्यतावच्छेदकघटकसमवायसम्बन्धेन धूमत्वावच्छिन्नं धूम एव न अयोगोलकीयः। अतः अत्र धूमस्य (साध्यस्य) वह्नौ (हेतौ) सामानाधिकरण्यस्य असत्त्वात् नातिव्याप्तिः व्याप्तिलक्षणस्य। यतोहि धूमस्य वह्नौ सामानाधिकरण्यं न भवति अपितु वह्नेः धूमे सामानाधिकरण्यं भवतीति सम्यग्व्याप्तिः। सम्भवतः एतादृशे असद्-हेतुस्थले अतिव्याप्तिकारणादेव व्याप्त्याश्रयः 'धूमः' इति।

**उपन्यासः -** एवमपि 'हेतुताऽवच्छेदक-संयोग- सम्बन्धावच्छिन्न- वह्नित्वावच्छिन्न- वह्नि-रूपहेत्वधिकरण- महानस- निष्ठ- साध्यताऽवच्छेदक- सम्बन्धावच्छिन्न-प्रतियोगिताऽवच्छेदकावच्छिन्न-पटाभाव- प्रतियोगितायां समवाय-संबन्धेनानवच्छेदकं= धूमत्वम्, समवाय- सम्बन्धेन तदवच्छिन्नो = धूमः, तत्सामानाधिकरण्यं कालिक-संबन्धेन वह्नावस्ति।' इत्यतिव्याप्तिः, अतः 'साध्य-सामानाधिकरण्यम्' इत्यत्र 'साध्यता' 'अवच्छेदक'-सम्बन्धेन बोध्यम्, तथा च वह्नि- रूप- हेत्वधिकरण- वृत्ति- घटाभाव-प्रतियोगिताऽनवच्छेदक- धूमत्वावच्छेन्नस्य साध्यताऽवच्छेदकीभूत- संयोग- सम्बन्धेन सामानाधिकरण्यस्यायो- गोलकेऽभावान्नातिव्याप्तिः।

एवं 'धूमवान्वह्नेः।' इत्यत्र 'हेतुताऽवच्छेदक-संयोग-संबन्धावच्छिन्न- हेतुताऽवच्छेदक-वह्नित्वावच्छिन्न- वह्नि- रूप- हेत्वधिकरण- पर्वत- वृत्ति- साध्यताऽवच्छेदक-संयोगसंबन्धावच्छिन्न- प्रतियोगितावच्छेदकावच्छिन्न- प्रतियोगिताको = घटाभावः, तत्प्रतियोगितायां समवाय-सम्बन्धेनानवच्छेदकं = धूमत्वम्, तेन सम्बन्धेन तदवच्छिन्नो = धूमः, तस्य साध्यताऽवच्छेदकीभूत-संयोग-संबन्धेन सामानाधिकरण्यं वह्निरूपहेतावस्ति।' इत्यतिव्याप्तिः, अतो 'यावद्धेत्वधिकरणाभावच्छेदेन साध्य-सामानाधिकरण्यं, बोध्यम्, तथा च 'यावद्धेत्वधिकरणान्तर्गतायोगोलके साध्यताऽवच्छेदक-सम्बन्धावच्छिन्न-साध्यताऽवच्छेदकीभूत- धूमत्वावच्छिन्नधूम-सामानाधिकरण्याभावान्नातिव्याप्तिः।

**हिन्द्यनुवादः –** ('धूमवान् महानसं वह्नेः' इस असद् हेतु स्थल में) हेतुतावच्छेदकसंयोग-सम्बन्धावच्छिन्न, हेतुतावच्छेदकवह्नित्वावच्छिन्न वह्निरूप हेतु के अधिकरण महानस में रहने वाला साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्न एवं प्रतियोगितावच्छेदकधर्मपटत्वावच्छिन्न 'पटाभाव' है। इसकी प्रतियोगिता का अनवच्छेदक समवायसम्बन्ध से अथवा साध्यतावच्छेदकताघटकसम्बन्ध से 'धूमत्व' अर्थात् 'साध्यतावच्छेदक' है। समवायसम्बन्ध से ही 'धूमत्व' से अवच्छिन्न 'धूम' है। इस 'धूम' का सामानाधिकरण्य कालिकसम्बन्ध से 'वह्नि' में होने से असद् हेतु में भी व्याप्ति का लक्षण घटित होने से अतिव्याप्तिदोष होगा। अतः 'साध्य-सामानाधिकरण्य' साध्यतावच्छेदकसम्बन्ध से ही रखना चाहिए, अन्य सम्बन्ध से नहीं। ऐसा करने पर उपर्युक्त असद् हेतु स्थल में वह्निरूपहेतु के अधिकरण महानस में रहने वाला घटाभाव की प्रतियोगिता का अनवच्छेदक धूमत्वावच्छिन्न 'धूम' का साध्यतावच्छेदकसम्बन्ध (संयोगसम्बन्ध) से 'अयोगोलक' अथवा 'वह्नि' में सामानाधिकरण्य न होने से यहाँ अतिव्याप्ति नहीं होगी।

इसी प्रकार 'धूमवान् वह्नेः' इस असद् हेतु स्थल पर हेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्न तथा हेतुतावच्छेदकवह्नित्वावच्छिन्न 'वह्नि' इस हेतु के अधिकरण पर्वत में रहने वाला घटात्यन्ताभाव साध्यतावच्छेदकसंयोगसम्बन्ध से अवच्छिन्न एवं प्रतियोगितावच्छेकघटत्व से अवच्छिन्न प्रतियोगिता वाला अभाव है। इस अभाव की प्रतियोगिता में समवायसम्बन्ध से अनवच्छेदक 'धूमत्व' ही साध्यतावच्छेदक है। समवायसम्बन्ध से ही धूमत्वावच्छिन्न साध्य (धूम) का सामानाधिकरण्य हेतु (वह्नि) में है। अतः इस स्थल में भी व्याप्तिलक्षण उपयुक्त

होने पर अतिव्याप्तिदोष की संभावना होती है। इस अतिव्याप्तिनिवारण के लिए 'यावद्धेत्वधिकरणावच्छिन्न साध्यसामानाधिकरण्य' कहा गया अर्थात् हेतु के जितने भी अधिकरण है उन सबमें साध्य का हेतु में सामानाधिकरण्य होना चाहिए ( प्रस्तुत स्थल में हेतु के अधिकरण पर्वत में तो साध्य (धूम) का समानाधिकरण्य 'हेतु' (वह्नि) में है किन्तु 'वह्नि' के अन्य अधिकरण 'अयोगोलक' में 'धूम' का समानाधिकरण्य 'वह्नि' में नहीं होता)। इस प्रकार वह्निरूपहेतु के जितने भी अधिकरण हैं उनके अन्तर्गत आने वाले 'अयोगोलक' में साध्यतावच्छेदकसंयोगसम्बन्ध से अवच्छिन्न साध्यतावच्छेदकधर्मधूमत्व से अवच्छिन्न 'धूम' का समानाधिकरण्य 'वह्नि' में न होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्


**साध्यसामानाधिकरण्यविवेचनम् –** उपरि साध्यसामानाधिकरण्यस्य चर्चा कृता साध्यतावच्छेदका- वच्छिन्नत्वस्य परीक्षणप्रसङ्गे। अत एव अधुना व्याप्तिलक्षणे प्रयुक्तस्य 'साध्यसामानाधिकरण्यं' इति पदस्यापि परीक्षा क्रियते। साध्यस्य हेतुना सह सामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धावच्छिन्नं तथा यावद्धेत्वधिकरणावच्छिन्नमेव बोध्यम्। साध्यतावच्छेदकसम्बन्धस्तु पूर्वमुक्तमेव। यदि साध्यतावच्छेदकसम्बन्धावच्छिन्नं साध्यसामानाधिकरण्यं न स्वीक्रियते तर्हि असद्-हेतुस्थले व्याप्तिलक्षणस्य अतिव्याप्तिः भविष्यति। यथा 'महानसं धूमवान् वह्नेः' इत्यत्र साध्यरूपधूमस्य हेतुरूपवह्नौ सामानाधिकरण्यं न भवति किन्तु कालिकसम्बन्धेन अत्र साध्यसामानाधिकरण्यं भवितुं शक्यते। अतः तस्मिन् परिस्थितौ व्याप्तिलक्षणस्य अत्रापि अतिव्याप्तिः भविष्यति। अत एव साध्यसामानाधिकरण्यं नियामकसम्बन्धः उच्यते। अयं सम्बन्धः साध्यतावच्छेदकसम्बन्धः अस्ति। अस्मिन् स्थले साध्यतावच्छेदकसम्बन्धः संयोगसम्बन्धः वर्तते यतोहि एतेनैव सम्बन्धेन साध्यः (धूमः) अधिकरणे (महानसे) विद्यते। अथ च संयोगसम्बन्धेन धूमस्य सामानाधिकरण्यं वह्नौ अयोगोलके वा न भवति। अतः व्याप्तिलक्षणम् अत्र नातिव्याप्तम्।

पुनः व्याप्तिलक्षणे अतिव्याप्तिनिवारणाय साध्यसामानाधिकरण्यं साध्यतावच्छेदक-सम्बन्धावच्छिन्नातिरिक्तं यावद्धेत्वधिकरणावच्छिन्नमप्युक्तम्। 'यावद्धेत्वधिकरणपरीक्षा' साध्यस्य हेतोश्च व्याप्तिनिर्धारणे महत्वपूर्णघटिका अस्ति। यदा साध्य-हेतोश्च व्याप्तिः


निर्मीयते तर्हि सर्वप्रथमम् इदं दृश्यते यत् हेतोः यावन्त्यपि अधिकरणानि सन्ति, साध्यः तेषु अधिकरणेषु उपस्थितो न वा ? यदि उपस्थितः तर्हि तयोः सद्व्याप्तिः यदि न वर्तते तर्हि तयोर्मध्ये असद्व्याप्तिः भवति। असद्व्याप्तिः यथार्थानुमितिज्ञाने करणं न भवति। अतः उपन्यासकारेण व्याप्तिलक्षणे साध्यसामानाधिकरण्यं यावद्धेत्वधिकरणावच्छिन्नमुच्यते। यदि 'यावद्धेत्वधिकरणावच्छिन्नं' नोच्यते तर्हि 'पर्वतो धूमवान् वह्नेः' इति असद्-हेतुस्थलेऽपि पर्वतरूपाधिकरणे तु धूमस्य वह्नेः समानाधिकरणत्वात्, धूमरूपसाध्यस्य सामानाधिकरण्यं वह्निरूपहेतौ भवितुं शक्यते। अतः असद्-हेतुस्थलेऽपि साध्यस्य हेतौ सामानाधिकरण्यत्वात् व्याप्तिलक्षणे अतिव्याप्तिदोषः भवति। अतो हेतोः साध्यसामानाधिकरण्यं यावद्धेत्वधिकरणावच्छिन्नं कथितम्। अत्र वह्निरूपहेतोः यावन्ति अधिकरणानि वर्तन्ते, धूमरूपसाध्यः न तेषु सर्वेषु तिष्ठति यथा अयोगोलके। अयोगोलकः वह्नेः अधिकरणमस्ति किन्तु तत्र धूमः न वर्तते। अतः वह्निरूपहेतौ धूमरूपसाध्यस्य सामानाधिकरण्ये यावद्धेत्वाधिकरणावच्छिन्नत्वाभावः अस्ति। अत एव 'पर्वतो धूमवान् वह्नेः' अत्र वह्निरूपहेतौ धूमरूपसाध्यसामानाधिकरण्याभावात् न व्याप्तिलक्षणस्य अतिव्याप्तिः। एवम्प्रकारेण व्याप्तिलक्षणे प्रयुक्तान्तिमपदस्यापि परीक्षा व्यापकरूपेण कृता टीकाकारेण।

**आरेखीयप्रस्तुतिः -** 'यावद्धेत्वधिकरणत्वम्'

'साध्यसामानाधिकरण्यं हेतौ' -



‘हेतुसामानाधिकरण्यं न साध्ये’ -




**चित्रक्रमाँकः ३१**

**उपन्यासः -** एवं च ‘हेतुताऽवच्छेदक-सम्बन्धावच्छिन्न-हेतुताऽवच्छेदकावच्छिन्न- हेत्वधिकरणे दैशिक- विशेषणता-सम्बन्धेन वृत्तिः। साध्यताऽवच्छेदक - सम्बन्धावच्छिन्न-प्रतियोगिताऽवच्छेदकावच्छिन्न- प्रतियोगिताको योऽभावः, तत्प्रतियोगितायां साध्यतावच्छेदकता-घटक-संबन्धेनानवच्छेदकं यत्साध्यताऽवच्छेदकं, साध्यताऽवच्छेदकता-घटक- सम्बन्धेन तदवच्छिन्नं यत्साध्यम्, तस्य साध्यताऽवच्छेदक-सम्बन्धेन साध्यसामानाधिकरण्यं यावद्धेत्वधिकरणावच्छेदकावच्छेदेन।’ इति यावत्॥

**हिन्द्यनुवादः –** इस प्रकार व्याप्तिलक्षण का परीक्षण करने के अनन्तर उपन्यासकार के द्वारा उसका निम्न परिष्कृत लक्षण प्रस्तुत किया गया है – “हेतुतावच्छेदकसम्बन्ध से अवच्छिन्न एवं हेतुतावच्छेदकधर्म से अवच्छिन्न होने वाले हेतु के अधिकरण में स्वरूपसम्बन्ध से रहने वाला जो अभाव है वह साध्यतावच्छेदकसम्बन्ध से अवच्छिन्न एवं प्रतियोगितावच्छेदकधर्म से अवच्छिन्न प्रतियोगितावाला है। इसकी प्रतियोगिता का अनवच्छेदक साध्यतावच्छेदकताघटकसम्बन्ध से साध्यतावच्छेदक है एवं इसी साध्यतावच्छेदकताघटकसम्बन्ध से ही साध्यतावच्छेदक से अवच्छिन्न साध्य का साध्यतावच्छेदकसम्बन्ध से तथा ‘यावद्धेतु अधिकरण’ से अवच्छिन्न होने से साध्य-सामानाधिकरण्य होना अर्थात् साध्य का हेतु में सामानाधिकरण्य होना ही व्याप्ति है।”

**विश्लेषणम्**

**परीक्षितस्य व्याप्तिलक्षणस्य निष्कर्षः -** अत्र **'हेतुसामानाधिकरणात्यन्ताभावप्रतियोगिता-ऽनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति'** इत्यस्मिन् व्याप्तिलक्षणे प्रयुक्तपदानां परीक्षणं कृत्वा निष्कर्षतया परीक्षितव्याप्तिलक्षणस्य निर्दुष्टस्वरूपम् उपन्यासकारमते प्रस्तुतम्। लक्षणेऽस्मिन् सर्वप्रथमं 'हेत्वधिकरणं' कथितम् अतः हेत्वधिकरणस्य परीक्षां कृत्वा हेतुतावच्छेदसम्बन्धावच्छिन्नं हेतुतावच्छेदकावच्छिन्नमिति हेत्वधिकरणस्य विशेषणद्वयम् उक्तम्। अतः परं 'साध्यतावच्छेदकसम्बन्धावच्छिन्नः प्रतियोगितावच्छेदकावच्छिन्नश्च प्रतियोगिताकः अत्यन्ताभावः तथा दैशिकविशेषणतासम्बन्धेन स्वरूपसम्बन्धेन वा अभावसामान्यस्य वृत्तित्वमुक्त्वा लक्षणे प्रयुक्तात्यन्ताभावस्य परीक्षा कृता। तदनु 'प्रतियोगितानवच्छेदकं' तथा 'तदवच्छिन्नं' इति पदयोः साध्यतावच्छेदकताघटकसम्बन्धेन स्थितिं प्रदश्र्य अमुयोः परीक्षणं क्रियते। पुनश्च लक्षणे प्रयुक्तान्तिमपदस्य अर्थात् साध्यसामानाधिकरण्यस्यापि परीक्षा तथैव प्रामुख्येण विहिता यथा लक्षणे प्रयुक्तप्रथमपदस्य। आचार्येण व्याप्तिलक्षणे दोषवर्जनाय साध्यसामानाधिकरण्यं साध्यतावच्छेदकसम्बन्धावच्छिन्नं तथा यावद्धेत्वधिकरणावच्छिन्नम् उक्तम्। एवम्प्रकारेण व्याप्तिलक्षणस्य सूक्ष्मदृष्ट्या कृतं व्यापकं परीक्षणं पुनः तर्कसंग्रहोपन्यासटीकायाः लक्षणपरीक्षावैशिष्ट्यं दृढतया संसूच्यते।

**उपन्यासः -** पक्षो लक्ष्यः। पक्षत्वं लक्ष्यताऽवच्छेदकम्। 'सिषाधयिषा- विरह- सह कृतसिद्ध्यभाववत्वं' लक्षणम्। 'सिद्ध्यभावः = पक्षता।' इत्युक्तौ सिद्धिसत्वे 'अनुमितिर्मे भूयात्।' इत्याकारकेच्छायां सत्यामनुमितिर्न स्यात्, अतः 'सिषाधयिषा-विरह-विशिष्टत्वं 'सिद्धौ' विशेषणम्; तथा च 'पर्वतो वह्निमान्।' इत्याकारक- सिद्धिसत्वेऽपि 'पर्वते वह्नयनुमितिर्मे भूयात्।' इत्याकारकेच्छायां सत्यां सिषाधयिषा-विरह-रूप-विशेषणाभाव-प्रयुक्त-विशिष्टाभाव-रूप-पक्षतायास्तत्र सत्वादनुमितिर्भवत्येव। १- यत्र सिषाधयिषा नास्ति सिद्धिरस्ति, तत्र सिषाधयिषा- विशिष्टसिद्धेः सत्वान्नानुमितिः। २- यत्र सिद्धिर्नास्ति, सिषाधयिषा वर्तते, तत्र सिषाधयिषा- विरह-रूप- विशेषण- विशेष्योभायाभाव- प्रयुक्त-विशिष्टाभाव-सत्वादनुमितिः। ३- यत्र सिषाधयिषा नास्ति, सिद्धिरपि नास्ति, तत्र विशेष्याभावप्रयुक्त- विशिष्टाभाव-पक्षतायास्तत्रापि सत्वादनुमितिः॥४०॥

**हिन्द्यनुवादः –** पक्ष लक्ष्य है। पक्षत्व लक्ष्यतावच्छेदक है। 'सिषाधयिषा के अभाव से युक्त सिद्धि का अभाव ही' पक्षता है अर्थात् साध्य को जानने की इच्छा के अभाव से विशिष्ट प्रत्यक्ष का अभाव ही पक्षता (पक्ष का धर्म) है। यदि 'सिद्ध (प्रत्यक्ष) का अभाव ही पक्षता है' मात्र इतना ही पक्षता का लक्षण किया जाए तो 'किसी वस्तु का प्रत्यक्ष के होने पर भी यदि उस वस्तु की अनुमिति करने की इच्छा हो तो' इस प्रकार की इच्छा होने पर भी अनुमिति नहीं होगी क्योंकि यहाँ पर तो प्रत्यक्ष (सिद्ध) का अभाव ही नहीं है अत एव प्रत्यक्ष को 'सिषाधयिषा के अभाव से विशिष्ट' कहा गया। जैसे कि 'पर्वतो वह्निमान्' इस का प्रत्यक्ष हो जाने पर भी पर्वत में 'वह्नि' (साध्य) की अनुमिति करने (अनुमान से जानने ) की इच्छा होने से अनुमिति होगी (क्योंकि न्याय में इच्छा सबसे बलवती होती है)। इसीलिए 'सिषाधयिषाविरहसहकृतसिद्धि का अभाव' इस लक्षण में 'सिषाधयिषाविरहसहकृतसिद्धि' लक्षण के इस भाग को अभाव के साथ तीन प्रकार से संयुक्त किया गया है – विशेषणाभाव (सिषाधयिषाविरह का अभाव), विशेष्याभाव (सिद्धि अथवा प्रत्यक्ष का अभाव) एवं उभयाभाव। इन तीनों ही स्थलों पर पक्षता के होने से अनुमिति की सिद्धि होती है। १. उपर्युक्त उदाहरण में प्रथम प्रकार का अभाव अर्थात् विशेषण का अभाव तथा विशेष्य का भाव होने से (सिषाधयिषा का होना तथा प्रत्यक्ष का भी होना) पक्षता है। अतः यहाँ पर अनुमिति हो जाएगी। इसी प्रकार दो अन्य परिस्थितियों में भी पक्षता के होने से अनुमिति की जा सकती है जैसे कि - २. 'सिषाधयिषारहसहकृतसिद्धि' इसमें विशेषण एवं विशेष्य दोनों का अभाव होने से अर्थात् जहाँ सिषाधयिषा भी हो एवं वस्तु का प्रत्यक्ष भी न हुआ हो, वहाँ भी पक्षता के होने से अनुमिति हो जाएगी।

३ 'सिषाधयिषारहसहकृतसिद्धि' यहाँ पर सिद्धिरूप अथवा प्रत्यक्षरूप विशेष्य का अभाव तथा विशेषण का भाव अर्थात् 'प्रत्यक्ष का न होना तथा सिषाधयिषा का भी न होना' पक्षता का स्थल माना गया है। अतः यहाँ भी अनुमिति होगी।

किन्तु इन तीनों स्थलों से अतिरिक्त जहाँ 'सिषाधयिषा भी नहीं है एवं वस्तु का प्रत्यक्ष भी है' अर्थात् 'विशेषण का भाव एवं विशेष्य का भाव' दोनो हो वहाँ 'सिषाधयिषा के अभाव से विशिष्ट सिद्धि के होने से' अनुमिति नहीं होगी।

## विश्लेषणम्

**पक्षतालक्षणम्** – व्याप्तिलक्षणानन्तरम् टीकाकारेण पक्षस्य धर्मः भावो वा पक्षता वर्ण्यते। पक्षता अनुमानप्रमाणस्य अभिन्नाङ्गरूपेण स्वीकृता न्यायदर्शने। उपन्यासकारेण पक्षतायाः लक्षणमेवं दीयते – **सिषाधयिषाविरहसहकृतसिद्ध्यभाववत्त्वं** लक्षणम्। अत्र सिषाधयिषा अर्थात् साधयितुमिच्छा, 'विरह' अर्थात् शून्यं, 'सहकृत' इत्यर्थः विशिष्टं तथा सिद्धेः तात्पर्यं प्रत्यक्षं वर्तते। अतः साधयितुम् इच्छाशून्येन विशिष्टस्य प्रत्यक्षस्य अभाव एव पक्षता कथ्यते। साधयितुमिच्छाशून्यविशिष्टप्रत्यक्षस्य भावः पक्षता न भवति। एतादृशज्ञानम् अनुमितिज्ञाने प्रतिबन्धकं भवति। अतः सर्वदा साधयितुमिच्छाशून्यविशिष्टप्रत्यक्षस्य अभाव एव पक्षता वर्तते न तु भाव इति ध्यातव्यम्। यदि लक्षणे 'सिद्ध्यभावः' अथवा 'प्रत्यक्षाभावः' मात्रोच्यते तर्हि यत्र प्रत्यक्षस्य अभावः वर्तते तत्रैव पक्षता भविष्यति अर्थात् तत्रैव अनुमितिः कर्तुं शक्यते नान्यत्र। एवम्प्रकारेण तु यत्र 'प्रत्यक्षे भूतेऽपि अनुमितेः इच्छा भवति तत्र तु अनुमिति न भवितुं शक्यते, प्रत्यक्षस्य सत्त्वात्। अतः अत्र पक्षतालक्षणमव्याप्तं भवति। अत एव लक्षणे 'सिषाधयिषाविरहसहकृत' इत्यपि प्रत्यक्षस्य सिद्धेः वा विशेषणमुक्तम्। सम्प्रति पर्वते वह्नेः प्रत्यक्षानन्तरमपि 'पर्वते वह्न्यनुमितिर्मे भूयात्' इत्याकारकेच्छायां सत्यां पक्षता भविष्यति। लक्षणेऽस्मिन् सिषाधयिषाविरहसहकृतसिद्धिः इति पूर्वार्धस्य योगः 'अभाव' इति उत्तरार्धपदेन सह कृतः। प्रकारत्रयेन पक्षतायाः साफल्यं ज्ञायते – १. विशेषणाभावः विशेष्यभावः, २. विशेष्याभावः विशेषणभावः, ३. उभयाभावः। सफलपक्षतायाम् अभावः नूनमेव विद्यते। एतत्सर्वम् एवमवगन्तुं शक्यते - पक्षतालक्षणे 'सिषाधयिषाविरहसहकृतसिद्धिः' इति पूर्वार्धपदं विशेषणदलं विशेष्यदलञ्च इति भागद्वयं कर्तुं शक्यते। 'सिषाधयिषाविरहसहकृत' इति विशेषणदलं तथा 'सिद्धिः प्रत्यक्षं वा' विशेष्यदलमस्ति। सम्प्रति द्वाभ्यां दलाभ्यां सह क्रमशः अभावः योजनीयः। सर्वप्रथमम्तु विशेषणदलेन सह अभावः संयुज्यते। अतः अत्र **'विशेषणस्य अभावः विशेष्यस्य भावः'** भविष्यति। विशेषणं 'साधयितुम् इच्छायाः शून्यता' अस्ति, अस्याभावः अर्थात् 'साधयितुमिच्छा' भवति। विशेष्यः प्रत्यक्षमस्ति, अस्य भावः अर्थात् प्रत्यक्षस्य भावः। अनेन प्रकारेण यत्र साधयितुमिच्छा तथा प्रत्यक्षं वर्तते तत्र पक्षता भवति अर्थात् तत्र अनुमितिज्ञानं भवितुं शक्यते। यद्यपि अत्र प्रत्यक्षज्ञानं पूर्वविद्यमानमस्ति तथापि यदि साधयितुमिच्छा (अनुमितेः इच्छा) वर्तते तर्हि प्रत्यक्षज्ञानानन्तरमपि अनुमानं कर्तुं शक्नुमः यतोहि न्याये '**इच्छा**

**सर्वतो बलीयसी'** इत्यनुसारेण इच्छा प्रत्यक्षादपि बलवती अस्ति। अतः अत्र सफलपक्षता विधीयते।

अतः परं विशेष्यदलेन सह अभावः संयुज्यते। अत्र **'विशेष्यस्य अभावः तथा विशेषणस्य भावः'** भविष्यति अर्थात् 'प्रत्यक्षस्य अभावः तथा साधयितुमिच्छायाः अभावः'। यथा प्रकोष्ठे स्थितबालकेन आकाशे मेघस्य चाक्षुषप्रत्यक्षं न कृतं तथा 'आकाशे मेघः अस्ति न वा' इति साधयितुमिच्छा अपि  न वर्तते। तथापि मेघगर्जनं श्रुत्वा सः अनुमानं करोति यत् 'गगनं मेघवत् घनगर्जनत्वात्'। अतः अत्रापि पक्षता भवति।

तदनु विशेषणविशेष्याभ्यां द्वाभ्यां सह अभावः संयुज्यते अर्थात् **उभयाभावः**। अत्र सिषाधयिषा वर्तते किन्तु प्रत्यक्षं (सिद्धिः) न वर्तते अर्थात् प्रत्यक्षं नास्ति तथा अनुमितिं कर्तुमिच्छा अपि वर्तते। अतः अत्र तु निश्चितरूपेण पक्षता भविष्यति। अतः उपर्युक्तं स्थलत्रयं पक्षतायाः स्थलं वर्तते।

किन्तु यत्र विशेषण-विशेष्ययोः द्वयोः भावः वर्तते तत्र पक्षता न भवति यतोहि द्वयोः भावः पक्षतायाः प्रतिबन्धकः अस्ति अर्थात् साधयितुमिच्छा अथवा सिषाधयिषा नास्ति तथा प्रत्यक्षमपि अस्ति। अत्र सिषाधयिषाविरहसहकृतसिद्धेः सत्त्वात्, अनुमितिर्न भविष्यति। अत एव उपर्युक्तमपि यत् 'सिषाधयिषाविरहसहकृतसिद्धिः' पक्षातायाः अनुमितेः वा प्रतिबन्धिका अस्ति। अनेन प्रकारेण 'सिषाधयिषाविरहसहकृतसिद्ध्यभाववत्त्वं' इति पक्षतालक्षणं प्रतिपादितम्।

(२.१६ बुद्धि- गुण- विवरणेऽनुमान- भेदयोर्लक्षणे)

**तर्कसंग्रहः –** अनुमानं द्विविधं स्वार्थं परार्थं च। तत्र स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन्व्याप्तिं स्मरति यत्र यत्र धूमस्तत्र तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिः उत्पद्यते। तदेतत्स्वार्थानुमानम्।

यत्तु स्वयं धुमाग्निमनुमाय परम्प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान्,धूमवत्वात्। यो यो धूमवान्स वह्निमान्यथा महानसः। तथा चायम्। तस्मात्तथेति। अनेन प्रतिपादितात् लिङ्गात्परोऽप्यग्निं प्रतिपद्यते॥४१॥

**उपन्यासः -** १. 'स्वार्थं २ . परार्थं च' इत्यानुमानविभागोक्तिः। १ - स्वार्थानुमानं लक्ष्यम्। स्वार्थानुमानत्वं लक्ष्यताऽवच्छेदकम्। 'स्वार्थानुमितिहेतुत्वं' लक्षणम्। तथाहि - "बहुषुस्थलेषु 'यत्र धूमः , तत्र वह्निः। ' इति व्याप्तिं गृहीत्वा पर्वतसमीपं गते सति तत्र धूमन्दृष्ट्वा सिषाधयिषायां सत्यां धूम -दर्शनेनोद्बुद्धव्याप्ति-स्मरणानन्तरं 'वह्नि-व्याप्य-धूमवानयं पर्वतः।' इतिविशिष्ट- परामर्शानन्तरं स्वस्यैव 'पर्वतोवह्निमान्' इत्यनुमितिर्जायते , तद्धेतुः।" इत्यर्थः॥ २ - परार्थानुमानं लक्ष्यम्। परार्थानुमानत्वं लक्ष्यताऽवच्छेदकम्। 'परार्थानुमितिहेतुत्वं' लक्षणम्। तथाहि - (१) पर्वतोवह्निमान् (२) धूमवत्त्वात्, (३) यो-योधूमवान्, सोऽग्निमान्, यथामहानसः (४) तथा चायम् , (५) तस्मात्तथा।' इति। अनेनप्रतिपादितात्पञ्चावयववाक्यात् परोऽपि वह्निं प्रतिपद्यते॥४१॥

**हिन्द्यनुवादः –** अनुमानप्रमाण के दो भेद है – स्वार्थानुमान एवं परार्थानुमान। स्वार्थानुमान लक्ष्य है। स्वार्थानुमानत्व लक्ष्यता-अवच्छेदक है। 'स्वार्थानुमिति का हेतु ही' स्वार्थानुमान है। जैसे कि – बहुत से स्थलों पर 'जहाँ जहाँ धूम है वहाँ वहाँ अग्नि है' ऐसी व्याप्ति को देखकर पर्वत के समीप जाने पर वहाँ धूम को देखकर के साध्य को जानने की ईच्छा होने पर धूमदर्शन से उद्बुद्ध व्याप्तिस्मरण के पश्चात् "वह्नि से व्याप्य धूम वाला यह पर्वत है" ऐसा विशिष्टपरामर्श होने के बाद स्वयं ही "यह पर्वत वह्नि वाला है" इस प्रकार की जो अनुमिति उत्पन्न होती है उसका जो हेतु है वही स्वार्थानुमान है।

परार्थानुमान लक्ष्य है। परार्थानुमानत्व लक्ष्यता-अवच्छेदक है। 'परार्थानुमिति का हेतु ही' परार्थानुमान है। जैसे – १.'पर्वत वह्नि वाला है', २. 'धूम वाला होने से',३.जो जो धूम वाला है वह वह्नि वाला है जैसे महानस, ४. उसी प्रकार यह (पर्वत) भी है, ५. वैसा होने से (वह्नि वाला होने से) यह (पर्वत) भी उसी प्रकार का है। ये पञ्चावयव वाक्य है। परार्थानुमान के द्वारा प्रतिपादित इन पञ्चावयववाक्यों से दूसरे को भी 'वह्नि' का ज्ञान कराया जाता है।

## विश्लेषणम्

**अनुमानभेदविवरणम् -** अनुमितिज्ञाने प्रयुक्तमहत्त्वपूर्णघटकानां विवेचनं कृत्वा अनुमानस्य भेदं निरूपयति। अनुमानं द्विविधं – स्वार्थानुमानं परार्थानुमानञ्च। स्वार्थानुमितेः यो हेतुः वर्तते तदेव स्वार्थानुमानमित्युच्यते उपन्यासकारेण - **स्वार्थानुमितिहेतुत्वं लक्षणम्**। न्यायबोधिन्यां **न्यायाप्रयोज्यानुमानं स्वार्थानुमानं**[265] कथ्यते। न्यायः अर्थात् पञ्चावयववाक्यम्। यस्मिन् अनुमाने पञ्चावयववाक्यस्य प्रयोगः न क्रियते तदनुमानं स्वार्थानुमानमिति वक्तुं शक्यते। इदमनुमानं स्वस्य कृते क्रियते अत एव स्वार्थानुमानं कथ्यते। स्वस्यार्थः प्रयोजनं यस्मात् तत् स्वार्थमिति, स्वार्थञ्च तदनुमानं स्वार्थानुमानमिति।[266] अत्र महानसादौ जायमानं धूमाग्न्योः साहचर्यज्ञानं प्रथमम्। तदनु पर्वतादौ धूमदर्शनेन उद्बुद्धं स्मरणरूपव्याप्तिज्ञानम्। ततः 'वह्निव्याप्यधूमवानयं पर्वतः' इति लिङ्गपरामर्शानन्तरं 'पर्वतो वह्निमान्' इति प्रकारकस्वार्थानुमितेः हेतुत्वं विद्यते।

परार्थानुमानं परस्य कृते कार्यते। **परार्थानुमितिहेतुत्वं** परार्थानुमानलक्षणम्। प्रतिज्ञा (पर्वतो वह्निमान्), हेतुः (धूमवत्त्वात्), उदाहरणं (यो यो धूमवान्, सोऽग्निमान् यथा महानसः), उपनयः (तथा चायम्), निगमनञ्च (तस्मात्तथा) इति पञ्चावयववाक्यात् परस्य कृतेऽपि 'पर्वते वह्निं' प्रतिपद्यते। इत्याकारकज्ञानं परार्थानुमितिः कथ्यते। अस्यैव परार्थानुमितेः हेतुः परार्थानुमानं भवति। पञ्चावयववाक्यानां विश्लेषणम् अग्रे क्रियते। अतो हेतोः अत्र पुनरुक्तिकारणात् न विश्लेषितम्।

(२ .१६ बुद्धि- विवरणेऽनुमानावयवानां लक्षणानि)

**तर्कसंग्रहः -** प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्वादिति हेतुः। यो यो धूमवान्स वह्निमान्यथा महानसः इत्युदाहरणम्। तथा चायमित्युपनयः। तस्मात्तथेति निगमनम्॥४२॥

**उपन्यासः -** न्यायोलक्ष्यः। न्यायत्वं लक्ष्यताऽवच्छेदकम्। 'उचितानुपूर्वीक-प्रतिज्ञाऽऽदि-पञ्चक-समुदायत्वं' लक्षणम्। 'समुदाय'-मात्रोक्तौ घटादि -समुदायेऽतिव्याप्तिः, अतः 'प्रतिज्ञाऽऽदिइत्युक्तम्, घटादि -समुदाये प्रतिज्ञाऽऽदि -समुदायत्वाभावान्नातिव्याप्तिः।

265 न्यायबोधिनी - अनुमानभेदप्रकरणम्

266 श्रीनिवासमुखोल्लासिनी - अनुमानभेदप्रकरणम्

'प्रतिज्ञाऽऽदि-समुदायत्व-मात्रोक्तौ व्युत्क्रमोक्त -प्रतिज्ञाऽऽदि-समुदायेऽतिव्याप्तिः, अतः 'उचितानुपूर्वीक-'इत्युक्तम्। 'उचितानुपूर्वीक-' मात्रोक्तौ एकत्वादि -दश-पर्यन्त-संख्याऽऽदावतिव्याप्तिः, अतः 'प्रतिज्ञाऽऽदि-समुदायत्वम्उक्तम्॥

**हिन्द्यनुवादः –** न्याय लक्ष्य है। न्यायत्व लक्ष्यता-अवच्छेदक है। 'उपयुक्तक्रमबद्ध रूप वाला प्रतिज्ञादि पाँचों अवयवों का जो समुदाय है' उसे न्याय कहते है। यहाँ समुदाय मात्र कहने पर घटादि के समुदायों में भी अतिव्याप्ति हो जाती अतः 'प्रतिज्ञादि' का कथन किया गया। घटादि के समुदाय में प्रतिज्ञादि के समुदाय का अभाव होने से अतिव्याप्ति नहीं होगी। यदि 'प्रतिज्ञादि का समुदाय ही' न्यायलक्षण है ऐसा कहा जाता तो 'विपरीतक्रम वाले प्रतिज्ञादि अवयवसमूह में' अतिव्याप्ति हो जाती। इसीलिए 'उचितानुपूर्वीक अर्थात् उपयुक्तक्रम वाला प्रतिज्ञादि का समुदाय' कहा गया। इसी प्रकार लक्षण में 'उचितानुपूर्वीक' मात्र यही ग्रहण करने पर 'उचित क्रम वाले एक से दश पर्यन्त सङ्ख्या आदि में' अतिव्याप्ति हो जाती। अतः इस अतिव्याप्ति निवारण हेतु इसके साथ ही लक्षण में 'प्रतिज्ञादि-समुदायत्व' भी कहा गया।

## विश्लेषणम्

**न्यायकथनम् –** न्यायस्य प्रसङ्गः परार्थानुमित्यन्तर्गते आयाति। न्यायदर्शने पञ्चावयवाक्यानां क्रमशः समुदायरूपे कथनमेव न्याय उच्यते। अत एव **'उचितानुपूर्वीकप्रतिज्ञाऽऽदिपञ्चकसमुदायत्वं'** न्यायलक्षणं दीयते उपन्यासे। उचितरीत्या क्रमशः उत्तरोत्तरप्रतिज्ञादिपञ्चवाक्यानां समूह एव न्याय इति। अत्र घटादिसमूहेऽतिव्याप्तिवारणाय एव 'प्रतिज्ञाऽऽदि' उक्तम्। प्रतिज्ञाऽऽदिपञ्चावयवानां व्युत्क्रमदृष्ट्या अपि समुदायत्वं वर्तते। किन्तु व्युत्क्रमोक्तप्रतिज्ञादीनां समुदायः न्यायः न भवति। अतः न्यायलक्षणस्य अत्रातिव्याप्तिवर्जनाय 'उचितानुपूर्वीक' इति पदं प्रयुक्तम्। 'उचितानुपूर्वीक'मात्रं न्यायलक्षणमुक्तौ एकत्वात् आरभ्य दशपर्यन्तम् उचितक्रमे वर्णिते संख्यादावतिव्याप्तिः भवति। न्यायलक्षणस्य संख्यादाव- तिव्याप्तिः न भवेत् चेत् लक्षणे 'प्रतिज्ञाऽऽदिसमुदायत्वं' उक्तम्। प्रतिज्ञादिसमुदायत्वस्य संख्यादावाभावान्नातिव्याप्तिः। अतः न्यायशास्त्रे पञ्चावयववाक्यं नाम न्याय इति।

**उपन्यासः -** अवयवो लक्ष्यः। अवयवत्वं लक्ष्यताऽवच्छेदकम्। 'न्यायान्तर्गतत्वे सति प्रतिज्ञाऽऽद्यन्यतमत्वं लक्षणम्॥

**हिन्द्यनुवादः –** अवयव लक्ष्य है। अवयवत्व लक्ष्यता-अवच्छेदक है। 'न्याय के अन्तर्गत स्थित प्रतिज्ञादि वाक्यों का पृथक् – पृथक् रूप ही अवयव कहा जाता है।'

## विश्लेषणम्

**अवयवलक्षणम् –** 'पञ्चावयववाक्यं' इत्यत्र अवयवपदं प्रयुक्तम्। अतः सम्प्रति 'अवयव' पदं लक्षितम् उपन्यासकारेण। सामान्यतः लोके अवयवस्य अर्थः शरीराङ्गम्, भागः, अंशः इत्यादयः प्रचलन्ति। किन्तु न्यायदर्शने 'अवयव' इत्यपि पारिभाषिकपदं वर्तते। **'न्यायान्तर्गतत्वे सति प्रतिज्ञाऽऽद्यन्यतमत्वं'** अवयस्य लक्षणम् अर्थात् पञ्चावयववाक्येषु प्रतिज्ञादिकस्य पृथक्-पृथक् कथने सति एते 'अवयव' इति संज्ञया अभिधीयन्ते। सरलभाषायाम् एवम्वक्तुं शक्यते यत् यदा प्रतिज्ञादिः समूहरूपे भवति तदा 'न्यायः' कथ्यते तथा यदा पृथक् -पृथक् भवति तदा 'अवयवः' अभिधीयते।

**उपन्यासः -** १. प्रतिज्ञा लक्ष्या। प्रतिज्ञात्वं लक्ष्यताऽवच्छेदकम्। 'न्याय-घटक-पक्ष-विशेष्यक-साध्य- प्रकारकत्वं' लक्षणम्। 'साध्य-प्रकारकत्व-'मात्रोक्तौ 'वह्निमदिन्धनम्' इत्याकारक-वाक्येऽतिव्याप्तिः, अतः 'पक्ष-विशेष्यकत्वम्' उक्तम्, तत्र पक्ष-विशेष्यकत्वाभावान्नातिव्याप्तिः। 'पक्ष-विशेष्यकत्व'मात्रोक्तौ 'धूमवान्पर्वतः' इत्याकारक-वाक्येऽतिव्याप्तिः, तत्र पक्ष - विशेष्यकत्वस्य सत्वात् , अतः साध्यप्रकारकत्वम् ' इत्युक्तम्। 'पक्ष-विशेष्यक-साध्य-प्रकारकत्वम्' इत्युक्तौ न्याय -बहिर्भूत-'पर्वतोवह्निमान्'-इत्याकारक-उदासीन-वाक्येऽतिव्याप्तिः, अतो 'न्याय- घटितत्वम्' उक्तम्, उदासीनवाक्ये न्याय - घटितत्वाभावान्नातिव्याप्तिः।

**हिन्द्यनुवादः -** प्रतिज्ञा लक्ष्या है। प्रतिज्ञात्व लक्ष्यता-अवच्छेदक है। 'न्याय का वह अवयव (वाक्य) जो पर्वत विशेष्य (पक्ष) से युक्त साध्य प्रकार का ज्ञान कराता है' उसे प्रतिज्ञा कहते है। लक्षण में 'साध्यप्रकारकत्व' मात्र कहने पर 'वह्निमदिन्धनम्' इस प्रकार के वाक्य में भी अतिव्याप्ति हो जाती। अत एव 'पक्षविशेष्यकत्व' का भी उपादान किया गया। उपर्युक्त उदाहरण में 'पक्षविशेष्यकत्व' का अभाव होने से अतिव्याप्ति नहीं होगी। यदि प्रतिज्ञा के लक्षण में 'पक्षविशेष्यकत्व' का ही ग्रहण करते तो 'धूमवान्पर्वतः' इस प्रकार के वाक्य में भी अतिव्याप्ति होने लगती। क्योंकि यहाँ भी 'पक्षविशेष्यकत्व' है। इसीलिए 'साध्यप्रकारकत्व' कहा गया। यदि 'पक्षविशेष्य वाले साध्यप्रकार को' ही प्रतिज्ञा का लक्षण कहा जाता तो न्याय

से भिन्न 'पर्वतो वह्निमान्' इस प्रकार के उदासीन वाक्यों में भी अतिव्याप्ति की संभावना होने लगेगी। इसी कारण से लक्षण में 'न्याय-घटितत्व' यह पद भी कहा गया। उदासीन वाक्यों में न्यायघटितत्व (न्यायावयव) का अभाव होने से अतिव्याप्तिदोष नहीं होगा।

## विश्लेषणम्

**प्रतिज्ञावाक्यलक्षणम् –** इतः पञ्चावयववाक्यानां लक्षणं प्रारभ्यते। पञ्चावयवसन्दर्भे न्यायस्य अवयवस्य च ज्ञानं महत्वपूर्णं स्थानं भजते। अतः पञ्चावयवाक्यानां लक्षणात् पूर्वं तयोः लक्षणमुच्यते टीकाकारेण। पञ्चावयवाक्येषु प्रतिज्ञावाक्यं प्रथमम्। **न्यायघटकपक्षविशेष्यकसाध्यप्रकारकत्वं** प्रतिज्ञालक्षणमुक्तम्। न्यायस्य स अवयवः यः पक्षविशेष्यकः साध्यप्रकारकः वर्तते सः प्रतिज्ञावाक्यमिति कथ्यते। यथा 'पर्वतो वह्निमान्' इति वाक्ये पर्वतरूपपक्षविशेष्यः तथा वह्निरूपसाध्यप्रकारः वर्तते। अतः वाक्यमिदं प्रतिज्ञावाक्यम्। तर्कदीपिकायां साध्यवत्तया पक्षवचनं प्रतिज्ञा[267] कथ्यते। यदि लक्षणे 'साध्यप्रकारत्व'मात्रमुच्यते तर्हि सपक्षप्रकारकवाक्येऽपि अतिव्याप्तिः यथा 'वह्निमदिन्धनम्'। अतः पक्षविशेष्यकत्वम् उक्तम्। अत्र इन्धनरूपविशेष्यः सन्दिग्धसाध्यवान् न, अत्र वह्निरूपसाध्यस्य निश्चितत्वात्। अतः पक्षविशेष्यकत्वाभावान्नातिव्याप्तिः अत्र प्रतिज्ञावाक्यलक्षणस्य। यदि 'पक्षविशेष्यकत्वमात्रं प्रतिज्ञावाक्यस्य लक्षणमुच्यते तर्हि 'धूमवान्पर्वतः' इत्याकारकवाक्येऽपि सन्दिग्धसाध्यवान् पर्वतरूपविशेष्यस्य विद्यमानत्वात् पक्षविशेष्यकत्वमस्ति। अतः वाक्यमिदमपि प्रतिज्ञावाक्यं भविष्यति। अत्र अतिव्याप्तिनिवारणाय एव लक्षणे 'साध्यप्रकारकत्वम्' उक्तम्। अतः नात्रातिव्याप्तिः। एवम्प्रकारेणैव उदासीनवाक्येऽतिव्याप्तेः निवारणाय लक्षणे 'न्यायघटितत्वम्' उक्तम्। अर्थात् न्यायान्तर्गतं पक्षविशेष्यकसाध्यप्रकारकवाक्यमेव प्रतिज्ञावाक्यं न तु अन्यवाक्यम् इति। 'पक्षज्ञानमि'ति प्रतिज्ञायाः प्रयोजनम्।

**उपन्यासः -** २. हेतु-वाक्यं लक्ष्यम्। हेतु -वाक्यत्वं लक्ष्यताऽवच्छेदकम्। 'न्याय-घटितत्वे सति पञ्चम्यन्त-लिङ्ग-प्रतिपादकत्वं' लक्षणम्। 'लिङ्ग-प्रतिपादकत्व-'मात्रोक्तौ 'धूम' इत्याकारक-वचनेऽतिव्याप्तिः, अतः 'पञ्चम्यन्तत्वम्' उक्तम्, तत्र पञ्चम्यन्तत्वाभावान्नातिव्याप्तिः।

---

267 तर्कदीपिका – पञ्चावयववाक्यप्रकरणम्

'पञ्चम्यन्तत्वमात्रोक्तौ 'घटात्' इत्याकारक-वचनेऽतिव्याप्तिः, अतो लिङ्ग -प्रतिपादकत्वम्' उक्तम्, तत्र लिङ्ग-प्रतिपादकत्वाभावान्नातिव्याप्तिः। 'पञ्चम्यन्त-लिङ्ग-प्रतिपादकत्वम्' उक्तौ उदासीन-'धूमाद्'-इत्याकारकवाक्येऽतिव्याप्तिः, अतो 'न्याय-घटितत्वम्' उक्तम्, तत्र न्याय -घटितत्वाभावन्नातिव्याप्तिः।

**हिन्द्यनुवादः -** हेतुवाक्य लक्ष्य है। हेतुवाक्यत्व लक्ष्यतावच्छेदक है। 'न्याय का अवयव होते हुए पञ्चम्यन्त जो वाक्य लिङ्ग का प्रतिपादक हो' उसे हेतु कहते है। 'लिङ्गप्रतिपादकत्व' मात्र कहने पर 'धूम' इस वचन में भी अतिव्याप्ति हो जाती। अतः 'पञ्चमी-विभक्त्यन्तक' कहा गया। 'धूम' इस वचन में पञ्चम्यन्त का अभाव होने से अतिव्याप्ति का निवारण हो जाता है। इसी प्रकार लक्षण में 'पञ्चम्यन्त' मात्र का कथन करने पर 'घटात्' इस पञ्चम्यन्त वचन में भी यह लक्षण अतिव्याप्त हो जाता। अत एव 'लिङ्गप्रतिपादकत्व' का उच्चारण किया गया। 'घटात्' इस वचन में लिङ्गप्रतिपादकत्व का अभाव होने से अतिव्याप्ति नहीं होगी तथा 'पञ्चम्यन्त-लिङ्गप्रतिपादकत्व' यह हेतु का लक्षण करने पर 'धूमात्' इस उदासीन वचन में अतिव्याप्ति होती। इसीलिए 'न्याय-घटितत्व' कहा गया। 'धूमात्' इस वाक्य में न्यायघटितत्व का अभाव होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**हेतुवाक्यलक्षणम् –** परार्थानुमानस्य पञ्चावयववाक्यान्तर्गते द्वितीयं वाक्यं हेतुवाक्यं वर्तते। हेतुः इत्यर्थः लिङ्गम् अस्ति। यत्वाक्यं लिङ्गप्रतिपादकं भवति तदेव न्यायशास्त्रे हेतुवाक्यं प्रतिपाद्यते। उपन्यासकारः **न्यायघटितत्वे सति पञ्चम्यन्तलिङ्गप्रतिपादकत्वं** हेतुवाक्यस्य लक्षणम् उक्तवान्। यत् पञ्चमीविभक्तिकान्तं वाक्यं हेतोः प्रतिपादनं करोति तत्वाक्यं हेतुवाक्यम् इति। दीपिकायामपि एतदेवोक्तं हेतुवाक्यलक्षणे।[268] यथा 'पर्वतो वह्निमान् धूमत्वात्'। अत्र वह्निरूपसाध्यस्य कृते पञ्चम्यन्तलिङ्गरूपप्रतिपादकपदं 'धूमत्वात्' वर्तते। अतः इदं वाक्यं हेतुवाक्यमस्ति। यदि लक्षणे 'लिङ्गप्रतिपादकत्वं' मात्रमेवोच्यते तर्हि 'धूम' इति वचनेऽपि अतिव्याप्तिः यतोहि धूमपदं 'पर्वतो वह्निमान्' इत्यत्र लिङ्गप्रतिपादकम्। अतः 'पञ्चम्यन्तत्वं' कथितम्, 'धूम' इति वचने पञ्चम्यन्तत्वाभावात् नातिव्याप्तिः

[268] पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः। तत्रैव

हेतुवाक्यस्य। लक्षणे 'लिङ्गप्रतिपादकत्वं' इति पदस्य 'घटात्' एतादृशपञ्चम्यन्तवचनेऽतिव्याप्तेः निवारणाय औचित्यमस्ति। अथ च 'धूमाद्' इत्याकारकोदासीनवचने- ऽतिव्याप्तिवर्जनाय 'न्यायघटितत्वम्' कथितम्। 'धूमाद्' इति पदं न न्यायान्तर्गते परिगणितम्। अतो नात्रातिव्याप्तिः हेतुलक्षणस्य। 'लिङ्गज्ञानं' हेतुवाक्यस्य प्रयोजनं वर्तते।

'**उपन्यासः -** ३. उदाहरण-वाक्यं लक्ष्यम्। उदाहरण -वाक्यत्वं लक्ष्यताऽवच्छेदकम्। 'न्याय-घटित-हेतु-विशेष्यक-व्याप्ति-प्रतिपादकत्वं' लक्षणम्। 'हेतु-विशेष्यकत्व-'मात्रोक्तौ 'नील-धूम' इत्याकारक-वाक्येऽतिव्याप्तिः, हेतु-विशेष्यकत्वस्य तत्र सत्त्वात्, अतो 'व्याप्ति-प्रतिपादकत्वम्' उक्तम्। 'व्याप्ति-प्रतिपादकत्व'-मात्रोक्तौ 'व्याप्य' इत्याकारकवचनेऽतिव्याप्तिः, अतो 'हेतु-विशेष्यकत्वम्' उक्तम्, तत्र हेतु -विशेष्यकत्वाभावादहेतोरपि विषयकत्वान्नातिव्याप्तिः। 'हेतु-विशेष्यक-व्याप्ति- प्रतिपादकत्वम्' उक्तौ 'धूमौ वह्निव्याप्य ' इत्याकारकोदासीनवाक्येऽतिव्याप्तिः, अतो 'न्याय-घटितत्वम्' उक्तम्, तत्र न्याय - घटितत्वाभावान्नातिव्याप्तिः।

**हिन्द्यनुवादः –** उदाहरण-वाक्य लक्ष्य है। उदाहरण-वाक्यत्व लक्ष्यतावच्छेदक है। 'न्याय का वह अवयव जो हेतु रूप विशेष्य में व्याप्ति का प्रतिपादन कराने वाला हो' उसे उदाहरण-वाक्य कहते है। लक्षण में 'हेतु विशेष्यकत्व' मात्र कहने पर 'नील-धूम' इस प्रकार के वाक्य में भी अतिव्याप्ति हो जाती, यहाँ भी 'हेतु-विशेष्यकत्व' के होने से। अतः 'व्याप्ति-प्रतिपादकत्व' का भी ग्रहण किया गया लक्षण में। इसी प्रकार लक्षण में 'व्याप्ति-प्रतिपादकत्व' का ही उपादान करने पर 'व्याप्य' इस वचन में अतिव्याप्ति होने लगती। इस कारण से 'हेतु-विशेष्यकत्व' का भी कथन किया गया। 'व्याप्य' इस वचन में हेतु-विशेष्यकत्व का अभाव होने से बिना हेतु के भी विषय वाला होने के कारण उदाहरण-वाक्य की अतिव्याप्ति नहीं होगी। 'हेतुविशेष्यक-व्याप्तिप्रतिपादक' मात्र इतना ही लक्षण करने पर 'धूमो वह्नि व्याप्य' इस उदासीन वाक्य में अतिव्याप्ति के निवारणार्थ 'न्याय-घटितत्व' भी कहा गया। इस उदासीन वाक्य में न्याय के अवयवत्व (घटितत्व) का अभाव होने से अतिव्याप्ति नहीं होगी।

## विश्लेषणम्

**उदाहरणवाक्यलक्षणम् -** तृतीयं वाक्यम् उदाहरणवाक्यं वर्तते। उपन्यासे **न्यायघटितहेतुविशे- ष्यकव्याप्तिप्रतिपादकत्वम्** उदाहरणवाक्यस्य लक्षणं वर्तते। पञ्चावयववाक्ये यत्वाक्यं व्याप्तिं प्रतिपादयति तथा तस्याः व्याप्तेः आश्रयः विशेष्यो वा हेतुः भवति तत् हेतुरूपविशेष्यकव्याप्तिप्रतिपादकवाक्यं उदाहरणवाक्यं कथ्यते। यथा 'यत्र यत्र धूमस्तत्र तत्र वह्निः यथा महानसम्'। लक्षणे 'हेतुविशेष्यकत्व'मात्रोक्तौ 'नीलधूमः' इत्याकारकज्ञानेऽपि अतिव्याप्तिर्जायते उदाहरणवाक्यस्य, यतोहि अत्रापि 'नीलः विशेषणं तथा धूमः (हेतुः) विशेष्यः' वर्तते। अत एव व्याप्तिप्रतिपादकत्वम् उक्तम्। अनेन प्रकारेण 'व्याप्तिप्रतिपादकत्व'मात्रोक्तौ 'व्याप्य' इत्यस्मिन् वचनेऽपि अतिव्याप्तिः, अस्य पदस्यापि व्याप्तिप्रतिपादकत्वात्। अतः हेतुविशेष्यकत्वमपि उक्तम्। अत्र हेतुविशेष्यत्वाभावान्नातिव्याप्तिः। अत्रापि 'न्यायघटितत्वम्' इति पदस्य पदकृत्यं पूर्ववदेव अवगन्तव्यम्। उदाहरणवाक्यं दृष्टान्तवाक्यनाम्ना अपि अभिधातुं शक्यते। उदाहरणवाक्यस्य प्रयोजनं व्याप्तिज्ञानमस्ति।

**उपन्यासः -** ४. उपनय-वाक्यं लक्ष्यम्। उपनय -वाक्यत्वं लक्ष्यतावच्छेदकम्। 'पक्षविशेष्यक-व्याप्ति-विशिष्ट-हेतु-प्रकारकत्वं' लक्षणम्। 'पक्ष-विशेष्यकत्व'मात्रोक्तौ 'नील-पर्वत' इत्याकारक-वाक्येऽतिव्याप्तिः, तत्र पक्षविशेष्यकत्वस्य सत्त्वात् , अतो 'हेतुप्रकारकत्वम्' उक्तम्। 'हेतु-प्रकारकत्व' मात्रोक्तौ 'धूमवान्महानस' इत्याकारकवाक्येऽतिव्याप्तिः, अतः 'पक्ष-विशेष्यकत्वम्' उक्तम्, तत्र पक्ष-विशेष्यकत्वाभावान्नातिव्याप्तिः,'पक्ष-विशेष्यक-हेतु-प्रकारकत्वम्'इत्युक्तौ 'धूमवान्पर्वत' इत्याकारक-वाक्येऽतिव्याप्तिः, अतो 'व्याप्ति-विशिष्ट' इत्युक्तम्, तत्रव्याप्ति-विशिष्टहेतुप्रकारकत्वा- भावान्नातिव्याप्तिः। 'व्याप्ति-विशिष्ट-हेतु-प्रतिपादकत्वम्' उक्तौ न्याय-बहिर्भूत-'वह्नि-व्याप्य-धूमवान्'-इत्याकारक-वाक्येऽतिव्याप्तिः, अतो 'न्यायघटितत्वम्' अपिबोध्यम्, तत्रन्याय-घटितत्वाभावान्नातिव्याप्तिः।

**हिन्द्यनुवादः –** उपनय वाक्य लक्ष्य है। उपनयवाक्यत्व लक्ष्यता-अवच्छेदक है। 'व्याप्तिविशिष्टरूप से हेतु प्रकार के पक्ष विशेष्य वाले ज्ञान का प्रतिपादक वाक्य' ही उपनय है। उपनयलक्षण में 'पक्षविशेष्यकत्व' मात्र कहने पर 'नील-पर्वत' इस प्रकार के वाक्य में भी अतिव्याप्ति हो जाती क्योंकि यहाँ भी 'पक्षविशेष्यकत्व' है। अतः 'हेतुप्रकारकत्व' का भी कथन किया गया। इसी प्रकार मात्र 'हेतुप्रकारकत्व' का कथन करने पर 'धूमवान्महानसम्' इस

प्रकार के वाक्य में अतिव्याप्ति हो जाती। किन्तु 'पक्षविशेष्यकत्व' इस पद का उच्चारण करने से यहाँ पर अतिव्याप्ति का निवारण हो जाता है। क्योंकि 'धूमवान् महानसं' इस वाक्य में 'पक्षविशेष्यकत्व' का अभाव है। इस लक्षण में 'पक्षविशेष्यक-हेतुप्रकारकत्व' मात्र रखने पर 'धूमवान् पर्वतः' इस तरह के वाक्यों में भी अतिव्याप्ति हो जाती अतः 'व्याप्तिविशिष्ट' यह पद भी ग्रहण किया गया। उपर्युक्त वाक्य में 'व्याप्ति से विशिष्ट हेतुप्रकारकत्व' का अभाव होने से अतिव्याप्ति नहीं होगी। उपनयलक्षण का 'वह्निव्याप्यधूमवान्' इस प्रकार के उदासीनवाक्यों में अतिव्याप्ति न हो अतः यहाँ भी न्यायघटित उपनयवाक्य ही समझना चाहिए। उपर्युक्त उदासीन वाक्य में न्यायघटितत्व का अभाव होने से यहाँ उपनयवाक्यलक्षण की अतिव्याप्ति नहीं हुई।

## विश्लेषणम्

**उपनयवाक्यलक्षणम् -** पञ्चावयववाक्येषु उपनयवाक्यं चतुर्थवाक्यं वर्तते। उपन्यासे **'पक्षविशेष्यकव्याप्तिविशिष्टहेतुप्रकारकत्वं'** उपनयस्य लक्षणं प्रस्तुतम्। न्यायस्य यस्मिन् वाक्ये पक्षः विशेष्यः तथा व्याप्तिविशिष्टहेतुः प्रकारः वर्तते तत्वाक्यम् उपनयवाक्यं भवति। यदि लक्षणे पक्षविशेष्यकत्वमात्रमुच्यते तर्हि 'नील-पर्वत' इत्याकारकवचनेऽपि अतिव्याप्तिः, यतोहि अत्र नीलं विशेषणं तथा पर्वतः विशेष्यः। अयं विशेष्यः पक्षोऽपि वर्तते अतः अत्रापि पक्षविशेष्यकत्वमस्ति। अत एव 'हेतुप्रकारकत्वम्' उक्तम्। अत्र हेतुप्रकारकत्वाभावान्नातिव्याप्तिः। लक्षणे 'हेतुप्रकारकत्व'मात्रोक्तौ 'धूमवान्महानस' इत्यत्रापि धूमरूपहेतुप्रकारकत्वस्य सत्त्वात् उपनयवाक्यस्यातिव्याप्तिः भविष्यति। अत एव 'पक्षविशेष्यकत्वम'पि योजितम्। अत्र पक्षः विशेष्यः न, अपितु सपक्षः विशेष्यः। अतः पक्षविशेष्यकत्वाभावान्नात्रातिव्याप्तिः। अनेन प्रकारेण लक्षणे 'व्याप्तिविशिष्ट' इति पदस्य प्रयोजनं 'धूमवान्पर्वतः' इत्यस्मिन् वाक्ये अतिव्याप्तिनिवारणार्थम् अभवत्। यतोहि अत्रापि पर्वतरूपपक्षविशेष्यकत्वं तथा धूमरूपहेतुप्रकारकत्वं तु अस्त्येव। अत एव 'व्याप्तिविशिष्ट' इत्युक्तम् अर्थात् 'धूमवान्पर्वतः' इति न उपनयवाक्यम् अपितु 'वह्निव्याप्यधूमवान्पर्वतः' इति उपनयवाक्यम्। एतमेव वाक्यं 'तथा चायम्' इत्यनेन वाक्येन संबोध्यते परार्थानुमानान्तर्गते। 'वह्निव्याप्यधूमवान्' इत्याकारकोदासीनवाक्ये अतिव्याप्तिवारणाय उपनयवाक्यलक्षणेऽपि न्यायघटितत्वम् इति अध्याहर्तव्यम्। एवम्प्रकारेण उपनयवाक्यस्य

प्रयोजनं 'पक्षधर्मताज्ञानं' वर्तत इति वक्तुं शक्यते।

**उपन्यासः -** ५. निगमन-वाक्यं लक्ष्यम्। निगमन-वाक्यत्वं लक्ष्यताऽवच्छेदकम्। 'पक्ष-विशेष्यकाबाधित-साध्य-प्रतिपादकत्वं' लक्षणम्। 'पक्ष-विशेष्यक-साध्य-प्रतिपादकत्वम्' उक्तौ प्रतिज्ञावाक्येऽतिव्याप्तिः, अतो 'अबाधितत्वम्' उक्तम्, 'पक्ष-विशेष्यकत्व'-'साध्य-प्रकारकत्वयोः' 'नील-पर्वतः', 'वह्निमदिन्धनम्' इत्याकारक-वाक्योरतिव्याप्तिवारणं प्रयोजनं बोध्यम्। न्याय-बहिर्भूत-वाक्येऽतिव्याप्ति-वारणाय 'न्यायघटितत्वम्' अपि बोध्यम्॥४२॥

**हिन्द्यनुवादः –** निगमनवाक्य लक्ष्य है। निगमनवाक्यत्व लक्ष्यता-अवच्छेदक है। 'पक्षरूप विशेष्य में अबाधित साध्य का प्रतिपादन कराने वाला वाक्य' निगमन है। यदि 'पक्ष विशेष्य में साध्य का प्रतिपादन कराने वाला ही' निगमन है ऐसा लक्षण किया जाता तो 'प्रतिज्ञावाक्य' में अतिव्याप्ति हो जाती अतः 'अबाधित' पद भी कहा गया। 'पक्षविशेष्यकत्व' का 'नील-पर्वत' इस प्रतिज्ञावाक्य में तथा 'साध्यप्रकारकत्व' का 'वह्निमदिन्धनम्' इस प्रतिज्ञावाक्य में अतिव्याप्तिनिवारण ही 'अबाधित' पद का प्रयोजन समझना चाहिए। न्याय से बहिर्भूत वाक्यों में अतिव्याप्ति निवारण हेतु 'न्यायघटितत्व' पद का संयोजन भी लक्षण में समझना चाहिए।

## विश्लेषणम्

**निगमनवाक्यलक्षणम् -** पञ्चावयवाक्यान्तर्गते अन्तिमं वाक्यं निगमनवाक्यमस्ति। पक्षविशेष्ये अबाधितसाध्यस्य ज्ञानं निगमनवाक्यं कारयति। अतो हेतोः उपन्यासकारेणापि **'पक्षविशेष्यकाबाधित- साध्यप्रतिपादकत्वं'** निगमनस्य लक्षणमुक्तम्। अत्र अबाधितपदं प्रतिज्ञावाक्येऽतिव्याप्तिनिवारणाय प्रयुक्तं यतोहि प्रतिज्ञावाक्यमपि पक्षविशेष्यकत्वं तथा साध्यप्रकारकत्वं प्रतिपादयति। किन्तु तत्र अबाधितसाध्यप्रकारस्य प्रतिपादनं न भवति तथा निगमनवाक्ये अबाधितसाध्यप्रतिपादनं वर्तते। अतः प्रतिज्ञावाक्येऽबाधितत्वाभावान्नातिव्याप्तिः। अनेन प्रकारेण लक्षणे 'पक्षविशेष्यकत्व'पदस्य कथनं 'नील-पर्वतः' इति प्रकारकवाक्येऽतिव्याप्तिवारणाय एवं साध्यप्रकारकत्वस्य कथनं 'वह्निमदिन्धनम्' इत्याकारकवाक्येऽतिव्याप्तिवर्जनाय कृतमिति बोध्यम्। पुनश्च अत्रापि 'न्यायघटितत्वम्' अध्याहर्तव्यम् अन्यवाक्यवत्। उपर्युक्तैः चतुष्प्रकारकैः वाक्यैः सदृशं निगमनवाक्यस्यापि प्रयोजनं वर्तते। अबाधितसाध्यस्य ज्ञानमेव निगमनस्य प्रयोजनमस्ति।

परार्थानुमाने 'तस्मात्तथा' इति निगमनवाक्यं यथार्थपरार्थानुमितेः प्रमुखसाधनरूपेण विद्यते।

(२.१६ बुद्धि-गुण-विवरणेऽनुमिति-करणं = लिङ्ग-परामर्शः)

**तर्कसंग्रहः -** स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्॥४३॥

**उपन्यासः -** तस्मादनुमितित्वावच्छिन्नं प्रति लिङ्ग-परामर्श एव कारणं बोध्यम् ॥४३॥

**हिन्द्यनुवादः –** इन दोनों अनुमानों से ज्ञात अनुमिति के प्रति लिङ्गपरार्श ही कारण है।

## विश्लेषणम्

**निष्कर्षवाक्यम् –** अनुमितिभेदवर्णनान्तरम् उपन्यासकारेण निष्कर्षतया अनुमितेः करणमुक्तम्। स्वार्थानुमानेन तथा परार्थानुमानेन अनुमितित्वावच्छिन्ना या यथार्थानुमितिर्जायते। तस्याः अनुमितेः करणं लिङ्गपरामर्शः भवतीति निष्कर्षः। यद्यपि इतः पूर्वम् आचार्येण करणस्वरूपप्रकरणे अनुमितिज्ञानस्य करणं व्याप्तिज्ञानं तथा व्यापारः लिङ्गपरामर्श उच्यते। लिङ्गपरामर्शः व्याप्तिज्ञानविशिष्टमेव वर्तते अतः लिङ्गपरामर्शकथने सति व्याप्तिज्ञानग्रहणम् अनायासेन भवति। संभवतः अस्मात् लाघवादेव उपन्यासकारेण अत्र लिङ्गपरामर्शमात्रमेव करणं प्रतिपादितम्। दीपिकायामपि एतदेवोक्तम्।[269]

(२.१६ बुद्धि-गुण-विवरणेऽनुमिति प्रसङ्गे लिङ्ग-लक्षणम् )

**तर्कसंग्रहः -** लिङ्गं त्रिविधम्। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूवत्त्वम्। 'यत्र धूमस्तत्राग्निर्यथा महानसः' इत्यन्वयव्याप्तिः। यत्र वह्निनर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रद इति व्यप्तिरेकव्याप्तिः। अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात्पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्। यदितरेभ्यो न भिद्यते न तद्गन्धवद्यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति,पृथिवीमात्रस्य पक्षत्वात्॥४४॥

---

[269] वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शस्थले विशिष्टपरामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव करणत्वात्। लिङ्गं न करणं अतीतादौ व्यभिचारात्। 'व्यापारवत्कारणं करणम्' इति मते परामर्शद्वाराव्याप्तिज्ञानं करणम्।

**उपन्यासः-** 'लिङ्गत्रिविधम्' इति लिङ्ग-विभागोक्तिः। (१) अन्वय-व्यतिरेकिलिङ्गं लक्ष्यम्। अन्वय-व्यतिरेकित्वं लक्ष्यताऽवच्छेदकम्। 'अन्वयव्याप्तिमत्त्वे सति व्यतिरेकव्याप्तिमत्त्वं' लक्षणम्। 'अन्वय-व्याप्ति-मत्त्व'मात्रमुक्तौ केवलान्वयिन्यतिव्याप्तिः, अन्वय-व्याप्तिमत्त्वस्य सत्त्वात्, अतो व्यतिरेक-व्याप्तिमत्त्वमुक्तम्। 'व्यतिरेक-व्याप्तिमत्त्व-मात्रमुक्तौ केवल-व्यतिरेकिण्यतिव्याप्तिः, तत्र व्यतिरेक-व्याप्तिमत्त्वस्य सत्त्वात्, अतो विशिष्टमुपात्तम्, तत्र विशिष्टस्याभावान्नातिव्याप्तिः। (२) केवलान्वयि लक्ष्यम्। केवलान्वयित्वं लक्ष्यताऽवच्छेदकम्। 'अन्वय-मात्रव्याप्तिमत्त्वं' लक्षणम्। अत्र 'मात्र'-पदानुपादानेऽन्वय-व्यतिरेकिण्यतिव्याप्तिः, अतस्तदुपादानम्, तत्र व्यतिरेक-व्याप्तेरपि सत्त्वान्नातिव्याप्तिः। (३) केवल-व्यतिरेकिलिङ्गं लक्ष्यम्। केवल-व्यतिरेकिलिङ्गत्वं लक्ष्यताऽवच्छेदम्। 'व्यतिरेक-मात्र-व्याप्तिमत्त्वं' लक्षणम्। 'मात्र'-पदस्य व्यतिरेकेतर-व्याप्ति-शून्यत्वे सति व्यतिरेक-व्याप्ति-मत्त्वम्। 'व्यतिरेक-व्याप्ति-शून्यत्व'-मात्रोक्तौ प्रमेयत्वादावतिव्यातिः ,अतो 'व्यतिरेक-व्याप्तिमत्त्वम्' उक्तम्। त त्र व्यतिरेक-व्याप्तिमत्त्वाभावान्नातिव्याप्तिः। 'व्यतिरेक-व्याप्तिमत्त्व'-मात्रोक्तौ धूमेऽतिव्याप्तिः, तत्रापि व्याप्तेः सत्त्वात्, अतः 'तदितर–शून्यत्वम्' उक्तम्, तत्र व्यतिरेक-व्याप्तीतर = अन्वय-व्याप्ति-शून्यत्वाभावान्नातिव्याप्तिः, तथाहि साध्याभाव-व्यापकीभूताभाव-प्रतियोगित्वम्। अस्ति चेदं लक्षणम् - (१) 'पृथिवीतरेभ्यो भिद्यते, (२) गन्धवत्त्वात् 'इत्यत्र साध्याभावः = इतर-भेदाभावः, तद्व्यापकीभूतोऽभावो = गन्धाभावः, तत्प्रतियोगित्वं 'गन्ध'-रूप-हेतावस्ति, इतिलक्षण-समन्वयः॥४४॥

**हिन्द्यनुवादः** – लिङ्ग अर्थात् हेतु तीन प्रकार का होता है - अन्वय-व्यतिरेकि लिङ्ग, केवलान्वयि लिङ्ग एवं केवलव्यतिरेकि लिङ्ग।

अन्वय-व्यतिरेकि लिङ्ग लक्ष्य है। अन्वय-व्यतिरेकित्व लक्ष्यतावच्छेदक है। जो 'लिङ्ग अन्वय-व्याप्तिवाला होते हुए व्यतिरेकव्याप्ति वाला भी हो' उसे अन्वय-व्यतिरेकि लिङ्ग कहते है। लक्षण में 'अन्वयव्याप्ति वाला' मात्र कहने पर केवलान्वयि लिङ्ग में अतिव्याप्ति हो जाती। क्योंकि वहाँ भी अन्वयव्याप्ति से युक्त लिङ्ग होता है। अतः 'व्यतिरेकव्याप्ति वाला' भी कहा गया। इसी प्रकार 'व्यतिरेकव्याप्ति वाला जो लिङ्ग है' वही अन्वयव्यतिरेकि लिङ्ग है। ऐसा कहने पर केवलव्यतिरेकि लिङ्ग में अतिव्याप्ति होगी। क्योंकि वहाँ भी व्यतिरेकव्याप्ति से युक्त लिङ्ग के होने से। अतः 'अन्वयव्याप्ति वाला' यह भी कहा गया। ऐसा उक्त करने पर

केवलव्यतिरेकि लिङ्ग में अन्वयव्याप्तित्व का अभाव होने से यहाँ अतिव्याप्ति नहीं होगी।

केवलान्वयि लक्ष्य है। केवलान्वयित्व लक्ष्यतावच्छेदक है। 'जो लिङ्ग मात्र अन्वयव्याप्ति वाला होता है' उसे केवलान्वयि लिङ्ग कहते है। यदि लक्षण में 'मात्र' का उपादान न किया जाता तो केवलान्वयि लिङ्ग का यह लक्षण 'अन्वयव्यतिरेकि लिङ्ग' में अतिव्याप्त हो जाता क्योंकि वहाँ 'अन्वयव्याप्तित्व' के होने से। अतः इसमें अतिव्याप्ति के निवारण हेतु 'मात्र' पद का कथन किया गया है। इस प्रकार अन्वय-व्यतिरेकि लिङ्ग में 'व्यतिरेकव्याप्तित्व' के भी होने से वहाँ अतिव्याप्ति नहीं होगी।

केवलव्यतिरेकि लिङ्ग लक्ष्य है। केवलव्यतिरेकि-लिङ्गत्व लक्ष्यतावच्छेदक है। 'जो मात्र व्यतिरेकव्याप्ति वाला होता है' उसे केवलव्यतिरेकि लिङ्ग कहते है। यहाँ पर 'मात्र' पद का तात्पर्य व्यतिरेक से इतर व्याप्तिशून्यत्व से है अर्थात् 'व्यतिरेक से भिन्न व्याप्तिवाला न होते हुए जो व्यतिरेकव्याप्तिवाला' हो वह केवलव्यतिरेकि लिङ्ग है। यदि लक्षण में 'इतर' पद न कहा जाता अथवा 'व्यतिरेकव्याप्तिशून्यत्व' मात्र इतना ही लक्षण दिया जाता तो प्रमेयत्वादि में अर्थात् केवलान्वयिलिङ्ग में अतिव्याप्ति हो जाती। अतः 'व्यतिरेकव्याप्ति वाला' कहा गया। केवलान्वयि में व्यतिरेकव्याप्तित्व का अभाव का अभाव होने अतिव्याप्ति नहीं होगी। इसी प्रकार 'व्यतिरेकव्याप्ति वाला' मात्र इतना ही लक्षण देने पर 'धूम' में अर्थात् अन्वय-व्यतिरेकि लिङ्ग अतिव्याप्ति हो जाती क्योंकि वहाँ भी व्यतिरेकव्याप्ति उपस्थित है। अतः 'व्यतिरेकव्याप्ति से इतर व्याप्तिशून्यत्व' का कथन किया गया। अन्वय-व्यतिरेकि लिङ्ग में अन्वयव्याप्तिशून्यत्व का अभाव होने से अतिव्याप्ति का निवारण हो जाएगा। अब केवलव्यतिरेकि लिङ्ग को सरलतया इस प्रकार परिभाषित कर रहे हैं कि साध्य के अभाव का व्यापकीभूत अभाव का प्रतियोगित्व जिसमें होता है, वही केवलव्यतिरेकि लिङ्ग है जैसे कि – 'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्'(यहाँ पर साध्य है 'इतरभेद', हेतु है 'गन्ध' एवं पक्ष है 'पृथिवी')। इस स्थल पर साध्य का अभाव हुआ इतरभेदाभाव अर्थात् पृथिवी से इतर जलादि का अभाव, इस अभाव का व्यापकीभूत अभाव गन्धाभाव है तथा इसका प्रतियोगित्व गन्ध रूप हेतु में है। अतः गन्ध यहाँ पर केवलव्यतिरेकि लिङ्ग है। यह उपर्युक्त लक्षण का समन्वय हुआ।

### विश्लेषणम्

**लिङ्गभेदविवरणम् -** अनुमितेः उत्पतिः लिङ्गपरामर्शेण उक्तं पूर्वम्। 'लिङ्गपरामर्शः' इत्यस्मिन् पदे 'लिङ्ग' पदं प्रयुक्तम्। 'लिङ्ग' इत्यस्यार्थः हेतुः। अतः सम्प्रति लिङ्गस्य हेतोः वा भेदः निरूप्यते। लिङ्गं त्रिप्रकारकं वर्तते – अन्वयव्यतिरेकि लिङ्गम्, केवलान्वयि लिङ्गम्, केवलव्यतिरेकि लिङ्गम्।

अनुमानप्रक्रियायां यस्य लिङ्गस्य अन्वयदृष्टान्तः (सपक्षः) व्यतिरेकदृष्टान्तश्च (विपक्षः) द्वयमपि भवति तल्लिङ्गम् अन्वयव्यतिरेकि लिङ्गमुच्यते। उक्तमपि उपन्यासकारेण – **'अन्वयव्याप्तिमत्त्वे सति व्यतिरेकव्याप्तिमत्त्वम्'** अन्वयव्यतिरेकिलिङ्गस्य लक्षणम्। अस्मिन् लिङ्गे हेतुसाध्ययोश्च अन्व्यव्यतिरेकव्याप्तिः भवति। यथा 'पर्वतो वह्निमान् धूमात्' अत्र पर्वतः पक्षः, वह्निः साध्यः, धूमः साध्यस्य हेतुः। अस्य हेतोः 'यत्र यत्र धूमस्तत्र तत्र वह्निः यथा महानसम् (सपक्षः)' इति अन्वयदृष्टान्तं तथा 'यत्र वह्न्याभावः तत्र धूमाभावः यथा सरोवरः (विपक्षः)' इति व्यतिरेकदृष्टान्तमपि प्राप्यते। अतः हेतुरयं अन्वयव्यतिरेकिहेतुः लिङ्गं वा कथ्यते। लक्षणे केवलव्यतिरेकिलिङ्गे केवलान्वयिलिङ्गे च अतिव्याप्तिवारणाय क्रमशः अन्वयव्यातिमत्त्वं तथा व्यतिरेकव्याप्तिमत्त्वं इति पदयोरुपादानं क्रियते।

केवलान्वयिसाधकं केवलान्वयिलिङ्गं भवति। यस्य लिङ्गस्य मात्रान्वयदृष्टान्तः (सपक्षः) उपलभ्यते तल्लिङ्गं केवलान्वयि उच्यते। अत एव **अन्वयमात्रव्याप्तिमत्त्वं** केवलान्वयिलिङ्गस्य लक्षणमुक्तम्। 'घटो अभिधेयः प्रमेयत्वात्' इति अस्य लिङ्गस्य उदाहरणं वर्तते। अत्र घटः पक्षः, अभिधेयत्वं साध्यं तथा प्रमेयत्वं हेतुरस्ति। अत्र साध्यहेतोर्मध्ये व्यतिरेकव्याप्तिः न अस्ति। अस्य हेतोः 'यत्र यत्र प्रमेयत्वं तत्र तत्र अभिधेयत्वं यथा पटः (सपक्षः)' इति अन्वयदृष्टान्तं त्वस्ति किन्तु 'यत्र अभिधेयत्वाभावः तत्र प्रमेयत्वाभावः यथा (?)' अत्र न कोऽपि विपक्षः उपलभ्यते। यतोहि यत्र कुत्रापि प्रमेयत्वं वर्तते तत्र अभिधेयत्वं भवत्येव, सर्वस्यापि प्रमेयत्वाद् अभिधेयत्वाच्च। एतद् एवमपि वक्तुं शक्यते यत् यत्र यत्र अभिधेयत्वस्य अभावः दृश्यते न तत्र प्रमेयत्वस्याभावः। अतः अस्य हेतोः न व्यतिरेकदृष्टान्तत्वात्, हेतुरयं केवलान्वयिलिङ्गम् अस्ति। अस्मिन् लक्षणे यदि 'मात्र' इति पदं नोच्यते तर्हि अन्वय-व्यतिरेकलिङ्गेऽतिव्याप्तिः भविष्यति यतोहि तत्रापि अन्वयव्याप्तिः वर्तते। मात्रपदस्य उपादाने नात्रातिव्याप्तिः यतोहि अन्वयव्यतिरेकिलिङ्गे मात्रान्वयव्याप्तिः न अपितु व्यतिरेकव्याप्तिरपि। अतः न तत्रातिव्याप्तिः केवलान्वयिलिङ्गलक्षणस्य।

लिङ्गस्य तृतीयः प्रकारः केवलव्यतिरेकिलिङ्गं वर्तते। **'व्यतिरेकमात्रव्याप्तिमत्त्वं'** केवलव्यतिरेकि- लिङ्गस्य लक्षणमुच्यते उपन्यासे। यस्य हेतोः मात्रव्यतिरेकदृष्टान्तः (विपक्षः) प्राप्यते तल्लिङ्गं नाम केवलव्यतिरेकिलिङ्गम्। केवलव्यतिरेकिलिङ्गस्य अन्वयदृष्टान्तः (सपक्षः) न प्राप्यते। यथा – 'पृथिवीतरेभ्यो भिद्यते गन्धवत्वात्' अत्र पृथिवी पक्षः, इतरभिन्नत्वं साध्यम्, गन्धः हेतुः वर्तते। अस्य हेतोः 'यत्र यत्र इतरभिन्नाभावः तत्र तत्र गन्धाभावः यथा जलम् (विपक्षः)' इति व्यतिरेकदृष्टान्तः विद्यते किन्तु यत्र यत्र गन्धः तत्र तत्र इतरभेदः यथा (?)' इत्यस्य न किमपि अन्वयदृष्टान्तः सपक्षो वा प्राप्यते। यतोहि गन्धरूपहेतुः पक्षरूपपृथिव्या अतिरिक्तं न कुत्रापि विद्यते। अतः अस्य हेतोः सपक्षः न प्राप्ते सति हेतुरयं केवलव्यतिरेकिलिङ्गमस्ति। अत्र साध्यरूपेतरभेदाभावस्य व्यापकीभूताभावः गन्धाभावः अस्ति। अस्य अभावस्य प्रतियोगित्वं गन्धरूपहेतौ सत्वात् केवलव्यतिरेकिलिङ्गलक्षणस्य समन्वयः अभवत्। यतोहि लिङ्गम् अथवा हेतुरेव 'केवलव्यतिरेकि' भवति। अस्मिन् लक्षणेऽपि मात्रपदम् उक्तम्। अत्र मात्रपदस्य तात्पर्यं **'व्यतिरेकेतरव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वम्'** उद्धृतम् आचार्येण। यदि अत्र 'व्यतिरेकव्याप्तिशून्यत्व'मात्रं कथ्यते तर्हि केवलान्वयिलिङ्गेऽतिव्याप्तिः भविष्यति यतोहि तत्रापि व्यतिरेकव्याप्तिशून्यत्वं वर्तते। अत एव व्यतिरेकव्याप्तिमत्वमपि उक्तम्। केवलान्वयिलिङ्गे व्यतिरेकव्याप्तिमत्वाभावान्नातिव्याप्तिः। अनेन प्रकारेण अन्व्यव्यतिरेकिलिङ्गेऽतिव्याप्तिवारणाय 'व्यतिरेकेतरव्याप्तिशून्यत्वं' कथितम्। तत्र 'व्यतिरेकव्याप्तीतरस्य' अर्थात् अन्वयव्याप्तेः शून्यत्वस्य अभावान्नातिव्याप्तिः संभवति केवलव्यतिरेकिलिङ्गलक्षणस्य।

न्यायशास्त्रस्य अनुमानप्रक्रियायां एतान्येव हेतुत्रयाणि प्रयुज्यन्ते। एते त्रयोऽपि हेतवः सद्-हेतवः भवन्ति न तु हेत्वाभासाः।

( २.१६ बुद्धि-विवरणे पक्ष-सपक्ष-विपक्षाणां लक्षणानि )

**तर्कसंग्रहः -** सन्दिग्धसाध्यवान्पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः। निश्चितसाध्यवान्सपक्षः। यथा तत्रैव महानसः। निश्चितसाध्याऽभाववान्विपक्षः। यथा तत्रैव महाह्रदः॥४५॥

**उपन्यासः -** पक्षो लक्ष्यः। पक्षत्वं लक्ष्यताऽवच्छेदकम्। 'संदिग्ध-साध्यवत्त्वं' लक्षणम्। 'साध्यवत्त्व-' मात्रोक्तौ सपक्षेऽतिव्याप्तिः, अतः 'सन्दिग्ध'इत्युक्तम्। 'सन्दिग्धत्व-'मात्रोक्तौ

सन्देहेऽतिव्याप्तिः, तत्रापि सन्दिग्धत्वस्य सत्त्वात्, 'साध्य'इत्युक्तम्। सपक्षो लक्ष्यः। सपक्षत्वं लक्ष्यताऽवच्छेदकम्। 'निश्चितसाध्यवत्त्वं' लक्षणम्। 'साध्यवत्त्व-'मात्रोक्तौ पक्षेऽतिव्याप्तिः, अतो 'निश्चितत्वम्' उक्तम्, तत्र निश्चितत्वाभावान्नातिव्याप्तिः। 'निश्चितत्व-'मात्रोक्तौ निश्चयात्मकज्ञानेऽतिव्याप्तिः, तत्रापि निश्चितत्वस्य सत्त्वात्, अतः 'साध्य-'इत्युक्तम्। विपक्षो लक्ष्यः। विपक्षत्वं लक्ष्यताऽवच्छेदकम्। 'निश्चित-साध्याभाववत्त्वं' लक्षणम्। 'साध्याभाववत्त्व-'मात्रौक्तो पक्षेऽतिव्याप्तिः, अतो 'निश्चित-'इत्युक्तम्, तत्र निश्चितत्वाभावान्नातिव्याप्तिः। 'निश्चितत्व-'मात्रोक्तौ ज्ञानेऽतिव्याप्तिः, अतः 'साध्याभाव-'इत्युक्तम्॥४५॥

**हिन्द्यनुवादः –** पक्ष लक्ष्य है। पक्षत्व लक्ष्यतावच्छेदक है। 'जहाँ पर साध्य संदिग्ध हो' उसे पक्ष का कहते है। पक्ष के लक्षण में 'साध्य' मात्र कहने पर 'सपक्ष' में अतिव्याप्ति हो जाती। इसीलिए 'सन्दिग्ध' कहा गया तथा 'संदिग्ध' मात्र का कथन करने पर 'सन्देह' में अतिव्याप्ति होती अतः 'साध्य' भी कहा गया।

सपक्ष लक्ष्य है। सपक्षत्व लक्ष्यता-अवच्छेदक है। 'जहाँ पर साध्य निश्चित हो' उसे सपक्ष कहते है। यहाँ भी 'साध्य' मात्र कहने पर 'पक्ष' में अतिव्याप्ति हो जाती अतः 'निश्चित' पद का कथन किया गया। 'पक्ष' में 'निश्चितत्व' का अभाव होने से अतिव्याप्ति नहीं होगी। यदि 'जहाँ पर निश्चितत्व हो' वही सपक्ष कहा जाए तो 'निश्चितज्ञान' में अतिव्याप्ति हो जाएगी। क्योंकि वहाँ भी 'निश्चितत्व' होता है। अतः 'साध्य' पद का भी कथन किया गया है।

विपक्ष लक्ष्य है। विपक्षत्व लक्ष्यतावच्छेदक है। 'जहाँ पर निश्चित रूप से साध्य का अभाव होता है' उसे विपक्ष कहते है। विपक्ष के लक्षण में 'साध्य का अभाव' मात्र रखने पर 'पक्ष' में अतिव्याप्ति होने लगती। अतः 'निश्चित' पद भी कहा गया। 'पक्ष' में निश्चितरूप से साध्य का अभाव न होने से अतिव्याप्ति नहीं होगी। इसी प्रकार मात्र 'निश्चितत्व' कहने पर 'निश्चितज्ञान' में अतिव्याप्ति निवारण हेतु 'साध्य का अभाव' इसका भी ग्रहण किया गया।

## विश्लेषणम्

**पक्षसपक्षविपक्षलक्षणम् -** इतः पूर्वं पर्वतादेः पक्षत्वादिकमुक्तम्। तत्र कः पक्षः, कः सपक्षः, कश्च विपक्षः ? इत्याकाङ्क्षया अत्र पक्षादेः लक्षणं प्रस्तुतं टीकाकारेण। प्रथमं पक्षः लक्ष्यते – **'सन्दिग्धसाध्यवत्त्वं'** पक्षस्य लक्षणम्। यत्र साध्यः सन्देहयुक्तः भवति, सः पक्ष उच्यते। यथा 'पर्वतो वह्निमान् धूमात्' इत्यत्र पर्वते वहनेः सत्ता सन्देहात्मिका अस्ति अर्थात् अत्र 'वह्निः

अस्ति न वा' इत्यस्य निश्चयः न। अतः अत्र 'पर्वतः' पक्षो अस्ति। लक्षणेऽस्मिन् 'सन्दिग्ध'पदस्य उपस्थापनं सपक्षेऽतिव्याप्तिनिवारणाय तथा 'साध्यवत्त्वं' इति सन्देहज्ञानेऽतिव्याप्तिनिवारणाय प्रयुक्तम्।

तदनु सपक्षः उपस्थाप्यते यत् **'निश्चितसाध्यवत्त्वं'** पक्षस्य लक्षणम्। यत्र साध्यस्य स्थितिः निश्चिता भवति सः सपक्षः। यथा 'महानसं वह्निमान् धूमात्' अत्र महानसे वह्निर्भवत्येव इति निश्चयात् महानसं सपक्षः अभिधीयते। अत्र पक्षे तथा निश्चितज्ञानेऽतिव्याप्तेः निवृत्त्यर्थं क्रमशः 'निश्चितत्वं' 'साध्यवत्वं' चेति पदे प्रयुक्ते।

पक्षसपक्षलक्षणानन्तरं विपक्षस्य लक्षणं प्रतिपादितम्। उपन्यासे **'निश्चितसाध्याभाववत्त्वं'** विपक्षः लक्ष्यते। यस्मिन् अधिकरणे साध्यस्य अभावः निश्चितः भवति तदधिकरणं न्यायशास्त्रे विपक्षनाम्ना आख्यातम्। यथा 'महाह्रदः वह्निमान् धूमात्' इत्यत्र महाह्रदे वह्निः (साध्यः) न कदापि भवितुं शक्यत इति निश्चितम्। महाह्रदे साध्याभावः अस्ति। अतः 'महाह्रदः' विपक्षः कथ्यते। अस्य लक्षणस्यापि पदकृत्यं कृतमाचार्येण। अत्र 'साध्याभाववत्त्वं' मात्रोक्तौ पक्षेऽतिव्याप्तिः एवं 'निश्चितत्वमा'त्रोक्ते सति निश्चितज्ञानेऽतिव्याप्तिः, अतः उभयोरेवोपादानम्।

अनुमानपरिच्छेदे पक्षसपक्षविपक्षस्य च विशिष्टस्थानं विहितं यतोहि एतेषां सद्ज्ञानेन बिना अपि यथार्थानुमितिः कर्तुं न प्रभवामः। अतः एते अनुमानान्तर्गते लघवः किन्तु महत्वपूर्णघटकाः सन्ति।

(२.१६ बुद्धि-गुणविवरणे हेत्वाभासोद्देशः)

**तर्कसंग्रहः -** सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः॥४६॥

**उपन्यासः-** हेत्वाभासो लक्ष्यः। हेत्वाभासत्वं लक्ष्यताऽवच्छेदकम्। 'अनुमिति-तत्करणान्यतर-प्रतिबन्धक-यथाऽर्थ-ज्ञान-विषयत्वं' लक्षणम्। अनुमिति-प्रतिबन्धक-यथाऽर्थ-ज्ञान-विषयत्वस्य 'बाध-सत्प्रतिपक्ष-विरुद्ध' एतत्त्रये सत्त्वेऽपिसव्यभिचारादावभावादव्याप्तिः, अतः 'अन्यतर-' इत्युक्तम्, अनुमिति-करण-व्याप्ति-ज्ञान-पक्ष-धर्मता-ज्ञान-प्रतिबन्धकत्वस्य सत्त्वान्नाव्याप्तिः। 'अनुमिति-करण-प्रतिबन्धक'-मात्रोक्तौ बाधादावव्याप्तिः, अतः 'अनुमिति–प्रतिबन्धकत्वम्' उक्तम्। अनुमिति-प्रतिबन्धक-ज्ञान-विषयत्वं पर्वते साध्याभाव-भ्रममादाय धूमेऽप्यस्ति, इत्यतिव्याप्तिः, अतो 'यथाऽर्थ-'इत्युक्तम्। एवं च 'अनुमितितत्करणान्यतर-प्रतिबन्धक-

यथाऽर्थ-ज्ञान-विषयत्वं = हेत्वाभासत्वम्।' इतिपर्यवसन्नम्॥४६॥

**हिन्द्यनुवादः -** हेत्वाभास लक्ष्य है। हेत्वाभासत्व लक्ष्यतावच्छेदक है। 'अनुमिति एवं अनुमिति के करण इन दोनों में से किसी एक का प्रतिबन्धक (असद् हेतु ) जो यथार्थ ज्ञान का विषय होता है' उसे हेत्वाभास कहते है। अर्थात् हेत्वाभास को 'या तो अनुमिति का प्रतिबन्धक होना चाहिए फिर उसके करण का' एवं यथार्थ ज्ञान का विषय भी चाहिए। यदि 'जो अनुमिति का प्रतिबन्धक हो एवं यथार्थज्ञान का विषय हो' यही हेत्वाभास का लक्षण दिया जाता तो बाध, सत्प्रतिपक्ष एवं विरूद्ध इन तीन हेत्वाभास में तो यह लक्षण उपयुक्त होता किन्तु इनके अतिरिक्त सव्यभिचार एवं असिद्ध में अनुमितिप्रतिबन्धकत्व का अभाव होने से अव्याप्त होने लगता। अतः 'अन्यतर' पद दिया गया। इसी प्रकार लक्षण में 'अनुमितिकरण का प्रतिबन्धक' मात्र कहने पर बाध, सत्प्रतिपक्ष एवं विरूद्ध में अव्याप्ति होती। अतः 'अनुमितिप्रतिबन्धकत्व' भी कहा गया। इसी प्रकार लक्षण में 'अनुमिति का प्रतिबन्धक एवं ज्ञान का विषय' मात्र कहने पर पर्वत में साध्याभाव (वह्न्याभाव) का भ्रम होने से धूम में भी अतिव्याप्ति होगी क्योंकि वहाँ भी अनुमितिप्रतिबन्धकभ्रमज्ञानविषयत्व है। अतः 'यथार्थ' भी कहा गया। इस प्रकार 'अनुमिति एवं उसके करण का प्रतिबन्धक यथार्थ ज्ञान का विषयत्व जिसमें होता है' उसे ही हेत्वाभास कहते है। ऐसा लक्षण पर्यवसित होता है।

## विश्लेषणम्

**हेत्वाभासलक्षणम् -** यथा अनुमानप्रक्रियायां हेतुज्ञानं विशिष्टं तथैव हेत्वाभासज्ञानमपि। हेतुवदाभासन्ते इति हेत्वाभासाः[270]। हेत्वाभासाः दुष्टहेतवः भवन्ति। एवं यो दुष्टो हेतुः स हेत्वाभासः तथा यः प्रामाणिको हेतुः सद्धेतुरिति बोध्यम्। हेत्वाभासस्य सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिताश्चेति पञ्चभेदाः वर्तन्ते तथैव सद्धेतोरपि **पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षव्यावृत्तित्वं, असत्प्रतिपक्षत्वं**, **अबाधितत्वञ्चेति** पञ्चरूपाणि भवन्तीति वक्तुं शक्यते। एतेषु रूपेषु एकस्यापि अभावे हेतुः सद्धेतुः न कथ्यते अपितु हेत्वाभासः उच्यते। अत्र पक्षसत्त्वं नाम हेतोः सन्दिग्धसाध्यवति पक्षे वृत्तित्वम्, सपक्षसत्त्वं नाम हेतोः निश्चितसाध्यवति सपक्षे वृत्तित्वम्, विपक्षव्यावृत्तित्वं नाम हेतोः निश्चितसाध्याभाववति विपक्षे अवृत्तित्वम्,

---

270 न्यायबोधिनी - हेत्वाभासप्रकरणम्

असत्प्रतिपक्षत्वं नाम हेतोः विरोधिहेतोरपि विद्यमानत्वम्, अबाधितत्वं नाम हेतोः बाधदोषेण अर्थात् पक्षे साध्यशून्यतया रहितत्वमिति। सद्धेतोः एतानि पञ्चरूपाणि निम्नोदाहरणमाध्यमेन ज्ञातुं शक्नुमः। यथा – 'पर्वतो वह्निमान् धूमात्' इत्यत्र पर्वतरूपपक्षे वह्निरूपसाध्यस्य धूमरूपहेतुः सद्धेतुः कथ्यते। यतोहि  हेतुरयं पर्वतरूपपक्षे विद्यते, सपक्षे महानसादौ विद्यते, विपक्षे महाह्रदादौ न विद्यते, अस्य हेतोः पर्वते वह्निरूपसाध्यस्य अभावसाधकः कोऽपि अन्यहेतुः (विरोधिहेतुः) न विद्यते एवञ्च हेतोः वह्निरूपसाध्यः पर्वतरूपपक्षे वर्तत एव अर्थात् बाधदोषराहित्यमपि अस्ति। अतः पर्वते वह्निसाधकोऽयं धूमहेतुः सद्धेतुरस्ति।

सद्धेतोः विपरीतः हेत्वाभासः भवति। हेत्वाभासः हेतुवद् आभासते तु किन्तु न सद्धेतुः। उपन्यासे **अनुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम्** इति हेत्वाभासस्य लक्षणं दीयते। ये अनुमितिज्ञानम् अथवा अनुमितेः करणस्य प्रतिबन्धकाः यथार्थज्ञानस्य विषयाः भवन्ति, ते एव हेत्वाभासाः अभिधीयन्ते। अनुमितिः अर्थात् अनुमितिरूपयथार्थज्ञानं तथा तत्करणमित्यर्थः व्याप्तिज्ञानपक्षधर्मतादिः। सव्यभिचार-विरुद्ध-असिद्ध-सत्प्रतिपक्ष-बाधिताश्चेति पञ्चहेत्वाभासानां मध्ये बाधितः, सत्प्रतिपक्षः तथा विरुद्धः अनुमितिज्ञानस्य प्रतिबन्धकाः वर्तन्ते। अथ च सव्यभिचारः असिद्धश्च अनुमितिकरणस्य प्रतिबन्धकौ भवतः। अत एव लक्षणे उभयपदयोरेव उपादानं कृतम्। यदि लक्षणे यथार्थपदं नोच्यते तर्हि अनुमितेः प्रतिबन्धकज्ञानविषयत्वं पर्वते साध्याभावत्वे (वह्न्यभावत्वे) सत्यपि भ्रमवशात् गृहीते हेतौ अर्थात् धूमेऽपि अस्ति। अत एव लक्षणे 'यथार्थ' इत्युक्तम्। अत्र भ्रमज्ञानकारणात् यथार्थज्ञानस्याभावः। अतः नातिव्याप्तिः हेत्वाभासलक्षणस्य।

पञ्चदोषकारणादेव एते पञ्चदुष्टहेतवः कथ्यन्ते। अत्र ध्यातव्यं यत् व्यभिचारः, विरोधः, सत्प्रतिपक्षः, असिद्धिः, बाधश्चेति पञ्चदोषाः[271]। एतत्विशिष्टाः सव्यभिचारः, विरुद्धः, सत्प्रतिपक्षः, असिद्धः, बाधितश्चेति पञ्चहेत्वाभासाः भवन्ति।

(२.१६बुद्धि-गुणविवरणे १.सव्यभिचार-हेत्वाभास-लक्षणम्)

**तर्कसंग्रहः -** सव्यभिचारोऽनैकान्तिकः। स त्रिविधः साधारणासाधारणानुपसंहारिभेदात्। तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान्प्रमेयत्वादिति। प्रमेयत्वस्य

---

271 न्यायबोधिनी - हेत्वाभासप्रकरणम्

वह्न्यभाववति ह्रदे विद्यमानत्वात्। सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिः असाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति। अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि प्रमेयत्वाद्दृष्टान्तो नास्ति॥४७॥

**उपन्यासः -** (१) साधारणो लक्ष्यः। साधारणत्वं लक्ष्यताऽवच्छेदकम्। 'साध्याभाववद्वृत्तित्वं' लक्षणम्। 'वृत्तित्व-'मात्रोक्तौ घटेऽतिव्याप्तिः, अतः 'साध्याभाववद्' इत्युक्तम्। 'साध्याभाववत्व-मात्रोक्तौ ह्रदादावतिव्याप्तिः, अतो 'वृत्तित्वम्' उक्तम्। साध्याभाववद्वृत्तित्वस्य धूमसाध्यक-वह्नि-रूप-हेतौ सत्त्वाल्लक्षणसमन्वयः।

(२) असाधारणो लक्ष्यः। असाधारणत्वं लक्ष्यताऽवच्छेदकम्। 'सर्व-सपक्ष-[विपक्ष][272]-वृत्ति-शून्यत्वं' लक्षणम्। 'सपक्ष-वृत्ति-शून्यत्व'-मात्रोक्तौ यत्किञ्चित्सपक्ष-वृत्ति-शून्यत्वस्य साधारणेऽपि सत्वादतिव्याप्तिः, अतः 'सर्व-सपक्ष' इत्युक्तम्, सर्व-सपक्ष-वृत्ति-शून्यत्वस्य तत्राभावान्नातिव्याप्तिः। एवं च नित्यत्व-साध्यक-शब्दत्व-रूप-हेतौ निश्चित-साध्यवत्परमाण्वादि-वृत्ति-शून्यत्वस्य सत्त्वाल्लक्षण- समन्वयः। (३) अनुपसंहारी लक्ष्यः। अनुपसंहारित्वं लक्ष्यताऽवच्छेदकम् 'अन्वय-दृष्टान्त-शून्यत्वे सति व्यतिरेक-दृष्टान्त-शून्यत्वं' लक्षणम्। 'अन्वय-दृष्टान्त-शून्यत्व'-मात्रोक्तौ केवल-व्यतिरेकिण्यव्याप्तिः, अतो ' व्यतिरेक-दृष्टान्त-शून्यत्वम्' तत्र व्यतिरेक-दृष्टान्त-शून्यत्वाभावान्नातिव्याप्तिः। व्यतिरेक-दृष्टान्त-शून्यत्वमात्रोक्तौ केवलान्वयिन्यतिव्याप्तिः, अतः 'अन्वय-दृष्टान्त-शून्यत्वम्' उक्तम्। तत्र अन्वय-दृष्टान्त-शून्यत्वाभावान्नातिव्याप्तिः। एवं च 'सर्वमभिधेयं प्रमेयत्वात्।' [प्रमेयत्व-रूपहेतौ साध्याभाव-रूपानित्यत्व-निरूपितव्याप्ति-सत्त्वाल्लक्षण-समन्वयः][273] इत्यत्र प्रमेयत्वरूपहेतौ अन्वयव्यतिरेकदृष्टान्त- शून्यत्वस्य सत्वाल्लक्षणसमन्वयः ॥४७॥

---

272 तर्कसंग्रहे तथा अन्यटीकास्वत्र 'विपक्ष'पदमपि उल्लिखितम्। अर्थसंगतिदृष्ट्या अपि विपक्षपदस्य औचित्यं वर्तते किन्तु संपादितपुस्तके न वर्णितम्। यद्यपि उपन्यासटीकायाः अन्यपाण्डुलिपीसु 'विपक्ष' इति पदमस्ति किन्तु अत्र 'विपक्षवृत्तिशून्यत्वस्य अग्रे अव्याख्यातत्वाद् अत्र एतन्नास्त्येव इति प्रतिभातीत्युक्तं शिवनारायणशास्त्रिमहोदयेन। असाधारणसव्यभिचारहेत्वाभासलक्षणे दुष्टलक्षणप्रसङ्गात् तथा उपयुक्तार्थस्य बलात् अत्र लक्षणस्य हिन्द्यनुवादे विपक्षपदं प्रयुज्य एव अर्थनिर्धारणं कृतम्।

273 मूलपुस्तके पङ्क्तिरियं प्राप्यते किन्तु नास्याः अर्थसमन्वयः 'सर्वमभिधेयं प्रमेयत्वात्' एतेन उदाहरणेन सह। अस्मिन् सन्दर्भे पाठभेदोऽपि न उपलभ्यते। अतः अत्र एतदातिरिक्ता उदाहरणसमन्विता पङ्क्तिरपि प्रयुक्ता।

**हिन्द्यनुवादः –** साधारण लक्ष्य है। साधारणत्व लक्ष्यतावच्छेदक है। 'जो हेतु साध्य के अभाव वाली जगह पर भी रहता है' अर्थात् जो अपने पक्ष तथा सपक्ष के अतिरिक्त विपक्ष में भी रहता हो, उसे साधारणसव्यभिचार हेत्वाभास कहते है। यदि 'रहना अर्थात् वृत्तित्व' मात्र ही लक्षण में कहा जाता तो घट में अतिव्याप्ति हो जाती। 'अतः साध्य के अभाव वाले स्थान पर' ऐसा भी कहा गया। 'साध्य के अभाव वाले स्थान' को ही यदि साधारणसव्यभिचार का लक्षण कहा जाता तो 'महाह्रद' में अतिव्याप्ति हो जाती अतः 'वृत्तित्व' भी कहा गया। धूम साध्य वाले वह्नि रूप हेतु का साध्याभाव वाले स्थान में भी वृत्तित्व होने से, प्रस्तुत हेतु में साधारणसव्यभिचार के लक्षण का समन्वय हो जाता है।

असाधारण लक्ष्य है। असाधारणत्व लक्ष्यतावच्छेदक है। 'सभी सपक्ष एवं विपक्ष में न रहने वाला' अर्थात् जो हेतु अपने विपक्ष के अतिरिक्त सपक्ष मे भी न रहे अथवा पक्ष मात्र में ही रहे' वह हेतु असाधारणसव्यभिचार हेत्वाभास कहा जाता है। यदि लक्षण में 'सपक्षवृत्तिशून्यत्व' अर्थात् 'सपक्ष में न रहने वाला' मात्र इतना ही कहा जाता तो अपने सपक्ष को छोडकर अन्य किसी हेतु के सपक्ष में तो साधारणव्यभिचार हेत्वाभास भी रहता है। अतः उसमें अतिव्याप्ति हो जाती। इसलिए 'सभी सपक्षो में जो न रहता हो' अर्थात् 'हेतु का अपने सपक्ष में भी न रहना' ऐसा कहा गया है। साधारणसव्यभिचार हेत्वाभास में 'सर्वसपक्षवृत्ति शून्यत्व' का अभाव होने से अतिव्याप्ति नहीं होगी। [यहाँ पर मूलसंस्कृतग्रन्थ में 'विपक्ष' का पदकृत्य नहीं किया गया है अतः इसका अनुवाद भी यहाँ अप्रस्तुत है]। इस लक्षण का समन्वय निम्न ('शब्दः नित्यः शब्दत्वात्) दृष्टान्त में प्रदर्शित किया गया है – यहाँ पर 'नित्यत्व' रूप साध्य वाले 'शब्दत्व' हेतु मात्र शब्द (पक्ष) में रहता है किन्तु यह हेतु 'नित्यत्व' साध्य वाले ही परमाणु इत्यादि (सपक्ष) में नहीं रहता। अतः इस हेतु का सपक्ष (परमाण्वादि) में वृत्तिशून्यत्व के होने से असाधारणसव्यभिचार हेत्वाभास लक्षण का यहाँ समन्वय हो जाता है।

अनुपसंहारी लक्ष्य है। अनुपसंहारित्व लक्ष्यतावच्छेदक है। 'जिस हेतु का न तो कोई अन्वय-दृष्टान्त होता है और न ही कोई व्यतिरेक-दृष्टान्त होता है' अर्थात् 'जिस हेतु का न तो कोई सपक्ष होता है एवं न ही विपक्ष' उसे अनुपसंहारि हेत्वाभास कहते है। यदि लक्षण में मात्र 'अन्वय-दृष्टान्त से रहित हेतु' कहा जाता तो केवलव्यतिरेकी हेतु में अतिव्याप्ति हो जाती।

अतः 'व्यतिरेक-दृष्टान्त से भी रहित हो' ऐसा कहा गया। 'सर्वमभिधेयं प्रमेयत्वात्' यहाँ पर 'प्रमेयत्व' रूप हेतु में साध्याभाव अर्थात् अनित्यत्व से निरूपित व्याप्ति के होने से अनुपसंहारिसव्यभिचार हेत्वाभास के लक्षण की संगति हो जाती है उपर्युक्त स्थल पर।

## विश्लेषणम्

**सव्यभिचारहेत्वाभासनिरूपणम् –** हेत्वाभासस्य प्रथमः भेदः सव्यभिचारः वर्तते। तर्कसंग्रहे सव्यभिचारोऽनैकान्तिकः इत्युच्यते। न ऐकान्तिक इति अनैकान्तिकः। ऐकान्तिक इत्यर्थः निश्चितः अर्थात् एकस्मिन् पक्षे यः निश्चितः स ऐकान्तिकः किन्तु यस्य निश्चयः न भवति स अनैकान्तिक इति। सव्यभिचारहेत्वाभासः न निश्चितः भवति अत एव सः अनैकान्तिकः कथ्यते। उपन्यासटीकायां सव्यभिचारहेत्वाभासस्य किमपि लक्षणं नोपलभ्यते। सव्यभिचारहेत्वाभासः भेदत्रयात्मकः जायते – साधारणसव्यभिचारः, असाधारण-सव्यभिचारः , अनुपसंहारिसव्यभिचारश्च।

यो हेतुः साध्यस्य अभावेऽपि स्थीयते स साधारणसव्यभिचारः। हेतोः पक्षवृत्तिः, सपक्षवृत्तिः तथा विपक्षव्यावृत्तिः भवेत् किन्तु अस्य हेतोः पक्षसपक्षवृत्तित्वे सति विपक्षवृत्तिरपि भवति। यत्र साध्यः न वर्तते अर्थात् विपक्षे, तत्रापि हेतुरयं विद्यते अतो हेतोः अस्य लक्षणे **'साध्याभाववद्वृत्तित्वम्'** इत्युच्यते उपन्यासकारेण। यथा – 'यत्र धूमः साध्यः वह्निश्च हेतुः, तत्र हेतोः साध्याभाववद्वृत्तित्वस्य अर्थात् अयोगोलकादौ (विपक्षे) सत्वात्, वह्निरूपहेतौ अस्य लक्षणस्य समन्वयः जातः। लक्षणे 'वृत्तित्व'मात्रकथने घटादावतिव्याप्तिः तथा 'साध्याभाववद्'मात्रोक्ते सति महाह्रदादौ अतिव्याप्तिः। अत एव उभयोरेवोपादानम्।

सव्यभिचारहेत्वाभासस्य द्वितीयभेदः असाधारणसव्यभिचारहेत्वाभासः वर्तते। **'सर्वसपक्षविपक्षवृत्तिशून्यत्वं'** असाधारणसव्यभिचारस्य लक्षणम्। यो हेतुः विपक्षातिरिक्तः सपक्षेऽपि न वर्तते अथवा पक्षमात्रे एव वर्तते स असाधारणसव्यभिचारः। यथा यत्र नित्यत्वं साध्यम्, शब्दत्वं च हेतुः तत्र शब्दत्वरूपहेतोः पक्षमात्रवृत्तिः वर्तते अर्थात् शब्दत्वं तु शब्दमात्रे (पक्षे) एव न तु अन्यत्र। अतः अस्य हेतोः शब्दातिरिक्तनित्यसाध्यवत्परमाणादौ (सपक्षे) अवृत्तित्वात्, अस्मिन् हेतौ असाधारणसव्यभिचारहेत्वाभासस्य लक्षणसंगतिः वर्तते। यदि लक्षणे 'सर्व'पदं न दीयते तर्हि यत्किञ्चित्सपक्षवृत्तिशून्यत्वस्य साधारणेऽपि विद्यते। अतः तस्मिन्नपि अतिव्याप्तिः भवितुं शक्यते। अतः लक्षणे 'सर्वसपक्ष'इत्युक्तम्।

साधारणसव्यभिचारस्तु स्वस्य सपक्षे वर्तते, अत्र सर्वसपक्षवृत्तिशून्यत्वस्य अभावात् अतिव्याप्तिः न भवति। अस्य लक्षणस्य 'विपक्ष'इति पदस्य पदकृत्यं न प्राप्यत उपन्यासे। अतः तस्य परीक्षा न कृता अत्र।       अनुपसंहारिसव्यभिचारः तृतीयः। यस्य हेतोः अन्वयव्यतिरेकदृष्टान्तः सपक्ष-विपक्षद्वयमेव न प्राप्यते सः अनुपसंहारिसव्यभिचारः इति। 'अन्वयदृष्टान्तशून्यत्वे सति व्यतिरेकदृष्टान्तशून्यत्वं' अनुपसंहारिलक्षणम्।

यथा 'सर्वमभिधेयं प्रमेयत्वात्' इत्यत्र अभिधेयरूपसाध्यस्य प्रमेयत्वरूपहेतुः वर्तते। अस्य हेतोः सपक्ष-विपक्षश्च पक्षान्तर्गते एव विलीयेते। यतोहि अत्र पक्षः 'सर्वं' वर्तते। अतः अत्र पक्षे एव सर्वं समाहितम्। लक्षणेऽस्मिन् केवलव्यतिरेकिहेतौ अतिव्याप्तिवारणाय 'व्यतिरेकदृष्टान्तशून्यत्वं' तथा केवलान्वयिहेतौ व्याप्तिनिवृत्त्यर्थं 'अन्वयदृष्टान्तशून्यत्वं' इत्युक्तम्।

एवम्प्रकारेण प्रथमहेत्वाभासस्य भेदाः निरूप्यन्ते। इतः परं द्वितीयहेत्वाभासः विरुद्धः लक्षयिष्यते।

(२.१६ बुद्धि-गुण-विवरणे २. विरुद्ध-हेत्वाभास-लक्षणम्)

**तर्कसंग्रहः -** साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्॥४८॥

**उपन्यासः-** विरुद्धो लक्ष्यः। विरुद्धत्वं लक्ष्यताऽवच्छेदकम्। 'साध्याभाव-व्याप्तिमत्त्वं' लक्षणम्। अस्ति चेदं लक्षणम् - शब्द-पक्षक-नित्यत्व-साध्यक-कृतकत्व-रुप-हेतौ साध्याभाव-रूपानित्यत्व-निरूपित-व्याप्ति-सत्त्वाल्लक्षणसमन्वयः॥४८॥

**हिन्द्यनुवादः -** विरुद्ध लक्ष्य है। विरुद्धत्व लक्ष्यतावच्छेदक है। 'जो हेतु साध्य के अभाव में ही व्याप्त होकर रहता है' उसे विरुद्ध हेत्वाभास है। इस लक्षण का 'शब्दः नित्यः कृतकत्वात्' इस स्थल पर समन्वय प्रस्तुत किया गया है। यहाँ पर 'शब्द' पक्ष वाले तथा 'नित्यत्व' रूप साध्य वाले 'कृतकत्व' इस हेतु का साध्याभाव रूप 'अनित्यत्व' में व्याप्ति होने से, यहाँ विरूद्धहेत्वाभास है।

## विश्लेषणम्

**विरुद्धहेत्वाभासलक्षणम् –** पञ्चहेत्वाभासेषु विरुद्धः द्वितीयः हेत्वाभासः। यस्य हेतोः साध्याभावेन सह व्याप्तिर्वर्तते, न तु साध्येन सह, स विरुद्धो हेत्वाभासः उच्यते। अत एव

**'साध्याभावव्यातिमत्त्वं'** विरुद्धहेत्वाभासस्य लक्षणं क्रियते। यो सद्धेतुः भवति तस्य साध्येन सह व्याप्तिः, एतत्वैपरीत्यं तु विरुद्धहेत्वाभासः। अर्थात् विरुद्धहेत्वाभासः सर्वदा विपक्षे (साध्याभावे) एव विद्यत इति वक्तुं शक्यते। यथा शब्दरूपपक्षे नित्यत्वरूपसाध्यस्य सिद्धौ कृतकत्वरूपहेतुः प्रयुज्यते। 'कृतकत्वं' इत्यर्थः 'उत्पतिमत्त्वं' एवं यत् उत्पत्तिमत् तत्तु सर्वदैव अनित्यमेव। अस्य हेतोः साध्यस्य अभावेन सह अर्थात् अनित्यत्वेन सह व्याप्तेः सत्त्वात्, अत्र विरुद्धहेत्वाभासः।

(२.१६ बुद्धि-विवरणे ३.सत्प्रतिपक्ष-हेत्वाभास-लक्षणम्)

**तर्कसंग्रहः -** यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा,शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद्घटवदिति॥४९॥

**उपन्यासः-** सत्प्रतिपक्षो लक्ष्यः। सत्प्रतिपक्षत्वं लक्ष्यताऽवच्छेदकम्। 'स्व-साध्य-विरुद्ध–साध्याभाव-साधक-हेत्वन्तरकत्वं लक्षणम्। यथा - 'शव्दो नित्यः [अनित्यः][274] श्रावणत्वात्' इत्यत्र नित्यत्वाभाव = अनित्यत्व-साधक-कृतकत्व-रूपहेत्वन्तरकत्वस्य सत्त्वात्। एवमनित्यत्वाभाव-रूप-नित्यत्व-साधक- श्रावणत्व-रूप-हेतवन्तरकत्वस्य कृतकत्व-रूप-हेतौ सत्वाल्लक्षण-समन्वयः॥४९॥

**हिन्द्यनुवादः –** सत्प्रतिपक्ष लक्ष्य है। सत्प्रतिपक्षत्व लक्ष्यतावच्छेदक है। 'अपने साध्य के विरूद्ध साध्य के अभाव का साधक अन्य हेतु वाला जो हेतु होता है' अर्थात् जिस हेतु के साध्याभाव को सिद्ध करने वाला उसी के समान दूसरा कोई हेतु विद्यमान हो तो, उस पूर्व हेतु को सत्प्रतिक्ष हेत्वाभास कहते हैं। जैसे कि 'शब्दः नित्यः श्रावणत्वात्' यहाँ पर 'नित्यत्व' रूप साध्य के अभाव 'अनित्यत्व' का साधक 'कृतकत्व' रूप अन्य हेतु वाला होने से, 'श्रावणत्व' यह हेतु सत्प्रतिपक्ष हेत्वाभास हुआ। इसी प्रकार अन्य स्थल ('शब्दः अनित्यः कृतकत्वात्') पर 'अनित्यत्व' रूप साध्य के अभाव अर्थात् 'नित्यत्व' के साधक 'श्रावणत्व' रूप अन्य हेतु वाले का भाव 'कृतकत्व' रूप हेतु में विद्यमान होने से 'कृतकत्व' यह हेतु सत्प्रतिपक्षहेत्वाभास हुआ। इस प्रकार इन दो स्थलों पर सत्प्रतिपक्षहेत्वाभास के लक्षण का समन्वय किया गया।

---

274 अत्र मूलपुस्तके 'अनित्यः' लिखितः, किन्तु अर्थसङ्गतिः दृष्ट्या 'नित्यः' भवेत् न तु 'अनित्यः'। तर्कसंग्रहेऽपि सत्प्रतिपक्षहेत्वाभासस्य उदाहरणे 'नित्यः' एव प्रदत्तः। अतो हेतोः अत्र 'नित्यः' इति क्रियते। अस्मिन् स्थले संपादकेनापि कोऽपि पाठभेदः न प्रस्तुतः।

## विश्लेषणम्

**सत्प्रतिपक्षहेत्वाभासलक्षणम् -** सत्प्रतिपक्षहेत्वाभासे द्वौ हेतू वर्तेते। यस्य हेतोः साध्यस्य विरुद्धः साध्याभावसाधकः प्रतिपक्षि विरोधि वा हेतुः वर्तते, स सत्प्रतिपक्षहेत्वाभासः। अर्थात् यस्य हेतोः प्रतिपक्षिहेतुः विधीयते, स एव सत्प्रतिपक्षः। उपन्यासेऽपि उक्तं यत् – **'स्वसाध्यविरुद्धसाध्याभाव साधकहेत्वन्तरकत्वं'** सत्प्रतिपक्षस्य लक्षणम्। अत्रापि साध्यस्य अभाव एव साध्यते तथा विरुद्धहेत्वाभासे अपि किन्तु अत्र हेतुद्वयं भवति तथा विरुद्धे एको हेतुरिति अनयोर्भेदः। सत्प्रतिपक्षहेत्वाभासः 'प्रकरणसम' इति अपरनाम्ना अपि ज्ञायते।[275] अस्य उदाहरणम् एवं दीयते – शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कृतकत्वाच्च। अत्र आदिवाक्ये नित्यत्वरूपसाध्यस्य साधकहेतुः 'श्रावणत्वम्' इति। किन्तु अस्य हेतोः साध्याभावस्य अर्थात् अनित्यत्वरूपसाध्यस्य साधकहेतुः 'कृतकत्वं' इति विद्यमाने सति 'श्रावणत्व'हेतुः न्याये सत्प्रतिपक्षहेत्वाभासः भवति। अनेन प्रकारेणैव अनित्यत्वरूपसाध्यस्य साधकहेतुः 'कृतकत्वं' इत्यस्य विरुद्धः साध्याभावस्य अर्थात् नित्यत्वस्य साधकहेतुः 'श्रावणत्वं' इति सत्प्रतिपक्षः। यद्यपि द्वयमपि सद्धेतुः किन्तु समानबलेन न अन्योन्यं साधयति। अतः द्वौ अपि निरस्तौ भूत्वा हेत्वाभासः इत्यभिधीयते।

(२.१६ बुद्धि-विवरणे ४.असिद्ध-हेत्वाभास-लक्षणम्)

**तर्कसंग्रहः -** असिद्धस्त्रिविधः - आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव। स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्। सोपाधिको हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। यथा पर्वतो धूमवान्वह्निमत्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः। तथाहि - यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता। यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलके

275 पदकृत्यम् - हेत्वाभासप्रकरणम्

आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्॥५०॥

**उपन्यासः-** 'असिद्धस्त्रिविध' इति विभागोक्तिः। (१) आश्रयासिद्धो लक्ष्यः। आश्रयासिद्धत्वं लक्ष्यताऽवच्छेदकम्। 'पक्षे पक्षताऽवच्छेदकभाववत्त्वं' लक्षणम्। 'गगनारविन्दं सुरभि' इत्यत्र गगनारविन्दत्वस्य अ भावाल्लक्षणसमन्वयः। (२) स्वरूपासिद्धो लक्ष्यः। स्वरूपासिद्धत्वं लक्ष्यताऽवच्छेदकम्। 'पक्षे हेत्वाभाववत्त्वं' लक्षणम्। अस्ति चेदं लक्षणम् - 'शब्दो गुणश्चाक्षुषत्वात्।' इत्यत्र शब्द-रुप-पक्षे चाक्षुषत्व-रुप-हेत्त्वाभावसत्त्वात्, [तत्प्रतियोगित्वस्य च][276] चाक्षुषत्वे सत्त्वाल्लक्षणसमन्वयः। (३) व्याप्यत्वासिद्धो लक्ष्यः। व्याप्यत्वासिद्धत्वं लक्ष्यताऽवच्छेदकम्। 'सोपाधिकत्वं' लक्षणम्। अस्ति चेदं लक्षणम् - 'धूमवान्वह्निः'। इत्यत्रवह्नि-रूप-हेतौ धूमाधिकरण-वृत्त्यन्ताभावाप्रतियोगित्वस्य च वह्न्यधिकरण-वृत्त्यत्यन्ताभावप्रतियोगित्वस्य चार्न्द्रेन्धन-संयोग-रूपोपाधौ सत्त्वात्तादृशोपाधिमत्त्वस्य वह्नि-रूप-हेतावव्याप्यत्वसम्बन्धेन सत्त्वाल्लक्षणसमन्वयः॥५०॥

**हिन्द्यनुवादः -** असिद्ध हेत्वाभास तीन प्रकार का होता है - आश्रयासिद्ध, स्वरूपासिद्ध एवं व्यापकत्वासिद्ध। आश्रयासिद्ध लक्ष्य है। आश्रयासिद्धत्व लक्ष्यतावच्छेदक है। 'जिस हेतु के पक्ष में पक्षतावच्छेदक का ही अभाव हो, उसे आश्रयासिद्धहेत्वाभास कहते है। जैसे कि 'गगनारविन्दं सुरभि, अरविन्दत्वात्' यहाँ पर 'अरविन्दत्वात्' इस हेतु का 'पक्ष' 'गगनारविन्द' है। इस 'गगनारविन्द' में 'गगनारविन्दत्व' का अभाव होने से (क्योंकि गगनारविन्द (पक्ष) ही नहीं है अतः उसमें गगनारविन्दत्व (पक्षतावच्छेदक) का भी अभाव है), यहाँ पर आश्रयासिद्ध हेत्वाभास हुआ अर्थात् जिस हेतु का आश्रय (पक्ष) ही असिद्ध है वह आश्रयासिद्ध हेत्वाभास है।

स्वरूपासिद्ध लक्ष्य है। स्वरूपासिद्धत्व लक्ष्यतावच्छेदक है। 'पक्ष में हेतु का अभाव होना ही' स्वरूपासिद्ध हेत्वाभास का लक्षण है। 'शब्दो गुणः चाक्षुषत्वात्' यहाँ पर शब्दरूप पक्ष में 'चाक्षुषत्व' इस हेतु का अभाव होने से, यहाँ स्वरूपासिद्धहेत्वाभास है।

व्याप्यत्वासिद्ध लक्ष्य है। व्याप्यत्वासिद्धत्व लक्ष्यतावच्छेदक है। 'उपाधि से युक्त होना ही'

---

276 अत्र एतं पदं स्वीकृत्य नार्थसङ्गतिः प्रतीयते एवञ्च अन्यप्रतीस्वपि इदं पदं न, इत्युल्लिख्यते संपादकेन। अतः अर्थसौविध्यदृष्ट्या त्यज्यते पदमिदम् अर्थनिर्धारणे।

व्याप्यत्वासिद्ध का लक्षण है। जैसे कि 'धूमवान् वह्निः' इस स्थल में 'वह्नि' रूप हेतु में धूम के अधिकरण में रहने वाले अत्यन्ताभाव का अप्रतियोगित्व (साध्यव्यापकत्व) तथा वह्नि के अधिकरण में रहने वाले अत्यन्ताभाव का प्रतियोगित्व (साधनाव्यापत्व) का आर्द्रेन्धनसंयोगरूप उपाधि में होने से, इस प्रकार के उपाधि का वह्नि रूप हेतु में अव्याप्यत्व सम्बन्ध से विद्यमानता है। अतः व्याप्यत्वासिद्ध हेत्वाभास के लक्षण का उपर्युक्त उदाहरण में समन्वय हो जाता है।

## विश्लेषणम्

**असिद्धहेत्वाभासनिरुपणम् –** पञ्चसु हेत्वाभासेषु असिद्धश्चतुर्थः हेत्वाभासः। पदकृत्ये '**आश्रयासिद्धाद्यान्यतमत्वमसिद्धत्वम्**' इति असिद्धस्य लक्षणमुच्यते। उपन्यासे अस्य लक्षणं न कृतम्। असिद्धहेत्वाभासः त्रिविधः भवति – आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्च। सर्वप्रथमं आश्रयासिद्धहेत्वाभासं निरूपयति उपन्यासकारः – **'पक्षे पक्षताऽवच्छेदकाभाववत्त्वं'** लक्षणम्। यस्य हेतोः पक्षे पक्षतावच्छेदकस्य अभावः भवति सः आश्रयासिद्धहेत्वाभासः। यथा 'गगनारविन्दं सुरभि अरविन्दत्वात्' इत्यत्र अरविन्दत्वरूपहेतोः पक्षः 'गगनारविन्दं' अस्ति। अत्र गगनारविन्दे 'गगनारविन्दत्वं' न वर्तते यतोहि अरविन्दत्वरूपहेतोः गगनारविन्दरूपपक्षः आश्रयः वा असिद्धः। यदि आश्रयस्य सत्ता एव न तर्हि तस्मिन् अवच्छेदकधर्मोऽपि न। अतः अत्र 'पक्षे पक्षतावच्छेदकाभावात्' आश्रयासिद्धहेत्वाभासः इति।

स्वरूपासिद्धः द्वितीयः। **'पक्षे हेत्वाभाववत्त्वं'** स्वरूपासिद्धहेत्वाभासस्य लक्षणं कृतम् उपन्यासे। यो हेतु स्वपक्षे एव न वर्तते अथवा यस्य हेतोः स्वस्मिन् पक्षे एव अभावः विद्यते, स स्वरूपासिद्धहेत्वाभासः। यथा 'शब्दो गुणश्चाक्षुषत्वात्'। अत्र हेतुः 'चाक्षुषत्वं' पक्षश्च 'शब्दः'। शब्दे चाक्षुषत्वाभावः भवति यतोहि शब्दे तु 'श्रावणत्वं' वर्तते तथा 'चाक्षुषत्वं' रूपे भवति। अतः अत्र पक्षे हेत्वाभावाल्लक्षणसमन्वयः। अत्र 'चाक्षुषत्वं' इति स्वरूपासिद्धहेत्वाभासः कथ्यते।

असिद्धहेत्वाभासस्य तृतीयभेदः व्याप्यत्वासिद्धहेत्वाभासः अस्ति। **'सोपाधिकत्वं'** व्याप्यत्वासिद्धस्य लक्षणम्। यो हेतुः उपाधिसहितः विद्यते स व्याप्यत्वासिद्धः। 'व्याप्य' इत्यर्थः व्याप्तिविशिष्टः। सद्धेतुः सर्वदा व्याप्तिविशिष्टः भवति किन्तु यत्र उपाधिवशाद् हेतुः व्याप्तिशून्य इति ज्ञातः तत्र स हेतुः व्याप्यत्वासिद्धहेत्वाभासः अभिधीयते। तर्कसंग्रहे

उपाधिर्नाम **'साध्यव्यापकत्वे सति साधनाव्यापकत्वम्'**[277] उच्यते। अर्थात् उपाधिः साध्येन सह सर्वत्र वर्तते किन्तु हेतुना सह न। एतत् पारिभाषिकशब्दावल्यां एवमुच्यते - साध्यसमानाधिकरणात्यन्ताभावस्य अप्रतियोगी यः भवति सः साध्यव्यापकः तथा साध्यसमानाधिकरणात्यन्ताभावस्य यः प्रतियोगी सः साधनाव्यापकत्वमिति। व्याप्यत्वासिद्धहेत्वाभासस्य उदाहरणं दीयते – 'धूमवान् वह्नेः'। अत्र धूमः साध्यः वह्निश्च हेतुः। अयं हेतुः 'आर्द्रेन्धनसंयोगः' इत्यनेन उपाधिना सह वर्तते। अत एव सोपाधिकः। उपाधिरयं यत्र यत्र धूमः (साध्यः) तत्र तत्र आर्द्रेन्धनसंयोगः इति व्याप्त्या साध्यव्यापकः तथा यत्र यत्र वह्निः (हेतुः) तत्र न आर्द्रेन्धनसंयोगः इति व्याप्त्या साधनाव्यापकः। अतः धूमस्य (साध्यस्य) अधिकरणे अत्यन्ताभावस्य अप्रतियोगित्वं तथा वह्न्यधिकरणे (हेत्वधिकरणे) अत्यन्ताभावस्य प्रतियोगित्वं आर्द्रेन्धनसंयोगे सत्त्वात् आर्द्रेन्धनसंयोगः उपाधिः। अथ च अनेन उपाधिना विशिष्टहेतुत्वं वह्निरूपहेतौ वर्तते। अतः अत्र हेतुरयं न सद्धेतुः अपितु व्याप्यत्वासिद्धहेत्वाभासः अस्ति।

अनेन प्रकारेण असिद्धहेत्वाभासस्य त्रिषु भेदेषु हेतोः आश्रय-हेतु-व्याप्तिषु असिद्धिदोषसत्त्वात्, क्रमशः आश्रयासिद्ध-स्वरूपासिद्ध-व्याप्यत्वासिद्धाः हेत्वाभासाः जायन्ते।

(२.१६ बुद्धि-विवरणे ५. बाधित-हेत्वाभास-लक्षणम्)

**तर्कसंग्रहः -** यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णो द्रव्यत्वात्।

अत्रानुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्॥५१॥

**उपन्यासः-** बाधितः [बाधः][278] लक्ष्यः। बाधितत्वं [बाधत्वं] लक्ष्यताऽवच्छेदकम्। 'पक्षे साध्याभाववत्त्वं लक्षणम्। अस्ति चेदं लक्षणम् - ह्रदो वह्निमान्, धूमात्। इत्यत्र 'ह्रद'-रूप-पक्षे वह्न्यभावः, तद्वत्त्वं च धूम-रूप-हेतावेक-ज्ञान-विषयत्व-सम्बन्धेन

---

277 तर्कसंग्रहः - उपाधिलक्षणम्

278 उपन्यासे 'बाधः' इति हेत्वाभासः उल्लिखितः किन्तु तर्कसंग्रहे तथा अन्यटीकास्वपि 'बाधितः' इति। स्वयं उपन्यासकारेणापि 'बाधितस्य' उद्देशः कृतः ( बुद्धि विवरणे बाधितहेत्वाभासलक्षणम्) किन्तु लक्षणे 'बाधः' इति। अस्मिन् विषये संपादकेनापि न किमपि उक्तम्। बाधस्तु दोषः न हेत्वाभासः। अतः अत्र उचितार्थबोधाय 'बाधितः' इति क्रियते।

सत्त्वाल्लक्षणसमन्वयः॥

**हिन्द्यनुवादः** – बाधित लक्ष्य है। बाधितत्व लक्ष्यतावच्छेदक है। 'पक्ष में साध्य का अभाव होना ही' बाधित नामक हेत्वाभास है। अब प्रस्तुत लक्षण का निम्न उदाहरण में समन्वय प्रदर्शित किया गया है – 'ह्रदि वह्निमान् धूमात्' इस स्थल पर 'ह्रद' अर्थात् सरोवर 'पक्ष' है, सरोवर (पक्ष) में 'वह्नि' अर्थात् 'साध्य' का अभाव है। इस प्रकार धूम रूप में एकज्ञानविषयत्वसम्बन्ध से साध्याभाव के होने से लक्षण का समन्वय हुआ है।

## विश्लेषणम्

**बाधितहेत्वाभासलक्षणम् -** बाधदोषेण युक्तः हेतुः बाधितहेत्वाभासः कथ्यते। उपन्यासकारेण अस्य लक्षणं दीयते – **'पक्षे साध्याभाववत्त्वम्'**। यस्य हेतोः पक्षे साध्यस्य अभावः विद्यते सः बाधितहेत्वाभासः। यथा – 'ह्रदो वह्निमान् धूमात्' अत्र धूमरूपहेतोः पक्षः ह्रदः अर्थात् सरोवरः तथा वह्निः साध्यः। यद्यपि वह्निरूपसाध्यस्य कृते धूमः सद्धेतुः किन्तु अत्र पक्षे अर्थात् सरोवरे वह्निर्न कदापि भवितुं शक्यते अतः साध्याभावः धूमरूपहेतौ एकज्ञानविषयत्वसम्बन्धेन अर्थात् स्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्व- सम्बन्धेन सत्त्वात् लक्ष्येऽस्मिन् बाधितहेत्वाभासस्य लक्षणसंगतिः भवति। अत एव धूमरूपहेतुः अत्र बाधितहेत्वाभासः।

अथ अनुमानप्रकरणं समाप्तम्। इदमेव अनुमानं न्यायदर्शनस्य प्राणः। अस्याम् अनुमानप्रक्रियायां परामर्शः, व्याप्तिः, पक्षधर्मता, त्रिविधलिङ्गं, पञ्चावयवः,पक्षसपक्षविपक्षः, हेत्वाभासादयः महत्वपूर्णघटकाः सन्ति। यथार्थानुमितिज्ञानाय एतेषामपि यथार्थज्ञानम् अत्यावश्यकम् इति। उपन्यासटीकायां एते समस्तपक्षाः लक्ष्यन्ते परीक्ष्यन्ते च। यथा उपन्यासस्य वैशिष्टयमस्ति लक्षणपरीक्षणम्, तत्तु व्याप्तिलक्षणे स्फुटतया दृश्यते। यतोहि व्याप्तिलक्षणस्य व्यापकपरीक्षा विहिता उपन्यासकारेण। अतः अनुमानप्रकरणेऽपि उपन्यासटीकायाः मूलवैशिष्ट्यं पूर्णतया दृग्गोचरं भवति।

॥इत्यनुमानोपन्यासः॥५१॥

(२.१६ बुद्धि-विवरणे यथार्थानुभव-तृतीय-भेद-करणस्योपमानस्य लक्षणम्)

**तर्कसंग्रहः -** उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। तथा हि कश्चिद्गवयशब्दार्थमजानन्कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन्गोसदृशं पिण्डं पश्यति। तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ॥५२॥

**उपन्यासः -** उपमानं लक्ष्यम्। उपमानत्वं लक्ष्यताऽवच्छेदकम्। 'उपमितिकरणत्वं' लक्षणम्। 'करणत्व'- मात्रोक्तौ कुठारेऽतिव्याप्तिः, अतः 'उपमितिकरणत्वम्' उक्तम्, उपमिति-करणत्वस्य तत्र अभावान्नातिव्याप्तिः। 'उप = समीपे मिति -करणम्' इति व्युत्पत्योपमिति -करणत्वस्य चक्षुरादावपि सत्वादतिव्याप्तिः , अतः 'उपमितित्वजात्यवच्छिन्न-कार्यता-निरूपित-कारणता-शालित्वम्।' इति वक्तव्यम्, तस्य चक्षुरादावभावान्नातिव्याप्तिः। 'उपमितित्व'-जाति-सिद्धिस्तु 'उपमिनोमि' इत्याकारकानुव्यवसायादेवेति बोध्यम्।

**हिन्द्यनुवादः –** उपमान लक्ष्य है। उपमानत्व लक्ष्यतावच्छेदक है। 'जो उपमिति का करण है' उसे अनुमान कहते है। लक्षण में 'करण' मात्र कहने पर कुठार में अतिव्याप्ति होती अतः 'उपमिति का करण' कहा गया। 'उपमितिकरणत्व' का कुठार में अभाव होने से अतिव्याप्ति नही होगी। 'उपमिति' इस पद में 'उप' का तात्पर्य है 'समीप' तथा 'मिति' का अर्थ है ज्ञान। इस प्रकार 'समीपतः ज्ञान का करण' इस व्युत्पत्ति के अनुसार 'उपमितिकरणत्व' का चक्षुरादि में भी होने से, इनमें अतिव्याप्ति हो जाएगी। अतः 'उपमितित्व' जाति से अवच्छिन्न कार्यता से निरूपित कारणता वाला ही उपमिति का करण है' ऐसा लक्षण करना चाहिए। इस लक्षण का चक्षुरादि में अभाव होने से अतिव्याप्ति नहीं होगी। लक्षण में 'उपमितित्व जाति' इस पद का प्रयोग हुआ है। इसकी सिद्धि 'मैं उपमान करता हूँ' इस प्रकार के अनुव्यवसायात्मकज्ञान से होती है।

## विश्लेषणम्


**उपमानलक्षणम् -** न्यायसम्प्रदाये निर्दिष्टचतुर्षु प्रमाणेषु तृतीयम् उपमानप्रमाणम्। अत्र उपमानप्रमाणस्यैव लक्षण परीक्षा च विधीयते- **'उपमितिकरणत्वं'** उपमानस्य लक्षणम्। उपमितिज्ञानस्य असाधारणं कारणमेव उपमानप्रमाणम्। उपमानमेव तर्कसंग्रहे सादृश्यज्ञानं[279] तथा न्यायबोधिन्याम् अतिदेशवाक्यार्थज्ञानं कथितम्।[280] येन वाक्येन समता

[279] सञ्ज्ञासञ्ज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। - तर्कसंग्रहः, उपमानपरिच्छेदः

सादृश्यं वा प्रदर्श्यते तत्तु अतिदेशवाक्यम्। करणलक्षणे उपमितिज्ञानस्य सन्दर्भे असाधारणकारणं सादृश्यज्ञानम् उपमानं वा तथा व्यापारः अतिदेशवाक्यार्थस्मरणम् उच्यते उपन्यासकारेण। अतः उपमानलक्षणेऽपि अतिदेशवाक्यार्थस्मरणयुक्तसादृश्यज्ञानमेव उपमितिकरणम् इति बोध्यम्।

अधुना उपमानलक्षणस्य परीक्षा आरभते। यदि लक्षणे 'उपमिति'पदं न गृह्यते तर्हि 'करणत्वम्' उपमानस्य लक्षणं भवति। किन्तु अस्य लक्षणस्य कुठारेऽतिव्याप्तिः भविष्यति यतोहि छिदादिक्रियायां कुठारोऽपि करणम्। अतः कुठारेऽतिव्याप्तिवारणाय 'उपमितिकरणत्वम्' उक्तम्। कुठारे उपमितिकरणत्वस्य अभावान्नातिव्याप्तिः। किन्तु 'उपमितिकरणत्वम्' इत्यस्मिन्नपि व्युत्पत्तिदृष्ट्या अतिव्याप्तिः लक्ष्यते आचार्येण। अत्र 'उप' अर्थात् 'समीपम्' एवं 'मितिकरणम्' अर्थात् ज्ञानस्य करणम्। समीपे ज्ञानस्य करणत्वं चक्षुरादीन्द्रियेष्वपि सत्वात् अत्रातिव्याप्तिः। अतः उपमानलक्षणे उपमितित्वजातिना अवच्छिन्नकार्यतया निरूपिता कारणता शालिकारणमेव उपमानम् इति वक्तव्यम्।

**आरेखीयप्रस्तुतिः –**




**चित्रक्रमाँकः ३२**

एतादृश्याः कारणतायाः चक्षुरादावभावान्नातिव्याप्तिः भवति उपमानलक्षणे। उपर्युक्तम् उपमानलक्षणं निर्दुष्टम् इति सिद्ध्यते टीकाकारेण। लक्षणे 'उपमितित्व'पदं प्रयुक्तम्। 'उपमितित्वं' तु उपमितेः जातिः वर्तते। अस्य सिद्धिः 'उपमिनोमि' अर्थात् 'अहम् उपमितिं करोमि' इत्याकारकानुव्यवसायात्मकज्ञानात् भवति।

**उपन्यासः -** उपमितिर्लक्ष्या। उपमितित्वं लक्ष्यताऽवच्छेदकम्। 'सञ्ज्ञा-सञ्ज्ञि-सम्बन्धज्ञानत्वं'

---

280 उपमानं नाम अतिदेशवाक्यार्थज्ञानम्। – न्यायबोधिनी, उपमानपरिच्छेदः

लक्षणम्। 'ज्ञानत्व'-मात्रोक्तौ अनुमित्यादावतिव्याप्तिः तत्र ज्ञानत्वस्य सत्वात् , अतः 'सम्बन्ध-ज्ञानत्वम्' उक्तम्। 'सम्बन्धज्ञानत्व'मात्रोक्तौ संयोगज्ञानेऽतिव्याप्तिः , अतः 'सञ्ज्ञा-सञ्ज्ञि-सम्बन्ध-ज्ञानम्' इत्युक्तम्। 'सञ्ज्ञा' नाम वाचकशब्दः। 'सञ्ज्ञी' नाम अर्थः। अनयोः सम्बन्धः = वाच्य-वाचक-सम्बन्धः। 'तज्ज्ञानम्' इति 'शक्ति- ज्ञानम्' इति यावत्।

**हिन्द्यनुवादः -** उपमिति लक्ष्य है। उपमितित्व लक्ष्यतावच्छेदक है। 'संज्ञा एवं संज्ञी के सम्बन्धज्ञान को उपमिति कहते है'। लक्षण में 'ज्ञान' मात्र कहने पर अनुमिति आदि ज्ञान में भी अतिव्याप्ति होगी। क्योंकि वहाँ भी 'ज्ञानत्व' होता है। अतएव 'सम्बन्ध का ज्ञान' कहा गया। 'सम्बन्धज्ञान' (सम्बन्ध का ज्ञान) मात्र कहने पर संयोगज्ञान में अतिव्याप्ति होती, अत एव संज्ञा-संज्ञि के सम्बन्ध का ज्ञान कहा गया। संज्ञा वाचक (शब्द) है तथा संज्ञी वाच्य (अर्थ) है। संज्ञा-संज्ञि का सम्बन्ध वाच्य-वाचक सम्बन्ध है और इस सम्बन्ध का ही ज्ञान शक्तिज्ञान है।

## विश्लेषणम्

**उपमितिलक्षणम् –** साम्प्रतम् 'उपमितिलक्षणं' इति विधीयते उपन्यासटीकायाम् - **'सञ्ज्ञासञ्ज्ञि-सम्बन्धज्ञानत्वं'** लक्षणम्। अत्र 'संज्ञा' इत्यर्थः वाचकशब्दः, 'संज्ञी' अर्थात् वाच्यार्थः तथा एतयोः सम्बन्धः वाच्यवाचकभावरूपसम्बन्धः वर्तते। अस्य सम्बन्धस्य ज्ञानम् अर्थात् शक्तिज्ञानमेव उपमितिः। अत्र 'सम्बन्धज्ञानं' नाम शक्तिज्ञानम् उच्यत उपन्यासाचार्येण। दीपिकायामपि **'अर्थस्मृत्यनुकूलः पदपदार्थसम्बन्धः'** शक्तिः कथ्यते।[281] एषा उपमितिरेव उपमानप्रमाणस्य फलमस्ति। उपमितिलक्षणे यदि ज्ञानत्वमात्रोच्यते तर्हि अनुमित्यादावपि ज्ञानत्वस्य सत्वात् अतिव्याप्तिः। अतः लक्षणे 'सम्बन्धज्ञानत्वम्' उक्तमुपन्यासटीकायाम्। पदकृत्ये 'सञ्ज्ञासञ्ज्ञिज्ञानत्वमि'त्युक्ते सति अनुमित्यादावतिव्याप्तिवारणाय 'सम्बन्ध'पदस्य उपादेयता वर्णिता।[282] अनेन प्रकारेण लक्षणे 'सम्बन्धज्ञानत्वं' मात्रोक्ते सति संयोगज्ञानेऽतिव्याप्तिः, सम्बन्धत्वात्। अतो हेतोः 'संज्ञासंज्ञिसम्बन्धज्ञानम्' इति लक्षणे कथितम्। अस्य लक्षणस्य न संयोगज्ञानेऽतिव्याप्तिः। अतः 'सञ्ज्ञासञ्ज्ञिसम्बन्धज्ञानत्वम्' इति उपमितेः परिष्कृतं लक्षणमेव।

---

281 तर्कदीपिका - शब्दप्रमाणपरिच्छेदः

282 पदकृत्यम् - उपमानपरिच्छेदः

(२.१६ बुद्धि विवरणे यथार्थानुभव-प्रसङ्गे शाब्दानुभव-लक्षणम्)

**तर्कसंग्रहः -** आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः। आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणमाकाङ्क्षाविरहात्। 'अग्निना सिञ्चतीति' न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात्। वाक्यं द्विविधम्। वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शब्दज्ञानम्। तत्करणं शब्दः॥५३॥

**उपन्यासः -** शब्दो लक्ष्यः। शब्दत्वं लक्ष्यताऽवच्छेदकम्। 'आप्त-वाक्यत्वं' लक्षणम्। 'आप्तत्व'-मात्रोक्तौ आप्तेऽतिव्याप्तिः, आप्तत्वस्य तत्र सत्त्वात्, अतो 'वाक्यत्वम्' उक्तम्। 'वाक्यत्व'-मात्रोक्तौ अनाप्तवाक्येऽतिव्याप्तिः, तत्रवाक्यत्वस्य सत्त्वात्, अतः 'आप्तत्वम्' उक्तम्। आप्तो लक्ष्यः। आप्तत्वं लक्ष्यताऽवच्छेदकम्। 'यथार्थ-वक्तृत्वं' लक्षणम्। 'वक्तृत्व-' मात्रोक्तावनाप्तेऽतिव्याप्तिः, तत्रापि वक्तृत्वस्य सत्त्वात्, अतो 'यथाऽर्थत्वम्' उक्तम्। 'यथाऽर्थत्व-'मात्रोक्तौ यथार्थ-ज्ञानेऽतिव्याप्तिः, तत्रापि यथाऽर्थत्वस्य सत्त्वात्, अतो 'वक्तृत्वम्' उक्तम्।

वाक्यं लक्ष्यम्। वाक्यत्वं लक्ष्यताऽवच्छेदकम्। 'पद-समूहं' लक्षणम्। 'समूहत्व-'मात्रोक्तौ घटादिसमूहेऽतिव्याप्तिः, तत्रापि समूहत्वस्य सत्त्वात्, अतः 'पद-'इत्युक्तम्। 'पदत्व'मात्रोक्तौ पदेऽतिव्याप्तिः अतः 'समूहत्वम्' उक्तम्। पदं लक्ष्यम्। पदत्वं लक्ष्यताऽवच्छेदकम्। 'शक्तिमत्त्वं' लक्षणम्। शक्तिर्लक्ष्या। शक्तित्वं लक्ष्यताऽवच्छेदकम्। "'अस्मात्पदादयमर्थोबोद्धव्यः' इतीश्वर-सङ्केतत्वं" लक्षणम्। इच्छा-विशेषेऽतिव्याप्ति-वारणार्थम् 'इति'-शिरस्कान्तम्।

**हिन्द्यनुवादः -** शब्द लक्ष्य है । शब्दत्व लक्ष्यतावच्छेदक है। 'आप्तवाक्यत्व' ही शब्दप्रमाण का लक्षण है। यहाँ 'आप्तत्व' मात्र कहने पर 'आप्त' में अतिव्याप्ति होगी। क्योंकि 'आप्त' में भी 'आप्तत्व' होता है। अतएव 'वाक्यत्व' भी कहा गया। इसी प्रकार 'वाक्यत्व' मात्र कहने पर 'अनाप्तवाक्य' में भी अतिव्याप्ति होती क्योंकि 'वाक्यत्व' वहाँ भी होता है। अतः 'आप्तत्व' का

उपादान किया गया। आप्त लक्ष्य है एवं आप्तत्व लक्ष्यतावच्छेदक है। 'यथार्थवक्तृत्व' आप्त का लक्षण है। इस लक्षण में 'वक्तृत्व' मात्र कहने पर 'अनाप्त वक्ता' में भी अतिव्याप्ति हो जाती, वहाँ भी 'वक्तृत्व' के होने से। इसीलिए लक्षण में 'यथार्थत्व' कहा गया तथा 'यथार्थत्व' मात्र कहने पर 'यथार्थज्ञान' में अतिव्याप्ति होने लगेगी, वहाँ भी यथार्थत्व के होने से। अतएव लक्षण में 'वक्तृत्व' पद का ग्रहण किया गया।

वाक्य लक्ष्य है। वाक्यत्व लक्ष्यतावच्छेदक है। 'पदसमूह' को वाक्य कहते है। इस लक्षण में 'समूहत्व' मात्र कहने पर 'घटादिसमूह' में भी अतिव्याप्ति होती क्योंकि वहाँ भी 'समूहत्व' है। अतः लक्षण में 'पद' भी कहा गया। 'पदत्व' मात्र कहने पर 'पद' में अतिव्याप्ति हो जाती इस कारण से 'समूह' (पदसमूह) पद का भी उच्चारण किया गया है।

प्रस्तुत वाक्यलक्षण में 'पद' यह पद प्रयुक्त हुआ है अतः अब इसका लक्षण दिया गया है। पद लक्ष्य है तथा पदत्व लक्ष्यतावच्छेदक है। 'शक्तिमत्त्व' पद का लक्षण है अर्थात् शक्ति अथवा सामर्थ्य से जो युक्त होता है उसे पद कहते है। पदलक्षण में 'शक्ति' पद होने पर, अब शक्ति का लक्षण किया गया है। शक्ति लक्ष्य है, शक्तित्व लक्ष्यतावच्छेदक है। 'इस पद से यह अर्थ जानना चाहिये' इस प्रकार का ईश्वरसङ्केत (ईश्वरेच्छा) ही शक्ति का लक्षण है। यहाँ 'इच्छाविशेष' में लक्षण की अतिव्याप्तिवारण के लिये ही 'ईश्वरसंकेत' अथवा 'ईश्वरेच्छा' कहा गया है।

## विश्लेषणम्

**शब्दप्रमाणलक्षणम् -** न्यायवैशेषिकदर्शने 'शब्दः' एको गुण इति पूर्वमुक्तं हि। किन्तु तत्र अयमेव शब्दः पदार्थतत्त्वज्ञानसाधनेषु चतुर्थप्रमाणत्वेन अपि गृह्यते। दर्शनेऽस्मिन् शब्दः चतुर्थः अन्तिमश्च प्रमाणं मन्यते। शब्दप्रमायाः करणं शब्दप्रमाणं भवति। अस्मिन्परिच्छेदे अयमेव 'शब्दः' वर्ण्यते। अत्र शब्देन सह वाक्यम्, पदम्, पदशक्तिः, शाब्दबोधे प्रणीतानि आकाङ्क्षादीनि साधनानि, वाक्यभेदश्च इत्यादिकं सर्वं लक्षितम्। न्यायसूत्रे **'आप्तोपदेशः शब्दः'** इति शब्दप्रमाणस्य लक्षणमुक्तम्।[283] आचार्यगौतमस्य न्यायसूत्रमनुसृत्य अन्नम्भट्टेनापि आप्तवचनमेव शब्दप्रमाणं स्वीक्रियते। एतस्यामेव शृङ्खलायां उपन्यासकारोऽपि **'आप्तवाक्यत्वं'** शब्दस्य लक्षणमुक्तम् अर्थात् आप्तस्य वाक्यमेव

[283] न्यायसूत्रम् – १/१/७

शब्दप्रमाणमित्यर्थः। लक्षणे 'आप्तत्व'मात्रोक्ते सति 'आप्ते' अर्थात् 'यथार्थवक्तरि' अतिव्याप्तिर्जायते। अत्रापि आप्तत्वस्य सत्वात् यतोहि 'आप्ते' तु 'आप्तत्वं' (आप्तस्य जातिः) भवत्येव। अतः लक्षणे 'वाक्यत्वम्' अप्युक्तम्। आप्ते वाक्यत्वस्याभावात् अतिव्याप्तिदोषः न। किन्तु लक्षणे 'मात्रवाक्यत्व'मुक्तौ अनाप्तवाक्येऽतिव्याप्तिः, अत्रापि वाक्यत्वस्य सत्वात्। अत एव 'आप्तत्वम्' उक्तम्। अतः परं लक्षणेऽस्मिन् नातिव्याप्तिदोषः।

उपन्यासटीकायाः इदं वैशिष्ट्यमस्ति यदत्र लक्षणस्य परीक्षा प्रामुख्यतया विहिता। किन्तु एतेन सह लक्षणे प्रयुक्तपदानामपि लक्षणं प्रदाय तेषां परीक्षा कृता अस्यां टीकायाम्। एतदेव वैशिष्ट्यं शब्दप्रमाणलक्षणपरीक्षानन्तरं लक्षणे प्रदत्तं आप्तः वाक्यश्च पदयोः लक्षणपरीक्षयोः दृश्यते। 'आप्तम्' उल्लिख्य आचार्येण उक्तं यत् **'यथार्थवक्तृत्वं' आप्तस्य लक्षणम्** अर्थात् सत्यवक्ता एव आप्तः पदकृत्ये **'यथाभूताबाधितार्थोपदेष्टा यथार्थवक्ता'** आप्तः वा कथितम्।[284] अत्रापि 'वक्तृत्वम्' मात्रोक्ते सति 'अनाप्ते' अयथार्थवक्तरि वा अतिव्याप्तिः तथा 'यथार्थत्व'मात्रोक्तौ यथार्थज्ञानेऽतिव्याप्तिः संभवति। अस्मात् कारणात् उभयोरेवोपादानं क्रियते टीकाकारेण आप्तलक्षणे।

तदनु वाक्यं लक्ष्यते – **'पदसमूहत्वं' वाक्यस्य लक्षणम्।** अत्र पदसमूहः इत्यर्थः क्रियाकारकपदानां समूहः। घटपटादिसमूहे अस्य लक्षणस्य अतिव्याप्तिः न भवेत् चेत् 'पदम्' इत्युक्तं नोचेत् तत्रापि समूहत्वस्य सत्वादतिव्याप्तिः। पुनश्च लक्षणे 'पदत्वं' मात्रोपादाने पदेऽतिव्याप्तिकारणात् 'समूहत्वं' गृह्यते। अतः 'पदसमूहत्वं' इदं वाक्यस्य दोषरहितलक्षणमस्तीति टीकाकारः।

सम्प्रति वाक्यलक्षणे प्रयुक्तं 'पदम्' इत्यस्य लक्षणं प्रस्तूयते – **'शक्तिमत्त्वं' पदस्य लक्षणम्।** अर्थबोधनकारयितृशक्त्या युक्तः शब्द एव पदमुच्यते। अर्थात् अर्थबोधने समर्थः वर्णः वर्णसमूहो वा पदमित्यर्थः न्यायवैशेषिके।[285] व्याकरणे तु 'सुप्तिङ्न्तं पदं' कथ्यते।[286] किन्तु नैयायिकानां मते सुबन्तं-तिङ्न्तं विना अपि पदं भवति यदि तस्मिन् अर्थबोधकशक्तिः वर्तते।

---

284 पदकृत्यम् - शब्दप्रमाणपरिच्छेदः

285 श्रीनिवासमुखोल्लासिनी - शब्दप्रमाणपरिच्छेदः

286 अष्टाध्यायी – १/४/१४

न्याये यस्मिन् पदे शक्तिः वर्तते तत्तु 'शक्तम्' इत्यभिधीयते।[287] इदानीं शक्तिपदस्य लक्षणं क्रियते – **'अस्मात्पदादयमर्थो बोद्धव्य इति ईश्वसंकेतत्वं'** शक्तेः लक्षणम्। घटादिपदात् घटत्वादिरूपो अर्थः वा बोद्धव्यः अर्थात् ज्ञातव्यः इत्याकारकेश्वरेच्छारूपः सङ्केत एव शक्तिरिति नैयायिका प्राञ्चाः। नव्यास्तु ईश्वरेच्छा न शक्तिः अपितु इच्छैव।[288] अतः लक्षणस्य इच्छाविशेषेऽतिव्याप्तिवारणाय एव 'ईश्वर'पदम् उपादीयते। ईच्छामात्रे ईश्वरत्वाभावान्नातिव्याप्तिः। अत्र उपन्यासकारेण प्राचीननैयायिकानां मतमेव उद्धृतम्। यद्यपि उपन्यासटीका नव्यन्यायशैल्यां विरचिता किन्तु तर्कसंग्रहस्य विषयवस्तु प्राचीनन्याय-वैशेषिकानुसारेणैव। अतः तर्कसङ्ग्रहस्य उपन्यासटीकायामपि विषयवस्तुदृष्ट्या तस्यैव अनुसरणं क्रियते।

**उपन्यासः -** शाब्द-बुद्धित्वावच्छिन्नं प्रति - (१) आकाङ्क्षा-ज्ञानम्, (२) योग्यता-ज्ञानम्, (३) आसत्ति-ज्ञानम् - एतैस्सहकृत-पदज्ञानं कारणम्। (१) आकाङ्क्षा लक्ष्या। आकाङ्क्षात्वं लक्ष्यताऽवच्छेदकम्। 'पदस्य पदान्तराभावप्रयुक्त- शाब्दबोधाजनकत्वं' लक्षणम्। अस्ति चेदं लक्षणम्- निराकाङ्क्षे 'गौरश्वः' इत्यादि-वाक्ये "'गो-'पदोत्तर-'अ०'-पदाभाव-प्रयुक्त-गवि या कर्मता" इति शाब्दबोधाजनकत्वस्य सत्त्वात्। (२) योग्यताज्ञानं लक्ष्यम्। योग्यता-ज्ञानत्वं लक्ष्यताऽवच्छेदकम्। 'अर्थाबाधत्वं' लक्षणम्। अस्ति चेदं लक्षणम्- (क) ''पयसा सिञ्चति।' इत्याकारक-वाक्ये 'पयः-करणकत्व-रूपार्थस्य 'सेक'-रूपार्थे बाधाभावः। (ख) 'वह्निना सिञ्चेत्।' इत्याकारक-वाक्ये तु वह्नि-करणकत्वस्य बाधान्न वह्नि-करणक-सेकः।" इति अन्वय-व्यतिरेकाभ्यां 'शाब्दबुद्धित्वावच्छिन्नं प्रति योग्यता-ज्ञानकारणम्।' इतिसिद्धम्। (३) सन्निधिर्लक्ष्यः। सन्निधित्वं लक्ष्यताऽवच्छेदकम्। 'पदानामविलम्बेनोच्चारणत्वं' लक्षणम्। (क) 'प्रहरे-प्रहरे उच्चारितानि घटादि-पदानि शाब्द-बोधाजनकानि, सान्निध्याभावात्। (ख) सहोच्चारितानि च घटादि-पदानिशाब्द-बोध-जनकानि।' इति अन्वयव्यतिरेकाभ्यां शाब्द-बुद्धित्वावच्छिन्नं प्रति आसत्ति-ज्ञानस्यहेतुत्वात्॥

**हिन्द्यनुवादः –** शाब्दबोध के प्रति आकाङ्क्षाज्ञान, योग्यताज्ञान एवं आसत्तिज्ञान के साथ ही पदज्ञान कारण होता है। आकाङ्क्षा लक्ष्य है तथा आकाङ्क्षत्व इसकी लक्ष्यता का अवच्छेदक

---

287 शक्तं पदम् – तर्कसङ्ग्रहः, शब्दप्रमाणपरिच्छेदः

288 न्यायसिद्धान्तमुक्तावली - शब्दखण्डः

है। 'एक पद का दूसरे पद के अभाव में प्रयुक्त होने से शाब्दबोध का न करा पाना ही आकाङ्क्षा है'। इस लक्षण का समन्वय निम्न उदाहरण पर किया गया है – जैसे कि 'गाय, अश्व' यह भी पदों का समूह होने से वाक्य है किन्तु इस वाक्य में शब्दप्रमाणत्व नही है क्योंकि इस वाक्य के पद परस्पर निराकाङ्क्ष है। इस निराकाङ्क्ष वाक्य में 'गो' पद के पश्चात् 'अम्' (कर्मकारक) पद का अभाव होने से, 'गो' पद का उसके बिना प्रयुक्त होने पर 'गो' में जो कर्मता है' उसका शाब्दबोध नहीं हो रहा है।

योग्यताज्ञान लक्ष्य है। योग्यताज्ञानत्व लक्ष्यतावच्छेदक है। 'अर्थ का अबाध ही योग्यता है'। (वाक्य में पदों के अर्थों का परस्पर अबाध 'अन्वय की योग्यता' से युक्त होना चाहिए एवं 'व्यतिरेक की योग्यता' से रहित होने चाहिए।) अन्वययोग्यता एवं व्यतिरेकयोग्यता को योग्यतालक्षण में इस प्रकार समन्वित किया गया है। - १. 'पयसा सिञ्चति' अर्थात् 'जल से सिञ्चन करता है' इस प्रकार के वाक्य में 'जल के करणत्व रूप अर्थ का सिञ्चनक्रिया रूप अर्थ के साथ' बाधा का अभाव है अर्थात् इन दोनों अर्थों का अन्वय हुआ है (यहाँ अन्वययोग्यता है अतः इस वाक्य में प्रमाणत्व विद्यमान है)। २. 'वह्निना सिञ्चति' अर्थात् 'वह्नि से सिञ्चन करता है' इस वाक्य में वह्नि के करणत्व रूप अर्थ का सिञ्चनक्रिया रूप अर्थ के साथ बाध होने से यहाँ व्यतिरेक योग्यता है (अतः यह वाक्य शब्दप्रमाण नहीं है)। इस प्रकार शाब्दबोध में अन्वयव्यतिरेक से योग्यताज्ञान कारण है।


सन्निधि लक्ष्य है। सन्निधित्व लक्ष्यतावच्छेदक है। 'पदों का अविलम्ब (शीघ्र) उच्चारण ही सन्निधि है'। जैसे कि प्रहर-प्रहर में उच्चारित घटादि पद शाब्दबोध के जनक नहीं होते है (यहाँ पदों के उच्चारण में व्यतिरेक की विद्यमानता है) तथा साथ-साथ (अविलम्ब) उच्चारितपद शाब्दबोध के जनक होते है (यहाँ पदों का उच्चारण अन्वय से युक्त है)। इस प्रकार आसत्ति (सन्निधि) भी अन्वय एवं व्यतिरेक से ही शाब्दबोध के प्रति कारण होता है।

## विश्लेषणम्

**शाब्दबोधे सहकारिकारणवर्णनम् –** साम्प्रतं शाब्दबोधे यानि-यानि सहकारिकारणानि भवन्ति तानि विवेचितानि टीकाकारेण। शाब्दबोधस्य कृते अत्र आचार्येण 'शाब्दबुद्धित्वावच्छिन्नम्' इति पदस्य प्रयोगः कृतः। शाब्दबोधः अर्थात् शाब्दबुद्धिः शाब्दज्ञानं वा। शाब्दबुद्ध्यां तस्याः प्राकृतिकधर्मः 'शाब्दबुद्धित्वम्' अस्ति। इदमेव शाब्दबुद्धित्वं

शाब्दबुद्धेः अवच्छेदकः वर्तते, यतोहि क्वचित् अवच्छेदकपदस्य अर्थः विशेषणमपि भवति तथा अवच्छिन्नपदं विशिष्टम् आश्रयो वा भवति।[289] अत्र 'शाब्दबुद्धित्वं' शाब्दबुद्धेः विशेषणम्, अतः तस्य अवच्छेदकमपि। एवम्प्रकारेण शाब्दबुद्धित्वावच्छिन्नं शाब्दबुद्धिरेव।

**आरेखीयप्रस्तुतिः -**




**चित्रक्रमाँकः ३३**

शाब्दबोधे वाक्यार्थबोधे वा आकाङ्क्षा, योग्यता, सन्निधिश्चेति त्रीणि सहकारिकारणानि भवन्ति। एतेषां ज्ञानेन सह पदज्ञानमेव शाब्दबोधे कारणम्। उपन्यासकारः एतेषामपि लक्षणं प्रदाय परीक्षां करोति। सामान्यतः लोके इच्छा एव 'आकाङ्क्षा' इति नाम्ना प्रचलिता। किन्तु वाक्यार्थज्ञानस्य घटकसामग्र्यां आकाङ्क्षायाः पारिभाषिकप्रयोगः प्राप्यते। **'पदस्य पदान्तराभावप्रयुक्तशाब्दबोधाजनकत्वं'** आकाङ्क्षायाः लक्षणम्। वाक्ये एकपदस्य अपरपदं विना प्रयुक्ते सति शाब्दबोधस्य अनुपपत्तिरेव आकाङ्क्षा। कस्मिंश्चिदपि वाक्ये साकांक्षपदानां समूह एव तस्य शब्दप्रमाणत्वं सिद्धयति। 'गौरश्वः' इत्यादिवाक्ये पदद्वयमेव निराकाङ्क्षं यतोहि वाक्यार्थबोधाय क्रियापदं कारकपदमपेक्ष्यते तथा कारकपदं क्रियापदमपेक्ष्यते। द्वयोः पदयोः एषा अपेक्षैव 'आकाङ्क्षा' कथ्यते। उपर्युक्तोदाहरणे द्वे पदे एव कारकपदे अतः ते निराकाङ्क्षे। अस्मात् कारणात् अस्मिन् पदसमूहे न प्रमाणत्वम्। 'गामानय' इत्यत्र 'गाम्' इति कर्मकारकपदं तथा 'आनय' इति क्रियापदम्। अतः एतयोः द्वयोः परस्पराकाङ्क्षत्वात् वाक्यमिदं शब्दप्रमाणान्तर्गते परिगण्यते। श्रीनिवासमुखोल्लासिनीटीकायां तु न केवलं पदानाम् अपितु प्रकृतिप्रत्ययः, किं, केन, कुतः इत्यादीनामपि जिज्ञासा आकाङ्क्षा कथिता।[290]

---

289 नव्यन्यायभाषाप्रदीपः – Text 43

290 श्रीनिवासमुखोल्लासिनी – शब्दप्रमाणपरिच्छेदः

वाक्यार्थबोधे एतत्तु पदानां स्थितिः आसीत्, साम्प्रतं पदार्थस्य उपस्थितिः वर्ण्यते योग्यतामाध्यमेन। वाक्ये तादृशपदानां परस्परमर्थस्य अविरोध एव योग्यता – **'अर्थाबाधत्वं योग्यता'।** अत्र अर्थाबाधस्य तात्पर्यम् अर्थेषु अन्वययोग्यता इति। यत्र पदानामर्थाः परस्परमन्वययोग्यतया न भवन्ति तत्र अर्थबाधः। एवञ्च यत्र अर्थाः परस्परमन्वययोग्याः तत्र अर्थस्य अबाधः। उपन्यासकारेण अन्वययोग्यता व्यतिरेकयोग्यता च द्वयोरेव उदाहरणं प्रस्तुतम्। **'पयसा सिञ्चति'** इत्यत्र पयसः अर्थात् जलस्य साधनरूपार्थः। अस्य अर्थस्य 'सेक'क्रियारूपार्थे अन्वयः, यतोहि जले सिञ्चनस्य सामर्थ्यं वर्तते। अतः उदाहरणेऽस्मिन् द्वयोः पदार्थयोः परस्परमन्वययोग्यता अर्थात् अर्थस्य बाधाभावः। अतः अस्य वाक्यस्य शब्दप्रमाणत्वमस्ति शाब्दबोधे। 'वह्निना सिञ्चेत्' वाक्येऽस्मिन् वह्नेः करणरूपार्थः वर्तते सेकक्रियायै। किन्तु वह्नौ सेककरणत्वस्य असामर्थ्यत्वात् पदद्वयोः अर्थयोः परस्परबाधः। अतः अत्र व्यतिरेक-योग्यता विद्यते तथा व्यतिरेकयोग्यतायाः शाब्दबोधे न करणत्वम् इति। अनेन प्रकारेण अन्यवयव्यतिरेकयोग्यताभ्यां शाब्दज्ञाने योग्यतायाः कारणत्वं निश्चीयते।

शाब्दप्रमायां शब्दप्रमाणस्य तृतीयं सहकारिकारणं सन्निधिः आसत्तिर्वा मन्यते न्यायवैशेषिकदर्शने। पदानामविलम्बेनोच्चारणमेव सन्निधिः कथ्यते – **पदानामविलम्बेनोच्चारणत्वं** सन्निधेः लक्षणम्। अबाधितार्थवतां परस्पमाकाङ्क्षितपदानां सद्यः उच्चारणमेव सन्निधिः। यथा - 'गाम् आनय' इत्यत्र पदद्वयं साकाङ्क्षं तथा पदयोः अर्थो अपि अबाधितः किन्तु यदि अमुयोः पदयोः क्रमेण समकाले एव उच्चारणं न कृत्वा विलम्बेनोच्चार्यते तर्हि वाक्यमिदं न प्रमाणं सन्निधेरभावात्। विलम्बेन उच्चारितपदानां परस्परार्थबोधकता नष्टा भवति अतः शाब्दबोधे आकाङ्क्षा तथा योग्यतानन्तरं सन्निधियुक्तवाक्यान्येव शाब्दबोधे साधनानि भवन्ति।

**उपन्यासः -** 'वाक्यं द्विविधम्' इति विभागोक्तिः। (१) वैदिक-वाक्यं लक्ष्यम्। वैदिक-वाक्यत्वं लक्ष्यताऽवच्छेदकम्। 'वेदत्वं' लक्षणम्। (२) लौकिक-वाक्यं लक्ष्यम्। लौकिक-वाक्यत्वं लक्ष्यताऽवच्छेदकम्। 'आप्तोक्तत्वं' लक्षणम्।

**हिन्द्यनुवादः -** वाक्य के दो भेद है - वैदिकवाक्य एवं लौकिकवाक्य। वैदिकवाक्य लक्ष्य है, वैदिकवाक्यत्व लक्ष्यतावच्छेदक है। 'वेदत्व' ही इसका लक्षण है अर्थात् वेद में उल्लिखत वाक्य ही वैदिकवाक्य है। लौकिकवाक्य लक्ष्य है। लौकिकवाक्यत्व लक्ष्यतावच्छेदक है।

'आप्तोक्त्व' अर्थात् आप्तपुरुष के द्वारा उच्चारित वाक्य ही लौकिकवाक्य है।

## विश्लेषणम्

**वाक्यभेदनिरूपणम् -** सम्प्रति वाक्यस्य भेदः प्रदर्श्यते। वाक्यं वैदिकं लौकिकञ्चेति भेदेन द्विविधं वर्तते। वैदिकवाक्यं वेदेषु उल्लिखितवाक्यम् अस्ति। यथा – **अग्निमीळे पुरोहितम्**[291], **सहस्रशीर्षा पुरुषः**[292] इत्यादिः। एतानि वेदस्वरूपानि वैदिकवाक्यानि साक्षादिश्वरमुखात् प्रोक्तत्वात् पूर्णतया शब्दप्रमाणरूपे स्वीकृतानि। अतो हेतोः उपन्यासकारेण अस्य लक्षणे **'वेदत्वं'** मात्रमुच्यते। यतोहि एतेन पदेनैव वैदिकवाक्यस्य सकलस्वरूपं ज्ञायते। श्रीधरमुखोल्लासिनीटीकायां वैदिकपदेन वेदमूलकस्मृतिः, पुराणादिरपि गृह्यते किन्तु याः स्मृतयः वेदविरोधिन्यः सन्ति ताः न परिगण्यन्ते वैदिकशब्दप्रमाणे।[293] लौकिकवाक्यं तु लोके मनुष्यैः व्यवहारे प्रयुञ्जमानं वाक्यं वर्तते। किन्तु एतत्वाक्यमपि तदैव प्रमाणं स्वीक्रियते यदा आप्तपुरुषमुखात् निसृतं यतोहि अस्य लक्षणमेव **'आप्तोक्त्वम्'** इति विधीयते टीकाकारेण। आप्तपुरुषः अर्थात् यथार्थवक्ता अतः अनाप्तपुरुषः अर्थात् अयथार्थवक्ता। एवम्प्रकारेण ये यथार्थज्ञानिनः न भवन्ति तेषां वाक्यम् अनाप्तपुरुषवचनत्वात् न प्रमाणं भवति।

**उपन्यासः -** शब्द-प्रमाणं लक्ष्यम्। शब्द-प्रमाणत्वं लक्ष्यताऽवच्छेदकम्। 'शाब्द-बोध-करणत्वं' लक्षणम्। 'करणत्वं' मात्रोक्तौ कुठारेऽतिव्याप्तिः, तत्रापि करणत्वस्य सत्वात्, अतः 'शाब्द-बोध-करणत्वम्' उक्तम्। 'शाब्द-बोध-करणत्व-'मात्रोक्तावतिदेश-वाक्येऽतिव्याप्तिः', तत्रापि शाब्द-बोध-करणत्वस्य सत्त्वात्, "'शाद्बत्व'-रुप-जात्यवच्छिन्न-कार्यता-निरूपित-कारणता-शालित्वम्।" इति यावत्। 'शाब्दत्व-जाति'-सिद्धिस्तु 'शाब्दयामि' इत्यनुव्यवसायात्मकानुभवादेव, इति ध्येयम्॥

॥इति शब्दोपन्यासः॥५३॥

**हिन्द्यनुवादः -** शब्दप्रमाण लक्ष्य है। शब्दप्रमाणत्व लक्ष्यतावच्छेदक है। 'जो शाब्दबोध का करण हो वही शब्दप्रमाण है'। लक्षण में 'करणत्व' मात्र कहने पर 'कुठार' में अतिव्याप्ति हो जाती क्योंकि वहाँ भी (छेदनक्रिया का करण होने के कारण) 'करणत्व' विद्यमान है। अतः

291 ऋग्वेदः – १/१/१

292 ऋग्वेदः – १०/९०/१

293 श्रीधरमुखोल्लासिनीटीका – पृष्ठम् - २५६

'शाब्दबोध का करण' कहा गया। 'शाब्दबोध का करण' मात्र कहने पर 'अतिदेशवाक्य' में अतिव्याप्ति हो जाती, वहाँ भी शाब्दबोध का करणत्व होने से। अतएव 'शाब्दत्व' जाति से अवच्छिन्न कार्यता से निरूपित कारणता वाला जो (असाधारण) कारण है वही शाब्दबोध का करण है अर्थात् शब्दप्रमाण है' ऐसा लक्षण देना चाहिए। यहाँ भी 'शाब्दत्व' इस जाति की सिद्धि 'मैं शाब्दबोध करता हूँ' इस प्रकार के अनुव्यवसायज्ञान से होती है।

## विश्लेषणम्

**शब्दप्रकरणोपसंहारः –** तर्कसंग्रहस्य शब्दपरिच्छेदे उपसंहारतया 'वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं शब्दः' इदं वाक्यमुक्तम्। अस्यैव टीकनम् उपन्यासकारः 'शाब्दबोधकरणत्वं शब्दप्रमाणम्' इत्यनेन लक्षणेन प्रस्तुतम्। वैदिकवाक्येन आप्तवाक्येन च शाब्दज्ञानं (शाब्दबोधः) जायते। अस्यैव शाब्दज्ञानस्य व्यापारवदसाधारणं कारणम् अर्थात् करणं शब्दप्रमाणं (वैदिकवाक्यं लौकिकवाक्यञ्च) भवति। अस्मिन् लक्षणेऽपि कुठारेऽतिव्याप्तिवारणाय 'शाब्दबोधः' इत्युक्तम्। किन्तु 'शाब्दबोधकरणत्वं' इत्यत्रापि अतिदेशवाक्ये अतिव्याप्तिः सम्भवतीत्युच्यते उपन्यासकारेण। यतोहि अत्रापि शाब्दबोधस्य करणत्वं तु विद्यत एव। अतः **शाब्दत्वरूपजात्यवच्छिन्नकार्यतानिरूपितकारणताशालित्वम्** शब्दप्रमाणस्य लक्षणम् अवगन्तव्यम् उपमानलक्षणवत्।

**आरेखीयप्रस्तुतिः** – चित्रक्रमाँकः '१' सदृश एव

अत्र 'शाब्दत्वं' शाब्दस्य जातिः वर्तते। अस्याः सिद्धिः 'अहं शाब्दयामि' इत्यनुव्यवसायात्मक-ज्ञानादेव भवति।

एवम्प्रकारेण बुद्धेः प्रकारे अनुभवे यथार्थानुभवस्य निरूपणं परिसमाप्तम् अभवत्। अतः परं अनुभवस्य द्वितीयभेदः अर्थात् अयथार्थानुभवः प्रारभ्यते।

(२.१५ बुद्धिविवरणेऽयथार्थानुभवस्य लक्षणम्)

**तर्कसंग्रहः -** अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात्। एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति। मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ इदं रजतमिति। व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति॥५४॥

**उपन्यासः–**'अयथार्थानुभवस्त्रिविध' इति विभागोक्तिः। (१) संशयोलक्ष्यः। संशयत्वं

लक्ष्यताऽवच्छेदकम्। 'एकस्मिन्धर्मिणिविरुद्ध-नाना-धर्म-प्रकारक-ज्ञानत्वं' लक्षणम्। 'विरुद्ध-नाना-धर्म-प्रकारकज्ञानत्वम्' उक्तौ 'घटपटौ' इति समूहालम्बनेऽतिव्याप्तिः, तत्र विरुद्ध-नाना-धर्म-प्रकारत्वस्य सत्त्वाद्, 'एक-धर्मिक' इत्युक्तम्। 'एक-धर्मिक-नाना-धर्म-प्रकारकत्वम्' उक्तौ 'घटो = द्रव्यम्' इत्याकारकज्ञानेऽतिव्याप्तिः, तत्रैकधर्मिक-नाना-धर्म-प्रकारकत्वस्यसत्त्वात्, अतो 'विरुद्ध' इत्युक्तम्। 'एक-धर्मिक-विरुद्ध-धर्म-प्रकारकत्वम्' उक्तौ 'घटत्व-विरुद्ध-पटत्ववान्' इत्याकारक-ज्ञानेऽतिव्याप्तिः, तत्रविरुद्ध-धर्म-प्रकारकत्वस्य सत्त्वात्, अतो 'नाना' इत्युक्तम्॥ (२) विपर्ययोलक्ष्यः। विपर्ययत्वं लक्ष्यताऽवच्छेदकम्। 'मिथ्या-ज्ञानत्वं' लक्षणम्। 'ज्ञानत्व'-मात्रोक्तौ 'घट'इत्याकारक-ज्ञानेऽतिव्याप्तिः, तत्र ज्ञानत्वस्य सत्त्वात्, अतो 'मिथ्यात्वम्' उक्तम्। 'मिथ्यात्व'-मात्रोक्तौ मिथ्या-रजतेऽतिव्याप्तिः, तत्रापि मिथ्यात्वस्य सत्त्वात्, अतो 'ज्ञानत्वम्' उक्तम्। (३) तर्कोलक्ष्यः। तर्कत्वं लक्ष्यताऽवच्छेदकम्। 'व्याप्यारोपेणव्यापकारोपत्वं' लक्षणम्। उदाहरणन्तु 'यदि वह्निर्न स्यात्, तर्हि वह्नि-जन्यो धूमोऽपि न स्यात्।' इति॥५४॥

**हिन्द्यनुवादः –** अयथार्थानुभव तीन प्रकार का होता है – संशय, विपर्यय एवं तर्क। संशय लक्ष्य है, संशयत्व लक्ष्यतावच्छेदक है। 'एक धर्मी में अनेक प्रकार के विरोधी धर्मों का ज्ञान होना ही' संशय का लक्षण है। यदि 'अनेक प्रकार के विरोधी धर्मों का ज्ञान' ही संशय है ऐसा कहा जाता तो 'घट एवं पट (घटपटौ)' इस समूहालम्बन ज्ञान में अतिव्याप्ति हो जाती। क्योंकि वहाँ भी अनेक विरोधी धर्मों का ज्ञान एक साथ होता है। इसीलिए 'एक धर्मी में' यह पद भी प्रयुक्त किया गया। यदि उपर्युक्त लक्षण में 'विरुद्ध' पद का ग्रहण न किया जाता अर्थात् 'एक धर्मी में अनेक प्रकार के धर्मों का ज्ञान' मात्र इतना ही कहा जाता तो 'घट द्रव्य है (घटो द्रव्यम्)' इस प्रकार के ज्ञान में भी अतिव्याप्ति हो जाती, यहाँ भी 'एक धर्मी में अनेक प्रकार के धर्मों का ज्ञान' होने से। अतः 'विरुद्ध' इस पद का उपादान किया गया है। इसी प्रकार यदि 'एक धर्मी में विरुद्ध धर्म का ज्ञान' मात्र इतना ही संशय लक्षण कहा जाए अर्थात् 'नाना' पद को न ग्रहण किया जाए तो 'घटत्व का विरोधी पटत्व धर्म वाला पट है (घटत्वविरुद्धपटत्ववान्)' इस प्रकार के ज्ञान में अतिव्याप्ति होने लगेगी क्योंकि यहाँ भी एक धर्मी में विरुद्ध धर्म का ज्ञान हो रहा है। इसमें अतिव्याप्ति निवारण हेतु ही संशय लक्षण में 'नाना' पद का प्रयोग किया गया है।

विपर्यय लक्ष्य है। विपर्ययत्व लक्ष्यतावच्छेदक है। 'मिथ्याज्ञान' ही विपर्यय का लक्षण है। 'ज्ञान' मात्र कहने पर 'घट' के भी ज्ञान में अतिव्याप्ति हो जाती, क्योंको वहाँ भी 'ज्ञान' है। अतः 'मिथ्यात्व' भी कहा गया। यदि लक्षण में मात्र 'मिथ्या' को ही कहा जाता तो 'मिथ्या रजत' में भी अतिव्याप्ति होने लगती, यहाँ भी 'मिथ्यात्व' के होने से। अतः 'ज्ञान' पद भी कहा गया।

तर्क लक्ष्य है, तर्कत्व लक्ष्यतावच्छेदक है। 'व्याप्य के आरोप से व्यापक का आरोप होना' ही तर्क का लक्षण है। 'यदि वह्नि नहीं होती तो वह्नि से जन्य धूम भी नहीं होता' यह तर्क का उदाहरण है।

## विश्लेषणम्


**संशयलक्षणम् -** यथार्थानुभवस्य विपरीतः अयथार्थानुभवः कथ्यते। तदभाववति तत्प्रकारकोऽनुभवः अयथार्थानुभवः इति तु पूर्वमुक्तमेव। अधुना अयथार्थानुभवस्य भेदं विभजते। अयथार्थानुभवः त्रिविधः संशय-विपर्यय-तर्कभेदात्। तर्कसंग्रहकारेण इव उपन्यासकारो अपि प्रथमं संशयमेव लक्ष्यते – **एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकज्ञानत्वं** संशयः। यदा एकस्मिन् धर्मिणि परस्परविरुद्धानेकानां धर्माणां ज्ञानं भवति तदा तज्ज्ञानं संशयः कथ्यते। संशये धर्मी एकमेव भवति किन्तु तस्मिन् धर्मद्वयं भासते। यथा - 'स्थाणुर्वा पुरुषो वा' इत्यत्र स्थाणुत्वं पुरुषत्वञ्चेति धर्मद्वयं एकसार्धमेव एकधर्मिणि प्रतीयते अतः धर्मद्वयस्य निश्चयाभावादत्र संशयः। न्यायबोधिन्याम् एतदेव कथनं निम्नप्रकारेण उक्तम्- **एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानं संशयः**।[294] एकस्मिन्नेव विशेष्ये यदा एकधर्मस्य भावः अभावश्च (अर्थात् एकस्मिन् धर्मिणि एकधर्मेण/धर्मणा सह अपरधर्मस्य स्थितिः) इति उभयप्रकारकज्ञानं जायते तदा संशयः भवति। तथा हि 'स्थाणुर्वा पुरूषो वा' इत्यत्र स्थाणुत्वं स्थाणुत्वाभावः तथा पुरुषत्वं पुरुषत्वाभावः (स्थाणुत्वं) इति प्रकारकज्ञानम्। अत एव नव्यन्यायभाषाप्रदीपे संशयः चतुष्कोटिक इत्युच्यते। अत्र कोटिरित्यर्थः प्रकार

[294] न्यायबोधिनी - अयथार्थानुभवनिरूपणम्

एव।[295]

**आरेखीयप्रस्तुतिः -**

'स्थाणुर्वा पुरुषो वा'




**चित्रक्रमाँकः ३४**

सम्प्रति उपन्यासकारेण प्रदत्तसंशयलक्षणस्य पदकृत्यं विहितम्। यदि लक्षणे 'एकस्मिन् धर्मिणि' इति पदं न दीयते तर्हि 'विरुद्धनानाधर्मप्रकारकत्वं' संशयज्ञानस्य लक्षणं भविष्यति। किन्तु अस्य लक्षणस्य समूहालम्बनज्ञानेऽतिव्याप्तिः सम्भवति यतोहि 'घटपटौ' इत्याकारकसमूहालम्बन- ज्ञानेऽपि परस्परविरुद्धधर्मस्य (घटत्वस्य पटत्वस्य च) ज्ञानं भवति अतो हेतोः लक्षणे 'एकस्मिन् धर्मिणि' इत्युक्तम्। समूहालम्बनज्ञाने विरुद्धधर्मस्य ज्ञानं तु भवति परमेकस्मिन् धर्मिणि न अपितु भिन्न-भिन्नधर्मिणि। नव्यन्यायभाषाप्रदीपे समूहालम्बनज्ञाने तथा संशयज्ञाने भेदः एवं प्रदर्शितः - **समूहालम्बनस्थले तु प्रत्येकप्रकारता निरूपिता पृथक्-पृथक् विशेष्यता भवतीति संशयात् समूहालम्बनस्य भेदः।**[296] अतः अत्र एकधर्मित्वाभावान्नातिव्याप्तिः।


**आरेखीयप्रस्तुतिः –**

स्थाणुर्वा पुरुषो वा घटपटौ

---

[295] संशये हि एकस्मिन् विशेष्ये प्रतियोगी तदभावश्च परस्परविरूद्धावपि उभौ प्रकारतया भासेते इति नियमः। संशये प्रकारस्य कोटिरिति नाम। अयं स्थाणुर्वा पुरुषो वा इत्यादौ संशये कोटिचतुष्टयमस्ति। - नव्यन्यायभाषाप्रदीपः Text 52

[296] तत्रैव




**चित्रक्रमाँकः - ३५**

अनेन प्रकारेण यदि विरुद्धपदं नोच्यते चेत् 'एकधर्मिकनानाधर्मप्रकारकत्वं' इति संशयलक्षणस्य 'घटो द्रव्यम्' इत्यस्मिन् ज्ञानेऽतिव्याप्तिः। अत्र विशेष्यः घटः, तस्मिन् तस्य प्राकृतिकधर्मः घटत्वं (विशिष्टसत्ता) वर्तते किन्तु एतेन सह घटः द्रव्यमपि अस्ति अतः तस्मिन् द्रव्यत्वमपि (शुद्धसत्ता) विद्यते। एकस्मिन् धर्मिणि घटे घटत्वं द्रव्यत्वञ्च इति नानाधर्मप्रकारकत्वादत्र अतिव्याप्तिः संशयलक्षणस्य। अतो हेतोः 'विरुद्धं' इत्युच्यते लक्षणे। 'घटो द्रव्यम्' अत्र नानाधर्मप्रकारकत्वम् तु अस्ति किन्तु अत्रोपस्थितानि धर्माणि परस्परविरुद्धानि न शुद्धसत्ताविशिष्टसत्तायाः ऐक्यत्वात्। अधुना 'घटो द्रव्यम्' नात्र अतिव्याप्तिः।

इदानीं लक्षणे प्रयुक्तस्य 'नाना'पदस्य उपादेयता वर्णिता। यदि 'नाना'पदस्य उपादानं न क्रियते तर्हि एकधर्मिकविरुद्धधर्मप्रकारकत्वम् इति संशयलक्षणस्य 'घटत्वविरुद्धपटत्ववान्' ज्ञानेऽस्मिन् अतिव्याप्तिः भविष्यति। यतोहि 'पटः' एकः धर्मी वर्तते यस्मिन् घटत्वस्य विरोधिधर्मः पटत्वं तिष्ठति किन्तु 'पटत्वं' तु एकमेव। नानापदस्य अभावे अत्रापि संशयलक्षणम् अतिव्याप्तम्। अतः नानापदम् उपात्तम्। घटे पटत्वविरुद्धधर्मस्य घटस्य उपस्थितिः तु वर्तते किन्तु तद्धर्मः एकमेव न तु नाना। अतः नानाधर्मत्वाभावान्नातिव्याप्तिः भवति अत्र संशयलक्षणस्य। इति संशयलक्षणपरीक्षितम्।

**विपर्ययलक्षणम् -** अयथार्थानुभवस्य द्वितीयभेदः विपर्ययः उल्लिखितः। '**विपर्ययो नाम मिथ्याज्ञानत्वम्**' इति लक्षणं प्रदत्तमुपन्यासकारेण। मिथ्याज्ञानम् इत्यर्थः अयथार्थज्ञानम्।

दीपिकायां **'तदभाववति तत्प्रकारकनिश्चयमेव'** मिथ्याज्ञानं वा अयथार्थज्ञानं भणितम्।[297] विपर्ययः 'भ्रम' इति नाम्ना अपि प्रसिद्धः।[298] विपर्ययस्य लक्षणे घटादेः यथार्थज्ञानेऽतिव्याप्तिवारणाय 'मिथ्यात्वं' तथा मिथ्यारजतेऽतिव्याप्तिवारणाय 'ज्ञानत्वम्' इत्युभयोरेव उपादानं विपर्ययलक्षणे कृतम्। अतः दोषरहितमिदं लक्षणम्।

**तर्कलक्षणम् -** अयथार्थानुभवस्य तृतीयः भेदः तर्कः वर्तते। तर्कस्य प्रयोगः तत्र भवति यत्र सद्हेतुस्थलेऽपि अर्थात् धूमस्य सत्त्वेऽपि आपत्तिकर्त्रा पर्वते वह्न्यभावः मन्यते। तदा आपत्तिकर्तुः आपत्तेः निरासाय तर्कः प्रयुज्यते। **'व्याप्यारोपेण व्यापकारोपत्वं'** इति तर्कस्य लक्षणं दीयते उपन्यासे। अस्य उदाहरणस्वरूपे 'यदि वह्निर्न स्यात् तर्हि वह्निजन्यो धूमोऽपि न स्यात्' इति वाक्यं दत्तम्। अत्र व्याप्यः 'वह्न्यभावः' वर्तते तथा व्यापकः 'धूमाभावः'। अत्र वह्न्यभावस्य आरोपेण आहार्यज्ञानेन वा धूमाभावरूपारोपः एव तर्क उच्यते। अर्थात् 'पर्वते वह्निः वर्तते धूमत्वात्' इत्यत्र पर्वते धूमस्य प्रत्यक्षदर्शनान्तरमपि आपत्तिकर्तुः वह्न्यभावरूपापत्तेः निरसनाय सिद्धान्तपक्षिणा अयं तर्कः प्रस्तूयते यत् यदि पर्वते वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात् यतोहि 'यत्र यत्र वह्निः तत्र तत्र धूमः एवं यत्र यत्र वह्न्यभावः तत्र तत्र धूमाभावः' इति व्याप्तिः वर्तते। अनया व्याप्त्या तु वह्न्यभावस्य सत्त्वात् धूमाभावोऽपि भवेत् किन्तु अत्र धूमस्य प्रत्यक्षं भवति। अतः अत्र धूमस्याभावात् असिद्धे सति वह्न्यभावोऽपि असिद्धः। एवम्प्रकारेण व्याप्यस्य वह्न्यभावस्य वा आरोपेण (यतोहि इयं स्थितिः वास्तविकी नास्ति अतः अस्य आरोपः क्रियते) आहार्येण वा व्यापकस्य धूमाभावस्य आरोपः तर्कः तथा एतेन तर्केण सदनुमानस्थले धूमसत्त्वेऽपि वह्न्यभावापत्तिनिराकृत्य वह्निधूमस्य व्याप्तिः प्रतिपाद्यते। इति अनुभवप्रकरणं विरतम्।

(२. १६ बुद्धि-विवरणे (१) स्मृतेर्लक्षणम्)

**तर्कसंग्रहः -** स्मृतिरपि द्विविधा। यथार्थायथार्था च। प्रमाजन्या यथार्था। अप्रमाजन्याऽयथार्था॥५५॥

**उपन्यासः -** 'स्मृतिरपि०' इत्यादिना स्मृतौ प्रमात्वं भ्रमत्वं चानुभवाधीनमिति द्योतनाय॥५५॥

---

297 तर्कदीपिका - अयथार्थानुभवनिरूपणम्

298 न्यायबोधिनी - अयथार्थानुभवनिरूपणम्

**हिन्द्यनुवादः –** स्मृति के भी दो भेद है – यथार्था स्मृति एवं अयथार्था स्मृति। प्रमा अर्थात् यथार्थज्ञान से उत्पन्न स्मृति यथार्था स्मृति है तथा अप्रमा (अयथार्थज्ञान) से जन्य स्मृति अयथार्था स्मृति है।

## विश्लेषणम्

**स्मृतिभेदविवेचनम् -** इतः बुद्धेः अपरप्रकारः स्मृतेः भेदविवेचनम् आरभते। स्मृतिरपि अनुभव इव द्विविधा वर्तते – यथार्था स्मृतिः अयथार्थास्मृतिश्च। प्रमाजन्या स्मृतिः यथार्था स्मृतिः भवति तथा अप्रमाजन्या स्मृतिः अयथार्था भवति। एषा स्मृतिः अनुभवाधीना एव भवति। यथा अस्माकम् अनुभवः भवति तादृशी एव स्मृतिः। अतः कारणभूतमनुभवमनुसृत्य कार्यभूता स्मृतिरपि ज्ञातव्या। यथार्थानुभवभेदमधिकृत्य यथार्थस्मृतिरपि प्रत्यक्षस्मृतिः, अनुमितिस्मृतिः, उपमितिस्मृतिः, शाब्दस्मृतिश्च भेदेन चतुर्विधाः तथा अयथार्थानुभवभेदमवलम्ब्य संशय-विपर्यय-तर्कभेदेन त्रिविधा इत्यवगन्तव्यम्। एतत्प्रकरणानन्तरमेव बुद्धिगुणप्रकरणमपि समाप्तम्।

(२.१७ सुख-लक्षणम्)

**तर्कसंग्रहः -** सर्वेषामनुकूलतया वेदनीयं सुखम् ॥५६॥

**उपन्यासः -** सुखं लक्ष्यम्। सुखत्वं लक्ष्यताऽवच्छेदकम्। 'सर्वेषामनुकूलवेदनीयत्वं' लक्षणम्। 'वेदनीयत्व-' मात्रोक्तौ सर्पेऽतिव्याप्तिः, तत्रापि वेदनीयत्वस्य सत्त्वात्, अतः 'अनुकूल-' इत्युक्तम्। 'अनुकूल-वेदनीयत्व-' मात्रोक्तौ कलञ्ज-भक्षणेऽतिव्याप्तिः, तत्र कस्यचिद्रोगिणोऽनुकूल-वेदनीयत्वस्य सत्त्वात्, अतः 'सर्वेषाम्' इत्युक्तम्॥५६॥

**हिन्द्यनुवादः –** सुख लक्ष्य है। सुखत्व इसकी लक्ष्यता का अवच्छेदक है। 'सभी प्राणियों द्वारा अनुकूल अनुभव करना ही' सुख का लक्षण है। यदि लक्षण में 'वेदनीयत्व' अर्थात् 'अनुभव करने मात्र को' सुख कहते तो 'सर्प' में इस लक्षण की अतिव्याप्ति होने लगती इसीलिये लक्षण में 'अनुकूल' कहा गया है (सर्प 'प्रतिकूल अनुभव' कराने वाला होता है)। यदि मात्र 'अनुकूल वेदनीयत्व' कहते तो 'कलञ्जभक्षण' में अतिव्याप्ति होने लगती क्योंकि रोगी के लिये 'कलञ्जभक्षण' का अनुकूल अनुभव होने से (जबकि रोगी के लिए रोग में कलञ्जभक्षण अर्थात् मांसभक्षण का सेवन स्वास्थ्य की दृष्टि से प्रतिकूल माना जाता है)। अतएव लक्षण में अतिव्याप्ति को रोकने के लिये 'सभी प्राणियों को जो अनुभव अनुकूल हो' ऐसा कहा गया है।

## विश्लेषणम्

**सुखलक्षणम् –** गुणेषु धर्मः सप्तदशो गुणः। सर्वेषां जनानां कृते अनुकूलज्ञानस्य विषय एव सुखम् उच्यते – **'सर्वेषामनूकूलवेदनीयत्वं'** सुखस्य लक्षणम्। अनूकूलः अर्थात् मनोवाञ्छितः तथा 'वेदनीयम्' इत्यर्थः ज्ञानस्य अनुभवस्य वा विषयः। सर्वेषां पदं स्वस्य, मित्रस्य, शत्रोश्च बोधाय प्रयुक्तम्। एवम्प्रकारेण स्वस्य कृते मित्रस्य कृते तथा शत्रोः कृतेऽपि यत् विषयम् अनुकूलज्ञानयुक्तं भवति तदेव सुखम्। सुखस्य असाधारणकारणं धर्ममात्रं वर्तते।[299] लक्षणे सर्पेऽतिव्याप्तिवारणाय 'अनुकूलपदम्' उक्तम्। यतोहि 'वेदनीयत्वं' सर्पेऽपि सत्वात् किन्तु अत्र अनुकूलवेदनीयत्वाभावात् अतिव्याप्तिदोषः न भवति सुखलक्षणे। यदि लक्षणे 'अनुकूलवेदनीयत्वं' एव कथ्यते तर्हि कलञ्जभक्षणे अतिव्याप्तिः भविष्यति यतोहि कस्यचिद् रोगिणः कृते कलञ्जभक्षणमपि अनुकूलवेदनीयं भवति। अतः 'सर्वेषां' पदमुच्यते। कलञ्जभक्षणं तु कस्यचिद् कृते अनुकूलवेदनीयं भवति, न तु सर्वेषां कृते। अतो हेतोः नात्रातिव्याप्तिः भवितुं शक्यते। तर्कदीपिकायां सुखस्य अनुव्यवसाय एव सुखस्य लक्षणं कथितम् - **सुख्यहम् इत्याद्यनुव्यवसायगम्यं सुखत्वादिकमेव लक्षणम्।**[300]

(२.१८ दुख-लक्षणम्)

**तर्कसंग्रहः -** प्रतिकूलतया वेदनीयं दुःखम्॥५७॥

**उपन्यासः -** दुःखं लक्ष्यम्। दुःखत्वं लक्ष्यताऽवच्छेदकम्। 'प्रतिकूलवेदनीयत्वं' लक्षणम्। 'वेदनीयत्व-'_मात्रोक्तौ सूपोदनेऽतिव्याप्तिः, अतः 'प्रतिकूल' इत्युक्तम्। प्रतिकूल-वेदनीयत्वस्य कस्यचिद्रोगिणः सूपोदनेऽपि सत्त्वात्, अतोऽत्रापि 'सर्वेषाम्' इत्यनुषज्जनीयम्॥५७॥

**हिन्द्यनुवादः -** दुःख लक्ष्य है। दुःखत्व लक्ष्यतावच्छेदक है। 'सभी प्रणियों के द्वारा प्रतिकूल अनुभव करना ही' दुःख है। यदि लक्षण में 'वेदनीयत्व' (अनुभव करना) मात्र कहते तो 'सूपोदन' में भी इस लक्षण की प्रसक्ति होती जिससे अतिव्याप्तिदोष हो जाता। अतएव लक्षण में 'प्रतिकूल' भी कहा गया है। किन्तु 'प्रतिकूल वेदनीयत्व' मात्र कहने पर भी लक्षण में अतिव्याप्तिदोष का प्रसंग उपस्थित होने लगेगा क्योंकि रोगी का भी 'सूपोदन' में प्रतिकूलवेदनीयत्व रहता है। अतएव लक्षण में 'सभी प्राणियों के लिए प्रतिकूल अनुभव का

[299] पदकृत्यम् - सुखलक्षणप्रकरणम्

[300] तर्कदीपिका - सुखलक्षणप्रकरणम्

विषय' ऐसा कहा गया है।

## विश्लेषणम्

**दुःखलक्षणम् -** अष्टादशगुणस्य दुःखस्य लक्षणं सुखलक्षणविपरीतमेव। **'प्रतिकूलवेदनीयत्वं'** दुःखलक्षणम्। सर्वेषां जनानां कृते प्रतिकूलज्ञानस्य विषय एव दुःखम्। अत्र 'वेदनीयत्व'मात्रोक्ते सति सूपोदनेऽतिव्याप्तिः प्रदर्शिता आचार्येण। अतो हेतोः लक्षणे 'प्रतिकूलपदम्' उक्तम्। 'मात्रप्रतिकूलवेदनीयत्वं' उक्ते सति कस्यचिद्रोगिणः 'सूपोदन' इत्यस्मिन् भोजनेऽपि प्रतिकूलवेदनीयत्वस्य सत्वाद् अतिव्याप्तिः संभवति। अतः अस्मिन् लक्षणेऽपि सुखलक्षणात् 'सर्वेषाम्' इति पदस्य अध्याहारः करणीय इति टीकाकारस्य आशयः। प्रतिकूलवेदनीयत्वं तु कस्यचिद्रोगिणः सूपोदने भवति न तु सर्वजनानाम्। अतो नात्रातिव्याप्तिः। पदकृत्यटीकायाम् अधर्ममात्रं दुःखस्य असाधारणकारणम् उच्यते।[301]

( २.१९ इच्छा २०.द्वेष- २१. प्रयत्न- २२. धर्म- २३.अधर्माणां लक्षणानि)

**तर्कसंग्रहः -** इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः। विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्तु अधर्मः॥५८॥

**उपन्यासः -** इच्छा लक्ष्या। इच्छात्वं लक्ष्यताऽवच्छेदकम्। 'कामत्वं' लक्षणम्। द्वेषो लक्ष्यः। द्वेषत्वं लक्ष्यताऽवच्छेदकम्। 'क्रोधत्वं' लक्षणम्। प्रयत्नो लक्ष्यः। प्रयत्नत्वं लक्ष्यताऽवच्छेदकम्। 'कृतित्वं' लक्षणम्। धर्मो लक्ष्यः। धर्मत्वं लक्ष्यताऽवच्छेदकम्। 'विहित-कर्मजन्यत्वं' लक्षणम्। 'कर्मजन्यत्व-'मात्रोक्तौ निषिद्ध-कर्म-जन्येऽतिव्याप्तिः, तत्रापि कर्म-जन्यत्वस्य सत्त्वात्, अतो 'विहित-'इत्युक्तम्। 'विहितत्व-'मात्रोक्तौ कर्मण्यतिव्याप्तिः, तत्रापि विहितत्वस्य सत्त्वात्, अतः 'कर्मजन्यत्वम्' उक्तम्। अधर्मो लक्ष्यः। अधर्मत्वं लक्ष्यताऽवच्छेदकम्। 'निषिद्ध-कर्मजन्यत्वं' लक्षणम्। 'कर्म-जन्यत्व-'मात्रोक्तौ धर्मेऽतिव्याप्तिः, तत्रापि कर्म-जन्यत्वस्य सत्त्वात्, अतो 'निषिद्धत्वम्' उक्तम्। 'निषिद्धत्व-'मात्रोक्तौ निषिद्ध-कर्मण्यतिव्याप्तिः, अतो 'निषिद्ध-कर्म-जन्यत्वम्' उक्तम्॥५८॥

**हिन्द्यनुवादः -** इच्छा लक्ष्य है, इच्छात्व लक्ष्यता-अवच्छेदक है। 'कामत्व' इच्छा का लक्षण है। द्वेष लक्ष्य है तथा द्वेषत्व लक्ष्यतावच्छेदक है। 'क्रोधत्व' द्वेष का लक्षण है।

प्रयत्न लक्ष्य है तथा प्रयत्नत्व लक्ष्यता का अवच्छेदक है। 'कृतित्व' ही प्रयत्न का लक्षण है।

---

[301] अधर्ममात्रासाधारणकारणो गुणो वा दुःखम्। पदकृत्यम् – दुःखलक्षणप्रकरणम्

धर्म लक्ष्य है तथा धर्मत्व लक्ष्यता का अवच्छेदक है। 'जो विहितकर्मों से उत्पन्न (अदृष्ट) होता है' वही धर्म है। यदि धर्म के इस लक्षण में 'केवल कर्मों से उत्पन्न' मात्र को धर्म कहा जाता तो 'निषिद्ध कर्मों से उत्पन्न' में भी धर्म की प्रसक्ति होने लगेगी क्योंकि कर्मों से उत्पत्ति तो उनकी भी होती है। अतएव लक्षण में 'विहित कर्मजन्य' को धर्म कहा गया है। यदि केवल 'विहित' मात्र को धर्म कहते तो 'कर्म' में अतिव्याप्ति होने लगेगी क्योंकि 'कर्म' में भी विहितत्व रहता है। इसीलिये लक्षण में 'कर्म से जन्य अथवा उत्पन्न' यह पद कहा गया है।

अधर्म लक्ष्य है एवं अधर्मत्व इस लक्ष्यता का अवच्छेदक है। 'जो निषिद्ध कर्मों से उत्पन्न होता है' उसे अधर्म कहते है। लक्षण में यदि 'कर्मों से उत्पन्न' मात्र इतना ही कहते तो 'धर्म' में भी इस लक्षण की अतिव्याप्ति होने लगती क्योंकि 'धर्म' भी (विहित) कर्मों से ही उत्पन्न होता है। अतएव 'निषिद्ध' पद का प्रयोग किया गया है। यदि केवल 'निषिद्ध' पद का ही लक्षण में प्रयोग करते तो 'निषिद्ध कर्म' में भी इस लक्षण की अतिव्याप्ति होने लगेगी। इसीलिये 'निषिद्ध कर्मों से उत्पन्न' को अधर्म कहा गया है ।

## विश्लेषणम्

**इच्छाऽऽरभ्य अधर्मगुणपर्यन्तं लक्षणविवेचनम्** – लोकव्यवहारे कामना, अभिलाषा, रूचिः इत्यादिः इच्छार्थे एव बोध्यते।[302] अतो हेतोः इच्छायाः लक्षणं **'कामत्वं'** दीयते। कामः इति इच्छायाः पर्याय एव। इच्छा फलेच्छा उपायेच्छा च भेदेन द्विविधा भवति। सुखादेः इच्छा एव फलेच्छा तथा योगध्यानादेः इच्छा उपायेच्छा विविच्यते।[303]

इच्छानन्तरं विंशतितमो गुणः द्वेषः लक्ष्यते – **'क्रोधत्वं'** द्वेषस्य लक्षणम्। क्रोधः एकप्रकारस्य भावो अस्ति। क्रोधस्य तात्पर्यं कोपः वर्तते। अतः क्रोधस्य भाव एव द्वेष इति वक्तुं शक्यते। आप्टेमहोदयेन तु घृणा, अरुचिः, बीभत्सा, अनिच्छा, जुगुप्सा, विरोधः, ईर्ष्यादिश्च द्वेषे एव परिगण्यन्ते।[304] क्रोधस्य उत्पत्तिः कामात् भवतीति गीतायाम् उक्तम् – **कामात्क्रोधोऽभिजायते**।[305]

---

302 संस्कृत-हिन्दी-कोशः – पृ० १७२

303 पदकृत्यम् - इच्छालक्षणप्रकरणम्

304 संस्कृत-हिन्दी-कोशः – पृष्ठम् ४८५

305 ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोभिजायते। श्रीमद्भगवद्गीता – २/६२

प्रयत्नः एकविंशतितमो गुणः। **'कृतित्वं'** प्रयत्नस्य लक्षणम्। सामान्यतया कृतेः अर्थः कार्यं, कृत्यं, अथवा कर्म एव प्रसिद्धः। किन्तु अत्र कृतिः नाम शारीरिककर्म मात्रमेव न अपितु मानसिकवृत्तिरपि। न्यायवैशेषिके कृतिः प्रथमं मनसा सम्पाद्या भवति पुनश्च तत्कृतेः निष्पाद्यं चेष्टारूपं शारीरिककर्म वर्तते।[306] प्रयत्नस्य त्रिविधभेदोऽपि प्राप्यते - प्रवृत्तिकारकप्रयत्नः, निवृत्तिकारकप्रयत्नः एवं जीवनयोनिप्रयत्नः।[307]

द्वाविंशतितमो गुणः धर्मः। धर्मः वेदविहितकर्मणा उत्पद्यमानः गुणः वर्ण्यते न्याय-वैशेषिकदर्शने। **'विहितकर्मजन्यत्वं'** धर्मलक्षणम्। विहितस्य तात्पर्यं वेदेषु विहितो वर्तते। यदि अत्र विहितपदं नोच्चार्यते तर्हि निषिद्धकर्मणि अर्थात् अधर्मेऽपि धर्मस्य अतिव्याप्तिः, तत्रापि कर्मजन्यत्वस्य सत्वात्। अतः 'विहित' इत्युक्तम्। धर्मलक्षणे मात्रविहितपदस्यैव उपादानत्वात्, वेदविहितयागा- दिकर्मणि अतिव्याप्तिः यतोहि एतानि कर्माण्यपि वेदविहितान्येव। अस्मात्कारणात् 'कर्मजन्यत्वं' इत्यस्य ग्रहणं कृतम्। एतानि कर्मजन्यानि न अपितु स्वयं कर्माणि सन्ति। अतः नातिव्याप्तिः अत्र।

अधर्मः धर्मस्य प्रतिपक्षिगुणः वर्तते। **'निषिद्धकर्मजन्यत्वं'** अधर्मस्य लक्षणं दीयते उपन्यासे। अत्रापि धर्मलक्षणमिव धर्मेऽतिव्याप्तिवर्जनाय 'निषिद्धपदं' तथा वेदविहितनिषिद्धकर्मण्यतिव्याप्तेः निवारणाय 'कर्मजन्यं' इति पदयोः उपादानं क्रियते उपन्यासकारेण। न्यायवैशेषिकशास्त्रे धर्माधर्मौ 'अदृष्टमि'ति नाम्ना प्रख्यातौ।[308]

(२.१६-२३ बुद्ध्याद्यष्टगुणानां विशेषाश्रय-कथनम्)

**तर्कसंग्रहः -** बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छा प्रयत्ना द्विविधाः। नित्या अनित्याश्च। नित्या ईश्वरस्यानित्या जीवस्य॥५९॥

**उपन्यासः –** 'बुद्धयादय' इत्यादिनाऽष्ट-गुणत्वमात्मनि (१) परमात्मनि विद्यमाना नित्याः, (२) जीवात्मन्यनित्याः॥ वायोर्नव गुणाः। एकादश तेजसि। पृथिवी-जल-जीवात्मनां चतुर्दश। काल-दिशोः पञ्च। आकाशे षट्। मनस्यष्टौ। तथैव चेश्वरे ॥५९॥

**हिन्द्यनुवादः –** बुद्धि आदि आत्मा में रहने वाले आठ विशेष गुण हैं अर्थात् ये आठ गुण मात्र आत्मा नामक द्रव्य में रहते है (इनके अतिरिक्त जो अन्य गुण आत्मा में रहते है वो आत्मा के

306 श्रीनिवासमुखोल्लासिनीटीका - प्रयत्नलक्षणप्रकरणम्

307 पदकृत्यम् – प्रयत्नलक्षणप्रकरणम्

308 पदकृत्यम् - धर्माधर्मलक्षणप्रकरणम्

अतिरिक्त अन्य द्रव्यों में भी रहते है अतः यहाँ मात्र आठ गुणों का ही कथन किया गया है, अन्य गुणों का नहीं)। इनमें से जो गुण परमात्मा में रहते है वो नित्य होते हैं तथा जो जीवात्मा में रहने वाले गुण है वो अनित्य होते हैं। वायु में नौ गुण रहते हैं। तेज में ग्यारह गुण रहते हैं। पृथिवी, जल एवं जीवात्मा में चौदह गुण रहते हैं। काल और दिशा में पाँच गुण रहते हैं। आकाश में छः गुण विद्यमान रहते हैं। मन मे आठ गुण रहते हैं। इसी प्रकार ईश्वर में भी आठ गुण विद्यमान रहते हैं।

## विश्लेषणम्

**नवद्रव्येषु समासेन गुणसंख्याकथनम् -** बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्माधर्मश्च एते अष्ट गुणाः आत्ममात्रविशेषगुणाः कथ्यन्ते अर्थात् एते गुणाः मात्रात्मद्रव्येषु एव तिष्ठन्ति न अन्येषु केषुचित्। एतेषु बुद्धिः, इच्छा, प्रयत्नश्च परमात्मनि नित्याः तथा जीवात्मनि अनित्याः भवन्ति। एतस्य पश्चात् उपन्यासकारेण नवद्रव्येषु विद्यमानानां गुणानां संख्यायाः सूची प्रदत्ता। अस्यां सूच्यां प्रदत्तगुणसंख्याः निम्नप्रकारिकाः सन्ति।

**आरेखीयप्रस्तुतिः –**

| द्रव्यम् | गुणसंख्या | गुणनामानि |
|---|---|---|
| १. कालः, दिक् | पञ्च (५) | संख्या, परिमाणम्, पृथक्त्वम्, संयोगः विभागः |
| २. आकाशम् | षट् (६) | शब्दः, संख्या, परिमाण, पृथक्त्वं, संयोगः विभागः |
| ३. मनः | अष्ट (८) | संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः |
| ४. परमात्मा | अष्ट (८) | संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः बुद्धिः, इच्छा, प्रयत्नश्च |
| ४. वायुः | नव (९) | स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः,परत्वम्, अपरत्वम्, वेगः |
| ५. तेजः | एकादश (११) | रूपम्, स्पर्शः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, द्रवत्वम्, |
| ६. पृथिवी | चतुर्दश (१४) | रूपम्, रसः, गन्धः, स्पर्शः, संख्या, परिमाणम्, पृथक्त्वं, संयोगः, विभागः, परत्वम्, अपरत्वम्, |

| | | |
|---|---|---|
| | | गुरुत्वम्, द्रवत्वम्, वेगः |
| ७. जलम् | चतुर्दश (१४) | रूपम्, रसः, स्पर्शः, संख्या, परिमाणम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्नेहः, वेगः |
| ८. जीवात्मा | चतुर्दश (१४) | संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, बुद्धिः,सुखम्, दुःखम्,इच्छा,द्वेषः,प्रयत्नः,धर्मः, अधर्मः,भावनाख्यसंस्कारः |

**चित्रक्रमांकः -३६**

(२.२४ संस्कार-गुणस्य लक्षणम्)

**तर्कसंग्रहः -** संस्कारस्त्रिविधः। वेगो भावना स्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थापकः स्थितिस्थापकः। कटादिपृथिवीवृत्तिः॥६०॥

**उपन्यासः -** 'संस्कारस्त्रिविध०' इतिविभागोक्तिः। (१) वेगोलक्ष्यः। वेगत्वं लक्ष्यताऽवच्छेदकम्। 'क्रिया-जन्यत्वे सति वेगत्वं' लक्षणम्। 'क्रिया-जन्यत्व-'मात्रोक्तौसंयोगादावतिव्याप्तिः, तत्रापिक्रिया-जन्यत्वस्य सत्त्वात्, अतो 'वेगत्वम्'उक्तम्। 'वेगत्व'मात्रोक्तौ लक्षण-लक्ष्यताऽवच्छेदकयोरभेद-प्रसङ्गः, अतः 'क्रिया-जन्यत्व'विशिष्टमुक्तम्॥ (२) भावनालक्ष्या। भावनात्वं लक्ष्यतावच्छेदकम्। 'अनुभव-जन्यत्वे सति स्मृति-हेतुत्वं'लक्षणम्। 'अनुभवजन्यत्व-'मात्रोक्तावनुभव-ध्वंसेऽतिव्याप्तिः, तत्राप्यनुभव-जन्यत्वस्यसत्त्वात्, अतः 'स्मृति-हेतुत्वम्'उक्तम्। 'स्मृतिहेतुत्व-'मात्रोक्तावनुभवेऽतिव्याप्तिः, तत्रापिस्मृति-हेतुत्वस्य सत्त्वात्, अतः 'अनुभव-जन्यत्वम्'उक्तम्, अनुभव-जन्यत्वस्यानुभवेऽभावान्नातिव्याप्तिः॥ (३) स्थिति-स्थापको लक्ष्यः। स्थिति-स्थापकत्वं लक्ष्यतावच्छेदकम्। 'क्रिया-जन्यत्वे सति स्थिति-स्थापकत्वं' लक्षणम्। 'क्रिया-जन्यत्व'-मात्रोक्तौ क्रिया-ध्वंसेऽतिव्याप्तिः, अतः'स्थिति-स्थापकत्वम्'उक्तम्। 'स्थिति-स्थापकत्व'मात्रोक्तौ लक्षण-लक्ष्यताऽवच्छेदकयोरैक्य-प्रसङ्गः, अतः 'क्रिया-जन्यत्वम्'उक्तम्। 'कटादि-पृथिवी-वृत्तिः'इत्याश्रयोक्तिः। भावनाऽऽत्ममात्र-वृत्तिः। वेगोमूर्त-द्रव्य-वृत्तिः॥

॥इतिगुणोपन्यासः॥६०॥

**हिन्द्यनुवादः –** संस्कार के तीन भेद है - वेग, भावना, एवं स्थितिस्थापक। वेग लक्ष्य है तथा वेगत्व लक्ष्यतावच्छेदक है। 'जो क्रिया से उत्पन्न होते हुए वेगत्व जाति से युक्त होता है' उसे वेग कहते है। यदि लक्षण में 'क्रिया जन्य' मात्र कहा जाता तो संयोगादि में भी अतिव्याप्ति की प्रसक्ति होने लगेगी क्योंकि संयोगादि भी 'क्रिया से जन्य' होते है। अतः लक्षण में 'वेगत्व' कहा गया। वेगत्व मात्र कहने पर लक्षण एवं लक्ष्यतावच्छेदक में अभेद की प्रसक्ति होने के कारण लक्षण में 'क्रिया-जन्यत्व' यह पद कहा गया।

भावना लक्ष्य है। भावनात्व लक्ष्यता का अवच्छेदक है। 'अनुभव से उत्पन्न एवं स्मृति का हेतु होना ही' भावना है। यदि केवल 'अनुभव से उत्पन्न' मात्र यही भावना का लक्षण किया जाता तो 'अनुभवध्वंस' में भी इस लक्षण की अतिव्याप्ति हो जाती। क्योंकि 'अनुभव से जन्य' होने के कारण वहाँ भी 'अनुभवजन्यत्व' होता है। इसलिये लक्षण में 'स्मृति का हेतु' इस पद का भी प्रयोग किया गया है। इसी प्रकार यदि लक्षण में केवल 'स्मृति का हेतु ' ही कहा जाता तो 'अनुभव' में प्रस्तुत लक्षण की अतिव्याप्ति होने लगेगी। क्योंकि वह भी 'स्मृति का हेतु' है इसलिये लक्षण में 'अनुभव से जन्य' यह भी कहा गया है। अनुभव में 'अनुभवजन्यत्व' का अभाव होने पर अतिव्याप्ति नही होती है।

स्थितिस्थापक लक्ष्य है तथा स्थितिस्थापकत्व लक्ष्यतावच्छेदक है। 'जो क्रिया से उत्पन्न होते हुए स्थिति-स्थापकत्व जाति से युक्त हो' उसे स्थिति-स्थापक कहते है। यहाँ 'क्रिया से उत्पन्न' मात्र कहने पर 'क्रिया-ध्वंस' में भी अतिव्याप्ति होने लगेगी अतएव लक्षण में 'स्थितिस्थापकत्व' भी कहा गया है। इसी प्रकार 'स्थितिस्थापकत्व' मात्र कहने पर लक्षण एवं लक्ष्यतावच्छेदक में ऐक्यता की प्रसक्ति हो जाती। अतः लक्षण में 'क्रिया-जन्यत्व' कहा गया है। स्थितिस्थापक संस्कार पृथिवीद्रव्य के अन्तर्गत कटादि पार्थिवपदार्थों में रहता है। भावनासंस्कार आत्मद्रव्य में रहता है तथा वेग मूर्तद्रव्यों (पृथिवी,जल,तेज,वायु एवं मन) में रहता है

## विश्लेषणम्

**संस्कारलक्षणं भेदविवरणञ्च -** संस्कारः चतुर्विंशतिगुणेषु अन्तिमो गुणो वर्तते। संस्कारस्य किमपि लक्षणं न दीयते उपन्यासकारेण। तर्कसंग्रहेऽपि संस्कारलक्षणं नोक्तम्। किन्तु

तर्कदीपिकायां **'संस्कारत्वजातिमान् संस्कारः'** इति कथितम्[309]। संस्कारस्य त्रिविधभेदम् आह – वेगः, भावना, स्थितिस्थापकश्च। उपन्यासे **'क्रियाजन्यत्वे सति वेगत्वं'** वेगस्य लक्षणं दीयते। क्रियाजन्यः तथा वेगत्वजातिवान् यः भवति स एव वेगः। क्रियाजन्यः अर्थात् आद्यपतनादिक्रियाजन्यः। वृक्षात् गलिते फले गुरुत्वेन आद्यपतनक्रिया जायते। एतया पतनक्रियया एव फले वेगाख्यः संस्कारः जायते। अतो हेतोः वेगः क्रियाजन्यः उक्तः। यदि लक्षणे क्रियाजन्यत्वमेव उच्यते तर्हि संयोगादावतिव्याप्तिः भविष्यति यतोहि संयोगादिरपि क्रियया कर्मेण वा उत्पद्यन्ते (कर्म संयोगस्य असमवायिकारणं वर्तते)। अतः 'वेगत्वम्' अपि कथितम्। अत्र संयोगादौ वेगत्वाभावान्नातिव्याप्तिः। अनेन प्रकारेण 'वेगत्वं' मात्रोक्ते सति लक्षण-लक्ष्यतावच्छेदयोः ऐक्यप्रसङ्गात् क्रियाजन्यत्वमप्युक्तम्। द्वितीयादिपतनासमवायिकारणं वेग एव भवति।[310] वेगः मूर्तद्रव्येषु अर्थात् पृथिवी-जल-तेज-वायु-मनसि च विद्यते।

संस्कारगुणस्य द्वितीयभेदः 'भावना' वर्तते। इन्द्रियादिजन्यः तत्तद्वस्तुविषयकप्रत्यक्षाद्यनुभवः भवति। एतेन अनुभवेन जातः सन् तत्तद्वस्तुस्मरणं प्रति कारणीभूतो भावनाख्यः संस्कारः जायते। अतो हेतोः **'अनुभवजन्यत्वे सति स्मृतिहेतुत्वं'** एतस्य लक्षणं कृतम्। अत्र अनुभवजन्यमात्रोक्तौ अनुभवध्वंसेऽतिव्याप्तिः यतोहि अनुभवध्वंसो अपि अनुभवजन्यः भवति। अतः 'स्मृतिहेतुत्वं' इत्यस्य उपादानं क्रियते। 'स्मृतिहेतुत्वं' मात्रोक्ते सति अनुभवेऽतिव्याप्तिः, अनुभवेऽपि स्मृतिहेतुत्वात्। अतः 'अनुभवजन्यम्' उपात्तम्। अनुभवः स्मृतिहेतुस्तु वर्तते किन्तु अनुभवजन्यः न, स्वयमेव अनुभवसत्त्वात्, अतः नात्रातिव्याप्तिः। यदा समाहितचित्तेन कस्यचिदपि वस्तुनः यत्दर्शनश्रवणमननादिः क्रियते। एतेन जनितः निर्णयरूपानुभवः स्वात्मनि इमं संस्कारं जनयितुं समर्थः भवति। पौनःपुन्येन तत्तद्वस्तुदर्शनादिना संस्कारोऽयं दृढतरश्च भवति। भावानाख्यः संस्कारः आत्मद्रव्ये एव विद्यते।

स्थितिस्थापकः संस्कारस्य तृतीयभेदः वर्तते। कस्यचिद् वस्तुनः स्थितिः अन्यथाकरणेऽपि यदि तत्वस्तु पुनः स्वपूर्वस्थितिमेव प्राप्नोति तर्हि तत्र अयमेव गुणः विद्यत इति निश्चयः। वस्तुनः

---

309 तर्कदीपिका - संस्कारगुणलक्षणप्रकरणम्

310 पदकृत्यम् - संस्कारगुणलक्षणप्रकरणम्

पुनः पूर्वस्थितिसम्पादको गुणः स्थितिस्थापकः। उपन्यासकारेण **'क्रियाजन्यत्वे सति स्थितिस्थापकत्वं'** इति अस्य लक्षणं कृतम्। वस्तुनः स्थितिम् अन्यथाकरणे एव गुणोऽयं उत्पद्यते। अतः अस्य लक्षणे 'क्रियाजन्यत्वं' इति विशेषणं प्रदत्तम्। अत्रापि वेगलक्षणमिव क्रियाध्वंसेऽतिव्याप्तिवारणाय तथा लक्षण-लक्ष्यतावच्छेदकयोरैक्यप्रसङ्गवर्जनाय क्रमशः स्थितिस्थापकत्वं क्रियाजन्यत्वञ्चेति पदयोः उपादानं क्रियते। स्थितिस्थापकः कटादिषु पार्थिवद्रव्येष्वेव वर्तते। अतः अस्य गुणस्य पृथिवीमात्रवृत्तिः इति वक्तुं शक्यते। एतावत्पर्यन्तं द्वितीयपदार्थगुणस्य भेदानां निरूपणमभवत्। अतः अत्रैव गुणनिरूपणं समाप्तम्।

॥इति गुणोपन्यासः॥६०॥

# चतुर्थोऽध्यायः

## 'कर्म-समवाय-सामान्य-विशेष-अभावानां विवेचनम्'

(३. कर्म-पदार्थ-लक्षणम् )

**तर्कसंग्रहः -** चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसंनिकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्। पृथिव्यादिचतुष्टयमनोमात्रवृत्ति॥ ६१॥

**उपन्यासः -** कर्म लक्ष्यम्। कर्मत्वं लक्ष्यताऽवच्छेदकम्। 'चलनात्मकत्वं' लक्षणम्। लक्षण-लक्ष्यताऽवच्छेदकयोरैक्य-प्रसङ्गस्तु कर्मात्मक-पद-वाच्यत्वस्य लक्ष्यताऽवच्छेदकत्वमभ्युपेत्य वारणीयः। 'उत्क्षेपणापक्षेप०' इत्यादिना विभागोक्तिः। (१) उत्क्षेपणं लक्ष्यम्। उत्क्षेपणत्वं लक्ष्यताऽवच्छेदकम्। 'ऊर्ध्व-देश-संयोगहेतुत्वं' लक्षणम्। 'संयोग-हेतुत्व'-मात्रोक्तावपक्षेपणादावतिव्याप्तिः, तत्र संयोग-हेतुत्वस्य सत्त्वात्, अत 'ऊर्ध्व-देश'-इत्युक्तम्। ऊर्ध्व-देश-हेतुत्वमूर्ध्व-संयोगेऽप्यस्ति इत्यतिव्याप्तिः। हेतुत्वं चासमवायि-विधया बोध्यम्। (२) अपक्षेपणं लक्ष्यम्। अप-क्षेपणत्वं लक्ष्यताऽवच्छेदकम्। 'अधो-देश-संयोग-हेतुत्वं' लक्षणम्। 'संयोग-हेतुत्व'-मात्रोक्तौ उत्क्षेपणोऽतिव्याप्तिः, तत्र संयोगहेतुत्वस्य सत्त्वात्, अतः 'अधो-देश'-इत्युक्तम्। अधो-देश-संयोग-हेतुत्वस्य द्रव्येऽपि सत्त्वादतिव्याप्तिः, अतोऽसमवायि-विधयेति-वक्तव्यम्। (३) आकुञ्चनं लक्ष्यम्। आकुञ्चत्वं लक्ष्यताऽवच्छेदकम्। 'शरीरसन्निकृष्ट-देश-संयोगहेतुत्वं' लक्षणम्। 'संयोग हेतुत्वम्'- मात्रोक्तावपक्षेपणेऽतिव्याप्तिः, तस्यापि संयोग-हेतुत्वात्, अतः 'शरीरसन्निकृष्टदेश-'इत्युक्तम्। शरीर-सन्निकृष्ट-देश-संयोग-हेतुत्वस्य द्रव्येऽपि सत्त्वादतिव्याप्तिः, अतो हेतुत्वं चासमवायि-विधया बोध्यम्। 'सन्निकृष्ट'-पद सापेक्षम्, इति कृत्वा 'शरीर'- इत्युक्तम्। (४)प्रसारणं लक्ष्यम्। प्रसारणत्वं लक्ष्यताऽवच्छेदकम्। 'शरीर-विप्रकृष्ट-देश-संयोग-हेतुत्वं' लक्षणम्। 'संयोग-हेतुत्व'-मात्रोक्तौ उत्क्षेपणादावतिव्याप्तिः, अतः 'शरीर-विप्रकृष्ट-देश'-इत्युक्तम्। देशान्तर-संयोगमादायोत्क्षे- पणादावतिव्याप्ति-वारणार्थं 'विप्रकृष्ट'-इत्युक्तम्। कस्य विप्रकृष्टम् ? इत्याकाङ्क्षायां 'शरीर'-इत्युक्तम्। (५) गमनं लक्ष्यम्। गमनत्वं लक्ष्यताऽवच्छेदकम्। " 'गमन'-पद-वाच्यत्वं" लक्षणम्। 'पृथिव्यादि-चतुष्टय०' इत्याद्याश्रयोक्तिः॥ ६१॥

**हिन्द्यनुवादः –** कर्म लक्ष्य है तथा कर्मत्व लक्ष्यता-अवच्छेदक है। 'चलनात्मक क्रिया को ही' कर्म कहते है। लक्षण एवं लक्ष्यतावच्छेदक में ऐक्य का प्रसङ्ग होने के कारण 'कर्म' पद के वाच्यत्व (कर्मत्व) का लक्ष्यतावच्छेदकत्व स्वीकार करके उसका (लक्षण की दृष्टि से) निवारण किया गया है अर्थात् उसे लक्षण एवं लक्ष्यतावच्छेदक में ऐक्य के कारण ही यहाँ मात्र लक्ष्यतावच्छेदक के रूप में स्वीकार किया गया है, लक्षण के रूप में नहीं। कर्म के उत्क्षेपण, अपक्षेपण, आकुञ्चन, प्रसारण तथा गमन पाँच विभाग है। (१) उत्क्षेपण लक्ष्य है। 'उत्क्षेपणत्व' लक्ष्यता-अवच्छेदक है। 'जो कर्म ऊर्ध्वदेश में संयोग का हेतु हो' उसे उत्क्षेपण कहते हैं। यहाँ 'संयोग का हेतु' मात्र कहने पर अपक्षेपणादि में भी अतिव्याप्ति की प्रसक्ति होने लगेगी क्योंकि वहाँ भी 'संयोगहेतुत्व' देखा जाता है। इसीलिये लक्षण में 'ऊर्ध्वदेश' का ग्रहण किया गया। किन्तु 'ऊर्ध्वदेश में संयोग का हेतु' ऐसा कहने पर भी ऊर्ध्वदेशसंयोग में अतिव्याप्ति होने लगेगी, उसमें भी 'ऊर्ध्वदेश के संयोग का हेतुत्व' होने से। यहाँ 'हेतु' को असमवायि कारण के रुप में जानना चाहिये। (२) अपक्षेपण लक्ष्य है। अपक्षेपणत्व लक्ष्यता का अवच्छेदक है। जो कर्म 'अधोदेश से संयोग का हेतु' होता है वह अपक्षेपण है। लक्षण में 'संयोग का हेतु' मात्र कहने पर 'उत्क्षेपण' में अतिव्याप्ति की प्रसक्ति होने लगेगी चूँकि उत्क्षेपण में भी 'संयोग का हेतुत्व' रहता ही है। इसलिये लक्षण में 'अधोदेश' कहा गया है। किन्तु 'अधोदेश में 'संयोग का हेतुत्व' 'द्रव्य' में भी होने से, वहाँ भी यह लक्षण अतिव्याप्त हो जाता है। अतः 'हेतुत्व' को असमवायिकारण के रुप में जानना चाहिये। ( क्योंकि द्रव्य सदैव समवायिकारण होता है। द्रव्य में असमवायिकारणता का अभाव होने से अतिव्याप्ति नहीं होगी)। (३) आकुञ्चन लक्ष्य है तथा आकुञ्चनत्व लक्ष्यतावच्छेदक है। 'शरीर के समीपवर्ती देश के साथ संयोग का हेतु' जो कर्म होता है उसे आकुञ्चन कहते है। 'संयोग का हेतु' मात्र कहने पर अपक्षेपण में भी अतिव्याप्ति होने लगेगी क्योंकि वहाँ भी 'संयोग का हेतुत्व' रहता है। इसीलिये 'शरीर के समीपवर्ती देश के साथ संयोग का हेतु' यह पूर्ण लक्षण किया गया है। 'शरीर के समीपवर्ती देश के साथ संयोग की हेतुता' द्रव्य में भी रहती है। इस प्रकार 'द्रव्य' में भी प्रस्तुत लक्षण की अतिव्याप्ति होने लगेगी। अतएव यहाँ भी 'हेतु' को असमवायिकारण के रुप में जानना चाहिये। सन्निकृष्ट पद सापेक्ष है इसीलिये लक्षण में 'शरीरसन्निकृष्ट' अर्थात् 'शरीर के निकटवर्ती' यह कहा गया है।( यहाँ सन्निकृष्ट पद को 'शरीर' इस पद की अपेक्षा है, अतः

'शरीर' पद का प्रयोग किया गया है लक्षण में)। (४) प्रसारण लक्ष्य है। प्रसारणत्व लक्ष्यता-अवच्छेदक है। 'शरीर से दूरस्थ देश के साथ संयोग का हेतु' ही प्रसारण का लक्षण है। यहाँ 'संयोग का हेतु' मात्र कहने पर उत्क्षेपण, अपक्षेपणादि में अतिव्याप्ति की प्रसक्ति होने लगेगी। अत एव लक्षण में 'शरीर से दूरस्थ देश के साथ संयोग का हेतु' यह कहा गया है। यदि केवल 'देश के साथ संयोग' यह कहा जाता तो पुनः उत्क्षेपणादि में अतिव्याप्ति होती। अतः उत्क्षेपणादि में अतिव्याप्ति को रोकने के लिये लक्षण में 'दूरस्थ' यह पद प्रयुक्त हुआ है। 'विप्रकृष्ट' (दूरवर्ती) इस पद के भी सापेक्ष होने से, 'किसके विप्रकृष्ट' इस प्रकार की जिज्ञासा अथवा आकांक्षा होने के कारण ही इस लक्षण में भी 'शरीर' पद का प्रयोग हुआ है। (५) गमन लक्ष्य है। गमनत्व लक्ष्यता का अवच्छेदक है। 'गमन पद-वाच्यत्व' अर्थात् 'गमन का वाच्यार्थ ही' गमन का लक्षण है।

ये पाँचों कर्म पृथिवी आदि अर्थात् पृथिवी, जल, तेज, वायु तथा मन में रहते हैं।

## विश्लेषणम्

**कर्मपदार्थलक्षणम् -** कर्म तृतीयपदार्थः वर्तते। यद्यपि इतः पूर्वमपि प्रथमाध्याये पदार्थविवेचनान्तर्गते कर्मस्य लक्षणं प्रदत्तं टीकाकारेण किन्तु तर्कसंग्रहे तत्र पदार्थानाम् उद्देश मात्रकृतः। अतः कर्मस्यापि उद्देशः कृतः तत्र, यस्य टीकनमुपन्यासकारेण कृतमादौ। अत्र तर्कसंग्रहकारेण उद्देशानन्तरं पदार्थानां लक्षणप्रकरणं विहितम्। अतो हेतोः टीकाकारेणापि पुनः कर्मादिपदार्थस्य टीकनमारभते।

उपन्यासकारः **'चलनात्मकत्वं'** इति कर्म निरूपयति। यच्चलनात्मकं तत्सर्वमपि कर्म एव कथ्यते। चलनात्मकमित्यर्थः गतिशीलः कम्पमानश्च। संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म इति पूर्वं कर्मलक्षणमुक्तम्। अत्र द्वयोः लक्षणयोर्मध्ये एवं समन्वयः कर्तुं शक्यते यत् 'संयोगभिन्नत्वे सति संयोगासमवायिकारणं यच्चलनादिकं तत् कर्म' इति कर्मलक्षणम्। लक्षण-लक्ष्यतावच्छेदकयोः ऐक्यप्रसङ्गात् 'कर्मत्वं' इति पदवाच्यत्वस्य लक्ष्यतावच्छेदकत्वं स्वीकृत्य लक्षणे वर्जनं कृतम्। कर्मपदार्थस्य पञ्चभेदाः वर्तन्ते - उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनञ्च। **'ऊर्ध्वदेशसंयोगहेतुत्वम्'** उत्क्षेपणस्य लक्षणम्। ऊर्ध्वः नाम 'उपरि' इति। वस्तुनः प्रस्तुतदेशात् उपरिदेशेन सह संयोगम्प्रति कारणीभूतं कर्म उत्क्षेपणम्। लक्षणे अपक्षेपणादौ अतिव्याप्तिवारणाय 'ऊर्ध्वदेश' इत्युक्तम्।

ऊर्ध्वदेशसंयोगहेतुत्वम् ऊर्ध्वदेशसंयोगेऽप्यस्ति। अतः तस्मिन् अतिव्याप्तिवारणाय अत्र 'हेतुत्वम्' इति असमावयिकारणतया अवगन्तव्यम्।

वस्तुनः प्रस्तुतदेशात् अधोदेशेन सह संयोगं प्रति अपक्षेपणकर्म कारणं भवति यतोहि **'अधो देशसंयोगहेतुत्वं'** अपक्षेपणकर्मस्य लक्षणम्। उत्क्षेपणादावतिव्याप्तिवारणाय लक्षणे 'अधो देश' इति कथितम्। अत्रापि असमवायिविधया एव 'हेतुत्वं' बोध्यम् अन्यथा अधो देशसंयोगहेतुत्वं द्रव्येऽपि सत्त्वादतिव्याप्तिः। किन्तु द्रव्यं तु समवायिकारणं भवति। अतः तस्मिन् असमवायिकारणत्वाभावात् नातिव्याप्तिः।

कर्मस्य तृतीयभेदः आकुञ्चनं वर्तते। आकुञ्चनं संकोचस्यैव पर्यायः अस्ति। उपन्यासे **'शरीरसन्निकृष्टदेशसंयोगहेतुत्वं'** अस्य लक्षणं दीयते। समीपवर्ती, समीपस्थः वा सन्निकृष्टस्य अर्थः वर्तते। शरीरसमीपदेशेन सह वस्तुसंयोगं प्रति कारणीभूतं यत् कर्म तत्तु आकुञ्चनम्। एतदेव लक्षणं दीपिकायामेवं प्रस्तूयते यत् **वक्रत्वसम्पादकमाकुञ्चनम्**[311]। सन्निकृष्टपदस्य सापेक्षत्वात् 'कस्य सन्निकृष्टं' इत्यकाङ्क्षा भवति। अत एव शरीरपदमुपात्तम्। शेषपदकृत्यं तु पूर्ववदेव ज्ञातव्यम्।

आकुञ्चनकर्मविपरीतं प्रसारणकर्मस्य लक्षणं वर्तते तथा हि **'शरीरविप्रकृष्टदेशसंयोगहेतुत्वं'** प्रसारणलक्षणम्। अत्र प्रसारणम् इत्यर्थः विस्तारणम् अस्ति। अनेन कर्मणा कस्यचित् वस्तुनः शरीरस्य विप्रकृष्टदेशेन सह अर्थात् दूरस्थदेशेन दूरवर्तिदेशेन वा सह संयोगं प्रति यस्य कर्मस्य असमवायिकारणता वर्तते तत्तु प्रसारणकर्म। तर्कदीपिकायां **'ऋजुतासम्पादकं प्रसारणम्'** इत्यस्य लक्षणं प्रस्तुतम्[312]। अस्य लक्षणस्यापि पदकृत्यविश्लेषणं पूर्वत एव अध्याहर्तव्यम्।

कर्मस्य पञ्चमभेदस्तु गमनमस्ति। गमनपदस्य वाच्यार्थः एव उपन्यासकारेण गमनकर्मलक्षणरूपेण प्रस्तुतः। उक्तं हि **'गमनपदवाच्यत्वं'** गमनस्य लक्षणम्। स्वदेशापेक्षया अपरदेशेन सह संयोगं प्रति गमनकर्मकारणम् एवमपि वक्तुमर्हामः। उपर्युक्तकर्मचतुष्टयातिरिक्तं अन्यानि सर्वाणि कर्माणि गमनकर्मण्येव अंतर्भाव्यन्ते। कर्मपदार्थः पृथिवी-जल-तेज-वायु-मनसि च विद्यते।

(४. सामान्य-पदार्थ-लक्षणम् )

---

311 तर्कदीपिका – कर्मलक्षणप्रकरणम्

312 तत्रैव

**तर्कसंग्रहः -** नित्यमेकमनेकानुगतं सामान्यं। द्रव्यगुणकर्मवृत्ति ।तद्विविधं परापरभेदात्। परं सत्ता। अपरं द्रव्यत्वादिः॥६२॥

**उपन्यासः -** सामान्यं लक्ष्यम्। सामान्यत्वं लक्ष्यताऽवच्छेदकम्। नित्यत्वे सति, एकत्वे सति, अनेकेषु समवाय सम्बन्धेन वृत्तित्वं लक्षणम्। 'वृत्तित्व-'मात्रोक्तौ रूपेऽतिव्याप्तिः, अतः 'अनेक-'इत्युक्तम्, अनेक-वृत्तित्वस्य एक-व्यक्ति-वृत्ति-रूपेऽभावान्नातिव्याप्तिः। अनेक-वृत्तित्व-मात्रोक्तावत्यन्ताभावेऽतिव्याप्तिः, अतः 'अनेक-समवेत'-इत्युक्तम्, अनेक-समवेतत्वस्य संयोगे सत्त्वात् अतिव्याप्तिः, अतः 'एकत्वे सति' इत्युक्तम्। 'एकत्वे सति समवेतत्वम्' इत्युक्तौ गगनपरिमाणेऽतिव्याप्तिः, अतः 'अनेक-समवेतत्वम्' इत्युक्तम्। 'द्रव्य०' इत्याद्याश्रयोक्तिः। 'परम्०' इत्यादि विभागोक्तिः ॥६२॥

**हिन्द्यनुवादः -** सामान्य लक्ष्य है। सामान्यत्व लक्ष्यता का अवच्छेदक है। 'नित्य एवं एक होते हुए अनेकों में समवाय सम्बन्ध से रहना' ही समवाय का लक्षण है। 'वृत्तित्व' (रहना) मात्र कहने पर 'रुप' में भी इस लक्षण की अतिव्याप्ति होने लगेगी। अतः लक्षण में 'अनेक' कहा गया है। 'अनेकवृत्तित्व' का एकव्यक्ति में वृत्ति वाले रूप में अभाव होने से अतिव्याप्ति नहीं होगी। लक्षण में 'अनेक वृत्तित्व' मात्र कहने पर 'अत्यन्ताभाव' में भी प्रस्तुत लक्षण की अतिव्याप्ति होने लगेगी। अतएव 'अनेक समवेत' यह कहा गया ( अनेक से सम्बद्ध रहने के स्थान पर 'समवाय सम्बन्ध से अनेक में रहना' यह अर्थ करने से सामान्यलक्षण की अभाव में अतिव्याप्ति नही होती है)। किन्तु 'अनेकसमवेतत्व' अर्थात् अनेकों में मिलकर रहना, संयोग में भी होने से यहाँ भी अतिव्याप्ति होती है। अतएव लक्षण में 'एक' यह कहा गया है। यदि लक्षण में 'एक समवेतत्व' मात्र कहें अर्थात् 'अनेकानुगतम्' इस पद का ग्रहण न करें तो यह लक्षण आकाश के परिमाण में भी अतिव्याप्त होने लगेगा। इसलिये लक्षण में 'अनेक समवेतत्व' कहा गया है। अर्थात् जो नित्य हो, एक हो तथा अनेकों में समवाय सम्बन्ध से रहता हो, वही सामान्य है। सामान्य द्रव्य, गुण तथा कर्म में रहता है तथा पर एवं अपर भेद से यह दो भागों में विभक्त है।

### विश्लेषणम्

**सामान्यपदार्थलक्षणम् –** पदार्थेषु सामान्यः चतुर्थपदार्थः अस्ति। न्यायवैशेषिके सामान्यस्य अपर नाम जातिः। एवम्प्रकारेण जातिः सामान्यश्च पर्यायौ। **'नित्यत्वे सति एकत्वे सति**

**अनेकेषु समवायसम्बन्धेन वृत्तित्वं**' सामान्यस्य लक्षणम्। यः पदार्थः नित्यः एकश्च वर्तते तथा अनेकवस्तुषु समवायसम्बन्धेन तिष्ठति स एव सामान्यः। अनेकेषु वस्तुषु समवायसम्बन्धेन समानतया वृत्तित्वादेव, अयं सामान्यः कथ्यते। यदि 'वृत्तित्वं' मात्रसामान्यलक्षणम् उच्यते तर्हि रूपेऽतिव्याप्तिः भविष्यति। यतोहि रूपस्यापि समवायसम्बन्धेन द्रव्ये वृत्तिः वर्तते। अतः 'अनेक' इत्युक्तम्। एकव्यक्तिवृत्तिरूपे अर्थात् एकस्मिन् द्रव्ये वृत्तित्वं यस्य रूपस्य, तस्मिन् अनेकवृत्तित्वस्य अभावात् नातिव्याप्तिः। लक्षणे 'अनेकेषु वृत्तित्वं' मात्रोक्तौ अत्यन्ताभावेऽतिव्याप्तिः। अतः 'अनेकसमवेत' इति कथितम्। अत्यन्ताभावस्य अनेकवृत्तित्वं स्वरूपसम्बन्धेन वर्तते न तु समवायसम्बन्धेन। अस्मात् कारणात् नात्रातिव्याप्तिः। यदि 'अनेकसमवेतत्व'मात्रोच्यते तर्हि संयोगेऽतिव्याप्तिः अतो हेतोः 'एकत्वे सत्यपि' उक्तम्। संयोगे एकत्वाभावात् सामान्यलक्षणमत्र अतिव्याप्तः न भविष्यति। अनेन प्रकारेण यदि 'एकत्वे सति समवेतत्वम्' इति सामान्यलक्षणं भवेत् तर्हि गगनपरिमाणेऽतिव्याप्तिर्जायते। अतः 'अनेकसमवेतत्वम्' इत्युक्तम्। गगने अनेकसमवेतत्वं नास्ति अतः नात्रातिव्याप्तिः।

सामान्यं द्रव्यगुणकर्मसु च विद्यते। अस्य प्रकारद्वयमस्ति - परसामान्यम् अपरसामान्यञ्च। त्रिषु द्रव्येषु परसामान्यं तिष्ठति। परसामान्यमेव सत्ता इति अपरनाम्ना ज्ञायते। अपरसामान्यं तु पृथिवीत्वादिः।

(५. विशेष-पदार्थ-लक्षणम् )

**तर्कसंग्रहः -** नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ॥६३॥

**उपन्यासः -** विशेषो लक्ष्यः। विशेषत्वं लक्ष्यताऽवच्छेदकम्। 'सामान्य-भिन्नत्वे सति, सामान्य-शून्यत्वे सति समवेतत्वं' लक्षणम्। 'सामान्य-भिन्नत्व-'मात्रोक्तावभावेऽतिव्याप्तिः, अतः 'समवेतत्वम्' उक्तम्, तत्र समवेतत्वाभावान्नातिव्याप्तिः,'सामान्य-भिन्नत्वे सति समवेतत्वम्' इत्युक्तौ द्रव्येऽतिव्याप्तिः, अतः 'सामान्य-शून्यत्वम्' उक्तम्, तत्र सामान्य-शून्यत्वाभावान्नातिव्याप्तिः। 'सामान्य-शून्यत्वे सति सम- वेतत्वम्' इत्युक्तौ सामान्येऽतिव्याप्तिः, अतः 'सामान्य-भिन्नत्वम्' इत्युक्तम्। 'समवेतत्वं' नाम समवाय-सम्बन्धेन वृत्तिमत्वम्, न तु समवाय-सम्बन्धेन सम्बन्धित्वम्, तस्य समवायेऽपि सत्त्वादतिव्याप्तिः स्यात्, अतः 'समवाय-सम्बन्धेन वृत्तिमत्त्वम्' इत्युक्तम्॥६३॥

**हिन्द्यनुवादः –** विशेष लक्ष्य है तथा विशेषत्व लक्ष्यतावच्छेदक है। 'सामान्य से भिन्न तथा सामान्य से शून्य रहते हुए नित्य द्रव्यों में जो समवाय सम्बन्ध से रहे' वह विशेष कहलाता है। लक्षण में 'सामान्य से भिन्न' मात्र कहने पर 'अभाव' में अतिव्याप्ति की प्रसक्ति होने लगेगी अतएव 'समवेतत्व' यह कहा गया है। 'अभाव' कहीं भी समवाय सम्बन्ध से नही रहता है अतः उसमें समवेतत्व का अभाव होने से यहाँ अतिव्याप्ति नहीं होगी। 'सामान्य से भिन्न तथा समवाय सम्बन्ध से रहने वाला' मात्र कहने पर द्रव्य में (गुण,कर्म में भी) अतिव्याप्ति की प्रसक्ति होने लगेगी। अतएव लक्षण में 'सामान्यशून्यत्व' कहा गया है क्योंकि द्रव्य 'सामान्य से शून्य' नहीं होता। अतः द्रव्य में अतिव्याप्ति नही होगी। यदि लक्षण में मात्र 'सामान्य से शून्य तथा समवाय सम्बन्ध से रहने वाला' कहते तो 'सामान्य' में इस लक्षण की अतिव्याप्ति होने लगती। इसीलिये लक्षण में 'सामान्य से भिन्न' भी कहा गया है। वस्तुतः प्रस्तुत विशेषलक्षण में 'समवेतत्व' से अभिप्राय है 'समवाय सम्बन्ध से वृत्तित्व (रहने वाला)' न कि 'समवाय सम्बन्ध से सम्बन्धित'। यदि लक्षण में समवेतत्व का अभिप्राय 'समवाय सम्बन्ध से वृत्तित्व' नही कहेगें तो समवाय में भी इस लक्षण की अतिव्याप्ति होने लगेगी क्योंकि 'समवाय सम्बन्ध से सम्बन्धित्व' तो समवाय में भी रहता ही है अतएव लक्षण में समवेत का तात्पर्य 'समवाय सम्बन्ध से रहने वाला' किया गया है।

## विश्लेषणम्

**विशेषपदार्थलक्षणम् -** विशेषः पञ्चमः पदार्थः। नैयायिकैः स्वीकृता ये पदार्थाः तेषु केचन् लोकेऽदृश्या अपि केवलशास्त्रेणैव ज्ञातव्याः। तेष्वेकः प्रकृतजनबुद्ध्यगोचरः विशेषनामकपदार्थः नैयायिकैरङ्गीकृतः। परमाणूनां परस्परभेदः वर्तते। एतेषां भेदकः धर्मविशेष एव विशेषपदार्थः। उपन्यासे **'सामान्यभिन्नत्वे सति सामान्यशून्यत्वे सति समवेतत्वं'** विशेषस्य लक्षणं दीयते। यः पदार्थः सामान्यपदार्थात् भिन्नः, सामान्यशून्यः जातिशून्यः तथा स्वाधारे समवायसम्बन्धेन तिष्ठति स एव विशेषः कथ्यते उपन्यासकारमते। अत्र समवेतत्वस्य तात्पर्यं समवायसम्बन्धेन वृत्तित्वम् अस्ति न तु समवायसम्बन्धेन सम्बन्धित्वम् इति ध्यातव्यः। सम्प्रति अस्य लक्षणस्य परीक्षा क्रियते। लक्षणे 'सामान्यभिन्नत्व'मात्रोक्ते सति अभावेऽतिव्याप्तिः भवेदतः न 'समवेतत्वम्' इति पदमुक्तम्। अभावे समवेतत्वस्य अभावात् नातिव्याप्तिः। यदि 'सामान्यभिन्नत्वे सति समवेतत्वम्' इत्येवं

विशेषलक्षणं क्रियते तर्हि द्रव्येऽतिव्याप्तिः संभवति। अतो हेतोः 'सामान्यशून्यत्वं' उपादीयते। द्रव्यं सामान्यशून्यं न भवति अपितु 'द्रव्यत्वं' इति जातियुक्तं वर्तते। किन्तु विशेषे 'विशेषत्वं' जातिः न प्रत्युतोपाधिः। अत एव विशेषः सामान्यशून्यः कथ्यते किन्तु द्रव्ये सामान्यत्वस्य सत्वात् नातिव्याप्तिः। अनेन प्रकारेण 'सामान्यशून्यत्वे सति समवेतत्वम्' मात्रोक्ते सति सामान्येऽतिव्याप्तिः। यतोहि सामान्यसम्बन्धः अपि सामान्यशून्यः भवति एवञ्च वस्तुभिः सह समवायतया सम्बन्धित्वमपि वर्तते तस्मिन्। अत्रातिव्याप्तिनिवारणाय एव लक्षणे सामान्यभिन्नत्वमुपात्तम्। अत्र समवेतस्य तात्पर्यं 'समवायसम्बन्धेन वृत्तित्वं' इति ग्रहणे सति समवायसम्बन्धेऽपि अतिव्याप्तिः निवारिता। यतोहि समवाये समवायसम्बन्धेन सम्बन्धित्वं वर्तते न तु वृत्तित्वम्। अनेन प्रकारेण 'सामान्यभिन्नत्वे सति सामान्यशून्यत्वे सति समवेतत्वम्' इति विशेषपदार्थस्य परीक्षितं निरीक्षितञ्च लक्षणं प्रस्तुतमुपन्यासकारेण।

पदार्थोऽयं नित्यद्रव्येष्वेव विद्यते एवञ्च अनन्तसंख्यकाः भवति। वस्तुतः एतत्तु सर्वं 'नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव' इति कथनादेव पूर्वमुक्तम्।

( ६. समवाय-पदार्थ-लक्षणम् )

**तर्कसंग्रहः-**नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ॥६४॥

**उपन्यासः-** समवायो लक्ष्यः। समवायत्वं लक्ष्यताऽवच्छेदकम्। 'अयुत-सिद्धत्वं' लक्षणम्। 'युत-सिद्धं' न भवति' इति अयुत-सिद्धम्। 'ययोर्मध्ये = जाति-व्यक्त्योर्मध्ये, एकम् = जातिः, 'अविनश्यत्' अपरम् = व्यक्तिम् आश्रित्यैत्वावतिष्ठते। एवं सर्वत्र ज्ञेयम्॥६४॥

**हिन्द्यनुवादः -** समवाय लक्ष्य है तथा समवायत्व लक्ष्यता का अवच्छेदक है। 'अयुतसिद्धत्व' ही समवाय का लक्षण है। युतसिद्ध न होना ही अयुतसिद्ध है। ( युत शब्द "यु मिश्रणामिश्रणयोः" धातु से अमिश्रण अर्थ में 'क्त' प्रत्यय से निष्पन्न है, जिसका अर्थ है असम्बद्ध [313]। नञ् समास से युक्त करने पर इसका अर्थ होता है अयुत अर्थात् जो प्रारम्भ से ही सम्बद्ध हो, कभी पृथक् न हो, अयुतसिद्ध कहलाता है।) जिन दो के मध्य में अर्थात् जाति और व्यक्ति के मध्य में एक (जाति) विनष्ट न होती हुई दूसरे (व्यक्ति) पर आश्रित रहती है।

[313] संस्कृत-हिन्दी-कोशः – पृ० ८३७

उन दोनों को अयुतसिद्ध कहा जाता है। उपर्युक्त प्रकार से ही सभी में अर्थात् गुणगुणी, अवयव-अवयवी, क्रिया-क्रियावान् तथा नित्यद्रव्य-विशेष में भी अयुतसिद्ध को समझना चाहिए।

## विश्लेषणम्

**समवायपदार्थलक्षणम् -** षष्ठः पदार्थः समवायः। पदार्थेषु समवायः एतादृशपदार्थः यः सम्बन्धो अपि वर्तते। येन विशेषणविशेष्ययुक्तविशिष्टप्रतीतेः नियमनं भवति स एव सम्बन्धः कथ्यते। उक्तं हि सम्बन्धलक्षणे – **'सम्बन्धत्वं विशिष्टप्रतीतिनियामकत्वम्'**[314]। सम्बन्धेषु समवायः नित्यसम्बन्धः। उपन्यासकारेण मात्रम् **'अयुतसिद्धत्वम्'** इति समवायस्य लक्षणं कृतम्। यः युतसिद्धं न भवति स एव अयुतसिद्धः। ययोर्द्वयो वस्तुनोर्मध्ये एकस्य विनाशे सत्यपि द्वितीयस्य सत्ता भवति। एतौ द्वौ युतसिद्धौ वर्तेते। अर्थात् यौ द्वौ पृथक् स्थातुं योग्यौ, तौ युतसिद्धौ। एतयोः पदार्थयोः सम्बन्धः संयोगः भवति। किन्तु यौ च सामान्यतया पृथक् पृथक् न स्थितौ भवतः, तयोर्द्वयोः अविनश्यन्ती अवस्था या भवति, तस्यामेवावस्थायाम् एकमन्यस्मिन् आश्रितं भवति चेत् तौ च द्वौ अयुतसिद्धौ। अर्थात् ययोः स्वतन्त्ररूपेण पृथक् स्थितिः न कदाचिदपि न भवति, तावयुतसिद्धौ। यथा तर्कसंग्रहे उक्तमपि - **ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ**। एतयोश्च सम्बन्धः समवायसम्बन्धः। एवम्प्रकारेण अयुतसिद्धपदार्थेषु एव समवायसम्बन्धः विद्यते। न्यायवैशेषिके अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये च अयुतसिद्धौ मन्येते। अतः एतयोः मध्ये समवायसम्बन्धः वर्तते। उपन्यासकारेण अयुतसिद्धलक्षणस्य अयुतसिद्धपदार्थोपरि एवम्संगतिः प्रदर्शिता यत् ययोद्वयोर्मध्ये इत्यर्थः जातिव्यक्त्योर्मध्ये, एकम् अर्थात् जातिः अविनश्यत्, अपरम् इत्यर्थः व्यक्तिमाश्रितमेव अवतिष्ठते। अतो हेतोः एतौ अयुतसिद्धौ। अनेन प्रकारेणैव सर्वेषु अयुतसिद्धपदार्थेषु लक्षणसंगतिः कर्तव्या। समवायसम्बन्धस्य ज्ञानन्तु अनुमानप्रमाणेन भवति। यथा 'नीलो घटः' इत्यत्र गुण(नीलः)-गुणिनोः (घटः) सम्बन्धज्ञानं विशेषण(नीलः)-विशेष्य(घटः)सम्बन्ध-विषयाविशिष्टबुद्धित्वाद् भवति, 'दण्डी पुरुषः' इति विशिष्टबुद्धिवत् इति तु प्रथमाध्याये समवायप्रसङ्गे विश्लेषितम्।

---

[314] न्यायबोधिनी - समवायलक्षणनिरूपणम्

अत्र आशङ्का भवितुं शक्यते यत् समवायः अपि संयोग इव सम्बन्धः वर्तते। यद्यपि समवायः नित्यः तथा संयोगः अनित्यः तथापि सम्बन्धस्तु द्वयमेव। तदा समवायं गुणेषु नान्तर्भाव्य स्वतन्त्रपदार्थरूपेण कथं स्वीकृतम्? अस्याः जिज्ञासायाः शमनाय एवं वक्तुमर्हामः यत् न्यायवैशेषिकदर्शने समवायस्य विशेषमहत्वकारणात् अयं संयोगगुणातिरिक्तः पृथक्पदार्थः स्वीक्रियते। यतोहि समवायं विना सृष्टिरेव न संभवति। न्यायवैशेषिकशास्त्रानुसारेण सृष्टिनिर्माणे सूक्ष्मात् स्थूलस्य उत्पत्तौ समवायस्यैव अपेक्षा भवति। परमाणुद्वयेन सह समवेतं भूत्वा एव द्वयणुकं तथा परमाणुत्रयेन सह समवेतं भूत्वा त्रयणुकमुत्पद्यते। अनेन क्रमेणैव महास्थूलपृथिव्यादिकं निर्मीयते। एतानि महाभूतानि (अवयवी) स्वपरमाणुषु (अवयवः) समवायसम्बन्धेनैव समवेतत्वानि भवन्ति। अतः यावत्पर्यन्तं एतानि भविष्यन्ति तावत्पर्यन्तं स्वपरमाणुषु समवेतं भूत्वैव भविष्यन्ति। अतः अस्य समवायसम्बन्धस्यापि उपस्थितिः सृष्टिसत्ताकालपर्यन्तम् भविष्यति किन्तु संयोगः एतादृशः न। अत एव नित्यसमवायस्य स्वतन्त्रपदार्थरूपेण परिगणनमभवत्।

( ७. अभाव-पदार्थ-लक्षणम् )

**तर्कसंग्रहः -** अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। सादिरनन्तः प्रध्वंसः। उत्पत्यनन्तरं कार्यस्य। त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति॥६५॥

**उपन्यासः –** अभावत्व-सामान्य-लक्षणमुक्तमेव। 'अभावश्चतुर्विधः' इति विभागोक्तिः। (१) प्रागभावो लक्ष्यः। प्रागभावत्वं लक्ष्यताऽवच्छेदकम्। 'विनाशित्वे सत्यभावत्वं' लक्षणम्। 'विनाशित्व-'मात्रोक्तौ घटेऽतिव्याप्तिः, तत्र विनाशित्वस्य सत्वात्, अतः 'अभावत्वम्' उक्तम्। 'अभावत्व-' मात्रोक्तावत्यन्ताभावेऽत्व्याप्तिः, अतो 'विनाशित्वम्' उक्तम्, तत्र विनाशित्वाभावान्नातिव्याप्तिः। (२) ध्वंसो लक्ष्यः। ध्वंसत्वं लक्ष्यताऽवच्छेदकम्। 'जन्यत्वे सत्यभावत्वं' लक्षणम्। 'जन्यत्व'-मात्रोक्तौ घटादावतिव्याप्तिः, अतः 'अभावत्वम्' उक्तम्। 'अभावत्व-'मात्रोक्तौ प्रागभावेऽतिव्याप्तिः, अतो 'जन्यत्वम्' उक्तम्, तत्र जन्यत्वाभावान्नातिव्याप्तिः। (३) अत्यन्ताभावो लक्ष्यः। अत्यन्ताभावत्वं लक्ष्यताऽवच्छेदकम्। 'त्रैकालिकत्वे सति संसर्गावाच्छिन्नप्रतियोगिताकत्वं' लक्षणम्। 'त्रैकालिकत्व-'

मात्रोक्तावन्योन्याभावेऽतिव्याप्तिः, अतः 'संसर्गावच्छिन्न-प्रतियोगिताकत्वम्' उक्तम्। तत्रापि तादात्म्य-सम्बन्धावच्छिन्न-प्रतियोगिताकत्वस्य सत्त्वादतिव्याप्तिस्तदवस्थैव, अतः संसर्गत्वं = संयोग-समवायान्यतरत्वम्, 'तदवच्छिन्न-संसर्गनिष्ठावच्छेदकताक-योगित्वं लक्षणे निवेश्यम्, अतो नातिव्याप्तिगन्धः। (४) अन्योन्याभावो लक्ष्यः। अन्योन्याभावत्वं लक्ष्यताऽवच्छेदकम्। 'तादात्म्य-सम्बन्धावच्छिन्न-प्रतियोगिताकत्वे सत्यन्योन्याभावत्वं' लक्षणम्। 'तादात्म्यसम्बन्धावच्छिन्न-प्रतियोगिताकत्व-'मात्रमुक्तं चेत् ? संयोग्यत्यन्ताभावेऽतिव्याप्तिः, तत्र संयोगि-तादात्म्यम्, संयोग-तदवच्छिन्न-प्रतियोगिताकत्वस्य सत्वात्, अतः 'अन्योन्याभावत्वम्' उक्तम्। 'अन्योन्याभावत्व-'मात्रोक्तौ लक्षण-लक्ष्यताऽवच्छेदकयोरैक्य-प्रसङ्गाद्विशिष्टमुपात्तम्।

(१)प्रागभावसद्भावे 'भविष्यति' इत्याकारक-प्रतीतिः प्रमाणम्, (२) ध्वंस-सद्भावे 'ध्वस्त' इत्याकारक-प्रतीतिः, (३) अत्यन्ताभावे 'नास्ति' इत्याकारक प्रतीतिः, (४) अन्योन्याभावे 'इदमिदं न' इति प्रतीतिः प्रमाणम्। इति बोध्यम्॥

**हिन्द्यनुवादः –** अभाव का सामान्य लक्षण तो (प्रथम अध्याय के अन्तर्गत अभावपदार्थ के उद्देश में) कहा ही गया है। अभाव चार भागों में विभक्त है। (१) प्रागभाव लक्ष्य है तथा प्रागभावत्व लक्ष्यता-अवच्छेदक है। 'जो अभाव विनाशी अर्थात् अन्तवान् होता है', उसे प्रागभाव कहते है। यदि लक्षण में मात्र 'विनाशी' ही कहा जाय तो प्रस्तुत लक्षण की घटादि में अतिव्याप्ति होने लगेगी क्योंकि घटादि में भी 'विनाशी' है। इसीलिये लक्षण में 'अभाव' इस पद का प्रयोग किया गया है। अर्थात् जो विनाशी होते हुए अभावत्व से युक्त हो, प्रागभाव कहलाता है । यदि लक्षण में 'अभावत्व' मात्र कहा जाय तो 'अत्यन्ताभाव' में अतिव्याप्ति की प्रसक्ति होने लगेगी अतएव लक्षण में 'विनाशित्व' यह पद कहा गया है। अत्यन्ताभाव में 'विनाशित्व' का अभाव होने से, यहाँ अतिव्याप्ति की सम्भावना समाप्त हो जाती है। (२) ध्वंस लक्ष्य है तथा ध्वंसत्व लक्ष्यता का अवच्छेदक है। 'जो अभाव उत्पत्तिवान् अर्थात् जन्य हो', उसे ध्वंसाभाव कहते है। यदि लक्षण में मात्र 'जन्यत्व' अर्थात् 'उत्पन्न होने वाला' यह ही कहा जाय तो घटादि में प्रस्तुत लक्षण अतिव्याप्त होने लगेगा। अतएव लक्षण में 'अभावत्व' कहा गया है। यदि केवल 'अभावत्व' मात्र कहा जाता तो 'प्रागभाव' में भी प्रस्तुत लक्षण की अतिव्याप्ति हो जाती। अतएव लक्षण में 'जन्यत्व' भी कहा गया है। प्रागभाव में 'जन्यत्व' का

अभाव होने से अतिव्याप्ति नही होगी। (३) अत्यन्ताभाव लक्ष्य है तथा अत्यन्ताभावत्व लक्ष्यतावच्छेदक है। 'तीनों कालों में होने वाला तथा संसर्ग (सम्बन्ध) से अवच्छिन्न प्रतियोगिता वाला होना ही' अत्यन्ताभाव का लक्षण है। यदि लक्षण में 'त्रैकालिक' मात्र कहते तो 'अन्योन्याभाव' में भी इस लक्षण की अतिव्याप्ति होने लगती क्योंकि वहाँ भी 'त्रैकालिकत्व' रहता है। अतः 'संसर्गावच्छिन्न प्रतियोगिता वाला' यह भी कहा गया। किन्तु वहाँ भी तादात्म्य सम्बन्ध (संसर्ग) से अवच्छिन्न प्रतियोगिता वाले अभाव के होने से अतिव्याप्ति उसी प्रकार बनी ही रहती है। अतः प्रस्तुत लक्षण में संसर्ग (सम्बन्ध) से अभिप्राय (तादात्म्य से भिन्न ) संयोग अथवा समवाय सम्बन्ध समझना चाहिए। इन सम्बन्धों से अवच्छिन्न संसर्ग निष्ठ अवच्छेदकता वाला प्रतियोगी जिस अभाव का हो उसे अत्यन्ताभाव कहते है' लक्षण में इस का निवेश करना चाहिए। ऐसा लक्षण करने से अतिव्याप्ति नही होगी। (४) अन्योन्याभाव लक्ष्य है तथा अन्योन्याभावत्व इसकी लक्ष्यता का अवच्छेदक है। 'तादात्म्य सम्बन्ध से अवच्छिन्न प्रतियोगिता वाला होते हुए अन्योन्याभावत्व से युक्त (परस्पर एक का दूसरे में अभाव का होना ही 'अन्योन्याभावत्व') होना ही' अन्योन्याभाव का लक्षण है। यदि 'तादात्म्य सम्बन्ध से अवच्छिन्न प्रतियोगिता वाला ही अन्योन्याभाव है' ऐसा लक्षण दिया जाता तो 'संयोगि' के अत्यन्ताभाव में अतिव्याप्ति हो जाती (जिस वस्तु में 'संयोग' रहता है उसे संयोगि कहते है। संयोग में उसका 'भाव' तथा 'अत्यन्ताभाव' दोनों एक साथ रहते है। अतः जिस वस्तु में संयोग है उस वस्तु अर्थात् संयोगि का भी अत्यन्ताभाव तादात्म्य सम्बन्ध से उसी में रहता है।) क्योंकि उसका भी अर्थात् संयोगि के अत्यन्ताभाव का संयोगि के साथ तादात्म्य होता है। अतः संयोगसम्बन्ध से अवच्छिन्न प्रतियोगिता वाला संयोग्यत्यन्ताभाव के भी होने से, वहाँ इस लक्षण की अतिव्याप्ति संभव होती है। अत एव लक्षण में 'अन्योन्याभावत्व' का उपादान किया गया। इसी प्रकार लक्षण में 'अन्योन्याभावत्व' मात्र कहने पर लक्षण तथा लक्ष्यतावच्छेदक दोनों ही एक हो जाते। अतः 'तादात्म्यसम्बन्ध से अवच्छिन्न प्रतियोगिता वाला' इस का भी लक्षण में ग्रहण किया गया है।

चारों अभावों की सिद्धि में प्रमाण - १. प्रागभाव के होने में 'भविष्यति' अर्थात् 'वस्तु भविष्य में होगी' इस प्रकार की प्रतीति ही प्रमाण है। २. ध्वंसाभाव की सिद्धि में 'ध्वस्तः' अथवा 'वस्तु का नष्ट होना' यह प्रतीति प्रमाण है। ३. अत्यन्ताभाव के सद्भाव में 'नास्ति' अर्थात्

'वस्तु नहीं है' इस प्रकार की लौकिकप्रतीति प्रमाण है। ४. अन्योन्याभाव की सिद्धि 'इदमिदं न' अर्थात् 'एक वस्तु का दूसरे में न होना' इस प्रकार की लौकिक प्रतीति करती है।

## विश्लेषणम्

**अभावपदार्थभेदस्य लक्षणप्रकरणम्-** पदार्थेषु अभावः सप्तमः अन्तिमश्च पदार्थः। पदार्थस्य सत्वात् अस्मिन्नपि अस्तित्वम्, अभिधेयत्वं ज्ञेयत्वञ्च विद्यत इति निश्चितम्। उपन्यासकारेण अत्र समवायादिसदृशपृथक्तया अभावलक्षणं न प्रस्तुतम् अपितु 'अभावत्वसामान्यलक्षणमुक्तमेव' इत्यनेन वचनेन प्रथमाध्याये अभावपदार्थोद्देशप्रकरणे वर्णितम् अभावलक्षणं प्रति सङ्केतितम् इति वक्तुं शक्यते। पूर्वं **'द्रव्यादिषट्प्रतियोगिताकाभाववत्त्वम्'** इति अभावस्य लक्षणमुक्तम्। सम्प्रति अभावस्य भेदाः विविच्यन्ते टीकाकारेण। अभावः चतुर्प्रकारकः वर्तते - प्रागभावः , प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्च। सर्वप्रथमः प्रागभावः लक्ष्यते - **'विनाशित्वे सत्यभावत्वं'** लक्षणम्। यः अभावः विनाशवान् (सान्तः) भवति सः प्रागभावः कथ्यते। तर्कसंग्रहे उल्लिखितस्य **'अनादिसान्तः प्रागभावः'** इति प्रागभावलक्षणस्यापि इदमेव तात्पर्यं वर्तते। यदि अस्मिन् लक्षणे 'विनाशित्व'मात्रोच्यते तर्हि विनाशित्वस्य घटादावपि सत्वात्, अत्र अतिव्याप्तिः भविष्यति। अत एव 'अभावत्वम्' इत्युक्तम्। घटादिः विनाशवन्तस्तु वर्तन्ते किन्तु ते भावरूपाः, न तु अभावरूपाः। अतः न घटादावतिव्याप्तिः। अनेन प्रकारेण 'अभावत्व'मात्रं प्रागभावस्य लक्षणमुक्ते सति अत्यन्ताभावादौ अथवा प्रागभावेतरान्याभावेष्वतिव्याप्तिः जायते। अतो हेतोः 'विनाशित्वं' कथितम्। तत्र विनाशित्वाभावात् अतिव्याप्तिदोषः न भवति प्रागभावलक्षणे। अस्य अभावस्य स्थितिः कार्यस्य उत्पत्तेः पूर्वं भवति[315]। तर्कदीपिकायां प्रागभावस्य स्वरूपविषये त्रीणि तथ्यानि प्रदर्शितानि यत् – **१.** प्रागभावस्य स्वप्रतियोगिनः समवायिकारणे वृत्तिः भवति। **२.** प्रागभावः स्वप्रतियोगिनः जनकः वर्तते। **३.** प्रागभावः 'कार्यं भविष्यति' इतिप्रकारकव्यवहारस्य हेतुर्भवति[316]।

अभावस्य द्वितीयप्रकारः ध्वंसाभावः। **'जन्यत्वे सत्यभावत्वं'** ध्वंसाभावस्य लक्षणं कृतम्

---

[315] उत्पत्तेः पूर्वं कार्यस्य। तर्कसंग्रहः - अभावलक्षणप्रकरणम्

[316] प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनको भविष्यतीति व्यवहारहेतुः प्रागभावः। तर्कदीपिका – अभावलक्षणप्रकरणम्

उपन्यासे। यो अभावः मात्रजन्यः वर्तते स एव ध्वंसाभावः। अत्रापि 'जन्यत्व'मात्रोक्तौ घटादावतिव्याप्तिः जन्यत्वस्य सत्वात् तथा 'अभावत्व'मात्रस्य कथने सति प्रागभावे अथवा ध्वंसाभावेतराभावेष्वतिव्याप्तिः, अत्रापि अभावत्वस्य सत्वात्। अतः एतयोः अतिव्याप्तिनिवारणाय ध्वंसलक्षणे क्रमशः अभावत्वं जन्यत्वञ्च पदयोः उपादानं क्रियते। एतयोः ग्रहणत्वात् ध्वंसाभावलक्षणेऽतिव्याप्तिदोषः निवार्यते। अस्य उपस्थितिः कार्यस्य (कार्यनाशस्य) उत्पत्तेः पश्चाद् मन्यते तर्कसंग्रहकारेण।[317] अस्मिन्नभावे प्रतियोगिसमवायिकारणवृत्तित्वं, प्रतियोगिजन्यत्वं तथा 'ध्वस्तः' इति व्यवहारस्य हेतुत्वं वर्तते।[318] वस्तुनाशाद् ध्वंसाभावः उत्पद्यते किन्तु पुनः अस्य अभावस्य नाशः न भवति। अत एव 'सादिरनन्तः प्रध्वंसः' इत्यपि कथितम्। ध्वंसाभावस्य अस्मात् वैशिष्ट्यवशादेव उपन्यासकारोऽपि अस्य लक्षणे 'जन्यत्वमेव' उक्तम्।

अत्यन्ताभावः तृतीयप्रकारः अभावस्य। भूत-भविष्य-वर्तमानकाले च सम्बन्धेन युक्ता प्रतियोगिता यस्मिन् वर्तते, स अभावः अत्यन्ताभावः उच्यते – **'त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकत्वं'** अत्यन्ताभावस्य लक्षणम्। अत्र 'त्रैकालिक' इत्यर्थः 'भूतभविष्यवर्तमान्' इति कालत्रयं तथा संसर्गः अर्थात् सम्बन्धः अवगमनीयः। अत्र 'त्रैकालिकत्व'मात्रोक्ते सति अन्योन्याभावेऽतिव्याप्तिः यतोहि तत्रापि तादात्म्यसम्बन्धावच्छिन्न या प्रतियोगिता सा अपि त्रैकालिका वर्तते। अतः अत्रातिव्याप्तिवारणाय 'संसर्गावच्छिन्न- प्रतियोगिताकत्वम्' इत्युक्तम्। किन्तु एतस्य कथनेऽपि अन्योन्याभावेऽतिव्याप्तिः तथैव भविष्यति यतोहि तत्रापि 'तादात्म्य' इति संसर्गेण सम्बन्धेन वा अवच्छिन्ना प्रतियोगिता वर्तते। अतः अत्यन्ताभावस्य लक्षणे संसर्गस्य तात्पर्यं संयोगः अथवा समवाय एव बोध्यः। संयोगसमवायान्यतरसंसर्गेनैव अवच्छिन्नप्रतियोगिता अत्यन्ताभावे वर्तते। अनेन प्रकारेण 'संयोगसमवायान्यतरत्वावच्छिन्नसंसर्गनिष्ठावच्छेदकताकप्रतियोगिताकत्वं' इति अत्यन्ताभावस्य लक्षणे निवेश्यम्। अस्य निवेशने न अन्योन्याभावेऽतिव्याप्तिः।

सम्प्रति अन्योन्याभावः लक्ष्यते - **'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वे**

---

317 प्रध्वंसः उत्पत्यनन्तरं कार्यस्य। तर्कसंग्रहः - अभावलक्षणप्रकरणम्

318 प्रतियोगिजन्यः प्रतियोगिसमवायिकारणवृत्तिर्ध्वस्तव्यवहारहेतुर्ध्वंसः। तर्कदीपिका - अभावलक्षणप्रकरणम्

**सत्यन्योन्याभावत्वं'** लक्षणम्। तादात्म्यसम्बन्धेन योऽभावः वर्तते सः अत्यन्ताभावः। तादात्म्यम् अर्थात् समरूपता ऐक्यता वा[319]। तादात्म्यमपि दर्शनशास्त्रे सम्बन्धः स्वीकृतः संयोगादिवत्। येन सम्बन्धेन वस्तुद्वयस्य ऐक्यं प्रदर्श्यते सः तादात्म्यसम्बन्धः भवति। अनेनैव तादात्म्यसम्बन्धेन यो अभावः स अन्योन्याभावः। नव्यन्यायशैल्यां तु तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः यो अभावः स अन्योन्याभाव इति। यदि लक्षणेऽस्मिन् 'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वं' मात्रोच्यते तर्हि संयोगेः अत्यन्ताभावेऽतिव्याप्तिः भविष्यति यतोहि संयोग्यत्यन्ताभावस्य संयोगिना सह तादात्म्यं वर्तते। अतः तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः संयोग्यत्यन्ताभावः अपि। अतः अस्मिन् अत्यन्ताभावेऽतिव्याप्तिवर्जनाय 'अन्योन्याभावत्वम्' उक्तम्। अत्यन्ताभावे अन्योन्याभावत्वस्य अभावान्नातिव्याप्तिः। अथ च 'अन्योन्याभावत्व'मात्रोक्ते सति लक्षण-लक्ष्यतावच्छेदकयोः ऐक्यः भविष्यति। अस्मात् कारणात् 'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वं' इति कथितम्। एवमुपन्यासकारेण 'तादात्म्यसम्बन्धावच्छिन्न प्रतियोगिताकत्वे सत्यन्योन्याभावत्वम्' इत्यन्योन्याभावस्य परीक्षितं लक्षणं प्रस्तूयते।

लक्षणानन्तरं टीकाकारेण लौकिकव्यवहारे प्रागभावचतुष्टयस्य सत्तायाः सिद्धौ प्रमाणं प्रदत्तम्। १. प्रागभावस्य सत्ताभावे तु 'भविष्यति' अर्थात् कार्यं भविष्यतीत्याकारकलौकिकप्रतीतिरेव प्रमाणम्। २. ध्वंसाभावस्य सद्भावे तु 'घटो ध्वस्तः' इत्याकारकप्रतीतिः प्रमाणमस्ति। ३. लोकव्यवहारे 'वस्तुः नास्ति' एवम्प्रकारकप्रतीतिः अत्यन्ताभावस्य सिद्धौ प्रमाणं वर्तते। ४. अथ च 'इदमिदं न' अर्थात् एकस्मिन् वस्तुनि अपरस्याभावरूपा या प्रतीतिर्जायते, सैव प्रतीतिः अन्योन्याभावसिद्धौ प्रमाणम्। संभवतः अस्मात् कारणात् 'अन्यस्मिन् अन्यस्य अभावः अन्योन्याभावः' इति प्रसिद्धः।

एवम्प्रकारेण चतुष्प्रकारकाभावलक्षणं तत्परीक्षणञ्च विधाय सप्तमपदार्थाभावं निरूप्य तर्कसंग्रहसमोपेता उपन्यासटीका समाप्यते टीकाकारेण ।इति।

एतावत्पर्यन्तम् उपन्यासकारेण तर्कसंग्रहवर्णितसिद्धान्तानां यथायथं टीकनं कृतम्। उपन्यासटीका अभावपदार्थपर्यन्तमेव विरचिता। इतः अग्रे टीकेयं न प्रापिता। यद्यपि अस्याः टीकायाः अन्यपाण्डुलिपीनाम् अन्ते टीकालेखनस्य मासतिथिवासरादिकम् उल्लिखितम्

[319] संस्कृत-हिन्दी कोश – पृष्ठम् ४२५

इत्युच्यते पाठभेदे संपादकमहोदयेन किन्तु संपादितोपन्यासटीकायां तत्सर्वं न लिखितम्। संभवतः तत्सर्वं न तादृश उपयोगिकम् अत एव अत्रोल्लेखः न कृतः। अतो हेतोः तर्कसंग्रहस्य यावत्भागपर्यन्तम् उपन्यासटीकासम्पादितं, हिन्द्यनुवादे विश्लेषणे चापि तावत्पर्यन्तमेव प्रस्तुतम्।

॥इति तर्कसङ्ग्रहोपन्यासः समाप्तिमगमत्॥६५॥

सर्वेषां पदार्थानां यथा-यथमुक्तेष्वेवान्तर्भावात् 'सप्तैव पदार्थाः।' इति सिद्धम्॥

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।

अन्नम्भट्टेन विदुषा रचितस्तर्कसङ्ग्रहः॥

॥ इति श्रीमहामहोपाध्यायान्नम्भट्टविरचिततर्कसङ्ग्रहः समाप्तः॥

# उपसंहारः

न्यायवैशेषिकदर्शनस्य वाङ्मयपरम्परायां 'तर्कसंङ्ग्रह' इति प्रकरणग्रन्थस्य भृशं महत्त्वं भजते। श्रीमदन्नम्भट्टविरचितः ग्रन्थोऽयं न्याय-वैशेषिकशास्त्रस्य विपुलसिद्धान्तानां सामान्यजनसहजबोधाय समासेन किन्तु सारग्राहिविधया वर्णनं करोति। यथा ग्रन्थारम्भे एव उक्तम् – **'बालानां सुखबोधाय क्रियते तर्कसंङ्ग्रहः'**। अत एव तर्कसङ्ग्रहः न्यायवैशिषिकदर्शनस्य सिद्धान्तेषु प्रवेशद्वारं कथ्यते। अस्य ग्रन्थस्योपरि अशीत्यधिकाः टीकाः विरच्यन्ते[320]। एताः टीकाः प्रायः सामान्यशैल्यां तथा नव्यन्यायशैल्यां विरचितास्सन्ति। एतासु टीकासु नव्यन्यायशैल्यामेव आलिखिता एवं संभवतः मेरुशास्त्रिगोडबोलेविरचिता 'उपन्यासटीका' विद्यते। यस्याः टीकायाः हिन्दीभाषायाम् अनुवादः विश्लेषणञ्च लघुशोधप्रबन्धेऽस्मिन् कृतम्। प्रस्तुतशोधकार्ये आरेखीयप्रस्तुतिकरणस्य संयोजनं नव्यन्यायस्य क्लिष्टभाषां दुरूहसिद्धान्तान् च पाठकानां सहजबोधाय विहितम्। अस्मिन् कार्ये प्रामुख्येन 'उपन्यासटीका' एव आधाररूपेण स्वीक्रियते किन्तु एतदतिरिक्तम् उपन्यासटीकाया अध्ययने अन्नभट्टविरचिततर्कदीपिका, गोवर्धनमिश्रकृतन्यायबोधिनी तथा चन्द्रजसिंहकृतपदकृत्यम् इति टीकानापि अवलम्बनं साहाय्यतया कृतम्। अतः प्रस्तुतशोधकार्ये शोधार्थिन्या तर्कसङ्ग्रहस्योपरि विरचितानाम् एतासां टीकानामपि साहाय्यं स्वीकृत्य उपन्यासटीकायाः लक्षणानां यथामतिम् अध्ययनं कृतम्। पुनश्च नव्यन्यायस्य पारिभाषिकशब्दावल्यां प्रस्तुतलक्षणानि आरेखीयप्रस्तुतीमाध्यमेन सरलीकरणस्य यथासंभवं प्रयासः विहितः।

तर्कसङ्ग्रहस्य बहुधाः टीकाः उपलभ्यन्ते यासां तर्कसङ्ग्रहीयसिद्धान्तानां टीकनं व्यापकदृष्ट्या विहितं किन्तु शोधार्थिन्या यावत् अवलोकितं 'लक्षणपरीक्षामात्रम्' आधृत्य कृतं टीकनं संभवतः उपन्यासटीकायां वैशिष्ट्यमस्तीति वक्तुं शक्यते। एतदेव वैशिष्ट्यम् अस्याः टीकायाः अपरटीकाभ्यः भिन्नत्वं सूचयति। यद्यपि आचार्यचन्द्रजसिंहेन विरचितायां पदकृत्यटीकायामपि तर्कसङ्ग्रहपदार्थानां लक्षणस्य परीक्षा विहिता, किन्तु तत्र चन्द्रजसिंहेन सामान्यशैल्याम् अन्नम्भट्टस्य प्रदत्तमूलपंक्तिम् अधिकृत्य व्याख्यानं कृतम्। उपन्यासटीकायां तु

320 Tarkasangraha (English Translation with notes ) , V.N. Jha – page 139 -142

पदार्थानामुद्देशः तर्कसंग्रहस्यैव किन्तु पदार्थलक्षणं स्वयं टीकाकारेण प्रस्तुत्य नव्यन्यायशैल्यां तस्य परीक्षादिकं कृतम्। अतः न द्वयोः टीकयोः अभिन्नत्वम्।

उपन्यासटीका नव्यन्यायशैल्यां तु विरचिता किन्तु तत्त्वमीमांसाप्रधानतर्कसङ्ग्रहस्य टीकनत्वात् न तावत्गूढशब्दावल्यः प्रयुक्ताः। अत्र भाषायां स्पष्टता वर्तते किन्तु टीकाकारस्य सूत्रात्मकशैल्याः सत्वात्, यत्र कुत्रचिद् अर्थबोधे काठिन्यं जातम्। लक्षणानां व्यापकपरीक्षा एव उपन्यासस्य प्रमुखवैशिष्टमिति तु प्रस्तावनायाम् उक्तमेव। तत्रापि सम्यग्तया दोषनिवारणाय पाठकस्य स्फुटार्थनिर्धारणाय च लक्षणेषु समस्तविशेषणानां परीक्षणं तदनु विशेषणेषु प्रयुक्तप्रतिपदानां परीक्षणं कृतम् उपन्यासकारेण। यथा - गुणलक्षणे, इन्द्रियलक्षणे, यथार्थानुभवलक्षणे, अयथार्थानुभवलक्षणे, व्याप्तिलक्षणे, सामान्यलक्षणे च इत्यादौ। एतानि लक्षणानि अन्यटीकासु संक्षिप्तरूपेण प्रदत्तानि किन्तु अत्र लक्षणेष्वावश्यकं प्रत्येकं विशेषणं यथामहत्वम् उपस्थापितम्। उपन्यासटीकायां प्रायः लक्षणे प्रयुक्तानि पदानि अपि परिभाष्यन्ते। उदाहरणतया लक्षणस्य लक्षणे प्रयुक्त‘समनियतं’, समनियतलक्षणे प्रयुक्त‘व्यापकं’, परिमाणलक्षणे उल्लिखितम् ‘असाधारणं’, कारणलक्षणे कथित‘नियतम्’ चेत्यादिकानां पदानां परिभाषा कृता। अत्र टीकाकारेण शास्त्रपरम्पराम् अनुल्लङ्घ्य यदि लक्षणे किमपि विशेषणम् अनवधानेन विस्मृतं तर्हि तस्योल्लेखः अनन्तरं क्रियते, न तु तत्रैव निवर्त्यते। यतोहि संस्कृतशास्त्रेषु आचार्याः एकबारं सूत्राणि कृत्वा न पुनः तानि निवर्तयन्ति[321]। यथा – गुणलक्षणस्य पदकृत्ये ‘लक्षणे समवायेन इत्यपि वक्तव्यम्’ एवमुच्यते। अनेन प्रकारेण टीकायाः अन्यलक्षणेष्वपि यत्र आवश्यकम्, तत्र कृतम्। टीकाकारः अत्र पुनरुक्तिदोषस्यापि यथासंभवः परिहारः अकरोत् इति वक्तुं शक्यते। यतोहि पृथिवीजलादिद्रव्यानां शरीरेन्द्रियविषयलक्षणेषु ‘गन्धस्थाने शीतस्पर्शवत्त्वं निवेश्य पृथिवीग्रन्थस्येव’ इत्यादिकमुक्तम्। एवम्प्रकारेण रूपरसादिगुणानां भेदलक्षणेऽपि यथावत् परिभाषावांछनीयत्वे सति ‘शुक्लत्वादिकं’, ‘मधुरत्वादिकं’, ‘सुरभित्वादिकं’ तथा ‘शीतत्वादिकम्’ इत्युच्यते। अतः वक्तुं शक्यते यत् एवम्प्रकारकम् अध्याहारं कृत्वा उपन्यासकारेण ग्रन्थे पुनरुक्तिदोषः निवार्यते। उपन्यासटीकायां सामान्यतः प्रचलितोदाहरणभिन्नात् नवीनोदाहरणप्रयोगो अपि यत्र तत्र दृश्यते यथा – अव्याप्तिदोषस्य

[321] महाभाष्यम् - पश्पशाह्निकम्

उदाहरणं 'द्रव्यस्य रूपवत्त्वम्', अतिव्याप्तेः 'द्रव्यस्य प्रमेयत्वम्', 'द्रव्यस्य गुणत्वम्' इति असम्भवदोषस्य तथा बाधितहेत्वाभासस्य 'ह्लदो वह्निमान् धूमात्'। यद्यपि नवीनप्रयोगे सत्यपि उपन्यासकारः परम्परायाः विरोधं न कृतवान् अर्थात् प्राचीनाचार्यैः वर्णितसिद्धान्तानामेव स्वोदाहरणेषु समन्वयं कृत्वा किञ्चित् भिन्नभाषायां प्रस्तुतम्।

टीकायाम् आत्मभेदस्य 'जीव' इत्यस्य लक्षणं न क्रियते। आत्मलक्षणे अस्य स्थितिं भेदमात्रञ्च निरूप्य कथनं समाप्यते। टीकाकारेण सर्वपदार्थानां लक्षणं कृतम् अतः अस्यां परिस्थितौ जीवलक्षणस्य टीकायाम् अनुपस्थापनं संभवतः पाण्डुलिप्यामेव अस्य अप्राप्तिः सूच्यते न तु टीकाकारस्य प्रमादः। न्यायवैशेषिकदर्शने प्रमाणमीमांसायाः महत्वपूर्णं स्थानमस्ति। यद्यपि तर्कसङ्ग्रहः प्राधान्येन तत्त्वमीमांसापरकः न्यायवैशेषिकस्य प्रकरणग्रन्थः तथापि बुद्धिगुणान्तर्गते प्रमाणमीमांसायाः विश्लेषणमपि व्यापकतया कृतं तर्कसङ्ग्रहे। यदि तर्कसङ्ग्रहात् सम्पूर्णप्रमाणविवेचनं पृथक्क्रियते तर्हि 'तर्कसंग्रह' इति ग्रन्थः अधिकांशतः रिक्तो भविष्यति। एतां परम्परामेव अनुसृत्य उपन्यासकारेण अपि व्यापकप्रमाणप्रक्रिया वर्णिता। चतुष्प्रमाणेष्वपि अनुमानप्रमाणम् उपन्यासटीकायां वृहद्रूपेण विवेचितम्। अनुमानप्रक्रियायां प्रयुक्तानां प्रायः सर्वेषां घटकानां लक्षणं प्राप्यते अत्र। यथा परामर्शः, व्याप्तिः, पक्षधर्मता, पञ्चावयवः, हेत्वाभासादेश्च लक्षणं निरूप्य विधिवत् परीक्षणं क्रियते उपन्यासाचार्येण। यतोहि अनुमानं न्यायस्य प्राणोऽस्ति। अस्मात् कारणात् उपन्यासेऽपि अनुमानप्रकरणं व्यापकतया विश्लेषितम्।

उपन्यासटीकायां यत्र कुत्रचिद् अकस्मात् प्रसङ्गपरिवर्तनमपि दृश्यते यथा सुखादिलक्षणेषु। उपन्यासकारेण एतस्याः लेखनशैल्याः कारणात् सद्यः ग्रन्थकारस्य तात्पर्यम् अवगमने काचित् बाधा जाता। तथापि शोधार्थिन्या यावत् स्वमत्या अवगम्यते तत्तु उपस्थापितमत्र।

अस्यां टीकायां सम्पादनसम्बधित्रुट्यः अपि यत्र तत्र दृश्यन्ते। किन्तु अस्याः उपन्यासटीकायाः संपादितसंस्करणस्य एकैव प्रति शोधार्थिन्याः पार्श्वे आसीत्। अतः तस्यानुसारेणैव प्रस्तुतशोधकार्यं क्रियते। किन्तु यत्र यत्र सम्पादनत्रुटिवशात् टीकायां वाक्यार्थसङ्गतिः न सम्यग्निर्मिता प्रतीयते तत्र तत्र सम्पादकमहोदयेन सम्पादितपुस्तके मूलग्रन्थस्य अधः प्रदत्तेषु पाठभेदेषु उचितपदं विचिन्त्य तस्य उपस्थापनं विहितम्। अथ च परिवर्तितपदस्य सूचनायै

तत्रैव तत्सम्बन्धिनी पादटिप्पणी अपि प्रदत्ता। किन्तु कुत्रचित् तु असम्बद्धपदं वाक्यञ्चापि प्रयुक्तं जातम् एवं प्रतीयते यतोहि तत्र अर्थान्वयः न निर्मीयते। एवञ्च एतेषां विषये सम्पादकमहोदयेन अपि न किमपि उच्यते पाठभेदे। अतः तेषु स्थलेषु वाक्यार्थसमन्वयाय अनुचितार्थवर्जनाय च यथामति उचितपदस्य वाक्यस्य वा नियोजनं पृथक्तया दर्शितम्। किन्तु तत्रैव तत्पदम् अथवा वाक्यम् अपि उपस्थापितं यथा मूलग्रन्थे प्राप्यते।

अतः सकलोपन्यासटीकायाः हिन्द्यनुवादेन विश्लेषणेन च संस्कृतजगति तर्कसङ्ग्रहस्य टीकापरम्परायाम् एका अन्यतमा टीका 'उपन्यासः' वर्तते इति वक्तुं शक्यते॥ इति शम् ॥

# परिशिष्टम् – 'उपन्यासटीकायां प्रदत्तानां लक्षणानां सूची'

- *पदार्थः - अभिधेयत्वं लक्षणम्।*
- *द्रव्यम् - समवायसम्बन्धेन गुणवत्त्वं लक्षणम्।*
- *अव्याप्तिः - लक्ष्यैकदेशावृत्तित्वं लक्षणम्।*
- *अतिव्याप्तिः - लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वं लक्षणम्।*
- *असम्भवः - लक्ष्यमात्रावृत्तित्वं लक्षणम्।*
- *लक्षणम्/असाधारणधर्मः - दूषणत्रयरहितधर्मवत्त्वं लक्ष्यताऽवच्छेदकसमनियतत्वं लक्षणम्।*
- *समनियतत्वम् - लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यताऽवच्छेदकव्यापकत्वं लक्षणम् ।*
- *व्यापकत्वम् - लक्ष्यताऽवच्छेदकीभूतद्रव्यत्वसामानाधिकरण्यं लक्षणम्।*
- *गुणः - द्रव्यभिन्नत्वे सति कर्मभिन्नत्वे सति सामान्यवत्त्वं गुणस्य लक्षणम्।*
- *कर्म - संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं लक्षणम्।*
- *सामान्यम् - नित्यत्वे सति, एकत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणम्।*
- *विशेषः - स्वतो व्यावर्तकत्वं लक्षणम्।*
- *समवायः - नित्यत्वे सति सम्बन्धत्वं लक्षणम्।*
- *अभावः - द्रव्यादिषट्प्रतियोगिताकाभाववत्त्वं लक्षणम्।*
- *पृथिवी - समवायसम्बन्धेन गन्धवत्त्वं लक्षणम्।*
- *नित्यम् - प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं लक्षणम्।*
- *अनित्यम् - प्रागभाव-प्रतियोगित्वे सति ध्वंस-प्रतियोगित्वम् लक्षणम्।*
- *पार्थिव-शरीरः - गन्धवत्त्वे सति शरीरत्वं लक्षणम्।*
- *पार्थिव-इन्द्रियम् – गन्धवत्त्वे सति इन्द्रियत्वं लक्षणम्।*
- *पार्थिव-विषयः - गन्धवत्त्वे सति विषयत्वं लक्षणम्।*
- *आपः - समवायसम्बन्धेन शीतस्पर्शवत्त्वं लक्षणम्।*
- *जलीय-शरीरम् - शीतस्पर्शवत्त्वं सति शरीरत्वं लक्षणम्।*
- *जलीय-इन्द्रियम् – शीतस्पर्शवत्त्वं सति इन्द्रियत्वं लक्षणम्।*
- *जलीय-विषयः - शीतस्पर्शवत्त्वं सति विषयत्वं लक्षणम्।*

- तेजः – समवायसम्बन्धेन उष्णस्पर्शवत्त्वं लक्षणम्।
- तेजसीय-शरीरम् - उष्णस्पर्शवत्त्वे सति शरीरत्वं लक्षणम्।
- तेजसीय-इन्द्रियम् - उष्णस्पर्शवत्त्वे सति इन्द्रियत्वं लक्षणम्।
- तेजसीय-विषयः - उष्णस्पर्शवत्त्वे सति विषयत्वं लक्षणम्।
- भौमतेजः - उष्णस्पर्शवत्त्वे सति भौमत्वं लक्षणम्।
- दिव्यतेजः - उष्णस्पर्शवत्त्वे सति दिव्यत्वं लक्षणम्।
- औदर्यतेजः - उष्णस्पर्शवत्त्वे सति औदर्यत्वं लक्षणम्।
- आकरजतेजः - उष्णस्पर्शवत्त्वे सति आकरजत्वं लक्षणम्।
- वायुः - समवायसबन्धेन अनुष्णाशीतस्पर्शवत्त्वं लक्षणम्।
- वायवीय-शरीरम् – अनुष्णाशीतस्पर्शत्वे सति शरीरत्वं लक्षणम्।।
- वायवीय-इन्द्रियम् – अनुष्णाशीतस्पर्शत्वे सति इन्द्रियत्वं लक्षणम्।।
- वायवीय-विषयः – अनुष्णाशीतस्पर्शत्वे सति विषयत्वं लक्षणम्।
- शरीरः - चेष्टाऽऽश्रयत्वं लक्षणम्।
- इन्द्रियम् - शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियसामान्य-लक्षणम्।
- विषयत्वम् - विषयाकारानुगतप्रतीतिसाक्षिकस्वरूपसम्बन्धविशेषः।
- आकाशम् - समवायसम्बन्धेन शब्दगुणत्त्वं लक्षणम्।
- श्रोत्रेन्द्रियम् - शब्दाश्रयत्वे सति इन्द्रियत्वं लक्षणम्।
- कालः - अतीतादिव्यवहारहेतुत्वं लक्षणम्।
- दिक् - प्राच्यादिव्यवहारहेतुत्वं लक्षणम्।
- आत्मा – समवायसम्बन्धेन ज्ञानवत्त्वं लक्षणम्।
- ईश्वरः - सर्वज्ञत्वे सति परमत्वं लक्षणम्।
- रूपम् – चक्षुर्मात्रग्राह्यत्वे सति विशेषगुणत्वं रूपस्य लक्षणम्।
- रूपगुणभेदानां लक्षणम् - चक्षुर्ग्राह्यत्वे सति शुक्लत्वादिकं लक्षणम्।
- रसः - रसनग्राह्यत्वे सति गुणत्वं लक्षणम्।
- रसगुणभेदानां लक्षणम् - रसनग्राह्यत्वे सति मधुरत्वादिकं इति।
- गन्धः - घ्राणग्राह्यत्वे सति गुणत्वं लक्षणम्।
- गन्धगुणभेदयोः लक्षणम् - घ्राणग्राह्यत्वे सति सुरभित्वादिकं लक्षणम्।
- स्पर्शः - त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं लक्षणम्।
- स्पर्शगुणभेदानां लक्षणम् - त्वगिन्द्रियग्राह्यत्वे सति शीतत्वादिकम् लक्षणम्।

- *संख्या - एकत्वादिव्यवहारहेतुत्वं लक्षणम्।*
- *परिमाणम् - मानव्यवहारासाधारणकारणत्वं लक्षणम्।*
- *असाधारणकारणम् – कार्यविशेषनिष्ठधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वं लक्षणम्।*
- *अणुपरिमाणम् – अणुव्यवहारासाधारणकारणत्वं लक्षणम्।*
- *महत्परिमाणम् - महत्व्यवहारासाधारणकारणत्वं लक्षणम्।*
- *दीर्घपरिमाणम् - दीर्घव्यवहारासाधारणकारणत्वं लक्षणम्।*
- *ह्रस्वपरिमाणम् - ह्रस्वव्यवहारासाधारणकारणत्वं लक्षणम्।*
- *पृथक्त्वम् - पृथग्व्यवहारासाधारणकारणत्वं लक्षणम्।*
- *संयोगः - संयुक्तव्यवहारहेतुत्वं लक्षणम्।*
- *विभागः - सयोगनाशकत्वे सति गुणत्वं लक्षणम्।*
- *परत्वमपरत्वञ्च - परापरव्यवहारासाधारणकारणत्वे लक्षणे।*
- *गुरुत्वम् - आद्यपतनासमवायिकारणत्वं लक्षणम्।*
- *द्रव्यत्वम् - आद्यस्यन्दनासमवायिकारणत्वं लक्षणम्।*
- *स्नेहः - चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं लक्षणम्।*
- *शब्दः - श्रोत्रग्राह्यत्वे सति गुणत्वं लक्षणम्।*
- *बुद्धिः - सर्वव्यवहारहेतुत्वे सति ज्ञानत्वं लक्षणम्।*
- *स्मृतिः - संस्कारजन्यत्वे सति ज्ञानत्वं लक्षणम्।*
- *अनुभवः - स्मृतिभिन्नत्वे सति ज्ञानत्वं लक्षणम्।*
- *यथार्थानुभवः – १. तद्वति तत्प्रकारकत्वं लक्षणम्।*

  *२. तत्सम्बन्धावच्छिन्न-तद्वद्विशेष्यकत्वावच्छेदेन तेन सम्बन्धेन तत्प्रकारकानुभवत्वं प्रमाया लक्षणम्।*
- *अयथार्थानुभवः - १. तदभाववति तत्प्रकारकत्वं लक्षणम्।*

  *२.तत्सम्बन्धावच्छिन्नप्रतियोगिताकप्रतियोगिव्यधिकरणदैशिकविशेषणतासम्बन्धेन तदभाववद्विशेष्यकत्वे सति तत्सम्बन्धेन तत्प्रकारकत्वं भ्रमलक्षणम्।*
- *करणम् - व्यापारवत्त्वे सत्यसाधारणकारणत्वं लक्षणम्।*
- *व्यापारः - तज्जन्यत्वे सति तज्जन्यजनकत्वं लक्षणम्।*

- *कारणम् – १.कार्यनियतपूर्ववृत्तित्वं लक्षणम्।*

  *२.कारणताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोगिताको योऽभावः, तादृशाभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्व रूपनियमघटित-कारणत्वं कारणसामान्य-लक्षणम्।*

- *नियतत्वम् - कार्यताऽवच्छेदकसम्बन्धावछिन्नकार्यताऽवच्छेदकावच्छिन्नकार्याधिकरणवृत्तिः।*
- *कार्यम् - प्रागभावप्रतियोगित्वं लक्षणम्।*
- *समवायिकारणम् - समवेतकार्यजनकत्वं लक्षणम्।*
- *असमवायिकारणम् - कार्यैकार्थ-कारणैकार्थान्यिरप्रत्यासत्त्या कार्याधिकरणे सम्बद्धं सत् कार्यजनकत्वं लक्षणम्।*
- *निमित्तकारणम् - समवायिकारणभिन्नत्वे सति, असमवायिकारणभिन्नत्वे सति कारणत्वं लक्षणम्।*
- *प्रत्यक्षज्ञानम् - इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं लक्षणम्।*
- *अनुमानम् - १.अनुमितिकरणत्वं लक्षणम्।*

  *२.अनुमितित्वरूपजात्यवच्छिन्नकार्यतानिरूपितकारणताशालित्वम् अनुमानम्।*

- *अनुमितिः - परामर्शजन्यत्वे सति ज्ञानत्वं लक्षणम्।*
- *परामर्शः - व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं लक्षणम्।*
- *पक्षधर्मता – धूमप्रकारकपक्षविशेष्यकत्वं लक्षणम्।*
- *व्याप्तिः – १. साहचर्यनियमत्वं लक्षणम्।*

  *२.हेतुताऽवच्छेदकसम्बन्धावच्छिन्नहेतुताऽवच्छेदकावच्छिन्नहेत्वधिकरणे दैशिकविशेषणता-सम्बन्धेन वृत्तिः। साध्यताऽवच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोगिताको योऽभावः, तत्प्रतियोगितायां साध्यतावच्छेदकताघटकसंबन्धेनानवच्छेदकं यत्साध्यताऽवच्छेदकं, साध्यताऽवच्छेदकताघटकसम्बन्धेन तदवच्छिन्नं यत्साध्यम्, तस्य साध्यताऽवच्छेदक-सम्बन्धेन साध्यसामानाधिकरण्यं यावद्धेत्वधिकरणावच्छेदकावच्छेदेन।*

- साहचर्यम् – सामानाधिकरण्यम् लक्षणम्।
- नियमः - हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिताऽनवच्छेदकधर्मवत्वम्।
- पक्षः - सिषाधयिषाविरहसहकृतसिद्ध्यभाववत्वं लक्षणम्।
- स्वार्थानुमानम् – स्वार्थानुमितिहेतुत्वं लक्षणम्।
- परार्थानुमानम् - परार्थानुमितिहेतुत्वं लक्षणम्।
- न्यायः – उचितानुपूर्वीकप्रतिज्ञाऽऽदिपञ्चकसमुदायत्वं लक्षणम्।
- अवयवः – न्यायान्तर्गतत्वे सति प्रतिज्ञाऽऽद्यन्यतमत्वं लक्षणम्।
- प्रतिज्ञा – न्यायघटकपक्षविशेष्यकसाध्यप्रकारत्वं लक्षणम्।
- हेतुवाक्यम् – न्यायघटितत्वे सति पञ्चम्यन्तलिङ्गप्रतिपादकत्वं लक्षणम्।
- उदाहरणवाक्यम् – न्यायघटितहेतुविशेष्यकव्याप्तिप्रतिपादकत्वं लक्षणम्।
- उपनयवाक्यम् – पक्षविशेष्यकव्याप्तिविशिष्टहेतुप्रकारकत्वं लक्षणम्।
- निगमनवाक्यम् – पक्षविशेष्यकाबाधितसाध्यप्रतिपादकत्वं लक्षणम्।
- अन्वय-व्यतिरेकि लिङ्गम् – अन्वव्याप्तिमत्त्वे सति व्यतिरेकव्याप्तिमत्त्वं लक्षणम्।
- केवलान्वयि लिङ्गम् – अन्वयमात्रव्याप्तिमत्त्वं लक्षणम्।
- केवलव्यतिरेकि लिङ्गम् – व्यतिरेकमात्रव्याप्तिमत्त्वं लक्षणम्।
- पक्षः - संदिग्धसाध्यवत्त्वं लक्षणम्।
- सपक्षः - निश्चितसाध्यवत्त्वं लक्षणम्।
- विपक्षः - निश्चितसाध्याभाववत्त्वं लक्षणम्।
- हेत्वाभासः – अनुमितितत्करणान्यतरप्रतिबन्धकयथाऽर्थज्ञानविषयत्वं लक्षणम्।
- साधारणसव्यभिचारः – साध्याभाववद्वृत्तित्वं लक्षणम्।
- असाधारणसव्यभिचारः – सर्वसपक्षविपक्षवृत्तिशून्यत्वं लक्षणम्।
- अनुपसंहारिसव्यभिचारः – अन्वयदृष्टान्तशून्यत्वे सति व्यतिरेकदृष्टान्तशून्यत्वं लक्षणम्।
- विरूद्धः - साध्याभावव्याप्तिमत्त्वं लक्षणम्।
- सत्प्रतिपक्षः – स्वसाध्यविरुद्धसाध्याभावसाधकहेत्वन्तरकत्वं' लक्षणम्।
- आश्रयासिद्धः - पक्षे पक्षताऽवच्छेदकभाववत्त्वं लक्षणम्।
- स्वरूपासिद्धः – पक्षे हेत्वाभाववत्त्वं लक्षणम्।
- व्याप्यत्वासिद्धः – सोपाधिकत्वं लक्षणम्।
- बाधः - पक्षे साध्याभाववत्त्वं लक्षणम्।
- उपमानम् – १. उपमितिकरणत्वं लक्षणम्।

- २. उपमितित्वजात्यवच्छिन्नकार्यतानिरूपितकारणताशालित्वम्।

- उपमितिः – संज्ञासंज्ञिसम्बन्धज्ञानत्वं लक्षणम्।
- संज्ञा - वाचकः शब्दः।
- संज्ञी – अर्थः।
- संज्ञासंज्ञिसम्बन्धः – वाच्यवाचकसम्बन्धः।
- शब्दः – आप्तवाक्यत्वं लक्षणम्।
- आप्तः - यथार्थवक्तृत्वं लक्षणम्।
- वाक्यम् - पदसमूहं लक्षणम्।
- पदम् - शक्तिमत्त्वं लक्षणम्।
- शक्तिः - अस्मात्पदादयमर्थो बोद्धव्यः इतीश्वरसङ्केतत्वं लक्षणम्।
- आकाङ्क्षा - पदस्य पदान्तराभावप्रयुक्तशाब्दबोधाजनकत्वं लक्षणम्।
- योग्यता - अर्थाबाधत्वं लक्षणम्।
- सन्निधिः - पदानामविलम्बेनोच्चारणत्वं लक्षणम्।
- वैदिकवाक्यम् - वेदत्वं लक्षणम्।
- लौकिकवाक्यम् - आप्तोक्तत्वं लक्षणम्।
- शब्दप्रमाणम् – १.शाब्दबोधकरणत्वं लक्षणम्।
  - २. शाद्वत्वरुपजात्यवच्छिन्नकार्यतानिरूपितकारणताशालित्वम्।
- संशयः - एकस्मिन्धर्मिणि विरुद्धनानाधर्मप्रकारकज्ञानत्वं लक्षणम्।
- विपर्ययः – मिथ्याज्ञानत्वं लक्षणम्।
- तर्कः - व्याप्यारोपेण व्यापकारोपत्वं लक्षणम्।
- सुखम् – सर्वेषामनुकूलवेदनीयत्वं लक्षणम्।
- दुःखम् – प्रतिकूलवेदनीयत्वं लक्षणम्।
- इच्छा – कामत्वं लक्षणम्।
- द्वेषः – क्रोधत्वं लक्षणम्।
- प्रयत्नम् – कृतित्वं लक्षणम्।
- धर्मः - विहितकर्मजन्यत्वं लक्षणम्।
- अधर्मः – निषिद्धकर्मजन्यत्वं लक्षणम्।
- वेगसंस्कारः – क्रियाजन्यत्वे सति वेगत्वं लक्षणम्।
- भावनासंस्कारः – अनुभवजन्यत्वे सति स्मृतिहेतुत्वं लक्षणम्।
- स्थितिस्थापकसंस्कारः – क्रियाजन्यत्वे सति स्थितिस्थापकत्वं लक्षणम्।

- *कर्म – चलनात्मकत्वं लक्षणम्।*
- *उत्क्षेपणम् – ऊर्ध्वदेशसंयोगहेतुत्वं लक्षणम्।*
- *अपक्षेपणम् - अधोदेशसंयोगहेतुत्वं लक्षणम्।*
- *आकुञ्चनम् – शरीरसन्निकृष्टदेशसंयोगहेतुत्वं लक्षणम्।*
- *प्रसारणम् – शरीरविप्रकृष्टदेशसंयोगहेतुत्वं लक्षणम्।*
- *गमनम् – गमनपदवाच्यत्वं लक्षणम्।*
- *सामान्यम् - नित्यत्वे सति एकत्वे सति, अनेकेषु समवाय सम्बन्धेन वृत्तित्वं लक्षणम्।*
- *विशेषः - सामान्य-भिन्नत्वे सति, सामान्यशून्यत्वे सति समवेतत्वं लक्षणम्।*
- *समवायः – अयुतसिद्धत्वं लक्षणम्।*
- *प्रागभावः – विनाशित्वे सत्यभावत्वं लक्षणम्।*
- *प्रध्वंसाभावः – जन्यत्वे सत्यभावत्वं लक्षणम्।*
- *अत्यन्ताभावः – त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकत्वं लक्षणम्।*
- *अन्योन्याभावः - तादात्म्य-सम्बन्धावच्छिन्न-प्रतियोगिताकत्वे सत्यन्योन्याभावत्वं लक्षणम्।*

# सन्दर्भग्रन्थसूची

**प्राथमिकस्रोतांसि ( Primary soures ) -**


- **साक्षात्-स्रोतांसि**

- अन्नम्भट्टः , *तर्कसंग्रहः (* बालप्रबोधिनी*, उपन्यास इति प्राचीनाप्रकाशित-टीका-युगलेन,उल्लास-नामक-सम्पादकीय-टिप्पण्या च संवलितः),* सं० - श्री शिवनारायण शास्त्री, दिल्ली : भारतीय पब्लिशिंग हाउस,१९४७.

- **असाक्षात्-स्रोतांसि –**

- अन्नम्भट्टः, *तर्कसंग्रहः (स्वोपज्ञव्याख्यातर्कदीपिकासहितः),* सं०- दयानन्द भार्गव, दिल्ली : मोतीलाल बनारसीदास ,१९७८.
- **----------**,*तर्कसंग्रहः(स्वोपज्ञ-दीपिकासहितः),* व्या० – कांशी राम, दिल्ली : मोतीलाल बनारसीदास ,२००७.
- **---------** ,*तर्कसंग्रहः( पं० गोवर्धनाचार्यकृतन्यायबोधिनी हिन्दीव्याख्यासंवलित ),* व्या०-नवीन कुमार झा अञ्जना, दिल्ली : अभिषेक प्रकाशन,२०१०
- **----------**,*तर्कसङ्ग्रहः (प्राचीननवटीकासहितः),* सं० – सत्कारिशर्मा बङ्गीय,वाराणसी : चौखम्बा संस्कृत संस्थान,वि०सं० २०६८.
- **----------**,*तर्कसंग्रहः (स्वोपज्ञतर्कसंग्रहदीपिका-गोवर्दनमिश्रकृतन्यायबोधिनी-चन्द्रजसिंहकृतपदकृत्य- गोविन्दाचार्यकृतश्रीनिवासमुखोल्लासिनी(संस्कृत)-*

*श्रीधरमुखोल्लासिनी(हिन्दी)व्याख्यासंवलितः कारिकावली - न्यायपदार्थकोश-लघूत्तरीयप्रश्नोत्तर-वस्तुनिष्ठप्रश्नात्मकपरिशिष्टसमलङ्कृतश्च),* सं०-गोविन्दाचार्यः, वाराणसी : सुरभारती प्रकाशन,२०१३.

- ----------,*तर्कसंग्रह – तारोदय,* व्या०- टी. शिवनारायण शास्त्री, दिल्ली-वाराणसी : भारतीय पब्लिशिंग हाऊस, १९७३.
- ----------,*तर्कसंग्रह ,*व्या०- चन्द्रशेखर द्विवेदी,आगरा:महालक्ष्मी प्रकाशन,१९९९.
- ----------,*तर्कसंग्रह,* व्या०- कृष्णमणि त्रिपाठी, दिल्ली: मोतीलाल बनारसीदास,२०००.
- ----------,*तर्कसंग्रह,* व्या०- अद्याप्रसाद मिश्र, इलाहाबाद: अक्षयवट प्रकाशन,२००१.
- ----------,*तर्कसंग्रह,* व्या०- ज्वालाप्रसादगौड, दिल्ली:मोतीलाल बनारसीदास,२००१.
- ----------,*तर्कसंग्रह,* व्या०- पंकजकुमार मिश्र, दिल्ली : परिमल पब्लिकेशन्स, २००१.
- ----------,*तर्कसंग्रह,* व्या०- अर्कनाथ चौधरी, जयपुर:जगदीश संस्कृत पुस्तकालय,२००२.
- ----------,*तर्कसंग्रह,* व्या०-दयानन्द भार्गव, वाराणसी : मोतीलाल बनारसीदास, २००५.
- ---------,*तत्त्वचिन्तामण्यालोकव्याख्या सिद्धाञ्जनम्(प्रामाण्यवादे ज्ञप्तिवादपर्यन्तो भागः),* सं० - मुळळपूडि विश्वनाथशास्त्री, दिल्ली : राष्ट्रीयसंस्कृतसंस्थानम्,२००६.

- Annambhatta*,Tarkasangraha ( English translataion with notes),* Ed. V.N.jha,Kerala : chinmaya international foundation shodha sansthan,2010.
- उद्योतकर,*न्यायवार्तिक(न्यायसूत्र तथा वात्स्यायन भाष्य सहित – प्रथम अध्याय),*व्या०-श्रीनिवास शास्त्री, गाजियाबाद : इण्डो-विजन प्राइवेट लिमिटेड
- उदयनाचार्य, *न्यायवार्तिकतात्पर्यटीकापरिशुद्धि* , सं०- अनन्तलाल ठाकुर,दिल्ली – भारतीय दार्शनिकानुसंधान परिषत्प्रकाशिका,१९९६.
- ------------,*न्यायकुसुमाञ्जलि* , सं०- महाप्रभुलाल गोस्वामी , मिथिला विद्यापीठ ग्रन्थमाला , सं. २३ , १९७२.
- उपाध्याय,गंगेश, *तत्त्वचिन्तामणिः* , सं० - एन. एस. ताताचार्य, तिरुपति : केन्द्रीय संस्कृत विद्यापीठ, १९७३.
- -----------, *किरणावली* , सं०- विन्ध्येश्वरीप्रसाद द्विवेदी , बनारस : चौखम्बा संस्कृत सीरीज, १८९७.
- कौटिल्य, *अर्थशास्त्रम्* , व्या०- वाचस्पति गैरोला, वाराणसी : चौखम्बा विद्याभवन ,२०१३.
- दीक्षित, अप्पय , *विधिरसायनम्* , राजविनयप्रकाशनम् (अन्तर्जालतः उपलब्धं पुस्तकम्)
- प्रशस्तपादविरचित, *प्रशस्तपादभाष्यम् ( न्यायकन्दलीटीका ),* प्रशस्तपादः, व्या० पण्डित श्री दुर्गाधर झाशर्मा, वाराणसी : सम्पूर्णानन्दसंस्कृत-विश्वविद्यालय, १९९७

- ----------------,*प्रशस्तपादभाष्यम्(प्रकाशिकाहिन्दीव्याख्याविभूषितम्),* भाष्यव्याख्या० ढुण्ढिराज शास्त्री, सूत्रव्याख्या० नारायणमिश्रः, वाराणसी : चौखम्भा संस्कृत संस्थान, वि.सं. २०५९.
- मनुविरचित, *मनुस्मृतिः(मेधातिथिभाष्यसमेता),* सं०- गङ्गानाथ झा, दिल्ली : परिमल पब्लिकेशन्स,२००४.
- माधवाचार्यः,*सर्वदर्शनसंग्रहः*(सपरिशिष्ट'प्रकाश'हिन्दीभाष्योपेतः),सं०- उमाशङ्कर'ऋषि', वाराणसी : चौखम्बा विद्या भवन ,२००४ .
- मिश्र, केशव, *तर्कभाषा(माधुरी हिन्दीव्याख्योपेता),* व्या० – गजानन शास्त्री मुसलगाँवकर,वाराणसी : चौखम्बा सुरभारती प्रकाशन,२०१३.
- *-------------,तर्कभाषा* , सं०. बदरीनाथ शुक्ल , वाराणसी : मोतीलाल बनारसीदास , १९६८.
- याज्ञवल्क्यः,*याज्ञवल्क्यस्मृतिः,* व्या०- उमेशचन्द्र पाण्डेय , वाराणसी : चौखम्बा संस्कृत संस्थान , (वि० सं०)२०६५.
- राजशेखरः , *काव्यमीमांसा* (प्रकाशहिन्दीव्याख्योपेता), व्या० – गंगासागर राय, वाराणसी : चौखम्बा विद्याभवन, २००७
- लौगाक्षिभास्कर,*अर्थसंग्रहः,* व्या०- कामेश्वरनाथमिश्रः, वाराणसी : चौखम्बा सुरभारती प्रकाशन,२०१०
- वाचस्पति मिश्र, *न्यायवार्त्तिकतात्पर्यटीका,* सं०- राजेश्वर शास्त्री द्राविड, वाराणसी : काशी संस्कृत सीरीज , १९२५.

- वात्स्यायन, *न्यायभाष्यम्*, सं०- नारायण मिश्र, वाराणसी : काशी संस्कृत ग्रन्थमाला,४३,१९७०.
- विश्वनाथ , *न्यायसिद्धान्तमुक्तावली* , सं०- श्रीकृष्ण वल्लभाचार्य , बनारस : काशी संस्कृत ग्रन्थमाला, १९७२.
- विश्वनाथ ,*न्यायसिद्धान्तमुक्तावली* , सं०- हरिराम शुक्ल शास्त्री , वाराणसी : काशी संस्कृत सीरीज, १९७२.
- *विष्णुपुराणम् (समीक्षितावृत्तिः)* द्वितीयो भागः, सं०- मधुसूदनः पाठकः, बडोदरा : प्राच्यविद्यामन्दिरम्,१९९९.
- श्रीधराचार्यः, *न्यायकन्दली* , सं०- दुर्गाधर झा , गंगानाथ झा ग्रन्थमाला सं. १, वाराणसी : १९६३.
- शंकराचार्य , *ब्रह्मसूत्रशांकरभाष्य* , सं० - हनुमानदास षट्शास्त्री , वाराणसी : चौखम्बा विद्याभवन , १९६७.
- *श्रीमद्भगवद्गीता* , गोरखपुर : गीताप्रेस , सं० २०६३
- सदानन्दः, *वेदान्तसारः* ( सुबोधिनीसंस्कृतटीकासहितः ), व्या० - आद्याप्रसादमिश्र, इलाहाबाद : अक्षयवट प्रकाशन,२००७.
- हरिदत्तः,*व्याकरणकारिका*, अन्तर्जालतः उपलब्धपुस्तिका (प्रकाशनादिकं न प्राप्यते तस्मिन्श्)

**द्वितीयकस्रोतांसि –**

- **स्वतन्त्रग्रन्थाः**

- अवस्थी, ब्रह्ममित्र, *भारतीय न्यायशास्त्र ( एक अध्ययन )*,दिल्ली : इन्दु प्रकाशन,१९६७.

- उपाध्याय, बलदेव, *संस्कृत-वाङ्मय का वृहद् इतिहास(नवम खण्ड-न्याय)*,लखनऊ : उत्तर
प्रदेश संस्कृत संस्थान,१९९९.
- कुमार, शशिप्रभा, *वैशेषिक दर्शन में पदार्थ-निरूपण*, दिल्ली : दिल्ली विश्वविद्यालय,१९९२.
- कुमार, शशिप्रभा, *वैशेषिक दर्शन-परिशीलन*, दिल्ली : विद्यानिधि प्रकाशन,१९९९.
- गैरोला, वाचस्पति, *भारतीय दर्शन*, इलाहाबाद : लोकभारती प्रकाशन, १९४३
- झा *,* हरिमोहन ,*'न्यायदर्शन " वैशेषिकदर्शन ' (भारतीय दर्शन परिचय प्रथम व द्वितीय खण्ड )*,पटना : पुस्तक भण्डार लहेरियासराय , १९६४ .
- झा, आनन्द , *पदार्थशास्त्र* , लखनऊ : हिन्दी समिति सूचना विभाग ,उत्तर प्रदेश , १९६९ .
- तिवारी, केदारनाथ, *भारतीय तर्कशास्त्र परिचय( An introdauction of Indian logic )* ,दिल्ली : मोतीलाल बनारसीदास,२००५.
- तर्कवागीश , फणिभूषण ., *न्याय परिचय (बंगाली)*, अनु० - किशोरीनाथ झा , वाराणसी : चौखम्बा विद्याभवन , १९६८.
- द्रविड, नारायण शास्त्री, *भारतीयदर्शन की मूलगामी समस्याएँ*, सागर : विश्वविद्यालय प्रकाशन, २००९.
- पाण्डेय, रामपूजन, *तर्कसंग्रहः तट्टीकानां च समीक्षात्मकमध्ययनम्*, वाराणसी : भारतीय विद्या संस्थान,१९९९.

- बिजल्वान, चक्रधर, *भारतीय न्यायशास्त्र*, लखनऊ : उत्तर प्रदेश हिन्दी संस्थान,१९९८.
- भण्डारी, आर., *भारतीय दार्शनिक चिन्तन*, दिल्ली : अखिल भारतीय दर्शन-परिषद् तथा न्यू भारतीय बुक कार्पोरेशन,२००५.
- महापात्रा, विष्णुपद, *न्यायपारिभाषिक शब्दावली*, दिल्ली : मान्यता प्रकाशन, २०१०.
- मिश्र, जगदीशचन्द्र, *भारतीय दर्शन*, वाराणसी : चौखम्बा विद्याभवन,२००३.
- वेदालंकार, जयदेव, *भारतीय दर्शनशास्त्र का इतिहास ( द्वितीय भाग – न्यायवैशेषिक )* दिल्ली : न्यू भारतीय बुक कार्पोरेशन, २००४.
- शर्मा, कमला, *न्याय-दर्शन में प्रमाण विचार*, दिल्ली : न्यू भारतीय बुक कार्पोरेशन,२००४.
- शर्मा, राममूर्ति, *न्याय-वैशेषिक ( एक चिन्तन ),* दिल्ली : राष्ट्रीय संस्कृत संस्थान ,१९९८
- शर्मा, राममूर्ति, *भारतीय दर्शन की चिन्तनधारा,* दिल्ली : चौखम्बा ओरियन्टालिया,२००८.
- शर्मा , चक्रधर, *भारतीय दर्शन आलोचना और अनुशीलन* , दिल्ली : मोतीलाल बनारसीदास , १९९०.
- शास्त्री , धर्मेन्द्रनाथ ,*भारतीय दर्शनशास्त्र (न्याय –वैशेषिक)* , बनारस : मोतीलाल बनारसीदास पब्लिशर्स , १९५३ .

- शुक्ल, बलिराम, *नव्यन्याय के पारिभाषिक पदार्थ(प्रथम खण्ड),* पुणे : योग एन्टरप्राईजेस,१९२०.
- ------------,*अनुमान प्रमाण (प्राचीन न्याय-वैशेषिक,बौद्धन्याय,जैनन्याय तथा नव्यन्याय पर आधारित ),* दिल्ली : ईस्टर्न बुक लिंकर्स, १९८६.
- सिंह, उदयनारायण, *न्यायदर्शनम्,* दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान
- सिंह, बद्रीनाथ, *वैशेषिकदर्शन : तुलनात्मक अध्ययन,* वाराणसी : आशा प्रकाशन,१९७९.
- हिरियन्ना एम. , *भारतीय दर्शन की रूपरेखा* , दिल्ली : राजकमल प्रकाशन ,१९६९.
- त्रिपाठी, हरेराम, *हेत्वाभास विमर्श*, कुशीनगर : राजविनय प्रकाशन, १९९५
- Bhaduri , S.N., *Studies in Nyaya-Vaisheshika Metaphysics*, Poona : Bhandarkar Oriental Series , No. 5, 1947.
- Dasgupta, S.N., *History of Indian Philosophy (5 Vols.)*, New Delhi : Motilal BanarasiDas , 1975.
- Gaur,Vibha,*The Navya-Nyaya Logic,* Delhi : Bharatiya Vidya Prakashan,1990.
- Guha, Dinesh Chandra, *Navya nyaya system of logic*, Varanasi : Bharatiya Vidya Prakashan, 1968.
- Ingalls,D.H.H.,*Materials for the study of Navya -Nyāya Lo gic*, HarvardOriental Series 40, Cambridge, Mass.: Harvard University Press, 1951.

- Jha, Ujjwala, *A Primer of Navya Nyaya Language and Methodology,* Kolkata : The Asiatic Society,2004.
- Raja, K.kunjunni, *New catalogas catalogoram ( An alphabetical register of Sanskrit and allied works and authors, volume-8 ),*Mdras : university

  of madras,1974.
- Sharma, Candradhar, *A critical survey of Indian philosophy*,Delhi : Motilal banarsidas publishers private limited.
- Vidyabhooshan, S.C., *History of Indian logic*, Delhi : Motilal banarsidas publishers private limited,2002.

- **शोध-पत्रिकाः -**

- उपाध्याय, वाचस्पति, *शोधप्रभा,* दिल्ली : श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

- **शोधप्रबन्धाः –**

- स्नेही ,सत्यमुदिता*, तर्कसंग्रह का आरेखीय एवं गणितीय प्रस्तुतिकरण(नव्यन्याय भाषा के आलोक में),* जवाहरलाल नेहरू विश्वविद्यालय,दिल्ली, (लघुशोध-प्रबन्ध),२००९.
- परनामी, भूपेन्द्र सिंह ,तर्कप्रकाशिनी *(*तर्कसंग्रह की अप्रकाशितटीका*)* का समालोचनात्मक अध्ययन , जवाहरलाल नेहरू विश्वविद्यालय,दिल्ली, (लघुशोध-प्रबन्धः), २००७.

- **कोशग्रन्थाः –**

- अवस्थी, बच्चू लाल, *भारतीय दर्शन बृहत्कोश* , दिल्ली : शारदा पब्लिशिंग हाऊस,२००५.
- आप्टे, वामन शिवराम, *संस्कृत-हिन्दी-कोश*, वाराणसी : चौखम्बा विद्याभवन,२०१४.
- झलकीकर, भीमाचार्य, *न्यायकोशः*, सं०- महामहोइपाध्याय वसुदेव शास्त्री अभ्यंकर वाराणसी : चौखम्बा सुरभारती प्रकाशन,२०१५.
- राजाकान्तदेव, *शब्दकल्पद्रुम*, दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्,२००२.
- रामचन्द्र वर्मा, *मानक हिन्दी कोश* , प्रयाग : हिन्दी साहित्य सम्मेलन, १९६४.
- वर्णेकर, श्रीधर भास्कर, *संस्कृत वाङ्मय कोष* (२ खण्ड),इलाहाबाद : लोकभारती प्रकाशन ,२००१.
- वाचस्पति, तारानाथ, *वाचस्पत्यम्*, दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्,२००२.
- सिंहः, अमरः, *अमरकोषः (भाषा टीका)*, सं०-श्रीमन्नालाल 'अभिमन्यु' एम.ए.,वाराणसी : चौखम्बा विद्याभवन,२०१५.
- *संस्कृत शब्दार्थ कौस्तुभ*, सं. - द्वारिकाप्रसाद शर्मा, तारणीश झा, रामनारायणलाल बेनीप्रसाद, इलाहाबाद : १९७३.
- *शब्दकल्पद्रुमः, (पाँच भाग)*, वाराणसी : चौखम्बा संस्कृत ग्रन्थमाला , ग्रन्थ संख्या ९३, १९६७.
- Jhalkikar, Bhimacarya, *Nyāyakoṣa or A Dictionary of the Technical Terms in Indian Philosophy*,(Bombay Sanskrit Series 49), Bombay: Government Central Book Depot, 1893.

- Potter, Karl H. , *Encyclopedia of Indian Philosophies*, vol- 1-2 , VaraNasi : Moti lal banarasi das,1995.

- **अन्तर्जालस्रोतांसि –**

- http://www.bharat discovery.org.in
- http://www.hi.wikipedia.org.in
- http://www.sa.wikipedia.org/wiki
- http://www.hindupedia.com/en/Darsana
- http://www.worldcat.ac.in